साचिव्यं स्मरसाम्राज्ये, किमस्य मयि गर्जति ? । इतीवाम्युन्नतिं प्राप्य, पयोदः पिदधे विधुम् ॥ ३३ ॥
खेदविस्फारसूत्कारा, दुर्दिनश्यामलद्युतः । पान्थाश्चरन्तः पङ्कान्तर्भेजिरे गूढपादताम् ॥ ३४ ॥
पान्थानां गच्छतामग्रे, प्राणद्रव्योत्तमर्णकैः । नद्यो गतिनिषेधाज्ञारेखा इव कृता घनैः ॥ ३५ ॥
चापमारोप्य पान्थेषु, स्मराज्ञाभङ्गकारिषु । वीराः पयोमुचोऽमुञ्चन्, धारा नाराचदुर्दिनम् ॥ ३६ ॥
दुर्गाहैर्वाहिनीवाहैः, पथिभिः पङ्कसङ्कुलैः । धारासारैरतिस्फारैः, क्रमोऽप्यजनि योजनम् ॥ ३७ ॥
कष्टं दृष्ट्वाऽथ सार्थस्य, ततः सार्थपतिर्धनः । सौस्थ्येनावासितस्तस्थौ, तत्रोच्चैरटवीतटे ॥ ३८ ॥
स्थिते सार्थपतौ तत्र, जनानां सार्थवासिनाम् । पाथेयानि त्रुटन्ति स्म, कियद्भिरपि वासरैः ॥ ३९ ॥
अथ सार्थस्तपस्वीव, प्रविष्टः कष्टसङ्कटे । कन्द-मूल-फलप्रायैर्वृत्तिं कर्तुं प्रचक्रमे ॥ ४० ॥
सार्थवाहस्तथा स्पष्टमाश्लिष्टश्चिन्तया तया । ईर्ष्ययेव यथा तस्मान्निद्रया विद्रुतं द्रुतम् ॥ ४१ ॥
यामिन्याः पश्चिमे यामे, शुश्रावाथ श्रुतिप्रियम् । असौ परस्परालापं, मन्दुरा-यामपालयोः ॥ ४२ ॥
तावत् परोपकारित्वमस्य लोकस्य दृश्यते । यावद् दुःसमयच्छद्मा, निकषो निकषा नहि ॥ ४३ ॥
यथा यथा पुनः कालः, करालोऽयं विजृम्भते । तथा तथाऽयं नः स्वामी, प्रतिपन्नेऽतिनिश्चलः ॥ ४४ ॥
परितः प्रसरन्त्येताः, पयोदचयवीचयः । प्रतिपन्नार्थशूरस्य, प्रभोरस्य च कीर्त्तयः ॥ ४५ ॥
संलापमेतयोः श्रुत्वा, सर्वं श्रुतवतांवरः । चित्ते सञ्चिन्तयामास, स चिद्रूपशिरोमणिः ॥ ४६ ॥
ध्रुवमाभ्यामुपालम्भं, लम्भितोऽस्मि स्तुतिच्छलात् । यदीदृशि मया कष्टसङ्कटे पातितो जनः ॥ ४७ ॥
अथ सञ्चिन्तयन् सार्थे, सार्थेशः स सुखा-ऽसुखे । सस्मार धर्मघोषाख्यमुनेर्विमलमानसः ॥ ४८ ॥
अप्रासुकीकृतं धन्याः, पयोऽपि न पिबन्ति ये । कथं तेषां मुनीन्द्राणां, प्राणयात्रा भविष्यति ? ॥ ४९ ॥
अहो ! मे मन्दभाग्यस्य, तथा निश्चेतनं मनः । यथा कथाऽपि साधूनां, नाकारि सहचारिणाम् ॥ ५० ॥
अत्रान्तरे पपाठोच्चैर्बहिर्मङ्गलपाठकः । उदयानुगतं भानोः, प्रातःसुप्रातमङ्गलम् ॥ ५१ ॥
रुद्धोऽपि मेघैः सार्थेश !, भवानिव विभाविभुः । असुंञ्चन्नयमुत्साहमुपकारार्थमुद्ययौ ॥ ५२ ॥
अथ प्राभातिकं कृत्यं, विधाय विधिवद् धनः । माणिभद्राभिधं मित्रं, पप्रच्छ जनवत्सलः ॥ ५३ ॥
धर्मघोषः प्रभुः कुत्र, कथं वा मित्र ! वर्तते ? । यदहो ! सुबहोः कालादद्य मे स्मृतिमागतः ॥ ५४ ॥
तेनाथ कथिते तेषामाश्रमे समुपागतः । गुरूंश्च तत्पुरस्तार्च्चं, स हृष्टो दृष्टवान् मुनीन् ॥ ५५ ॥

---

१ °धाय, रेखा° खंता० ॥ २ °र्थपतिस्तत्र, प्रवि° खंता० ॥ ३ °ङ्कटम् खंता० पाता० ॥
४ °र्थवीरस्य, खंता० ॥ ५ °तयोः सर्वं, श्रुत्वा श्रुत° खंता० पाता० ॥ ६ °षस्य, मुने° खंता० ॥
७ °मुचन्न° पाता० ॥ ८ °श्च, सुहृ° खंता० ॥

कायोत्सर्गस्थितान् काँश्चिदितरान् ध्यानबन्धुरान् । स्वाध्यायधन्यानन्यॉस्तु, प्रत्युपेक्षापरान् परान् ॥ ५६ ॥
स प्रणम्य क्रमादेतान्, धर्म्यकर्मसु कर्मठान् । गुरोः पुरस्तादासीनः, कृताञ्जलिरदोऽवदत् ॥ ५७ ॥
॥ युग्मम् ॥
समायाताः स्थ सार्थेऽस्मिन्, वचनैर्मम निर्ममाः ! । चक्रे मया न चिन्ताऽपि, सन्तापि हृदयं ततः ॥ ५८ ॥
महामोहस्य माहात्म्यात्, तदिदं स्खलितं मम । सर्वं क्षन्तव्यमव्यग्रमतिभिर्मुनिपुङ्गवैः ॥ ५९ ॥
अथो गुरुरभाषिष्ट, कष्टमेतन्मुधैव ते । सार्थाधीश ! किमस्माकं, न हितं विहितं त्वया ? ॥ ६० ॥
संसार इव दुर्लङ्घे, कान्तारेऽस्मिन् महामते ! । भवता दुष्टकर्मभ्यो, दस्युभ्यो रक्षिता वयम् ॥ ६१ ॥
मुनीनामन्न-पानादि, सर्वमेते यथोचितम् । सार्थवाह ! प्रयच्छन्ति, सार्थिकास्ते निरन्तरम् ॥ ६२ ॥
धनोऽप्यूचे गुणमयं, मन्यन्ते गुणिनो जगत् । वसुधा हि सुधाभानोः, सुधाधौतेव भासते ॥ ६३ ॥
तत् कल्पनीयमाहारमिदानीं दित्सुरस्म्यहम् । मुनीन् प्रेषयताऽऽवासं, प्रति सद्यः प्रसद्य मे ॥ ६४ ॥
वर्तमानेन योगेनेत्युक्ते भगवताऽथ सः । प्राप्तः स्वावासमासन्नबोधिः शोधितमानसः ॥ ६५ ॥
गुरोरथ समादेशाद्, गृहायातं मुनिद्वयम् । कल्प्यान्तरस्याभावेन, स स्वभावेन शुद्धधीः ॥ ६६ ॥
श्रद्धया ग्राहयामास, सर्पिरुत्सर्पिवासनः । सङ्ख्यातीतगुणं बोधिबीजं प्राप्येव निर्वृतः ॥ ६७ ॥ युग्मम् ॥
धर्मलाभोऽस्त्विति स्पष्टमिष्टमाशीर्वचो मुनी । दत्त्वा धनाय नम्राय, जग्मतुर्गुरुसन्निधौ ॥ ६८ ॥
अथाह्रायापराह्णेऽपि, धनोऽपूर्णमनोरथः । गुरुपादान्तिकं प्राप, निन्दन्नात्मानमात्मना ॥ ६९ ॥
अथारेभे मुनीन्द्रेण, देशना क्लेशनाशनी । त्वं नात्मनिन्दया दुःखं, महात्मन् ! कर्तुमर्हसि ॥ ७० ॥
स्वार्थीकृतपरार्थेन, चरितेनामुना भवान् । लोकोत्तरश्रियां नूनं, भविष्यति निकेतनम् ॥ ७१ ॥
महात्मनां ह्ययं पन्थाः, क्षुण्णः पुण्यात्मभिर्नृभिः । यत् परप्रीणनं नाम, प्राणैरपि धनैरपि ॥ ७२ ॥
अस्मिन्नर्थे कथं सार्थवाह ! विश्वैकपावन ! । अभयङ्करभूभर्तुर्न श्रुतं चरिताद्भुतम् ? ॥ ७३ ॥

## अभयङ्करनृपचरितम्

यथाऽपरविदेहेषु, विद्यते भूविभूषणम् । विजये पुष्कलावत्यां, नगरी पुण्डरीकिणी ॥ ७४ ॥
तस्यां विश्राणितक्षोणिक्षेमः क्षेमङ्करो नृपः । तस्य चाऽमरसेनेति, बभूव प्राणवल्लभा ॥ ७५ ॥
अर्धरात्रेऽन्यदा देवी, लग्ने सर्वग्रहेक्षिते । चतुर्दशमहास्वप्नसूचिताद्भुतवैभवम् ॥ ७६ ॥
देवपूजा-दया-दान-दीनोद्धारादिदोहदैः । प्रकाशितगुणग्रामं, सुतरत्नमसूत सा ॥ ७७ ॥ युग्मम् ॥
पिता हर्षप्रकर्षेण, कृताद्भुतमहोत्सवः । अभयङ्कर इत्यस्य, समये चाभिधां व्यधात् ॥ ७८ ॥
वर्द्धमानः क्रमात् पर्वशर्वरीरमणोपमाम् । लेभे कुमारः कलयन्, सकलः सकलाः कलाः ॥ ७९ ॥
निद्राविरामे भूपालतनयोऽपश्यदन्यदा । आत्मानं काननस्यान्तः, पश्चिमप्रहरे निशः ॥ ८० ॥
न तत् पुरं न तद् गेहं, न स लोको न सा रसा । अदृष्टपूर्वः सर्वोऽयं, प्रदेशः प्रतिभाति मे ॥ ८१ ॥

---

१ दुर्लङ्घये, का° खंता० पाता० ॥ २ सार्थाधीश ! प्रय° खंता० ॥ ३ °न्निधिम्° खंता० पाता० ॥
४ °नोद्धरणदो° खंता० ॥ ५ निशि खंता० ॥

किमिन्द्रजालं ?, किं स्वप्नः ?, किं वाऽयं विभ्रमो मम ? । इत्यनल्पैर्विकल्पौघैस्तस्य दोलायितं मनः ॥ ८२ ॥
॥ युग्मम् ॥

अत्रान्तरे विनीतात्मा, दिव्यरूपधरः पुरः । गिरं शुचिस्मितां कश्चित्, कुमारं प्रत्यभाषत ॥ ८३ ॥
विस्मयं धीर ! मा कार्षीस्त्वं मयाऽपहृतोऽसि यत् । ज्ञाताऽसि तु स्वयं मातरपहारस्य कारणम् ॥ ८४ ॥
इति श्रुत्वा कुमारोऽपि, यावद् वदति किञ्चन । भेजे तावददृश्यत्वं, स दिव्यपुरुषः क्षणात् ॥ ८५ ॥
किमेतदिति तस्याथ, विस्मयस्मितचेतसः । तथैवावस्थितस्याप, क्षणेन क्षणदा क्षयम् ॥ ८६ ॥
अथोत्थाय कुमारोऽसौ, कौतुकोत्तानमानसः । वनं विलोकयामास, हर्षसोत्कर्षलोचनः ॥ ८७ ॥
वनं स मेने सच्छायवृक्षच्छन्नदिगन्तरम् । भयादिव दिवा भानोः, पिण्डीभूय स्थितं तमः ॥ ८८ ॥
स्थूलस्थुलतुलैः शैलैस्तनिकाकारनिर्झरैः । स्कन्धावारः स्मरस्येव, जहारास्य वनं मनः ॥ ८९ ॥
तद् वनं स्ववधूमुक्तकुञ्जपुञ्जं विलोकयन् । स मानसं सरोऽपश्यदात्ममानसनिर्मलम् ॥ ९० ॥
कुमारः कनकाम्भोजैर्भूषितं वीक्ष्य तत् सरः । दिग्वधूदर्पणं मेने, सङ्क्रान्तवदनाम्बुजम् ॥ ९१ ॥
अथास्य सरसो नीरे, समीरेरितवारिजे । उचितां शुचितां कृत्वा, बभ्राम विपिने पुनः ॥ ९२ ॥
अथाग्रतो गतो भूपनन्दनो वन्दनोचितम् । दर्शनीयं ददर्शोच्चैर्मठं कञ्चन काञ्चनम् ॥ ९३ ॥
उद्दामविस्मया-ऽऽनन्ददत्तहस्तावलम्बनः । कुमारोऽथ समारोहत्, तस्य प्रथमभूमिकाम् ॥ ९४ ॥
विलोकयन्नयं तस्य, मठस्य रमणीयताम् । क्रमेणोपरि भूभागमाप निष्पापमानसः ॥ ९५ ॥
अथ तत्र स्थितं कञ्चिद्, दिव्याकृतिधरं पुरः । योगपट्टपरीताङ्गमक्षसूत्रपवित्रितम् ॥ ९६ ॥
पश्यन्तमन्तरात्मानं, विनिवारितमारुतम् । असौ योगीन्द्रमद्राक्षीत्, साक्षाद् योगमिवाङ्गिनम् ॥ ९७ ॥
॥ युग्मम् ॥

प्रणम्याग्रे निविष्टेऽस्मिन्, समाधिमवधूय सः । ऊचे मधुमुचं वाचं, वाचंयमचमूपतिः ॥ ९८ ॥
स्वागतं भवतः श्रीमन् !, राजपुत्राऽभयङ्कर ! । मया त्वमत्रानीतोऽसि, विनीत ! हितहेतवे ॥ ९९ ॥
सोऽप्यूचे स्वागतं तात !, त्वयि दृष्टे ममाधुना । यत् पुण्यं जन्मिनां जन्म, दर्शनेन महात्मनाम् ॥ १०० ॥
इत्थं वदत एवास्य, कुमारस्य क्षणादयम् । विधिवद् विदधे ध्यानमानन्दैकमना मुनिः ॥ १०१ ॥
अथाम्बरपथेनैव, भास्वरस्वर्णभाजना । आगान्मर्त्येष्वसम्भाव्या, भव्या रसवती पुरः ॥ १०२ ॥
जगाद योगी राजेन्दुनन्दनं तदनन्तरम् । अतिथिस्त्वं ममाद्यासि, कुमार ! कुरु भोजनम् ॥ १०३ ॥
अथ स्वर्णमयं स्थालं, स्वयमेव पुरोऽभवत् । यथेष्टभोज्यसम्पूर्णमेकैकमुभयोस्तयोः ॥ १०४ ॥
कृतभोजनयोर्जज्ञे, करकः पुरतोऽम्बरे । तेन प्रदत्ताचमनावुभावप्युत्थितौ ततः ॥ १०५ ॥
अथ हुङ्कारमात्रेण, योगिनोऽस्य महात्मनः । यथाऽऽयातं तथा यातं, रसवत्या तया पुनः ॥ १०६ ॥
चन्दना-ऽगुरु-कर्पूरपूरसौरभसम्भृतम् । ताम्बूलमुभयोः पाणौ, कुतोऽप्युपनतं स्वयम् ॥ १०७ ॥
अथो यथोचिते स्थाने, सुखविश्रान्तयोस्तयोः । अयत्नोपनतं वेणु-वीणादिध्वनिबन्धुरम् ॥ १०८ ॥
स्थान-मान-यति-ग्राम-लयत्रयपवित्रितम् । तदा तत्राभवद् दिव्यं, सङ्गीतं प्रीणितश्रुति ॥ १०९ ॥
॥ युग्मम् ॥

इत्थं विनोदसन्दोहैस्तस्यापहृतचेतसः । ययौ निदाघदीर्घोऽपि, निमेष इव वासरः ॥ ११० ॥

---

१ °लस्थलच्छलैः खंता०॥ २ °रसस्तीरे, खंता०॥

तेजश्छटासटे याते, तदा देशान्तरं हरौ । भ्रान्तैरिभनिभैर्ध्वान्तैर्नभःकाननमानशे ॥ १११ ॥
तमःकञ्चुकमाच्छिद्य, करैरुज्ज्वलयन् मुखम् । निशाकृशाङ्ग्याः प्राणेशो, दूरदेशादुपागमत्[1] ॥ ११२ ॥
अथ पृथ्वीपतेः पुत्रः, पवित्रस्तेन योगिना । जगदेकमहाबाहुर्जगदे मुदितात्मना ॥ ११३ ॥
सन्ति मे शतशो विद्या, निरवद्या नृपात्मज ! । तासामथ यथापात्रं, क्वचित् काश्चिन्नियोजिताः ॥ ११४ ॥
परमद्यापि विद्याऽस्ति, खड्गसिद्धिनिबन्धनम् । ममैका साऽनुरूपस्य, पात्रस्याभावतः स्थिता ॥ ११५ ॥
एतस्याः सिद्धविद्यायाः, स्मरणेन रणे नरः । भवेदपि परोलक्षविपक्षविजयक्षमः ॥ ११६ ॥
यद्यपि प्राप्य यो विद्यां, कयाचिदपि शङ्कया । नियोजयति नान्यत्र, स विद्यावधपातकी ॥ ११७ ॥
तथापि तस्याः सत्पात्रं, प्राप्नोति न यदा नरः । तदा श्रेयस्तमो मन्ये, निराम्नायः किल क्षयः ॥ ११८ ॥
॥ युग्मम्[2] ॥
असङ्क्रामितविद्यस्य, मम स्यादधमर्णता । असत्पात्रे तु विन्यासो, विद्याविप्लवकारणम् ॥ ११९ ॥
आयुश्च स्वल्पमेवैतदितो व्याघ्र इतस्तटी । इति कर्तव्यतामूढमानसो यावदस्म्यहम् ॥ १२० ॥
तावद् विधेयमागत्य, स्वयमेव पुरो मम । चिन्तां त्वं वत्स ! मा कार्षीरित्यवोचत सादरम् ॥ १२१ ॥
अद्य प्रातर्गुणग्रामरामणीयकमन्दिरम् । समानेष्यामि सत्पात्रभूतं कमपि पूरुषम् ॥ १२२ ॥
त्रैलोक्यमण्डनप्राये, तस्मिन् मां पुरुषाद्भुते । सम्यग् विन्यस्य सन्न्यस्य, शरीरं त्वं सुखी भव ॥ १२३ ॥
अथैतया त्वमानीतः, प्रेषितान्निजचेटकात् । प्रतिपद्यस्व तद् विद्यामित्युक्ते सोऽप्यदोऽवदत् ॥ १२४ ॥
एतावतैव धन्योऽस्मि, दृष्टवान् यत् तव क्रमौ । तद् विद्यया किमद्यापि, कृत्यं सद्विद्य ! विद्यते ? ॥ १२५ ॥
सिद्धिसौधाग्रसोपानं, श्रीवशीकारकारणम् । कल्याणसम्पदादर्शो, दर्शनं हि महात्मनाम् ॥ १२६ ॥
योगीन्द्रोऽप्यब्रवीद् भद्र !, जगद्भद्रङ्करश्रियः । भवन्ति हि भवादृक्षाः, कल्पवृक्षा इव क्षितौ ॥ १२७ ॥
परं तथाऽपि मे विद्यां, गृहाणानुगृहाण माम् । ऋणं गुरोर्मयि च्छिन्दन्नुपकारपरो भव ॥ १२८ ॥
इत्युक्त्वा खड्गसिद्धिं तां, दत्त्वा सत्त्वानुरञ्जितः । योगीन्द्रः प्रापयामास, कुमारं पितुरन्तिके ॥ १२९ ॥
अथाकस्मान्नृपो दृष्ट्वा, तं समायातमात्मजम्[3] । नगरं कारयामास, महोत्सवमयं तदा ॥ १३० ॥
पृथ्वीनाथेन पूर्वेषामथ प्रस्थास्नुना पथि । कुमारो राज्यदानार्थमर्थितोऽस्त्यर्थमब्रवीत् ॥ १३१ ॥
गृह्णामि नाहं साम्राज्यं, तात ! पातकपोतकम्[4] । कर्तुमभ्युत्सहे किन्तु, त्वत्सेवामेव केवलम् ॥ १३२ ॥
यातस्तातामतः पद्भ्यां, प्रियाः प्रस्वेदबिन्दवः । न तु मे त्वद्विमुक्तस्य, मौलौ मुक्ताफलस्रजः ॥ १३३ ॥
अनिच्छतोऽप्यथैतस्य, क्षेमङ्करनरेश्वरः । अर्पयामास साम्राज्यमभिषेकपुरःसरम् ॥ १३४ ॥
अथ क्षेमङ्करः क्ष्माभृद्, दक्षो दीक्षामुपाददे । अभयङ्करभूपालः, पालयामास तु क्षितिम् ॥ १३५ ॥
राज्यभारधुरं बिभ्रन्, न्यायधर्मधुरन्धरः । अयमानन्दयामास, प्रजा इव निजाः प्रजाः ॥ १३६ ॥
तस्य कल्पद्रुमस्येव, सर्वतोऽप्युपकुर्वतः । दिशोऽधिवासयामास, यशःकुसुमसौरभम् ॥ १३७ ॥
अथान्यदाऽस्य भूभर्तुर्धर्मासनमुपेयुषः । सदःसदनमभ्येत्य, प्रतीहारो व्यजिज्ञपत् ॥ १३८ ॥
'प्रभो ! पुष्पपुरस्वामी, नृसिंहः सिंहविक्रमः । बहिः स्वल्पपरीवारो, देवपादान् दिदृक्षते ॥ १३९ ॥
'अथ भूभर्तुरादेशात्, प्रावेशयदसौ नृपम् । सोऽप्यासन्नासनासीनः, सप्रश्रयमदोऽवदत् ॥ १४० ॥

---

१ °शादथाऽऽगमत् खंता० पाता० ॥ २ वता० पाता० युग्मम् इति नास्ति ॥ ३ °मागत° खंता० पाता० ॥ ४ °पातुकम् पाता० ॥

दुःखघर्मोपतप्तस्य, जगतो जीवनं द्वयम् । पुष्करावर्तमेघो वा, सज्जनो वाऽद्भुतोदयः ॥ १४१ ॥
श्रितोऽस्मि त्वां जगन्मित्रं, तज्जीवितमहीतलम् । विपक्षेण क्षयं नीतः, शीतद्युतिरिवारुणम् ॥ १४२ ॥
तगरानगरीशेन, यतोऽकारणवैरिणा । विगृह्य जगृहे राज्यं, बलिना च्छलिना च मे ॥ १४३ ॥
तत्खड्गविद्यादानादित्वदवष्टम्भवैभवात् । यथा श्रियं श्रयामि त्वां, पृथ्वीनाथ ! तथा कुरु ॥ १४४ ॥
इति विज्ञापितो राजा, प्रतिश्रुत्य तथैव तत् । प्राहिणोत् प्रतिहारेण, सहितं स्वागताय तम् ॥ १४५ ॥
अथोचे सुमतिर्मन्त्री, स्वच्छ ! स्वच्छन्दचारिता । वारिता नीतिशास्त्रेषु, कथमाद्रियते त्वया ? ॥ १४६ ॥
अस्मै साहाय्यकामाय, सिद्धिर्दातुं न बुध्यते । आरामिकः किमारामं, दत्ते पुष्प-फलार्थिनाम् ? ॥ १४७ ॥
चतुरङ्गचमू-देश-कोशप्रभृतिभिः प्रभो ! । स्वगृहाङ्गणमायातं, तत् कृतार्थय पार्थिवम् ॥ १४८ ॥
भूपोऽभ्यधत्त मन्त्रीश !, समीचीनमिदं वचः । किन्तु वन्ध्याः कला यासां, न परोपकृतिः फलम् ॥ १४९ ॥
जायन्ते जन्तवः कुक्षिम्भरयो भूरयो न किम् ? । परार्थाः सिद्धयो यस्य, स जातः स च जीवति ॥ १५० ॥
पात्रे हि योजिता विद्या, क्षेत्रे चारोपिता लता । मनोरथपथातीतं, प्रसूते फलमद्भुतम् ॥ १५१ ॥
कामं कलासमृद्धोऽस्तु, सगर्वः शर्वरीवरः[2] । क्षीणोऽपि पूज्यते किन्तु, कलाभिः प्रीणितामरः ॥ १५२ ॥
इति सम्बोध्य मन्त्रीशं, मुहूर्ते शुभशंसिनि । खड्गसिद्धिं ददौ तस्मै, नृसिंहाय महीभुजे ॥ १५३ ॥
कृतसाहायकः सैन्यैरदैन्यैः सिद्धवैभवः । सोऽजैषीत् सङ्गरोत्सङ्गे, तगरानगरीश्वरम् ॥ १५४ ॥
क्षीणशक्तित्रयः सोऽपि, नृसिंहहृतवैभवः । व्यभावयदहो ! दैवं, नैवं मे हृदयेऽप्यभूत् ॥ १५५ ॥
भ्रष्टराज्यद्वयः सोऽहं, दुःस्थावस्थः करोमि किम् ? । अथवा यस्य साहाय्यादनेनौर्जित्यमर्जितम् ॥ १५६ ॥
अभयङ्करभूपालं, तमनुप्रविशाम्यहम् । येन स्याद् वह्निदग्धानां, वह्निरेव महौषधम् ॥ १५७ ॥युग्मम्॥
विपश्चिदिति निश्चित्य, नगरीं पुण्डरीकिणीम् । आगत्य नत्वा भूमीशं, समयज्ञो व्यजिज्ञपत् ॥ १५८ ॥
देव ! त्वमेव नाम्नाऽपि, कर्मणाऽप्यभयङ्करः । नाममात्रेण कीटोऽपि, वर्ण्यते त्विन्द्रगोपकः ॥ १५९ ॥
स्युर्यस्मिन्नर्थिसार्थस्य, फलवन्तो मनोरथाः । तेनैव नररत्नेन, रत्नगर्भेति भूरभूत् ॥ १६० ॥
तदेवं देव ! नावद्यं, विद्यते त्वयि किञ्चन । परं तथापि वाल्लभ्यात्, त्वमुपालभ्यसे मया ॥ १६१ ॥
अहं हि तगरापुर्या, नृपतिर्घनवाहनः । हृतराज्यो नृसिंहेन, त्वत्प्रसादोन्मदिष्णुना ॥ १६२ ॥
कुमुदस्य श्रियं हृत्वा, निधत्ते रविरम्बुजे । इन्दुरप्युदयं प्राप्य, कुरुते तद्विपर्ययम् ॥ १६३ ॥
राज्यं तन्मे त्वयाऽऽच्छिद्य, नृसिंहाय प्रयच्छता । आत्मा लोकोत्तरः सम्प्रत्येतयोः सदृशीकृतः ॥ १६४ ॥
॥ युग्मम् ॥
जगदुच्छ्वासिनः सन्तस्तुल्या हि स्वा-ऽन्यपक्षयोः । नासावंशा इवोत्तुङ्गा, वाम-दक्षिणनेत्रयोः ॥ १६५ ॥
किञ्चोपकर्तुमार्तानामलङ्कर्मीणवुद्धिना । त्वादृशानां घनानां च, विदधे विधिना जनिः ॥ १६६ ॥
राजेन्द्र ! तन्ममापि त्वं, ममत्वं हृदये दधत् । राज्यश्रीभ्रंशसन्तापव्यापदं हर्तुमर्हसि ॥ १६७ ॥
अथ पृथ्वीपतिः प्राह, लज्जावनमिताननः । यन्मे दूरस्थितस्याभूत्, तत् त्वया मृष्यतामिति ॥ १६८ ॥
मदभ्यर्थनया राज्यं, देश-कोश-बलान्वितम् । मामकीनमधिष्ठाय, त्वं सखे ! सुखितो भव ॥ १६९ ॥
उक्त्वेत्यस्याभिषेकाय, यावदादिशति स्म सः । मन्त्रीशः सुमतिस्तावत्, साक्षेपमिदमब्रवीत् ॥ १७० ॥
वारं वारं विभो ! केयमनालोचितकारिता ? । प्राणैरप्यर्ज्यते राज्यं, यत् तत् त्याज्यं क्वचिद् भवेत् ? ॥ १७१ ॥

---

१ °तो जनः खंता० ॥ २ °द्धोऽपि, सगर्वः खंता० ॥

देशैकदेशो देशो वा, पादान्तिकमुपेयुषे । युक्तं यन्नृपपुत्राय, प्रेमपात्राय दीयते ॥ १७२ ॥
सकलं राज्यमुत्सृज्य, गात्रमात्रपरिच्छदः । कथं पत्नीजनस्यापि, स्वाननं दर्शयिष्यसि ? ॥ १७३ ॥
नृपतिस्तावदेवासि, यावल्लक्ष्मीरभङ्गुरा । भङ्गुरायां पुनस्तस्यां, नृपत्तिर्भवसि क्षणात् ॥ १७४ ॥
उह्यते निधनावस्थो, नरः स्कन्धेन बन्धुभिः । त्यज्यते निर्धनावस्थः, सोदरैरपि दूरतः ॥ १७५ ॥
आश्रितस्य श्रिया पुंसः, स्युर्ये लोकम्पृणा गुणाः । त एव तद्विमुक्तस्य, जगदुद्वेगहेतवः ॥ १७६ ॥
अभ्यधादथ भूमीन्दुस्त्वं लोकोचितमुचिवान् । तत्त्वस्पृशा दृशा किन्तु, सचिवोच्चैर्विवेचय ॥ १७७ ॥
श्रियो वा स्वस्य वा नाशे, येनावश्यं विनश्यते । श्रीसम्बन्धे बुधाः स्थैर्यबुद्धिं बध्नन्तु तत्र किम् ? ॥ १७८ ॥
अहमस्याः पतिः सेयं, ममैवेत्यभिमानिनः । भुवा भोगार्थिनः के वा, वेश्ययेव न वञ्चिताः ? ॥ १७९ ॥
पत्रपात्रीव धात्रीयं, भुक्त्वा त्यक्ता महात्मभिः । विगृह्य गृह्यते लुब्धैः, कुक्कुरैरिव ठक्कुरैः ॥ १८० ॥
यः श्रियं सुकृतकीर्तौ, सुपात्रे नैव निक्षिपेत् । विदुषोऽप्यस्य सोत्कर्षा, कर्षुकादपि मूर्खता ॥ १८१ ॥
वर्धयेद्धान्यवीजं हि, क्षेत्रे निक्षिप्य कर्षुकः । निधाय न पुनर्गेहे, मूलनाशं विनाशयेत् ॥ १८२ ॥
पुंसस्तस्य वटस्येव, विटस्येव च वैभवम् । निःश्वस्य गम्यते यस्मादकृतार्थैः फलार्थिभिः ॥ १८३ ॥
भाग्यैरावर्जितैर्लक्ष्मीस्त्यक्ताऽप्यभ्येति[1] वेश्मनि । गृहादपि बहिर्याति, तैरनावर्जितैः पुनः ॥ १८४ ॥
राज्यभूमीरुहो मूलं, श्रीवशीकारकार्मणम् । भाग्यमावर्जयन्तं मां, तन्मन्त्रिन् ! मा निवारय ॥ १८५ ॥
प्रतिबोध्येति मन्त्रीशं, धात्रीशो[2] मेघवाहनम् । भद्रपीठे प्रतिष्ठाप्य, प्रसभादभ्यषिञ्चत ॥ १८६ ॥
तस्मै राज्यश्रियं यच्छन्, धन्यां कन्यामिवात्मनः । देशं कोशं च सैन्यं च, सर्वमूर्वीपतिर्ददौ ॥ १८७ ॥
अभयङ्करदेवस्य, लोकमेकाग्रमानसः । आरादाराधयामास, सुतवन्मेघवाहनः[3] ॥ १८८ ॥
अथाऽभयङ्करक्ष्मापस्तमापृच्छय बलादपि । कृतानुगमनान् पौरा-ऽमात्यादीन् विनिवर्त्य च ॥ १८९ ॥
विहाय वाहनश्रेणिमपि विश्राणितां स्वयम् । सत्पात्रदत्तसर्वस्वमात्मानमनुमोदयन् ॥ १९० ॥
एकोऽप्यद्भुतमाहात्म्यात्, परिवारैरिवावृतः । पाणौ कृपाणं बिभ्राणः, प्रतस्थे तीर्थकौतुकी ॥ १९१ ॥
॥ विशेषकम् ॥

यामिन्यामन्यदा धीमानन्तःकान्तारगह्वरम् । शुश्राव करुणध्वानमध्वानमतिलङ्घयन् ॥ १९२ ॥
ध्वनेस्तस्यानुसारेण, करुणाञ्चितचेतनः । स विवेश विशामीशः, सत्वरं गिरिगह्वरम् ॥ १९३ ॥
तस्मिन् गुरुगुहागर्भव्यापारितविलोचनः । अपश्यन्मण्डलं कुण्डप्रज्वलज्ज्वलनोज्ज्वलम् ॥ १९४ ॥
तदन्तिकनिषण्णां च, वनितां नवयौवनाम् । शापादिव दिवः स्रस्तां, पुरन्दरपुरश्रियम् ॥ १९५ ॥
जानुयुग्मान्तरन्यस्तव्यस्तालकमुखाम्बुजाम् । भय-शोकातिरेकेण, तनूकृततनुद्युतिम् ॥ १९६ ॥
योगिनोद्यतखड्गेन, वीक्षितां क्रूरचक्षुषा । तनूमिव निशाभर्तुः, सैंहिकेयकटाक्षिताम् ॥ १९७ ॥
करवीरस्रजा रक्तचन्दनेन च चर्चिताम् । असौ विलोकयामास, विलपन्तीमिदं मुहुः ॥ १९८ ॥
॥ कलापकम् ॥

दुरात्मनो मुखादस्य, निषादस्य हठादपि । योऽपकर्षति मां तेन, किमु शून्या जगत्त्रयी ? ॥ १९९ ॥
अहो ! मे मन्दभाग्याया, धर्मः स भगवानयम् । जगत्त्राणप्रवीणोऽपि, विपरीतो विवर्तते ॥ २०० ॥

---

१ °क्ष्मीर्मुक्ताऽप्य° पाता० ॥ २ °शो घनवाहनम् खंता० ॥ ३ °वद् घनवाहनः खंता० ॥

प्रणिपत्य क्रमौ कर्मसाक्षिणमभ्यर्थये मुहुः । जगच्चक्षुरसि त्राता, तन्मे कश्चिद् विलोकताम् ॥ २०१ ॥
अथ विश्वोपकारैकदीक्षितः क्षितिवल्लभः । निस्त्रिंशं धृतनिस्त्रिंशं, योगीन्द्रमिदमब्रवीत् ॥ २०२ ॥
महात्मन्नद्भुतस्फूर्तिरियं मूर्तिस्तवोर्जिता[1] । साम्राज्यलक्षणैरेतैर्न ब्रूते योगिमात्रताम् ॥ २०३ ॥
इदं लोकद्वयापथ्यं, कर्म धर्मविदांवर ! । न शक्यं वक्तुमप्युच्चैस्तत् किमर्थं त्वयाऽर्थ्यते ? ॥ २०४ ॥
सन्तो ह्यपथपान्थानां, परेषां पथदेशकाः । आत्मनैव कथङ्कारं, प्रथयन्त्यपथे पदं ॥ २०५ ॥
तदस्या ननु योगीन्द्र !, जीवितव्यप्रदानतः । अतिथेर्मे समेतस्य, कर्तुमातिथ्यमर्हसि ॥ २०६ ॥
अथ कन्याशिरोदेशाद्, विनिवर्तितया दृशा । पश्यन् नरेन्द्रं योगीन्द्रः, प्राह साहसिकाग्रणीः ॥ २०७ ॥
जगत्त्रयपवित्रेण, सच्चरित्रेण[2] चामुना । श्रीपुषा वपुषा च त्वं, चक्रवर्तीव लक्ष्यसे ॥ २०८ ॥
तन्ममास्मिन्नकृत्येऽपि, प्रवृत्तेः शृणु कारणम् । विश्वासभाजनं कस्य, भवन्ति न भवादृशाः ? ॥ २०९ ॥
तुङ्गशृङ्गसमूहेन, नभः कवलयन्निव । अस्ति विस्तारवित्ताढ्यो, वैताढ्य इति पर्वतः ॥ २१० ॥
तत्राहमुत्तरश्रेणौ, विद्याधरपतेः सुतः । कुलक्रमागतां विद्यामद्भुतामपराजिताम् ॥ २११ ॥
आराधयितुमारेभे, तथा तद्ध्यानमानसः । दिनेष्वपरिपूर्णेषु[3], साक्षादेषा यथाऽभवत् ॥ २१२ ॥ युग्मम् ॥
अभाषिष्ट च तुष्टाऽस्मि, वत्स ! त्वत्सेवयाऽनया । मदाज्ञया पुनः सेवामुत्तरां कर्तुमर्हसि ॥ २१३ ॥
द्वात्रिंशल्लक्षणां नारीं, नरं वाऽद्भुतविक्रमम् । हुत्वाऽग्निकुण्डे त्वं वत्स !, वरेण्यं वृणुया वरम् ॥ २१४ ॥
अथैतदन्यथाकारं, करिष्यसि वचो मम । स्फुटिष्यति ततस्तूर्णं, मूर्धा तव सहस्रधा ॥ २१५ ॥
अन्तर्हितायां चैतस्यां, तदर्थं पृथिवीमटन् । दृष्ट्वा सिंहपुराधीशसुतामेतामिहानयम्[4] ॥ २१६ ॥
तन्महात्मंस्त्वमेतस्याः, प्राणत्राणपरायणः । सिद्धेर्मम परार्थैकनिघ्न ! किं यासि विघ्नताम् ? ॥ २१७ ॥
अस्या विवेकिन्नेकस्या, जीवितं ते समीहितम् । भूतधात्रीं[5] परित्रातुर्न पुनर्नृपतेर्मम ॥ २१८ ॥
भुवि ख्यातप्रथो वाचमथोवाच धराधवः । भद्र ! क्षुद्रधियां गच्छस्यध्वन्यध्वन्यतां कुतः ? ॥ २१९ ॥
परेषां पोष्यमात्मानं, सर्वे कुर्वन्ति जन्तवः । जगदप्यात्मनः पोष्यं, कश्चित्तु कुरुते पुमान् ॥ २२० ॥
निर्मथ्य धर्ममत्यर्थमर्थमावर्जयन्ति ये । द्रुमं समूलमुन्मूल्य, फलानि कलयन्ति ते ॥ २२१ ॥
किञ्च दृष्टं श्रुतं वाऽपि, स्त्रीवधाद् देवतार्चनम् ? । तन्मन्ये वञ्चितोऽसि त्वं, छलाद् देवतया तया ॥ २२२ ॥
अथ देव्या वचस्तथ्यं, तथाप्येषा विमुच्यताम् । हुत्वा मदीयं मूर्द्धानं, भव पूर्णमनोरथः ॥ २२३ ॥
एवं च कुर्वता स्वस्य, कन्यायाश्च ननु त्वया । परार्थसिद्धिलुब्धस्य, ममाप्युपकृतं भवेत् ॥ २२४ ॥
गिरं श्रुत्वेति गम्भीरामभयङ्करभूभुजः । योगीन्दुरवदद् दन्तद्युतिद्योतितदिङ्मुखः ॥ २२५ ॥
अप्राकृतगुणाधारस्तवाकारोऽयमद्भुतः । प्राह साहसिकप्रज्ञामवज्ञातबृहस्पतिम्[6] ॥ २२६ ॥
सौभाग्य-भाग्ययोर्गेहं, देहं त्वन्यार्थमुत्सृजन् । स्वार्थाद् भ्रष्टोऽसि दूरेण, स्वार्थभ्रंशो हि मूर्खता ॥ २२७ ॥
यदि चात्मन्ययेनैतां, वनितां त्रातुमिच्छसि । ततः सकर्ण ! स्वर्णेन, क्रेतुं रीतिं समीहसे ॥ २२८ ॥
भूपतिः प्राह भो मित्र !, तव स्नेहोचितं वचः । अन्यः कोऽपि पुनः स्वार्थः, परमार्थविदां मतः ॥ २२९ ॥
दानं धनं क्षमा शक्तिरुन्नतिर्गुरुसन्नतिः । स्वार्थः परार्थनिष्पत्तिर्मेने लोकोत्तरैर्नरैः ॥ २३० ॥

---

१ °वोचिता खंता० ॥ २ °ण, सुचरि° पाता० । °ण सचरि° खंता० ॥ ३ °नेषु परि° वंता० खंता० ॥ ४ °मेनामि° पाता० खंता० ॥ ५ °त्रीपरि° खंता० ॥ ६ °ज्ञानाव° पाता० ॥

किञ्च प्राण्युपकाराय, प्रायः कायः क्षमो न चेत्। तदनेनाधमर्णेन[1], पोषितेनाधमेन किम्? ॥ २३१ ॥
बहुविघ्नः कृतघ्नोऽयं, मुधैव यदि यास्यति। कायः परार्थे पुण्याय, किं न विक्रीयते ततः? ॥ २३२ ॥
दैवस्य वश्यः कायोऽयमवश्यं तेन गृह्यते। यदर्जितं ततः पुण्यमवैगुण्यं तदात्मनः ॥ २३३ ॥
वयस्य! यदि मे सत्यं, हिताय विहितादरः। तत् पवित्रः कृपाणोऽयं, पाणौ मम समर्प्यताम् ॥ २३४ ॥
विद्याधरकुमारोऽथ, योगिवेषधरोऽब्रवीत्। देव्या वचसि नैवास्ति, महात्मन्! मम संशयः ॥ २३५ ॥
प्राणान् जगत्त्रयत्राणप्रवीणान् मोक्तुमुत्सुकः। स्त्रीमात्रस्य कृते राजन्!, जाने मूढोऽसि सर्वथा ॥ २३६ ॥
ग्रहिलो महिलात्राणकदाग्रहपरिग्रही। नाहं त्वमिव तद् भूप!, कृपाणं न तवार्पये ॥ २३७ ॥
पृथ्वीनाथोऽप्यभाषिष्ट, सभाशिष्टमिदं वचः। निर्विचारं विचारज्ञ!, त्वद्वचः प्रतिभाति मे ॥ २३८ ॥
क्षत्रियो हि क्षतात् त्राता, प्राप्नोत्यन्वर्थनामताम्। क्षत्रियस्याङ्गजत्वेन, मल एवान्यथा भवेत् ॥ २३९ ॥
तदहं युवयोस्त्राणकृते कायममुं त्यजन्। अर्जयँश्च यशोदेहं, शाश्वतं ग्रहिलः कथम्? ॥ २४० ॥
अनिच्छतोऽप्यथैतस्य, करादाच्छिद्य भूपतिः। अन्तकभ्रुकुटीभीमं, खड्गमव्यग्रमग्रहीत् ॥ २४१ ॥
उपकारिणमासाद्य, खड्गं स्नेहस्पृशा दृशा। वीक्षाञ्चक्रे सुधावर्षैः, स नृपः स्नपयन्निव ॥ २४२ ॥
अथ निस्त्रिंशदुर्दर्शः, स्मेरवृन्दनपङ्कजः। भीषणो रमणीयश्च, तदा राजा रराज सः ॥ २४३ ॥
अथ व्यापारयामास, कृपाणं पाणिना नृपः। सादरं मुदितो मौलिकमले कमलेक्षणः ॥ २४४ ॥
दरिद्र इव सम्प्राप्य, परमान्नं सुदुर्लभम्। मुमुदे स तदा स्कन्धे, लब्ध्वा खड्गस्य सङ्गमम् ॥ २४५ ॥
रोमाङ्कुरभरैरूर्द्ध्वमुद्धुरैः[2] स तदा बभौ। अभ्युत्थानार्थमत्यर्थं, खड्गायेव समुत्थितैः ॥ २४६ ॥
अथाकस्माद् द्विषच्छेददक्षिणोऽपि न दक्षिणः। बाहुर्बभूव भूभर्तुः, खड्गव्यापारणक्षमः ॥ २४७ ॥
बाहुस्तम्भेन तेनोच्चैरन्तःसन्तापवान् नृपः। मन्त्रान्निग्रहमापन्नः, पन्नगेन्द्र इवाभवत् ॥ २४८ ॥
अथ यावदयं धीरः, कृपाणं वामपाणिना। अग्रहीत् साहसोत्साहधुरीणो धरणीधरः ॥ २४९ ॥
घर्षणोत्थाग्निदुर्द्धर्षे, कण्ठे दम्भोलिसन्निभे। मेजेऽसिः कुण्ठतां तावन्मदनेनेव निर्मितः ॥ २५० ॥

॥ युग्मम् ॥

अथ यावच्छिरश्छेत्तुं, स्वेन स्वमयमक्षमः। तदर्थं प्रार्थयामास, योगिनं जगतीपतिः ॥ २५१ ॥
जीर्णमूलद्रुवत् तावद्, वातेन क्रूरकर्मणा। शठात्मा स महीपीठे, योगीन्द्रः पुरतोऽपतत् ॥ २५२ ॥

॥ युग्मम् ॥

पृथ्वीनाथोऽप्यथाकस्मात्, किञ्चिन्मूर्च्छितचेतनः। अशृणोद् दिव्यनारीणां, हाहाकारं नभस्तले ॥२५३॥
लब्धसंज्ञश्च वर्षन्तीं, पीयूषं स्वकमण्डलोः। स्फारतारोत्करेणेव, मुक्ताहारेण हारिणीम् ॥ २५४ ॥
चन्द्रोज्ज्वलमुखी स्वच्छचन्दनस्यन्दसुन्दराम्। सेवागताभिः स्वःस्त्रीभिश्चकोरीभिरिवावृताम् ॥ २५५ ॥
नेत्रनीलोत्पलानन्दमन्दिरं[3] सुन्दराकृतिम्। ददर्श पुरतो देवीं, ज्योत्स्नामिव शरीरिणीम् ॥ २५६ ॥

॥ विशेषकम् ॥

अथो जगाद सा देवी, सैवाहमपराजिता। वत्स! त्वत्साहसेनाऽऽशु, तुष्टाऽस्मि वृणु वाञ्छितम् ॥२५७॥
अथ प्रणम्य तां राजा, रम्यतामधिकं दधत्। जगाद देवि! मे श्रेयस्तरुरद्य फलेग्रहिः ॥ २५८ ॥
यतस्त्वं मम तुष्टाऽसि, शिरश्छेदार्थमर्थिनः। तदिदं प्रार्थये मातः!, प्रसादः क्रियतां मयि ॥२५९॥

---

१ °न, मम स्यादधमर्णता खंता० ॥ २ °भरै रूद्धमुद्धु° पाता० ॥ ३ °न्दिरां सु° खंता० ॥

बाहुस्तम्भे तथा स्तम्भं, निशुम्भय भयापहे । शिरश्छेत्तुमलम्भूष्णुर्यथाऽयं जायते क्षणात् ॥ २६० ॥
एवं प्रतिज्ञानिर्वाहव्रतरक्षणतो मम । उपकारो महान् देवि !, भवेदेव न संशयः ॥ २६१ ॥
मम कार्यं न राज्येन, न धनैर्न वधूजनैः । यदि तुष्टाऽसि सत्येन, तदिदं क्रियतां त्वया ॥ २६२ ॥
नैवं चेत् कर्तुमुत्साहो, मत्साहसवशादथ । योगिनोऽस्य ततः स्पष्टमिष्टसिद्धिर्विधीयताम् ॥ २६३ ॥
अथ देवी पुनः प्राह, नाहमस्य दुरात्मनः । प्राणानपि प्रयच्छामि, दूरेऽभीष्टार्थसाधनम् ॥ २६४ ॥
अयं हि जगतीनाथ !, स्त्रीवधारम्भपातकी । भवादृशां वधादात्मसिद्धिं दुष्टः समीहते ॥ २६५ ॥
एतस्य सत्त्वपर्यन्तपरीक्षार्थं मया पुरा । अकृत्यमिदमादिष्टमपूर्णे पूर्वकर्मणि ॥ २६६ ॥
वत्स ! तत् सर्वमुत्सृज्य, मन्त्रानुष्ठानमुत्तमम् । वञ्चितोऽयं मया लोभान्निष्कृपं कर्म निर्ममे ॥ २६७ ॥
अभीरोरस्य पापेषु, लोकद्वयविरोधिनः । हीनसत्त्वस्य तत्त्वज्ञ !, कुतः सिद्धिर्भवेत्वसौ[1] ? ॥ २६८ ॥
पुंसः पद्माकरस्येव, क्षीणसत्त्वाम्बुजस्थितेः । श्रीर्वशं कथमायातु, भ्रमरीव चलाचला ? ॥ २६९ ॥
दुरात्मनस्तदेतस्य, हेतवे त्वं महीपते ! । रत्नगर्भामिमामात्मशून्यां नो कर्तुमर्हसि ॥ २७० ॥
अथापि क्रियतामेवं, परोपकृतिकर्मठ ! । यदि स्यादुपकारोऽस्य, कश्चिद् दुश्चरिताम्बुधेः ॥ २७१ ॥
निवृत्तायामथैतस्यां, रेजे भूपतिभारती । सत्क्रियानन्तरं कान्ता, सात्त्विकस्याऽऽयतिर्यथा ॥ २७२ ॥
यदेव देवि ! साध्येऽर्थे, निषेधाय त्वयोच्यते । तदेव प्रत्युतात्यर्थं, प्रवृत्तिं प्रति कारणम् ॥ २७३ ॥
ततस्त्वं मां शिरश्छेदप्रतिज्ञापूरणोद्यतम् । निवारयन्ती तुष्टाऽपि, कष्टं रुष्टाऽसि तत्त्वतः ॥ २७४ ॥
प्रसादसादरं मातः !, प्रतिज्ञातार्थवारणात् । निघ्नत्या मे यशोदेहं, किं ते सम्प्रति साम्प्रतम् ? ॥ २७५ ॥
यदि भग्नप्रतिज्ञोऽपि, जीवलोकेऽत्र जीवति । वद तद्देवि ! को नाम, मृत इत्यभिधीयताम् ? ॥ २७६ ॥
ततस्त्वं यदि तुष्टाऽसि, तत् प्रयाहि यथाऽऽगतम् । शिरश्छेदाक्षमोऽप्येष, विशाम्यग्नौ यथा स्वयम् ।२७७।
इत्युक्त्वैव समुत्तस्थौ, झम्पार्थं स विभावसौ । नहि सत्त्ववतां किञ्चिदशक्यं प्रतिभासते ॥ २७८ ॥
दृष्ट्वा सिंहपुराधीशसुताऽप्येतं तथोद्यतम् । अन्तःसञ्जातसङ्घट्टा, पृथिव्यामपतत् तदा ॥ २७९ ॥
बलादथ समाकृष्य, रभसादपराजिता । भाषते स्म मुदा स्मेरवदना मेदिनीपतिम् ॥ २८० ॥
साहसं वत्स ! मा कार्षीरहं तुष्टाऽस्मि सर्वथा । तवोपरोधात् पश्यायं, जीवितं लम्भितोऽधमः ॥ २८१ ॥
इत्युक्त्वा योगिनस्तस्य, जीवितव्यमिवाङ्गवत् । शवप्राये शरीरेऽन्तश्चिक्षेपाम्भः कमण्डलोः ॥ २८२ ॥
कुमारीमपि तामेवमभिषिच्याऽपराजिता । स्वयमुज्जीवयामास, घनलेखालतामिव ॥ २८३ ॥
अथ जीवन्तमालोक्य, कुमारी धरणीधवम् । विमर्श-विस्मयस्मेरा, मुमुदे कुमुदेक्षणा ॥ २८४ ॥
अन्तश्चित्तं प्रविष्टोऽथ[2], तदा तस्या रतेरिव । लोकोत्तरगुणः सोऽयं, पतिः सङ्कल्पजोऽभवत् ॥ २८५ ॥
तदा दध्रे धराधीशमनोऽपहरणार्थिनः । तस्या विलोकितं साचि, साचिव्यं चित्तजन्मनः ॥ २८६ ॥
अवोचत पुनर्देवी, नरेन्द्रमपराजिता । तवोपरोधात् तुष्टाऽहं, महात्मन्नस्य योगिनः ॥ २८७ ॥
सत्त्वरत्नाम्बुधेरस्य, दर्शनायैव लालसः । कर्मसाक्षी तदाऽऽरोहत्, प्राचीनाचलचूलिकाम् ॥ २८८ ॥
अत्रान्तरेऽभवद् भूरिनिःस्वानस्वनमांसलः । दिक्कुक्षिम्भरिरत्युच्चैः, कोऽपि कोलाहलो महान् ॥ २८९ ॥
ददर्शास्यानुसारेण, चक्षुर्दिक्षु क्षिपन्नयम् । क्षोणिनाथः क्षणेनाथ, पृतनां कृतिनांवरः ॥ २९० ॥
किमेतदिति विस्मेरविलोचनमथो नृपम् । सैन्यादस्मादुपागत्य, कश्चिन्नत्वा व्यजिज्ञपत् ॥ २९१ ॥

---

१ °वत्यसौ भता० ॥ २ °ष्टोऽयं, त° खंता० ॥

अस्मद्भर्तुरिदं सैन्यमरिकेशरिभूभुजः । स्वामिशून्यं प्रभावस्मिन्नपुत्रे त्रिदिवं गते ॥ २९२ ॥
आराध्य विधिवद् गोत्रदेवतामपराजिताम् । ततस्तदुपदेशेन, भवन्तमुपतिष्ठते ॥ २९३ ॥ युग्मम् ॥
राज्यश्रियस्तदेतस्या, भव त्वं वल्लभो विभो ! । रम्याऽपि हि श्रियं धत्ते, न विनेन्दुं कुमुद्वती ॥ २९४ ॥
प्रज्ञालोकाभिधानस्य, मन्त्रिणः क्रमिकस्य मे । अभ्यर्थनामिमां नाथ !, नान्यथा कर्तुमर्हसि ॥ २९५ ॥
अथो निकटवर्तिन्या, स्वयं देवतया तया । अभ्यषिच्यत राजेन्दुर्निवेश्य कनकासने ॥ २९६ ॥
तस्योत्तमाङ्गे शुशुभे, सितमातपवारणम् । पूर्वक्षोणिभृतः शृङ्गे, सितांशोरिव मण्डलम् ॥ २९७ ॥
कुमारीमपि तामस्मै, मङ्गलस्नानपूर्वकम् । दत्त्वा देवी क्षितीशाय, क्षणेनाथ तिरोदधे ॥ २९८ ॥
अथाऽरिकेशरिक्ष्मापपुरं लक्ष्मीपुराभिधम् । तया वनितया साकं, प्रविवेश विशांपतिः ॥ २९९ ॥
तल्लक्ष्मीपुरसाम्राज्यमभ्युपेत्याऽभयङ्करः । पाथोद इव पाथोधिपाथः पृथ्वीमतर्पयत् ॥ ३०० ॥
ततः सिंहपुराधीशः, स्वयमेत्य प्रमोदवान् । तामनङ्गवतीं पुत्रीं, भूभुजा पर्यणीनयत् ॥ ३०१ ॥
भूचराः खेचराश्चान्ये, कन्यादिभिरुपायनैः । भक्तिपह्वीभवच्चित्तास्तं भूभुजमपूपुजन् ॥ ३०२ ॥
विद्याधरेश्वरः सोऽपि, देवतादत्तवैभवः । सोऽपि पुष्पपुराधीशः, स चापि घनवाहनः ॥ ३०३ ॥
नृपं परेऽपि सामन्ताः, समन्तादेत्य सम्मदात् । रत्न-वाजि-गजप्रायैः, प्राभृतैरुपतस्थिरे ॥ ३०४ ॥
॥ युग्मम् ॥

अन्यदा वन्यदावाग्निप्रतापस्यास्य भूभुजः । चक्रमायुधशालायामाविरासीत् सुदुःसहम् ॥ ३०५ ॥
चक्रस्यास्य प्रभावेण, द्विगुणीकृततेजसा । अभयङ्करभूपेन, षट्खण्डा साधिता मही ॥ ३०६ ॥
न नाम भूभृतामेव, सार्वभौमपदं नृपः । महात्मनामपि प्राप, गुणैर्लोकोत्तरैरयम् ॥ ३०७ ॥
अथ क्रमेण सम्प्राप्य, व्रतसाम्राज्यसम्पदम् । पदं लोकोत्तरं लब्धा, चक्रवर्त्यभयङ्करः ॥ ३०८ ॥

सार्थवाह ! श्रियो मूलमालवालं यशस्तरोः । व्रतं परोपकाराख्यं, मुनयस्तदिदं विदुः ॥ ३०९ ॥
न शोच्यस्तत् त्वयाऽऽप्यात्मा, पाप इत्यमलाशय ! । उपकारपरा बुद्धिः, शुद्धां ब्रूते तवायतिम् ॥ ३१० ॥
उपयोगः परं कश्चिद्, यन्नास्मत्तोऽभवत् तव । सार्थवाह ! क्रियाहीनं, तन्मनोऽतिदुनोति नः ॥ ३११ ॥
तन्महात्मँस्तवात्यर्थं, सर्वथाऽप्युपकुर्वतः । तत्त्वोपदेशमात्रेण, वयमप्युपकुर्महे ॥ ३१२ ॥
संसारे जन्तवः सन्ति, मिथ्यात्वमयनिद्रया । हिता-ऽहितमजानन्तो, जीवन्तोऽपि मृता इव ॥ ३१३ ॥
मिथ्यात्वतटिनीपूरप्लावितः सर्वथा जनः । रयाद्दुस्तरसंसारपारावारे पतत्ययम् ॥ ३१४ ॥
तन्मिथ्यात्वमयं ध्वान्तं, सद्गतिस्खलनक्षमम् । जिघांसता जनेनोच्चैः, सेव्यः सम्यक्त्वभास्करः ॥ ३१५ ॥
स्मेरं सम्यक्त्वसूर्येण, निगूढगुणगौरवम् । उत्तंसयति मुक्तिश्रीरजस्रं पद्मवज्जनम् ॥ ३१६ ॥
सम्यक्त्वकौमुदीस्वादचकोराणां शरीरिणाम् । पुरोवर्तिनि मिथ्यात्वविषे दृष्टिर्विरज्यते ॥ ३१७ ॥
रागादिविजयी देवः, सच्चरित्रगुरुर्गुरुः । प्राणित्राणप्रधानश्च, धर्मः सम्यक्त्वमुच्यते ॥ ३१८ ॥
तत् तवायमलङ्कारो, युज्यते पुरुषोत्तम ! । आधातुं हृदये श्रीमत्सम्यक्त्वं कौस्तुभः शुभः ॥ ३१९ ॥
ऊचे धनोऽथ भगवन् !, प्रतिपन्नमिदं मया । नहि श्रियं समायान्तीं, पदेन प्रेरयेद् बुधः ॥ ३२० ॥
गुरूनथ नमस्कृत्य, प्रीतः सम्यक्त्वसम्पदा । तां क्षपां क्षपयामास, निजावासं गतो धनः ॥ ३२१ ॥

१ °प्रायप्राभृ° पाता० ॥

प्रगेऽथ माणिभद्रेण, विज्ञप्तः सुहृदा धनः । इयं प्रावृडतिक्रान्ता, निशेवोद्भासिभास्करा ॥ ३२२ ॥
विमुक्तं धनुरिन्द्रेण, गृहीतं वसुधाधिपैः । नभस्त्यक्तं घनैः श्लिष्टं, जिगीषुबलधूलिभिः ॥ ३२३ ॥
कालेऽत्र प्रसरन्त्युच्चैर्व्यवसायिमनोरथाः । प्रभो ! प्रतिदिशं प्रौढाः, सहस्रांशोरिवांशवः ॥ ३२४ ॥
एतदाकर्ण्य सार्थेशः, समुलङ्घ्याटवीमिमाम् । गुरूणां गौरवं कुर्वन्, वसन्तपुरमाययौ ॥ ३२५ ॥
तत्र भूपतिसत्कारद्विगुणोत्साहितो धनः । विक्रीय स्वीयभाण्डानि, प्रतिभाण्डान्युपाददे ॥ ३२६ ॥
तत्र स्थितमथापृच्छ्य, धर्मघोषमुनीश्वरम् । क्षितिप्रतिष्ठितं प्राप, कृतार्थः सार्थपः पुरम् ॥ ३२७ ॥
अथ कालेन पूर्णायुरुत्तरेषु कुरुष्वयम् । कल्पद्रुपूर्णसङ्कल्पो, जग्मिवान् युग्मधर्मताम् ॥ ३२८ ॥
ततश्च प्रथमे कल्पे, भूत्वाऽसौ भासुरः सुरः । अपरेषु विदेहेषु, विजये गन्धिलाभिधे ॥ ३२९ ॥
वैताढ्यशैले गन्धारदेशे गन्धसमृद्धके । पुरे शतबलक्ष्माभृत्पुत्रो विद्याधरान्वये ॥ ३३० ॥
चन्द्रकान्ताङ्गसम्भूतो, जज्ञे नाम्ना महाबलः । अङ्गावगणितानङ्गः, शृङ्गार इव मूर्तिमान् ॥ ३३१ ॥
॥ विशेषकम् ॥
राज्यं महाबलायाथ, दत्त्वा शतबलो नृपः । दीक्षां गृहीत्वा कृत्वा च, तपांसि दिवमासदत् ॥ ३३२ ॥
अथो महाबलः क्ष्माभृद्, यौवनोन्माददुर्धरः । अज्ञातधर्मा कर्माणि, निर्ममे स यथारुचि ॥ ३३३ ॥
महाबलमहीपालमन्यदा सदसि स्थितम् । निर्भरस्फीतसङ्गीतरसनिर्मग्नमानसम् ॥ ३३४ ॥
मन्त्रीशो धर्मतत्त्वज्ञः, स्वयम्बुद्धोऽभिधानतः । वैराग्यवासनाविष्टमभाषिष्ट विशिष्टधीः ॥ ३३५ ॥ युग्मम् ॥
अस्तु स्वादुफलश्रीकः, कदलीद्रुरिवैकदा । विनैकं पुण्यबीजं तु, जन्तुरुच्छेदमृच्छति ॥ ३३६ ॥
तत् तवापि श्रियां मूलं, त्यक्त्वा धर्मं कुलप्रभो ! । इत्थं न विषयग्रामो, भोक्तुं तत्त्वज्ञ ! युज्यते ॥ ३३७ ॥
अभ्यधाद् भूपतिर्मन्त्रिन् !, किमप्रस्तुतमुच्यते ? ।
उवाच सचिवः स्वामिन् !, श्रूयतामत्र कारणम् ॥ ॥ ३३८ ॥
शुचिभिः सचिवैः स्वामिन् !, कुशलोदर्ककर्कशम् । अप्रस्तुतमपि प्रायो, हितं वाच्यं हितैषिभिः ॥ ३३९ ॥
यदद्य नन्दनोद्याने, ज्ञानातिशयशालिनौ । भवदायुर्मया पृष्टौ, चारणौ वाचमूचतुः ॥ ३४० ॥
मासमात्रं भवद्भर्तुरायुः शेषमिति प्रभो ! । विज्ञ ! विज्ञप्यसे बाढमतस्त्वमिति मा मुहः ॥ ३४१ ॥
ऊचे महाबलः साधु, साधुबुद्धिबृहस्पते ! । स्वयम्बुद्ध ! गुरुस्त्वं मे, त्वं मन्त्री त्वं च बान्धवः ॥ ३४२ ॥
यदित्थं पातकाम्भोधिपातुकं प्रति सम्प्रति । मामन्धमिव निर्बन्धाद्, भुजालम्बं प्रयच्छसि ॥ ३४३ ॥
परं समीपमापन्ने, मृत्यौ कृत्यं करोमि किम् ? । मूर्ध्नि दत्तपदे शत्रौ, विक्रमः क्रमतां कुतः ? ॥ ३४४ ॥
प्रव्रज्यां दिनमप्येकं, प्राप्यानन्यमना जनः । मोक्षं यदपि नाप्नोति, कामं वैमानिको भवेत् ॥ ३४५ ॥
इत्यमात्योपदेशेन, महाबलमहीपतिः । जग्राह दीक्षामाचार्यसमीपमुपजग्मिवान् ॥ ३४६ ॥ युग्मम् ॥
असावनशनं कृत्वा, दिनद्वाविंशतिं ततः । ईशानकल्पे देवोऽभूद्, विमाने श्रीप्रभाभिधे ॥ ३४७ ॥
नाम्नाऽथ ललिताङ्गस्य, तत्र वैषयिकं सुखम् । भुञ्जानस्यान्यदाऽच्योष्ट, प्रिया तस्य स्वयम्प्रभा ॥ ३४८ ॥
हा प्रिये ! देहि मे वाचं, प्रलपन्नित्यथोदितः । स्वसामानिकदेवेन, सौहार्दाद् दृढधर्मणा ॥ ३४९ ॥
यः पुरा मित्र ! मन्त्रीशः, स्वयम्बुद्धस्तवाभवत् । सोऽहं तव वियोगेन, प्रव्रज्यैनां श्रितः श्रियम् ॥ ३५० ॥

---

१ °ब्वसौ खंता० पाता० ॥ २ °स्फीतिस° वता० ॥ ३ °मिकु° पाता० खंता० ॥
४ दिनान् द्वा° खंतासं० ॥ ५ दृढवर्मणा खंता० पाता० ॥

अहं त्वयि ततः स्नेहाद्, विज्ञायावधिनाऽधुना । पुनः स्वयम्प्रभामन्यां, भाविनीं कथयामि ते ॥३५१॥
बभूव धातकीखण्डप्राग्विदेहैकमण्डने । नागिलाख्यो गृहपतिर्नन्दिग्रामेऽतिदुर्गतः ॥ ३५२ ॥
तस्य नागश्रियां पत्न्यां, पुत्रीषट्कादनन्तरम् । सुताऽभून्मर्त्यलोकेऽपि, नरकक्ष्मेव सप्तमी ॥ ३५३ ॥
एतस्यां जातमात्रायाममात्रोद्विग्नमानसः । नगरान्निरगाद् दूरं, विरागान्नागिलः किल ॥ ३५४ ॥
दुर्भगत्वेन पुत्र्यास्तु, नाम्नोऽप्यकरणादथ । निर्नामिकेत्यभूत् तस्याः, प्रसिद्धिर्जनिता जनैः ॥ ३५५ ॥
सा वर्द्धिष्णुः क्रमेणाथ, समं दारिद्र्यकर्मणा । अगमद् दारुभारार्थं, नभस्तिलकपर्वते ॥ ३५६ ॥
युगन्धरमुनिं तत्र, सुरा-ऽसुरनमस्कृतम् । दृष्ट्वा नत्वाऽथ तद्व्याख्यां, श्रुत्वा संवेगतो जगौ ॥ ३५७ ॥

दुःखिनः सन्ति भूयांसो, भवेऽस्मिन् भगवन् ! जनाः ।
मत्तस्तु मन्दभाग्यायाः, कोऽपि दुःखाधिकोऽस्ति किम् ? ॥ ३५८ ॥

अथो युगन्धरः प्राह, केवलज्ञानभास्करः । वत्से ! धत्से मुधा दुःखाद्वैतवैतण्डिकं मनः ॥ ३५९ ॥
दुःखानि परतः सन्तु, तावन्नरकवासिनाम् । श्रुतमात्राणि भिन्दन्ति, हृदयं यानि देहिनाम् ॥ ३६० ॥
परं प्रत्यक्षमेवैते, वनेऽपि सुखमानिनः । विनाऽपराधं वध्यन्ते, पशवः पश्य पापिभिः ॥ ३६१ ॥
दृढं कशाभिस्ताड्यन्ते, कर्कशाभिस्तुरङ्गमाः । बध्यन्ते चाद्भुतप्राणबन्धुरा अपि सिन्धुराः ॥ ३६२ ॥
परद्रव्य-परद्रोहपराः पश्य नरा नृपैः । क्रन्दन्तः करुणं मारैर्निहन्यन्ते नवैर्नवैः ॥ ३६३ ॥
स्वस्वामिभावसम्बन्धमुर्मुरैर्मर्मदाहिभिः । वत्से ! स्वर्गेऽपि ताप्यन्ते, मरुतोऽविरतोत्सवाः ॥ ३६४ ॥
विलोक्यते न तल्लोके, प्रदेशो निरुपप्लवः । आराध्यते न चेदेष, धर्मः शर्मनिबन्धनम् ॥ ३६५ ॥
संसारदुःखसम्मर्दकर्दमे पततामयम् । धर्म एव भुजालम्बं, दत्ते नान्यः शरीरिणाम् ॥ ३६६ ॥
आराद्धश्च विराद्धश्च, चक्रवर्तीव देहिनाम् । धर्मस्तुष्टश्च रुष्टश्च, सुखं दुःखं च यच्छति ॥ ३६७ ॥
सुखाय वत्से ! तद् वाञ्छा, यदि ते विद्यते हृदि । आराध्यतां ततो धर्मः, कल्पनाकल्पपादपः ॥ ३६८ ॥
उपदेशमिति श्रुत्वा, मुनेस्त्रैलोक्यदर्शिनः । अनुज्ञां चास्य सम्प्राप्य, दुःखौघक्षयकाङ्क्षया ॥ ३६९ ॥
उद्विग्ना निजदेहेऽपि, गृहीतानशनाऽधुना । वर्ततेऽस्यास्ततो गत्वा, स्वं रूपं दर्शय स्वयम् ॥ ३७० ॥
॥ युग्मम् ॥
तथाकृतेऽथ तेनैषा, तस्मिन्नेवानुरागिणी । मृत्वा तस्याऽभवद् देवी, प्रेमपात्रं स्वयम्प्रभा ॥ ३७१ ॥
भोगान् भुक्त्वा तया साकं, साकम्पोऽथ दिवश्च्युतः । क्षेत्रे महाविदेहेऽभूल्लोहार्गलपुरप्रभोः ॥ ३७२ ॥
सुतः सुवर्णजङ्घस्य, प्रतापजितभास्वतः । स लक्ष्मीकुक्षिमाणिक्यं, वज्रजङ्घ इति श्रुतः ॥ ३७३ ॥
॥ युग्मम् ॥

नगर्यां पुण्डरीकिण्यां, च्युत्वा साऽपि स्वयम्प्रभा ।
चक्रिणो वज्रसेनस्य, श्रीमतीति सुताऽभवत् ॥ ॥ ३७४ ॥

अन्यदा प्रमदोद्याने, क्रीडन्ती समुपागतम् । मुनिं केवलिनं वीक्ष्य, वन्दितं देव-दानवैः ॥ ३७५ ॥
जातजातिस्मृतिर्ज्ञात्वा, सा सर्वं पूर्वचेष्टितम् । धात्रेयीं पण्डितामाह, रहो विश्वासभाजनम् ॥ ३७६ ॥
॥ युग्मम् ॥
पुरा ममाऽऽसीदीशानकल्पे हृदयवल्लभः । ललिताङ्ग इति ख्यातस्तत्प्रियाऽहं स्वयम्प्रभा ॥ ३७७ ॥

---
१ °भामेनां, भावि° खंता० ॥ २ सन्ति, ता° खंता० ॥ ३ सल्लक्ष्मी° खंता० ॥

स च मद्ध्यवनात् पूर्वं, च्युतः काप्यभवद् भुवि । न ज्ञायते ततस्तस्य, प्रयत्नं प्राप्तये कुरु ॥ ३७८ ॥
पण्डिताऽपि श्रुताशेषवृत्तान्तानुगतं पटम् । लेखयित्वाऽङ्गणोपान्ते **वज्रसेन**स्य चक्रिणः ॥ ३७९ ॥
सेवागतानां सर्वेषां, कुमाराणामदर्शयत् । दृष्ट्वैतद् **वज्रजङ्घो**ऽपि, जातजातिस्मृतिर्जगौ ॥ ३८० ॥
मम पूर्वभवः सोऽयं, **पण्डिते** ! लेखितः कुतः ? । दिव्यज्ञानवता केन, कथितं वा तवाग्रतः ? ॥ ३८१ ॥
एकैकशस्तया पृष्टः, पर्वतादिविनिर्णयम् । पूर्वदृष्टानुसारेण, स यथाविधमभ्यधात् ॥ ३८२ ॥
अथोत्सुकतया वृत्तमनाख्यायाऽपि **पण्डिता** । **श्रीमत्याः** पुरतो गत्वा, तद्वृत्तान्तं व्यजिज्ञपत् ॥ ३८३ ॥
**वज्रसेनो**ऽपि विज्ञप्तः, स्वयं **पण्डितया** तया । **सुवर्णजङ्घ**पुत्रं तं, कुमार्या पर्यणीनयत् ॥ ३८४ ॥
सोऽथ श्वशुरमापृच्छ्य, **लोहार्गलपुरं** गतः । स्वयं जिघृक्षुणा दीक्षां, पित्रा राज्ये निवेशितः ॥ ३८५ ॥
सुतं **पुष्कलपाला**ख्यं, राज्ये कृत्वा स चक्रभृत् । **वज्रसेनो**ऽपि सञ्जज्ञे, मुनीभूयाथ तीर्थकृत् ॥ ३८६ ॥
अन्यदा **पुष्कल**क्ष्मापं, श्रुत्वा शत्रुभिरावृतम् । **वज्रजङ्घो**ऽपि साहाय्यं, कर्तुं तस्य पुरीं ययौ ॥ ३८७ ॥
तत्र शत्रून् विनिर्जित्य, **श्रीमत्या** सहितोऽथ सः । व्रजन् निजपुरं मार्गे, विलोक्य मुनिसत्तमौ ॥ ३८८ ॥
आत्मीयावेव सोदर्यौ, केवलज्ञानशालिनौ । नमश्चक्रे कृती नाम्ना, **सेनान्तौ मुनि-सागरौ** ॥ ३८९ ॥
॥ युग्मम् ॥
अथैवं चिन्तयामास, **वज्रजङ्घ**नरेश्वरः । अहो ! मे मन्दभाग्यत्वमहो ! मे मतिहीनता ॥ ३९० ॥
यदहं प्राप्तवान् लक्ष्मीं, वान्तप्रायामिमां पितुः । एतौ चारित्रसाम्राज्यं, प्रापतुः सोदरौ तु मे ॥ ३९१ ॥
अधुनाऽपि पुरं गत्वा, दत्त्वा राज्यं स्वसूनवे । चारित्राशनिना कर्मद्रुमं भस्मीकरोम्यहम् ॥ ३९२ ॥
इति निश्चित्य भूपालो, **लोहार्गलपुरं** गतः । प्रातर्दित्सुरयं राज्यं, प्रसुप्तः **श्रीमती**युतः ॥ ३९३ ॥
अज्ञातपरमार्थेन, राज्यलोभान्धचेतसा । विषधूमप्रयोगेण, घातितो निशि सूनुना ॥ ३९४ ॥ युग्मम् ॥
अथो**त्तरकुरु**ष्वेष, समं दयितया तया । नृपो युगलधर्माऽऽयुर्यथाक्षेत्रमपालयत् ॥ ३९५ ॥
**सौधर्म**कल्पे सङ्कल्पोपनतैः प्रीणितौ सुखैः । स्नेहस्यूताविवाभूतामेककालमुभौ सुरौ ॥ ३९६ ॥
**वज्रजङ्घ**स्य जीवोऽथ, **जम्बूद्वीपे** दिवश्च्युतः । **क्षितिप्रतिष्ठितपुरे, विदेहक्षेत्रमण्डने** ॥ ३९७ ॥
वैद्यस्य **सुविधेः** सूनुर्जज्ञे सत्कर्मकर्मठः । **जीवानन्दा**ख्यया ख्यातो, वैद्यविद्याविशारदः ॥ ३९८ ॥
**ईशानचन्द्र**भूभर्तुस्तत्रैव नगरे तदा । कान्तायां **कनकवत्यां**, जज्ञे पुत्रो **महीधरः** ॥ ३९९ ॥
**लक्ष्म्यां** च जज्ञे कान्तायां, **सुनासीर**स्य मन्त्रिणः ।
सुतः **सुबुद्धि**र्विख्यातो, नाम्ना च क्रियया च यः ॥ ४०० ॥
प्रियायां **शीलवत्यां** च, **धना**ख्यश्रेष्ठिनस्तदा । नन्दनो गुणरत्नानामाकरोऽभूद् **गुणाकरः** ॥ ४०१ ॥
बभूवा**ऽभयमत्यां** च, पत्न्यां सार्थपतेः सुतः । नाम्ना **सागरदत्त**स्य, **पूर्णभद्र** इति श्रुतः ॥ ४०२ ॥
सोऽप्यत्र **श्रीमती**जीवश्च्युतः **सौधर्म**कल्पतः । बभूवे**श्वरदत्त**स्य, श्रेष्ठिनः **केशवः** सुतः ॥ ४०३ ॥
एषामपि च पञ्चानां, समानगुणशालिनाम् । **जीवानन्दे**न वैद्येन, सह सख्यमभूत् तदा ॥ ४०४ ॥
सञ्जातानामथामीषामन्येद्युर्वैद्यवेश्मनि । साधुर्माधुकरीं भिक्षां, कुर्वन् नेत्रपथं ययौ ॥ ४०५ ॥
सं **पृथ्वीपाल**भूभर्तुः, पुत्रं किल **गुणाकरम्** । आत्तव्रतं तपःकष्टानुष्ठानैर्वीक्ष्य कुष्ठिनम् ॥ ४०६ ॥
**महीधरकुमार**स्तं, वैद्यपुत्रं तदाऽवदत् । धिगिदं भिषजां जन्म, धिगिदं शास्त्रकौशलम् ॥ ४०७ ॥

---

१ °न, **समं मैत्र्यमभूत्** खंता° पाता° ॥

अनीहानां शरीरेऽपि, परत्रैकरतात्मनाम् । यदीदृशानां साधूनां, नोपकाराय जायते ॥ ४०८ ॥
यल्लोकमल-मूत्रादिघ्राणान्मालिन्यमर्जितम् । तदिदं क्षाल्यतामद्य, मुनेरारोग्यदानतः ॥ ४०९ ॥
जीवानन्दो जगादैवमथ राजेन्दुनन्दनम् । युवाऽपि वृद्धबुद्धिस्त्वं, युक्तमेवोक्तवानिति[1] ॥ ४१० ॥
किन्तु दीनारलक्षेण, प्रत्येकमपि दुर्लभैः । निगृह्यते यतेरस्य, रोगोऽयं भेषजैस्त्रिभिः ॥ ४११ ॥
एतेषु लक्षपाकाख्यं, तैलमस्त्येव मद्गृहे । गोशीर्षचन्दनं रत्नकम्बलं च पुनर्नहि ॥ ४१२ ॥
इत्युक्ते तेन ते पञ्च, विपणिश्रेणिमण्डनम् । कञ्चिन्महेभ्यमभ्येत्य, श्रेष्ठिनं श्रेष्ठमूचिरे ॥ ४१३ ॥
अपि दीनारलक्षाभ्यां, देहि गोशीर्ष-कम्बलौ । यदाभ्यां कर्तुमिच्छामश्चिकित्सां रोगिणो मुनेः ॥ ४१४ ॥
तेषामिति वचः श्रुत्वा, विस्मयस्मेरमानसः । जगाद सादरं श्रेष्ठी, धन्याः ! शृणुत मद्वचः ॥ ४१५ ॥
कुष्ठरोगाभिभूतस्य, योग्यावेतौ महामुनेः । राज्येनापि न लभ्येते, दूरे दीनारदर्शनम् ॥ ४१६ ॥
सन्ति पुण्यनिदानानि, यानि दानानि कोटिशः । एतैरारोग्यदानस्य, शतांशेनापि नोपमा ॥ ४१७ ॥
तद् गृह्णीत विना मूल्यमनुगृह्णीत मां मुदा । श्रेष्ठीत्युक्त्वाऽर्पयामास, रत्नकम्बल-चन्दने ॥ ४१८ ॥
ततस्ते समुपादाय, शकुनैः शुभशंसिभिः । जीवानन्देन सहिता, मुनेरनुपदं ययुः ॥ ४१९ ॥
कायोत्सर्गासनासीनमधोन्यग्रोधभूरुहः । बाह्योद्यानेऽथ ते वीक्ष्य, नमश्चक्रुर्मुनीश्वरम् ॥ ४२० ॥
ततो मुनिमनुज्ञाप्य, तैलेनाभ्यज्य वैद्यभूः । निश्चेतनेऽथ तद्देहे, क्षिप्तवान् रत्नकम्बलम् ॥ ४२१ ॥
तैलतापेन तेनाथ, व्याकुलास्तत्कलेवरात् । निःसृत्य शीतले लीनाः, कृमयो रत्नकम्बले ॥ ४२२ ॥
अथ गोशवमानीय, तस्योपरि दयापरः । कम्बलात् पातयामास, कृमीन् वैद्यवरः स्वयम् ॥ ४२३ ॥
गोशीर्षचन्दनस्यन्दैरिन्दुनिस्यन्दसुन्दरैः । शमिनः शमयामास, स तापव्यापदं मुदा ॥ ४२४ ॥
त्रिर्विधाय क्रियामित्थं, कृमीनतुलकौशलः । गोशवे पातयामास, त्वग्मांसास्थिगतानयम् ॥ ४२५ ॥
कैश्चिद् दिनैः शमिस्वामी, चामीकरसमच्छविः । क्षमितस्तैर्विहाराय, पुनर्नववपुर्ययौ ॥ ४२६ ॥
वणिक्श्रेष्ठोऽपि भैषज्यदानप्रभववैभवात् । अन्तकृत्केवलीभावं, तस्मिन्नेव भवेऽभजत् ॥ ४२७ ॥
तेऽपि कम्बल-गोशीर्षशेषं विक्रीय काञ्चनैः । प्रासादं कारयामासुः, स्वेन लक्षद्वयेन च ॥ ४२८ ॥
कियताऽप्यथ कालेन, समं सञ्जातभावनाः । व्रतं प्राप्याऽच्युते कल्पे, शिश्रियुस्त्रिदशश्रियम्[2] ॥ ४२९ ॥
द्वाविंशत्यतरायुष्कास्ते सर्वेऽप्यच्युताच्युताः । प्राग्द्वीपप्राग्विदेहेषु, तटे लवणवारिधेः ॥ ४३० ॥
विजये पुष्कलावत्यां, पुण्डरीकिण्यधीशितुः । वज्रसेननृपस्याऽऽसन्, धारिण्यां पञ्च सूनवः ॥ ४३१ ॥
॥ युग्मम् ॥

अभूत् तेषु भिषग्जीवो, वज्रनाभाभिधोऽग्रजः । चतुर्दशमहास्वप्नशिष्टसाम्राज्यवैभवः ॥ ४३२ ॥
बाहुः सुबाहुः पीठोऽथ, महापीठः क्रमादमी । जीवास्ततो नृपा-ऽमात्य-श्रेष्ठि-सार्थेशजन्मिनाम्[3] ॥ ४३३ ॥
आसीत् केशवजीवोऽपि, सुयशा राजपुत्रकः । प्राग्भवस्नेहतः सोऽपि, वज्रनाभमशिश्रियत्[4] ॥ ४३४ ॥
तीर्थप्रवृत्त्यै विज्ञप्तस्ततो लोकान्तिकैः सुरैः । वज्रसेननृपो राज्ये, निवेश्य निजमात्मजम् ॥ ४३५ ॥
सांवत्सरिकदानानि, दत्त्वा देवेन्द्रवन्दितः । चारित्रसम्पदा साकं, मनःपर्यायमासदत् ॥ ४३६ ॥
वज्रनाभमहीनाथो, महीमथ महाभुजः । सुयशःसारथिः शक्रसमलक्ष्मीरपालयत् ॥ ४३७ ॥

१ °वानिदम् खंता० पाता० ॥ २ °युस्त्रिदिवः श्रियम् वता० ॥ ३ जन्मनाम् खंता० पाता० ॥ ४ °माजयत् पाता० ॥

केवलं वज्रसेनस्य, तस्य तीर्थकृतस्तदा । चक्रं तु सममेवाभूद् वज्रनाभस्य भूभुजः ॥ ४३८ ॥
**वज्रनाभो** विजित्याथ, विजयं **पुष्कलावतीम्** । प्राप्तचक्रिपदः कामं, धर्म्यकर्माणि निर्ममे ॥ ४३९ ॥
अन्यदा जातवैराग्यस्तातपादान्तमागतः । राज्यं न्यस्य सुते दीक्षां, सबन्धुर्जगृहे नृपः ॥ ४४० ॥
भवोपग्राहिकर्माणि, क्षयं नीत्वाऽथ निर्वृतिम् । । वज्रसेनप्रभौ प्राप्ते, धरायां विजहार सः ॥ ४४१ ॥
द्वादशाङ्गधरस्यास्य, सिद्धयः सकला अपि । वज्रनाभमुनीन्द्रस्य, पादपीठान्तिकेऽलुठन् ॥ ४४२ ॥
अन्येऽपि बन्धवस्तस्य, समं सुयशसाऽभवन् । एकादशाङ्गपारीणा, महिम्नां च महास्पदम् ॥ ४४३ ॥
विंशत्याऽऽराधितैः स्थानैरर्हद्भक्तिपुरःसरैः । वज्रनाभमुनीन्द्रोऽथ, तीर्थकृत्कर्म निर्ममे ॥ ४४४ ॥
वैयावृत्येन साधूनां, बाहुश्चक्रिपदप्रदम् । सुबाहुस्तु बलाधायि, कर्म निर्मितवान् मुनिः ॥ ४४५ ॥
प्रशंसां च तयोश्चक्रे, वज्रनाभमुनीश्वरः । तेन **पीठ-महापीठौ**, प्रकामं दुर्मनायितौ ॥ ४४६ ॥
तदीर्ष्याजनितं कर्म, ताभ्यामालोचनां विना । स्त्रीभावफलदं चक्रे, मायामिथ्यात्वयोगतः ॥ ४४७ ॥
क्रमात् षडपि ते पूर्वलक्षान् दीक्षां चतुर्दश । पालयित्वाऽथ सर्वार्थसिद्धिश्रियमशिश्रियन् ॥ ४४८ ॥

इत्यऽनुत्तरविमाननिवासश्रीविलासविकसन्मनसस्ते ।
निर्वृतिप्रतिभुवं भवभाजां, भेजिरे निरुपमां सुखलक्ष्मीम् ॥ ॥ ४४९ ॥

**॥ इति श्रीविजयसेनसूरिशिष्यश्रीमदुदयप्रभसूरिविरचिते श्रीधर्माभ्युदय-नाम्नि श्रीसङ्घपतिचरिते लक्ष्म्यङ्के महाकाव्ये श्रीऋषभस्वामि-पूर्वभववर्णनो नाम द्वितीयः सर्गः समाप्तः ॥**

यस्तीर्थयात्राभवपुण्ययोगान्मात्राधिकोऽभूद् भगवत्प्रसादः ।
श्रीवस्तुपालस्तममुं पृथिव्यां, प्रासादमूर्त्या प्रकटीचकार ॥ १ ॥[3]

॥ [4]ग्रं० ४५६ उभयं ५७७ ॥

---

१ धर्मक° पाता० ॥ २ °भदेवस्वा° वता० ॥
३ एतत्पद्यानन्तरं पाता० पुस्तकेऽयं श्लोकोऽधिक उपलभ्यते—**या श्रीः स्वयं जिनपतेः पदपद्मसद्मा, भालस्थले सपदि सङ्गमिते समेता । श्रीवस्तुपाल ! तव भालनिभालनेन, सा सेवकेषु सुख-मुन्मुखता बिभाति** ॥ २ ॥ वता० खंता० पुस्तकयोः पुनरयं श्लोकः तृतीयसर्गप्रान्ते वर्तते ॥
४ **ग्रंथाग्रम्—४५३ ॥ उभयं ५६८** ॥ इति पाता० ॥

## तृतीयः सर्गः ।

**कुलकराणामुत्पत्तिर्नीतयश्च**

इतश्च जम्बूद्वीपेऽस्ति, विदेहेष्वपरेषु पूः । ईशानचन्द्रक्ष्माचन्द्रत्राता नाम्नाऽपराजिता ॥ १ ॥
तत्र चन्दनदासस्य, श्रेष्ठिनो नन्दनोऽभवत् । ख्यातः सागरचन्द्राख्यो, द्राक्षोपमवचस्ततिः ॥ २ ॥
कौमुद्यां बाह्यमुद्यानमन्येद्युः सपुरे नृपे । सम्प्राप्तेऽशोकदत्तेन, समं मित्रेण सोऽप्यगात् ॥ ३ ॥
श्रेष्ठिनः पूर्णभद्रस्य, नन्दिनीं बन्दिसङ्कटात् । असावत्रान्तरे दुष्टादमोचयत् प्रियदर्शनाम् ॥ ४ ॥
तावन्योन्यसमालोकप्रमोदहृतमानसौ । छलैकदृष्टेः कन्दर्पपिशाचस्य वशङ्गतौ ॥ ५ ॥
स्वं स्वं गृहमथो यातावन्योन्यविरहातुरौ । न रतिं प्रापतुः क्वापि, कामाज्ञा हि सुदुःसहा ॥ ६ ॥
अथ सागरचन्द्रस्य, श्रुत्वा तद् विक्रमाद्भुतम् । पिता चन्दनदासोऽस्मै, सामधाम गिरं जगौ ॥ ७ ॥
कृथा मास्म वृथा वत्स !, विक्रमक्रममन्यदा । यतो न वणिजां क्वापि, शौर्यमौचित्यमञ्चति ॥ ८ ॥
अपि चाशोकदत्तोऽयं, छद्मनः सद्म जङ्गमम् । सङ्गमस्तेन नैतेन, समं कार्यः क्वचित् त्वया ॥ ९ ॥
ईर्ष्यालुः कोऽपि तातस्य, मिथ्यैवेदं न्यवेदयत् । यन्मे वयस्यो मायावी, मायावीतमना अपि ॥ १० ॥
स स्वच्छप्रकृतिश्चित्ते, चिन्तयन्निति सागरः । तातादेशः प्रमाणं मे, नित्यमित्यवदत् कृती ॥ ११ ॥ युग्मम् ॥
चन्दनः पूर्णभद्रश्च, चित्तज्ञौ सुतयोः[1] स्वयोः । कारयाञ्चक्रतुः प्रीत्या, पाणिग्रहमहोत्सवम् ॥ १२ ॥
पत्या सागरचन्द्रेण, तुल्येन प्रियदर्शना । लक्ष्मीर्नारायणेनेव, प्रीता नीता कृतार्थताम् ॥ १३ ॥
प्रियेऽन्यदा बहिर्याते, सति तद्धामगामिना । प्रार्थिताऽशोकदत्तेन, त्यक्तलज्जेन साऽवदत् ॥ १४ ॥

त्वं मायातः समायातः, किमु रे ! मम मन्दिरे[2] ? ।
तुच्छ ! तद् गच्छ भर्ता मे, स्वच्छस्त्वां मित्रमिच्छति ॥ ॥ १५ ॥

अथोद्विग्नो विनिर्गत्य, सागराग्रेऽब्रवीदिदम् । पत्न्यास्ते दुश्चरित्रायाः, सङ्कटेऽद्यापतं सखे ! ॥ १६ ॥
श्रुत्वेति सागरोऽप्यूचे, क्षणं विकृतमानसः । सखे ! न खेदस्ते दक्ष !, विधातुमुचितः क्वचित् ॥ १७ ॥
स्नेहानुविद्धयोर्भ्रातरावयोर्मानसक्षतिः[3] । भाविनी नाविनीतायाः, कृते तस्याः कदाचन ॥ १८ ॥
ऋजुप्रकृतिना तेन, स दुष्ट इति भाषितः । कामं मुदितचित्तोऽभूत्, स्वभावोऽयं दुरात्मनाम् ॥ १९ ॥
स्वयोषायामदोषायामपि मित्रगिरा तया । सागरोऽभूद् गतप्रेमा, ज्ञापयामास तां न तु ॥ २० ॥
प्रियदर्शनया साकं, मृत्वा कालेन सागरः । जम्बूद्वीपेऽत्र भरतक्षेत्रार्द्धे दक्षिणेऽभवत् ॥ २१ ॥
तृतीयारेऽवसर्पिण्यां, सिन्धु-गङ्गान्तरक्षितौ । शेषे पल्योपमाष्टांशे, युग्मधर्मा रविच्छविः ॥ २२ ॥
॥ युग्मम् ॥
माययाऽशोकदत्तोऽपि, निष्पन्नोऽत्रैव कुञ्जरः । चतुर्दन्तः सितच्छायकायस्तं दृष्टवान् भ्रमन् ॥ २३ ॥
आविर्भूताद्भुतप्रीतिः, सकरेणुः करेण तम् । आलिङ्ग्याऽऽरोपयामास, निजस्कन्धे सविस्मयम् ॥ २४ ॥

---

१ °तयोःस्तयोः वता० ॥ २ °न्दिरम् ? संता० ॥ ३ °सक्षितिः वता० ॥

अयं मया क्वचिद् दृष्ट, इत्यन्योन्यं सचिन्तयोः। तयोः स्मृतिपथं यातः, स्नेहः पूर्वभवोद्भवः ॥ २५ ॥
प्राग्भवस्मरणाज्ज्ञातनीतिः स्कन्धाधिरोपितः। करिणा तेन स ख्यातिं, लेभे **विमलवाहनः** ॥ २६ ॥
प्रभावादवसर्पिण्याः, कालेऽत्र ममताजुषाम्। न ददुर्वाञ्छितं कल्पतरवः स्तोकतां गताः ॥ २७ ॥
ममायमिति कल्पद्रुविषये कलहाकुलाः। अभवन् मार्गगाः सर्वे, तस्य हाकारदण्डतः ॥ २८ ॥
तस्य **चन्द्रयशोनाम्नि**, कलत्रेऽभवदन्यदा। धनुरष्टशतीतुङ्गं, प्राच्यसंहननं शिति ॥ २९ ॥
विलुप्तसङ्ख्यपूर्वायुः, स्त्री-पुंसमिथुनं किल। **चक्षुष्माँश्चन्द्रकान्ता** चेत्यनयोर्नाम कल्पितम् ॥ ३० ॥
॥ युग्मम् ॥
जरा-रोगौ विना मृत्वा, ततो **विमलवाहनः**। सुपर्णाख्यकुमारेषु, सुरः समभवन्नवः ॥ ३१ ॥
**नागलोकेऽ्वभूच्चन्द्रयशा** अपि मृता ततः। अगान्नागकुमारेषु, कुञ्जरोऽपि च्युतस्ततः ॥ ३२ ॥
अन्त्यकालेऽथ **चक्षुष्मानपि** युग्ममजीजनत्। **यशस्वी** च **सुरूपा** च, **चन्द्रकान्ताङ्गसम्भवम्** ॥ ३३ ॥
**चक्षुष्मान्** स **सुपर्णेषु**, मृत्वोत्पेदे महासुरः। **चन्द्रकान्ताऽपि नागेषु**, समानसमयं किल ॥ ३४ ॥
अथो **यशस्विनस्तस्य**, पितृवत् प्रभुताजुषः। धार्ष्ट्योल्लङ्घितहाकारनीतिभिर्मिथुनैः स्थितम् ॥ ३५ ॥
तच्छासनाय माकारदण्डं चक्रेऽथ स प्रभुः। यथापराधं प्रायुङ्क्त, नीतिद्वयमथ क्रमात् ॥ ३६ ॥
**अभिचन्द्रोऽभवत्** पुत्रः, **प्रतिरूपा** च कन्यका। गौर-श्यामरुची पत्न्यां, **सुरूपायां यशस्विनः** ॥ ३७ ॥
**यशस्व्यब्धिकुमारोऽभूत्**, **सुरूपा** त्वस्य वल्लभा। विपद्य सममेवाहिकुमारः समजायत ॥ ३८ ॥
पुत्रः **प्रसेनजिन्नाम**, **चक्षुःकान्ता** च नन्दनी। **अभिचन्द्रस्य** जज्ञाते, **प्रतिरूपाङ्गसम्भवौ** ॥ ३९ ॥
**अभिचन्द्रो** विपद्याऽब्धिकुमारेषूदपद्यत। सहैव **प्रतिरूपा** तु, जज्ञे **नागकुमारकः** ॥ ४० ॥
पितृवद् युग्मिनां शास्तिं, **प्रसेनजिति** कुर्वति। सति हाकार-माकारलङ्घने धार्ष्ट्यतः पुनः ॥ ४१ ॥
धिक्कारनीतिं निर्माय, निर्मायः क्रमशस्त्रिभिः। दण्डैरमीभिश्चण्डाज्ञो, मिथुनानि शशास सः ॥ ४२ ॥
॥ युग्मम् ॥
**चक्षुःकान्ताऽथ** तत्कान्ता, **मरुदेवं** तनूद्भवम्। सुतामसूत **श्रीकान्तां**, चेति तद्युग्मजातकौ ॥ ४३ ॥
मृत्वा **प्रसेनजिद् द्वीपकुमारेष्वथ** निर्जरः। **चक्षुःकान्ताऽथ नागेषु**, समं समुदपद्यत ॥ ४४ ॥
पितृवन्मरुदेवस्य, शासतोऽथ प्रजा निजाः। **श्रीकान्तायां** सपादाग्रधनुःपञ्चशतोच्छ्रयौ ॥ ४५ ॥
शातकुम्भद्युतिर्नाभिर्मरुदेवा प्रियङ्गुरुक्। नाम्नेत्यजायतां पुत्रः, पुत्री च युगजातकौ ॥४६॥ युग्मम् ॥
सङ्ख्यातपूर्वप्रमितं, तयोरायुरजायत। पैतृकादायुषः किञ्चिन्न्यूनमन्यूनपुण्ययोः ॥ ४७ ॥
प्राप **द्वीपकुमारत्वं मरुदेवो** विपद्य सः। **श्रीकान्ता** तस्य कान्ता तु, तदा **नागकुमारताम्** ॥ ४८ ॥

## धनसार्थवाहजीवस्य ऋषभतीर्थकृतश्चरितम्

अथो विदधतो **नाभेर्युग्मिनामनुशासनम्**। तृतीयारस्य शेषेषु, पूर्वलक्षेषु केषुचित् ॥ ४९ ॥
आयुर्भुक्त्वा त्रयस्त्रिंशत्सागरोपमसम्मितम्। जीवः **श्रीवज्रनाभस्य**, च्युत्वा **सर्वार्थसिद्धितः** ॥ ५० ॥
कृष्णाषाढस्य तुर्येऽह्न्युत्तराषाढास्थिते विधौ। कुक्षौ **श्रीमरुदेवायाः**, स प्रभुः समवातरत् ॥ ५१ ॥
॥ विशेषकम् ॥

---

१ °पा चास्य पाता० ॥ २ °सम्भवम् खंता० ॥ ३ °ढचतुर्थेऽह्नयु° खंता० पाता० ॥

अवतारे प्रभोस्तत्र, पवित्रे भुवनत्रयम् । ध्वस्तध्वान्तं सुखिस्वान्तं, शान्तदुःखमभूत् क्षणम् ॥ ५२ ॥
वृषेभ-सिंह-श्री-दाम-चन्द्रा-ऽऽदित्यान् ध्वजं घटम् । सरो-वार्द्धि-विमानानि, रत्नौघ-ज्वलितानलौ ॥ ५३ ॥
एतान् लोकोत्तरस्फूर्तिप्रभावाद्भुतसूचकान् । तदा चतुर्दश स्वप्नान्, मरुदेवी व्यलोकयत् ॥ ५४ ॥
॥ युग्मम् ॥
अथ प्रातः प्रबुद्धाऽसौ, नाभेः स्वप्नानचीकथत् । सोऽप्युवाचेति पुत्रस्ते, भावी कुलकरोत्तमः ॥ ५५ ॥
अथाऽऽसनप्रकम्पेन, विज्ञायावतरं प्रभोः । समं समन्तात् तत्रैत्य, स्वप्नार्थं वज्रिणो जगुः ॥ ५६ ॥
मरुदेवीं नमस्कृत्य, ततः सर्वे सुरेश्वराः । जग्मुर्निजं निजं स्थानममन्दानन्दमेदुराः ॥ ५७ ॥
निधानं रत्नगर्भेव, बिभ्राणा गर्भमद्भुतम् । दिनेषु परिपूर्णेषु, श्यामचैत्राष्टमीदिने ॥ ५८ ॥
उत्तराषाढया युक्ते, विधावुच्चैः शुभग्रहैः । देवी युगलधर्माणं, सुतरत्नमसूत सा ॥ ५९ ॥ युग्मम् ॥
सुखैस्तदोदितं वार्तैर्मुदितं नारकैरपि । जगत्त्रयेऽपि तेजोऽभूदनदद् दिवि दुन्दुभिः ॥ ६० ॥
पीठकम्पा-ऽवधिज्ञानाज्ज्ञात्वाऽऽदिजिनजन्म तत् । अष्टाधोलोकवासिन्यः, समीयुर्दिक्कुमारिकाः ॥ ६१ ॥

**भोगङ्करा भोगवती, तोयधाराऽप्यनिन्दिता ।**
**सुभोगा पुष्पमाला च, विचित्रा भोगमालिनी** ॥ ६२ ॥

आभिर्नत्वा च नुत्वा च, भेतव्यं नेत्युदीर्य च । हेतुरागमने स्वामिमातुस्तथ्यमकथ्यत ॥ ६३ ॥
॥ युग्मम् ॥
उत्तरस्यां दिशि स्तम्भसहस्रं प्राङ्मुखं च ताः । वातपूतद्विगव्यूति, व्यधुः सूतिगृहं बृहत् ॥ ६४ ॥
उत्तंसाम्भोजभृङ्गालिध्वानस्थानप्रदानतः । प्रीता गीतानि गायन्त्यो, नत्वा प्रभुमभि स्थिताः ॥ ६५ ॥
एत्य कम्पासनाँ ज्ञात्वा, मेरुस्थाः स्वर्गलोकगाः । प्रणेमुर्दिक्कुमार्योऽष्टौ, जिनं तज्जननीमपि ॥ ६६ ॥

**मेघङ्करा वत्समित्रा, सुवत्सा मेघमालिनी ।**
**सुमेघा मेघमाला च, वारिषेणा बलाहिका** ॥ ६७ ॥

कृताम्बुदा मुदा हृत्वा, रेणुं सुरभिवारिणा । आयोजनं ततः पुष्पैर्वृष्टिं पञ्चविधैर्व्यधुः ॥ ६८ ॥
॥ युग्मम् ॥
अभ्येत्य दिक्कुमार्योऽष्टौ, पौरस्त्यरुचकाद्रिगाः । नेमुर्जिनं तदम्बां च, करस्फुरितदर्पणाः ॥ ६९ ॥

**नन्दा नन्दोत्तराऽऽनन्दा, वैजयन्त्यपराजिता ।**
**जयन्ती विजया चैव, किञ्चान्या नन्दिवर्द्धना** ॥ ७० ॥

आयाता दिक्कुमार्योऽष्टावपाच्यरुचकाद्रिगाः । नत्वा मात्रा समं नाथं, सभृङ्गाराः सगीतयः ॥ ७१ ॥
**लक्ष्मीवती चित्रगुप्ता, समाहारा वसुन्धरा । सुप्रबुद्धा शेषवती, सुप्रदत्ता यशोधरा** ॥ ७२ ॥
अथ **प्रतीचीरुचकादुपेत्याष्टौ** कुमारिकाः । नत्वाऽर्हन्तं च देवीं च, तस्थुर्व्यजनपाणयः ॥ ७३ ॥
**भद्रा नवमिका सीता, एकनासा पृथिव्यथ । इलादेवी-सुरादेवी-पद्मवत्य** इति श्रुताः ॥ ७४ ॥
**उदीचीरुचकादष्टावागता** दिक्कुमारिकाः । प्रणम्य देवं देवीं च, चामराणि करे दधुः ॥ ७५ ॥

---

१ °रुदेवा व्य° वता० ॥ २ °रुदेवां न° वता० ॥ ३ °ढनक्षत्रे, विधा° खंता० ॥ ४ °नात् ज्ञा° खंता० पाता० ॥ ५ °लाहका खंता० ॥ ६ °ऽष्टौ, पौ° खंता० ॥ ७ °प्रबुद्धा खंता० पाता० ॥

वारुणी पुण्डरीका च, हासा ह्रीः श्रीरलम्बुसा । ख्याताः सर्वप्रभा मित्रकेशी चेत्यभिधानतः ॥ ७६ ॥
अष्टाष्ट दिक्कुमार्यस्ताः, पौरस्त्यरुचकादितः । विज्ञप्य पूर्ववद् देवीं, दिक्षु पूर्वादिषु स्थिताः ॥ ७७ ॥
निपीतस्फीतपीयूषपूरोद्गारैर्वरैः स्वरैः । तेनुर्जिनगुणग्रामगानमानन्दमन्दिरम् ॥ ७८ ॥

दशभिः कुलकम् ॥

विदिशारुचकादेत्य, चतस्रो दिक्कुमारिकाः । नत्वा देवं च देवीं च, गायन्त्यो दीप्तदीपकाः ॥ ७९ ॥
सतेरा चित्रकनका, चित्रा सौत्रामणी तथा । विज्ञप्य पूर्ववत् तस्थुरैशान्यादिविदिक्षु ताः ॥ ८० ॥

॥ युग्मम् ॥

चतस्रो दिक्कुमार्योऽथ, रुचकद्वीपतोऽभ्ययुः । सुरूपा-रूपिकावत्यौ, रूपा-रूपांसिके तथा ॥ ८१ ॥
चतुरङ्गुलतो बालनालं छित्त्वा न्यधुर्दरे । तत्र रत्नादिना पूर्णे, दूर्वया पीठिकां व्यधुः ॥ ८२ ॥
सिंहासन-चतुःशालजुषस्त्रीन् कदलीगृहान् । चक्रुश्च मूलप्रासादात्, प्राचीनोत्तर-दक्षिणान् ॥ ८३ ॥
अभ्यङ्गमुभयोश्चक्रुश्चतुःशालेऽथ दक्षिणे । लक्षपाकेन तैलेन, दिव्यमुद्वर्तनं च ताः ॥ ८४ ॥
संस्नप्य प्राक् चतुःशाले, लिप्त्वा गोशीर्षचन्दनैः । ताश्च व्यभूषयन् दिव्यचेला-ऽलङ्करणैरुभौ ॥ ८५ ॥
ताश्चोत्तरचतुःशालपीठमानीतयोस्तयोः । हुत्वा हिमाद्रिगोशीर्षं, रक्षापोट्टलिकां न्यधुः ॥ ८६ ॥
पर्वतायुर्भवेत्युक्त्वा, कर्णाभ्यर्णे जिनस्य ताः । स्फारमास्फालयामासुराशु पाषाणगोलकौ ॥ ८७ ॥
अथो जिनं जिनाम्बां च, नीत्वा सूतिनिकेतने । मुदा तल्पे समारोप्य, गायन्त्यस्तस्थुरन्तिके ॥ ८८ ॥
नेदुर्दिवि तदा घण्टाश्चकम्पे वासवासनैः । अहो ! किमिदमित्येवमासदद् द्युसदां भयम् ॥ ८९ ॥
क्रुद्धो वद्धोद्यमः पूर्वं, शक्रो विक्रमकेशरी । सावधानोऽवधिज्ञानाज्ज्ञात्वा जन्म जगद्गुरोः ॥ ९० ॥
कोपाटोपं समुत्सृज्य, मुक्तसिंहासनस्ततः । प्राग्मिथ्यादुःकृतं दत्त्वा, नत्वा च त्रिजगद्गुरुम् ॥ ९१ ॥
समं समस्तैर्गीर्वाणैर्विधित्सुर्जिनमज्जनम् । आदिदेश सुराधीशः, सेनान्यं नैगमेषिणम् ॥ ९२ ॥

॥ विशेषकम् ॥

तद्वादितसुघोषाख्यघण्टया सह सर्वतः । नादाद् विमानघण्टानामधावन्त सुधाभुजः ॥ ९३ ॥
पञ्चयोजनशत्युच्चं, लक्षयोजनविस्तृतम् । पालकः पालकं यानं, चक्रे शक्रनिदेशतः ॥ ९४ ॥
महिषीभिः सहामात्यैः, साकं नाकेश्वरस्ततः । भेजे विमानं व्योमेव, विधुस्तारा-ग्रहान्वितः ॥ ९५ ॥
अथ नन्दीश्वरद्वीपे, गत्वा रतिकरे गिरौ । विमानं तत्र सङ्क्षिप्य, प्राप्तो जिनजनेर्गृहम् ॥ ९६ ॥
प्रदक्षिणिततीर्थेशसौधः सौधर्मनायकः । तद्विमानमुदक्प्राच्यां, संस्थाप्य प्रभुमभ्यगात् ॥ ९७ ॥
दृष्टमात्रं जिनं मात्रा, समं नत्वा सुरेश्वरः । त्रेधं प्रदक्षिणीकृत्य, कृत्यवित् प्रणनाम च ॥ ९८ ॥
मुदाऽथ द्युसदांनाथः, प्राह सोत्साहमानसः । मरुदेव्याः पुरो जन्ममहिम्ने स्वं समागतम् ॥ ९९ ॥
दत्त्वाऽवस्वापिनीं देव्याः, प्रतिच्छन्दं जगत्पतेः । स्थापयित्वा तदन्ते च, पञ्चमूर्तिर्बभूव सः ॥ १०० ॥
एकः पुरः सुरस्वामी, भुवनस्वामिनं न्यधात् । गोशीर्षचन्दनामोदशस्ते हस्ताम्बुजद्वये ॥ १०१ ॥
छत्रमत्र दधारैकश्चामरे परितोऽप्युभौ । एको वेत्रीव निर्दम्भो, दम्भोलिं पुरतो हरिः ॥ १०२ ॥
रङ्को रत्नमिवासाद्य, माद्यन्नृभुविभुः स्वयम् । निधाय हृदये यत्नादगमन्मेरुमूर्द्धनि ॥ १०३ ॥

---

१ °स्वरैः वता० ॥ २ °कृतं कृत्वा, न° खंता० पाता० ॥ ३ °ह्वावृतः खंता० पाता० ॥
४ °भुः प्रभुम् खंता० पाता० ॥

शिलया पाण्डकवने, पाण्डुकम्बलया धृतम् । अध्यास्त वासवः स्नात्रपीठमुत्सङ्गितप्रभुः ॥ १०४ ॥
अस्मिन् महे महाघोषाघण्टानिर्घोषबोधिताः । इन्द्रास्त्रिषष्टिराजग्मुरपरे सपरिच्छदाः ॥ १०५ ॥
अच्युतेन्द्रोऽथ सौवर्णान्, रौप्यान्[1] मणिमयानपि । हेमरूप्य-हेमरत्न-रत्नरूप्यमयानपि ॥ १०६ ॥
हेमरूप्यमणिमयान्, भौमाँश्च कलशान् सुरैः । अष्टोत्तरसहस्रं स, तान् प्रत्येकमचीकरत् ॥ १०७ ॥
कुम्भवत् पात्रिका-रत्नकरण्ड-स्थाल-दर्पणान् । भृङ्गार-पुष्पचङ्गेरी-सुप्रतिष्ठानकारयत् ॥ १०८ ॥
क्षीरोद-पुष्करोदाभ्यामम्भः साम्भोरुहं तदा । समृत्स्नं चान्यतीर्थेभ्यो, भरतैरावतादिषु ॥ १०९ ॥
आनिन्यिरे पद्महृदात्, किञ्चित् क्षुद्रहिमाद्रितः । तुवरौषध-सिद्धार्थ-कुसुमानि च ते सुराः ॥ ११० ॥

नन्दनात् पाण्डकाद् भद्रशालात् सौमनसाच्च ते ।
गन्धद्रव्याण्युपानीय, पानीयान्तर्निचिक्षिपुः ॥ १११ ॥
कुम्भानम्भोभिरापूर्य, स्फूर्जत्तूर्यरवोर्जितम् ।
क्षिप्त्वा पुष्पाञ्जलीन् शक्राः, स्नात्रमासूत्रयन् विभोः ॥ ११२ ॥

रूक्षाङ्गं गन्धकाषाय्या, व्यालिम्पन्नथ ते विभुम् । पात्रिकान्यस्तगोशीर्षश्रीखण्डद्रवकर्दमैः ॥ ११३ ॥
अभ्यर्चितोऽङ्के दध्रेऽथ, प्रभुरीशानचक्रिणा । सौधर्माधिपवद् भक्त्या, मूर्त्तीः पञ्च वितन्वता ॥ ११४ ॥
शृङ्गोच्छलज्जलान् दिक्षु, चतुरश्चतुरो वृषान् । विधाय विदधे स्नात्रं, सौधर्मेन्द्रोऽप्यथ प्रभोः ॥ ११५ ॥
पूजा-विलेपना-कल्पैरनल्पामोदमेदुरैः । विभुं विभूषयामास, दासवद् वासवः स्वयम् ॥ ११६ ॥
ततश्च पृथिवीपीठविलुठन्मौलिमण्डलः । नमस्कृत्य जगन्नाथं, हृष्टस्तुष्टाव वासवः ॥ ११७ ॥
नमस्ते विश्वनाथाय, विश्वानन्दप्रदायिने । विश्वोत्तरचरित्राय, विश्वताताय तायिने ॥ ११८ ॥
श्रीयुगादिजगन्नाथ !, कृतावतरणे त्वयि । अद्याभूद् भरतक्षेत्रं, पवित्रं त्रिदिवादपि ॥ ११९ ॥
गते काले महामोहमेघव्यूहतमोमये । दिष्ट्या दृष्टा भवन्मूर्तिर्नेत्रकैरवकौमुदी ॥ १२० ॥
अस्मिन् जन्मनि मन्येऽहं, धन्यमद्यतनं दिनम् । यत्र त्वत्पदपद्माभ्यां, शिरः सुरभितं मम ॥ १२१ ॥
श्रीजिनेश ! दिनेशस्त्वमपूर्वप्रथितोदयः । उर्व्या सर्वज्ञ ! कुर्वीथाः, शाश्वतं सुदिनोत्सवम् ॥ १२२ ॥
ईशानेशादथो नाथं, गृहीत्वा पञ्चरूपभाक् । यथाऽऽगतं सुधर्मेन्द्रः, सूतिकासदनं ययौ ॥ १२३ ॥
विनिवृत्य प्रतिच्छन्दं, विभुं तल्पे निवेश्य च । वाससी कुण्डले चात्र, मुमुचे नमुचेरिपुः ॥ १२४ ॥
अस्तन्यपाननिष्ठस्य, निजाङ्गुष्ठशिखालिहः । सुधा सुधाभुजां भर्त्रा, न्यधायि स्वामिनोऽङ्गुले ॥ १२५ ॥
अथ धाम्नि प्रभोः स्वर्ण-रत्न-वस्त्रा-ऽऽसनादिकम् । सारं सांसारिकं वस्तु, सर्वं श्रीदो न्यधापयत् ॥ १२६ ॥
जिनस्य जिनमातुर्वा, योऽवद्यं चिन्तयिष्यति । तन्मूर्द्धा शतधा भावीत्युच्चैर्गिरमुदीर्य सः ॥ १२७ ॥
धात्रीकर्मप्रपञ्चाय, तत्पञ्चाप्सरसो हरिः । आदिदेश सदेशस्थाः, शश्वद् विश्वत्रयीगुरोः ॥ १२८ ॥
॥ युग्मम् ॥
सौधर्मेन्द्रस्तदाऽऽनन्दी, नदीश्वरवरं गतः । स्पष्टमष्टाह्निकामत्र, चक्रे शक्रास्तथाऽपरे ॥ १२९ ॥
परेऽपि सर्वे सर्वेषु, शाश्वतार्हतसद्मसु । यथाविधि महं कृत्वा, यथागतमगुः सुराः ॥ १३० ॥
वृषभश्चिह्नमूरुस्थं, स्वप्ने प्राग् वृषभोऽप्यभूत् । प्रभोर्ऋषभ इत्याख्यां, चक्रतुः पितरौ ततः ॥ १३१ ॥
बाल्यस्थः पाल्यमानोऽथ, सुरस्त्रीभिः स पञ्चभिः । दधौ वृद्धिं समितिभिः, साक्षात् संयमवत् प्रभुः ॥ १३२ ॥

१-२-३ °रौप्य° खंता० ॥ ४ °दुरैः खंता० ॥ ५ °ष्टाम° वतासं० ॥

तद्युग्मजन्मधन्यायाः, कन्याया नाम चक्रतुः । सुमङ्गलेति सम्प्रीतौ, नितरां पितरावथ ॥ १३३ ॥
वत्सरे स्वामिनः पूर्णे, जनकोत्सङ्गसङ्गिनः । सौधर्मेन्द्रोऽन्वयस्थित्यै, सेक्षुयष्टिः पुरोऽभ्यगात् ॥ १३४ ॥
प्रभुर्ज्ञातेन्द्रसङ्कल्पो, जग्राहेक्षुलतां च ताम् । इक्ष्वाकुसंज्ञं कृत्वेति, वंशं भर्तुर्ययौ हरिः ॥ १३५ ॥
विभुरभ्यागतैर्देवैरेव रम्यमरम्यत । नित्यमत्यद्भुतानेकरूपनिर्माणकर्मठैः ॥ १३६ ॥
प्राप्य प्रभुरथाङ्गुष्ठपानावस्थातिगं वयः । अप्रीयत फलैर्दिव्यैस्तैरुत्तरकुरूद्भवैः ॥ १३७ ॥
स्वामी क्रमात् प्रवर्द्धिष्णुः, स्पर्द्धिष्णुः कल्पपादपम् । सौभाग्यरूपभूपालभवनं यौवनं ययौ ॥ १३८ ॥
सेव्ये चन्द्रकुटुम्बेन, पद्मन्यक्कारभीरुणा । प्रभोर्नखमणिव्याजात्, पादपद्मे विराजतः ॥ १३९ ॥
भुजौ भातः प्रभोः श्राद्ध-साधुधर्मधरोद्धृतौ । भुजगेन्द्राविवोन्निद्रनखरत्नाङ्गुलीफणौ ॥ १४० ॥
अन्योन्यमुपमीयन्ते, करांह्रि-नयनादयः । प्रभोर्मुकुरबिम्बेषु, नाभि-हृद्वदनादयः ॥ १४१ ॥
कारुण्यशालितारुण्यचारुण्यङ्गे जगद्गुरुः । अपीप्यत द्युतिपयस्तृषितान् लोकदृग्मृगान् ॥ १४२ ॥
बालकेलिरसोत्तालस्तालद्रुमतलेऽन्यदा । दारकः फलपातेन, कुतोऽपि मिथुनान्मृतः ॥ १४३ ॥
अथान्यमिथुनैर्बाला, परासुपितृ-वल्लभा । जातरूपसदृग्जातरूपश्रीर्नाभयेऽर्पिता ॥ १४४ ॥
साऽपि शापच्युतेव श्रीर्नयनानन्दकौमुदी । नन्दनीव सुनन्दाख्या, नाभिना साऽभिनन्दिता ॥ १४५ ॥
ऽयशीतिं पूर्वलक्षाणि, यावद् भोगफलोदयम् । प्रभुः स्वस्यावधिज्ञानाज्जानन् शक्रकृतोत्सवः ॥ १४६ ॥
सुमङ्गला-सुनन्दे ते, रति-प्रीतिनिभे ततः । निरस्तदर्प-कन्दर्पचर्यः पर्यणयज्जिनः ॥ १४७ ॥
अथादपूर्णषट्पूर्वलक्षा कुक्षौ सुमङ्गला । तौ बाहु-पीठयोर्जीवौ, च्युतौ सर्वार्थसिद्धितः ॥ १४८ ॥
सुनन्दाऽपि कृतानन्दा, तदानीमुदरे दधौ । तौ सुबाहु-महापीठौ, तत एव दिवश्च्युतौ ॥ १४९ ॥
दृष्ट्वा चतुर्दश स्वप्नानथ देवी सुमङ्गला । स्वाम्युक्तचक्रिमातृत्वप्रीता युग्ममसूत सा ॥ १५० ॥
सुतो भरत इत्यस्या, ब्राह्मीति च सुताऽभवत् । सुनन्दा बाहुबलिनं, सुन्दरीमप्यजीजनत् ॥ १५१ ॥
पुनरेकोनपञ्चाशत्पुत्रयुग्मानि जीवसूः । असूत भूतलस्यूतमङ्गलानि सुमङ्गला ॥ १५२ ॥
तदा च स्वामिनो दानाद्भुतादिव विलज्जितैः । कल्पद्रुमैरदृश्यत्वं, तैर्जग्मे युग्मधर्मिणाम् ॥ १५३ ॥
मिथोऽथ मिथुनैः कालयोगात् कलिकदर्थितैः । एत्य विज्ञापितः स्वामी, समन्तादसमञ्जसम् ॥ १५४ ॥
ज्ञानत्रयततो वाचं, ततो वाचंयमाग्रणीः । ऊचे भो ! भूपतिः शास्ति, न्यायवर्त्मातिवर्तिनः ॥ १५५ ॥
सोऽर्थ्यतामिति तैरुक्ते, पिता दातेति सोऽब्रवीत् । नाभिनाऽपि समादिष्टं, भूयस्तं भूपमभ्ययुः ॥ १५६ ॥
वाचा तस्याभिषेकाय, विवेकायत्तचेतसः । ते जग्मुर्युग्मिनस्तूर्णं, पयसे नयसेविनः ॥ १५७ ॥
तदा चासनकम्पेन, शक्रोऽप्यवधिबोधितः । कालं मत्वाऽभिषेकस्य, प्रभोरभ्यर्णमभ्यगात् ॥ १५८ ॥
क्लृप्तकल्याणवेद्यन्तः, सिंहासनजुषः प्रभोः । चक्रे शक्रस्ततो राज्याभिषेकं तीर्थवारिभिः ॥ १५९ ॥
गङ्गावीचीवरैः प्रीतश्रीवरैस्तं शचीवरः । विभुं व्यभूषयद् विश्वभूषणं भूषणैरपि ॥ १६० ॥
युग्मान्यप्यब्जिनीपत्रैस्तोयमानीय चिक्षिपुः । भूषितस्य विभोर्योग्यं, न मूर्ध्नीति पदाब्जयोः ॥ १६१ ॥
तानि मत्वा विनीतानि, मिथुनानीति नीतिमान् । धनदेन विनीताख्यं, शक्रः पुरमचीकरत् ॥ १६२ ॥
विस्तारा-ऽऽयामसम्पूर्णनव-द्वादशयोजनाम् । अयोध्येत्यन्यनामानं, स दिव्यां नगरीं व्यधात् ॥ १६३ ॥

---

१ °क्षा गर्भे सुम° खंता० पाता० ॥ २ सोऽवदत् खंता० पाता० ॥ ३ °भ्ययुः खंता० ॥ ४ °पात्रै° खंता० ॥ ५ °तिवित् खंता० पाता० ॥

विंशतौ पूर्वलक्षाणां, पूर्णायां जन्मतो विभुः । अयोध्यायामभूद् भूपः, प्रजापालनपण्डितः ॥ १६४ ॥
रूक्षस्निग्धेन कालेन, जातेऽग्नौ तरुषु स्वयम् । स्वामिना चक्रिरे कुम्भकारप्रमुखकारवः ॥ १६५ ॥
भरताय कला बाहुबलयेऽश्वादिलक्षणम् । सुन्दर्यै गणितं ब्राह्म्यै, लिपीरप्यादिशत् प्रभुः ॥ १६६ ॥

विधाय विधिवद् विश्वान्, विश्वनाथो नियोगिनः ।
अदैन्यानि च सैन्यानि, राज्यं प्राज्यमपालयत् ॥ १६७ ॥

निःशङ्का निर्विपत्पङ्का, निरातङ्का निरागसः । निरीतयः प्रजास्तस्मिन्, वसुर्वसुमतीपतौ ॥ १६८ ॥
सस्यान्यकृष्टपच्यानि, धेनवः कामधेनवः । विसृष्टवृष्टयः काले, जलदाः फलदा द्रुमाः ॥ १६९ ॥
राजन्वत्यां तदा तेन, भुवनस्वामिनाऽवनौ । जातः शूरोऽपि न क्रूरकराक्रान्तिकृतौ कृती ॥ १७० ॥
आज्ञामात्रे धरित्रीशान्, कुर्वत्यस्य वशंवदान् । स स्मरो यदि सस्मार, केवलं चापचापलम् ॥ १७१ ॥
इत्थं त्रिवर्गसंसर्गसुभगम्भावुकाः प्रजाः । त्रिषष्टिः पूर्वलक्षाणां, जज्ञे पालयतः प्रभोः ॥ १७२ ॥
अन्यदा शिशिराक्रान्तं, जगदानन्दयन्नयम् । वसन्तर्तुर्जगद्भर्तुः, सेवां कर्तुमिवाययौ ॥ १७३ ॥
मधुर्विधाय वासन्तीं, पुष्पाभरणभूषिताम् । चक्षुर्दोषभियाऽकार्षीदलिकज्जलमञ्जुलाम् ॥ १७४ ॥
सहकारं सहुङ्कारं, किल कोकिलकूजितैः । पथिकाः पथि कामस्य, भृत्यं मृत्युममन्यत ॥ १७५ ॥
कन्दर्पो दर्पवानाज्ञाभङ्गवध्यान् वियोगिनः । पश्यत्यन्तर्वणं कुर्वन्नुच्चैश्चम्पकदीपकान् ॥ १७६ ॥
सारो मधुरसैरन्तरुद्भिन्नमधुभाण्डवत् । मधुपानां कलकलैर्व्याकुलो बकुलोऽभवत् ॥ १७७ ॥
पुष्पोल्लासैः सहासेव, सगीतेवालिनिःस्वनैः । वधूरिव मधून्मत्ता, वनलक्ष्मीरलक्ष्यत ॥ १७८ ॥
हल्लीसकलयाद् वल्लीर्वेल्लत्पल्लवपाणिभिः । अनीनटन्नटाचार्यकलया मलयानिलः ॥ १७९ ॥
तदोत्कण्ठितचेतोभिः, प्रेरितो भरतादिभिः । जगाम जनितानन्दं, नन्दनं नाभिनन्दनः ॥ १८० ॥
पिकीनां पञ्चमोच्चारैर्भृङ्गीसङ्गीतनिःस्वनैः । असमैः कुसुमैर्भर्तुर्वनश्रीः स्वागतं व्यधात् ॥ १८१ ॥
पुष्पवेश्मकृतावासे, पुष्पभूषणभूषिते । तत्र पुष्पासनासीने, पुष्पमास इव प्रभौ ॥ १८२ ॥

यशोभिर्वासिते विश्वे, विश्वतः स्वामिनाऽमुना ।
किमेतैरिति पुष्पाणि, चिन्वन्ति स्म विलासिनः ॥ १८३ ॥ युग्मम् ॥

अस्त्रप्रपञ्चं पञ्चेषोरन्यन्नहि सहामहे । इतीव पुष्पावचयं, रचयन्ति स्म सुभ्रुवः ॥ १८४ ॥
कोऽपि प्रियास्तनस्तम्बे, स्तम्बेरममिव स्मरम् । बबन्ध निदधत्पुष्पमालामालानसन्निभाम् ॥ १८५ ॥
प्रियोपनीतं सावज्ञं, श्वासैर्भून्मास्म भस्मसात् । इतीव कुसुमं कान्ता, नासिकान्तादपातयत् ॥ १८६ ॥

पाणिः पुष्पाणि चिन्वत्याः, कस्याश्चित् कोमलाङ्गुलिः ।
उच्चैश्चुचुम्बे रोलम्बकुटुम्बैरम्बुजभ्रमात् ॥ १८७ ॥

कपोलेऽताडयत् काचिदुद्यत्पल्लवपाणिना । अशोकः पादघातस्य, कृतप्रतिकृतौ कृती ॥ १८८ ॥
लताभ्यः पुष्पसर्वस्वं, हृत्वा यात्यङ्गनाजने । स्वनन्तोऽनुपदीभूता, भृङ्गास्तदुपजीविनः ॥ १८९ ॥
पञ्चवर्णसुमस्तोमसर्वाङ्गीणविभूषणाः । विरेजुर्जङ्गमाः कामशस्त्रशाला इव स्त्रियः ॥ १९० ॥
सुस्थितैर्मिथुनैरित्थं, परितः परिवारितः । बभौ त्रिभुवनस्वामी, तदाऽनङ्ग इवाङ्गवान् ॥ १९१ ॥
अथैकतः कृतोत्तालतालै[3]-नादानुगामिभिः । मृदङ्ग-पणवा-ऽऽतोद्य-वेणु-वीणादिनिःस्वनैः ॥ १९२ ॥

---

१ क्रूरः कराक्रान्तकृ° खंता० ॥ २ °ममंसत खंता० पाता० ॥ ३ °लमानानु° खंता० ॥

कीर्णकर्णसुधावर्षं, यति-मान-लयान्वितम् । भावहस्तक-हक्चारी, चारुर्नृत्तमनोहरम् ॥ १९३ ॥
ग्राम-रागोज्ज्वलस्फीतगीतप्रीतजगज्जनम् । सङ्गीतकं प्रभुस्तत्र, प्रीत्याऽत्यर्थं कृतार्थयन् ॥ १९४ ॥
अन्यतः प्रमदोद्दामप्रमदाजनचर्चरीः । परतः पौरलोकानामापानकमहोत्सवम् ॥ १९५ ॥
अपरत्रापि लोलाक्षीर्दोलान्दोलनखेलिनीः ।
पश्यन् प्रमुदितः स्वामी, चिन्तयामासिवानिति ॥ १९६ ॥ पञ्चभिः कुलकम् ॥
किं कदाऽपि मया क्वापि, सुखमीदृक्षमीक्षितम्[१] । ददर्शे विमृशन्नेवमवधिज्ञानतः प्रभुः ॥ १९७ ॥
आत्मनैवानुभूतं यत्, पुरा वैषयिकं सुखम् । अनुत्तरविमानान्तस्त्रिदिवेषूत्तरोत्तरम् ॥ १९८ ॥ युग्मम् ॥
विभुर्विभावयामास, स्वभावं भविनां ततः । जानन्तोऽपि हि मोहेन, जीयन्ते हन्त ! जन्तवः ॥ १९९ ॥
यदनन्तभवाभ्यस्तं, सुखं विषयसम्भवम् । अपूर्वमिव मन्यन्ते, बुभुक्षव इवाशनम् ॥ २०० ॥
दुःखहेतुषु तत्त्वेन, सुखेच्छा विषयेषु या । साऽपि मोहस्य माहात्म्यं, सुधाबुद्धिर्विषेष्विव ॥ २०१ ॥
अर्थ्यमानोऽपि नोपैति, नोपेतोऽप्यवतिष्ठते । स्थितोऽपि न सुखं दत्ते, मत्तेभो विषयव्रजः ॥ २०२ ॥
मल-मूत्रादिपात्रेषु, गात्रेषु मनुजन्मनाम् । सचेतसामसावस्तु, वस्तुतः कैव काम्यता ॥ २०३ ॥
अस्थिखण्डेषु दन्तेषु, कुन्दसुन्दरतामतिम् । मलक्लेत्रेषु नेत्रेषु, नीलोत्पलदलभ्रमम् ॥ २०४ ॥
श्लेष्मादिदोषवृक्षाणां, कानने वनितानने । सुधांशुबुद्धिं बध्नन्ति, विगमी मोहमोहिताः ॥ २०५ ॥
॥ युग्मम् ॥
किञ्चात्र चक्रि-शक्राद्यैरप्यनाक्रान्तविक्रमे । नित्यमत्यन्तमुद्युक्ते, मृत्यौ स्वैरिणि वैरिणि ॥ २०६ ॥
जरायां रूपसर्वस्वहरायामस्खलद्गतौ । यौवनं वनवद् भस्मीकुर्वत्यां पलितच्छलात् ॥ २०७ ॥
अशेषसुखसन्तानकाननाशनिसन्निभे । विविधव्याधिसम्बन्धे, बाधामाधातुमुद्धते ॥ २०८ ॥
विभवे विघ्नसङ्घातघातसम्पातकातरे । उत्पातवातनिर्धूतपताकाञ्चलचञ्चले ॥ २०९ ॥
संसारचारकक्षिप्तो, महामोहतमोहतः । ध्वस्तालोकः कथं लोकः, क्रीडारसवशंवदः ? ॥ २१० ॥
॥ पञ्चभिः कुलकम् ॥
ततः संसारकारान्तर्निवासं प्रति सम्प्रति । विरज्य युज्यते मुक्तेरध्वन्यध्वन्यतैव मे ॥ २११ ॥
तदा पदान्तिकप्राप्तैरथ लोकान्तिकैः सुरैः । समयज्ञोऽपि कल्पज्ञैर्व्यज्ञप्यत जगत्पतिः ॥ २१२ ॥
राज्यवत् प्रथमं नाथ !, धर्मतीर्थं प्रवर्तय । कृतिन् ! कृत्यं जगज्जन्तुहितसार ! जितस्मर ! ॥ २१३ ॥
इति विज्ञप्य यातेषु, तदा तेषु जगत्पतिः । आनन्दी नन्दनोद्यानात्, सदःसदनमासदत् ॥ २१४ ॥
अथाकार्य तदा हर्षभरतो भरतं सुतम् । समं समस्तसामन्त-बाहुबल्यादिनन्दनैः ॥ २१५ ॥
आदिदेश विभुर्वत्स !, भव राज्यधुरन्धरः । भावयन्तो वयं तोषं, ग्रहीष्यामो हि संयमम् ॥ २१६ ॥
विचक्षणः क्षणं वीक्ष्य, विभोर्मुखमवोचत । सादरं भरतः स्वामिसेवारम्भरतस्ततः ॥ २१७ ॥
त्वदग्रे गच्छतः क्षोणिपरागैरङ्गसङ्गिभिः । प्रथते मे यथाऽऽनन्दश्चन्दनैरपि नो तथा ॥ २१८ ॥
प्रीता नित्यं भवत्पादसेवासुखसुधारसैः । स्वामिन् ! साम्राज्यभोगाय, रमते न मतिर्मम ॥ २१९ ॥
जगदे जगदेकाधिनाथेनाथेदमङ्गजः । वत्स ! सेवा पितुः सेयमाज्ञाऽवज्ञायते न यत् ॥ २२० ॥
अङ्गजा अपि ये कुर्युर्गुर्वाज्ञां तेऽत्र नन्दनाः । अन्ये तु स्नेहभाजोऽपि, त्याज्या एव मला इव ॥ २२१ ॥

---

१ °नृत्यम° खंता० ॥ २ °नात्तत्रिदि° पाता० ॥

एकदेहविनिर्माणादधमर्णीकृतैः सुतैः । यशो-धर्ममयं देहद्वयं पित्रोर्वितीर्यते ॥ २२२ ॥
श्रुत्वा सुरा-ऽसुरैर्मान्यामाज्ञामिति जगत्पतेः । न्यग्मुखो भरतस्तस्थावदत्तपुनरुत्तरः ॥ २२३ ॥
हृष्टाः स्वामिसमादिष्टाः, सचिवास्तदनन्तरम् । भरतं परतन्त्रेच्छमभ्यषिञ्चन् पितुः पदे ॥ २२४ ॥
तद्बाहुबलिमुख्यानामपि बाहुबलस्पृशाम् । विभुर्विभज्य भूभागान्, नन्दनानां तदा ददौ ॥ २२५ ॥
ततश्च वार्षिकं दानं, निदानं पुण्यसम्पदाम् । प्रभुः प्रवर्तयामास, वित्तैर्वित्तेशपूरितैः ॥ २२६ ॥

अष्टलक्षाधिकां तत्र, कोटिमेकां च काञ्चनीम् ।
प्रातः प्रारभ्य मध्याह्नं, यावद् देवोऽन्वहं ददौ ॥ २२७ ॥

भागेऽह्नः पश्चिमे चैत्रश्यामाष्टम्यामथ प्रभुः । चन्द्रमस्युत्तराषाढाभाजि भेजे व्रतोद्यमम् ॥ २२८ ॥
व्रताय विपिने गन्तुमथ प्रथमपार्थिवः । याप्ययानं समारोहन्मोहराजपराजयी ॥ २२९ ॥
शिबिकासविकासान्तःश्रद्धाबन्धोद्धुरैर्नरैः । ऊढा प्रौढैश्च गीर्वाणैर्दासवद् वासवादिभिः ॥ २३० ॥
दिव्यैरातोद्यनिर्घोषैर्नृणां जयजयस्वनैः । सिंहनादैर्दिविषदां, मागधध्वनिवर्द्धितैः ॥ २३१ ॥
शब्दाद्वैतमयीं कुर्वन्नुर्वीमुर्वी वहन् मुदम् । विभुर्जम्भारि-रम्भादिनृत्ते दत्तेक्षणः क्षणम् ॥ २३२ ॥
पूर्देशो भृङ्गयन्नङ्गे, जितचम्पकसम्पदि । भरताद्यैः समं स्वामी, सिद्धार्थवनमागमत् ॥ २३३ ॥
॥ विशेषकम् ॥

शिबिकायास्तदोत्तीर्य, किङ्किल्लिद्रुतले द्रुतम् । स्वयं जगदलङ्कारोऽलङ्कारानत्यजद् विभुः ॥ २३४ ॥
शक्रः स्कन्धेऽथ देवस्य, देवदूष्यं न्यवेशयत् । निर्मलं केवलज्ञानाग्रयानमिव मूर्त्तिमत् ॥ २३५ ॥
तीर्थङ्करः कराम्भोजे, भृङ्गतां बिभ्रतः क्षणम् । मूर्ध्नश्चतसृभिः केशानुच्चखानाथ मुष्टिभिः ॥ २३६ ॥
केशाः सुवर्णवर्णेऽङ्गे, सन्तु नीलमणिश्रियः । इत्युक्तः पञ्चमीं मुष्टिमुमुचन्नमुचिद्विषा ॥ २३७ ॥
लज्जया मज्जयन्नीलरत्नानि क्षीरनीरधौ । शक्रेणाथ तदक्षेपि, केशमुष्टिचतुष्टयम् ॥ २३८ ॥
आगत्याथ द्युनाथेन, तुमुले मुकुलीकृते । कृताष्टमतपाः स्वामी, कृत्वा सिद्धनमस्कृतिम् ॥ २३९ ॥
सर्वसावद्ययोगानां, प्रत्याख्यानमुदीरयन् । भवाब्धिपोतश्चारित्रं, तदाऽरित्रमिवासदत् ॥ २४० ॥
नारकाणामपि प्रीतिस्फीतं विरचयन् मनः । तन्मनःपर्ययज्ञानमुत्पेदे त्रिजगत्पतेः ॥ २४१ ॥
चतुःसहस्रसङ्ख्यैश्च, समं भर्त्रा समन्ततः । भूपैः कच्छ-महाकच्छमुख्यैर्दीक्षां तदाऽऽददे ॥ २४२ ॥
स्तुत्वा नत्वा च यातेषु, सुतेषु त्रिदशेषु च । विहर्तुमिह मौनेन, स भूचक्रे प्रचक्रमे ॥ २४३ ॥

प्रभुणा भ्रमता भिक्षा, प्रापि न क्वापि पारणे ।
भिक्षानभिज्ञः स्वर्णादि, तदा लोको ह्यढौकयत् ॥ २४४ ॥

यां निर्वास्य चिरस्यापि, वसन्तीं जनवेश्मसु । यः श्रियं वासयामास, सा भिक्षा किमुपैतु तम् [१] ॥ २४५ ॥

तथाऽप्यनार्तः क्षुत्तृष्णाद्यार्तैः कच्छादिभिः प्रभुः ।
आलोच्यामोचि तस्थे च, गङ्गाप्रस्थे फलाशिभिः ॥ २४६ ॥

अथ कच्छ-महाकच्छसुतौ पूर्वं नियोजितौ । तदा नमि-विनम्याख्यौ, पित्रोः पादान्तमीयतुः ॥२४७॥
अथैतौ प्रेषितौ ताभ्यां, सेवितुं भरतं प्रभुम् । ऊचतुश्चतुरं साभिमानमानसविक्रमौ ॥ २४८ ॥

---

१ कङ्कि॰ खंता॰ पाता॰ ॥ २ चीर्णाष्ट॰ खंता॰ पाता॰ ॥ ३ ॰च्याधोऽवतस्थे पाता॰ ॥
४ ॰रतप्रभुम् खंता॰ पाता॰ ॥

विभुं विहाय नाभेयं, नावां सेवावहे परम् । को हि रोहणमासाद्य, प्रपद्येतापरं गिरिम् ? ॥ २४९ ॥
इति प्रतिज्ञामाधाय, प्रणिपत्य पितृक्रमान् । प्रभुं गत्वा च नत्वा च, तौ व्यजिज्ञपतामिति ॥ २५० ॥
क्षेत्रमात्र्यपि किं तात !, भागेऽस्माकं न भूरभूत् ? ।
विज्ञप्तोऽपीति नैताभ्यां, वाचं वाचंयमो ददौ ॥ २५१ ॥
व्यधत्तामतिभक्त्या तावप्यवक्तरि भर्तरि । सेवामेवान्वहं के वा, हेवाकं मोक्तुमीशते ? ॥ २५२ ॥
बभौ विभुः स्थितो मध्ये, स तत्पाणिकृपाणयोः । परास्तयोरिव शिवपुरद्वारकपाटयोः ॥ २५३ ॥
अपरेद्युः परश्रद्धाधरणो धरणोरगः । अपश्यन्नमि-विनमी, सेवकौ विनमन् जिनम् ॥ २५४ ॥
कौ युवां ? संश्रितौ किं वा, मौनध्यानधनं जिनम् ? । कर्ता किमर्थः कार्यं वामित्युक्तौ भोगिभूभुजा ॥ २५५ ॥
तावूचतुश्चतुर्बाहुविक्रमौ भोगिनां विभुम् । सेवैव सेवकैः कार्या, चिन्ता किं तादृशी प्रभोः ? ॥ २५६ ॥
॥ युग्मम् ॥
एतस्य मौनयुक्तस्य, धनमुक्तस्य सेवया । यद् भवेत् तेन नो कार्यमेकः सेव्यो हि मानिनाम् ॥ २५७ ॥
सेविते तत् किमन्यत्र, निर्धनेऽप्यत्र यत् फलम् ? । दीपे क तज्जगद्दीपे, मेघच्छन्नेऽपि यन्महः ? ॥ २५८ ॥
तयोः फणिपतिः प्रीतः, प्रज्ञप्तिप्रमुखां ददौ । पाठसंसिद्धविद्याष्टचत्वारिंशत्सहस्रिकाम् ॥ २५९ ॥
विद्याः किलैता वैताढ्यमेखलादक्षिणोत्तरे । प्रभावं प्रथयिष्यन्ति, भवतोरित्युवाच च ॥ २६० ॥
प्रभुप्रभावसम्प्राप्तविद्यौ ह्यौजसाविमौ । गतौ वैताढ्यमावेद्य, पितृभ्यां भरताय च ॥ २६१ ॥
वर्षं वर्द्धुन्धराहारो, निराहारोऽप्यथ प्रभुः । भ्रमन् बहुषु देशेषु, क्षुधाक्षामीकृताकृतिः ॥ २६२ ॥
अवधिज्ञानतो ज्ञात्वा, तदा पारणकारणम् । पुरं गजपुरं प्राप, द्विपस्तप्त इवांह्रिपम् ॥ २६३ ॥
॥ युग्मम् ॥
तत्र बाहुबलेः पौत्रः, स्वप्ने सोमप्रभात्मभूः । श्रेयांसो धूसरं मेरुं, क्षीरैरक्षालयत् तदा ॥ २६४ ॥
प्रापि सोमप्रभेणापि, स्वप्नः किल महाभटः । रिपुभ्योऽमोचि रोचिष्णुः, श्रेयांसेनाद्भुतश्रिया ॥ २६५ ॥
अदर्शि भास्करः स्वप्ने, श्रेष्ठिनाऽपि सुबुद्धिना । अतिभास्वान् किल भ्रष्टैः, करैः श्रेयांसयोजितैः ॥ २६६ ॥
विचाराय प्रगे सोमप्रभक्ष्मापसभान्तरे । स्वप्नार्थे तेष्वजानत्सु, मिलितेषु समन्ततः ॥ २६७ ॥
पुरं त्रिभुवनस्वामी, व्योमदेशमिवांशुमान् । विहर्तुं प्रविवेशाथ, धिष्ण्याद्धिष्ण्यान्तरं चरन् ॥ २६८ ॥
अगृह्णति जिने भिक्षां, हस्त्यश्व-वसनादिकाम् । लोलाः कोलाहलं चक्रुः, प्रजाः सार्यव्रजा इव ॥ २६९ ॥
प्रेषितस्तुमुलं ज्ञातुं, प्रत्यागत्य व्यजिज्ञपत् । प्रतिहारः कुमाराय, वेगादागमनं प्रभोः ॥ २७० ॥
नापदस्तापदायिन्यः, प्रभवन्ति प्रभोः पुरः । श्रेयांस इति निर्मुक्तच्छत्रोपानदुपागमत् ॥ २७१ ॥
नमस्कृतप्रभुः सोऽथ, किङ्कर्तव्यविमूढधीः । श्रेयांसः शिश्रिये जातिस्मृत्याऽब्धिरिव वेलया ॥ २७२ ॥
पूर्वं पूर्वविदेहेषु, वज्रसेनजिनाङ्गजः । वज्रनाभोऽभवच्चक्री, सोऽहमेतस्य सारथिः ॥ २७३ ॥
महाव्रतं मया साकमीदृग्मुद्राभृतस्तदा । पार्श्वे पितुरवापायमनपायसुखेच्छया ॥ २७४ ॥
वज्रसेनजिनेन्द्रेण, तदाऽऽदिष्टमिति स्वयम् । भविता व्रजनाभोऽयं, भरते प्रथमो जिनः ॥ २७५ ॥
तदयं स दयाराशिः, पयोराशिगभीरिमा । दिष्ट्या दृष्ट्या मया दृष्टश्चकोरेणेव चन्द्रमाः ॥ २७६ ॥
निश्चित्येदं तदा जानन्, भिक्षाकल्पमनल्पधीः । ददाविक्षुरसं भर्तुः, श्रेयांसस्तत्क्षणागतम् ॥ २७७ ॥

---

१ °प्रभः क्ष्मा° खंतासं० पातासं० ॥ २ °नन्तृपाङ्गजः खंता० ॥

प्रभुणा पाणिपात्रेण, साक्षादिक्षुरसो धृतः । आरूढः शिखया व्योम, जेतुमिन्दुकरानिव ॥ २७८ ॥
तदा ददत् कुमारोऽयं, मुदा रोमाञ्चमेचकः । बभौ मुक्तिश्रिया साक्षात्, कटाक्षैरिव वीक्षितः ॥ २७९ ॥
पुण्यैरिव कुमारस्य, दिवमिक्षुरसैर्गतैः । उत्सवाय समाहूताः, पुरुहूतादयः सुराः ॥ २८० ॥
हतदुन्दुभयो रत्न-पुष्प-गन्धोदकादिम् । विधाय भूतले देवाश्चेलोत्क्षेपमथ व्यधुः ॥ २८१ ॥
प्रभोः शुक्लतृतीयायां, वैशाखेऽजनि पारणम् । तदक्षयतृतीयाख्यं, पर्व सर्वत्र विश्रुतम् ॥ २८२ ॥
किमेतदिति सोत्कर्षं, पृच्छते स्वच्छचेतसे । राज्ञे प्राज्ञेन विज्ञप्तं, प्राग्वृत्तं तेन सूनुना ॥ २८३ ॥

कल्प्या-ऽकल्प्यविचारं च, जातजातिस्मृतिः कृती ।
अपशोकाय लोकाय, श्रेयांसः श्रेयसेऽदिशत् ॥ २८४ ॥

नाथपारणकेनाथ, कुमारजनितेन ते । स्वप्नाः स्पष्टार्थतां प्रापुस्त्रयेऽपि पुरुषत्रये ॥ २८५ ॥
अथ प्रभौ गते पापवारणे कृतपारणे । चकार पारणस्थाने, रत्नपीठं नृपाङ्गजः ॥ २८६ ॥

एतदादिकृतः पीठमिति लोकाय सोऽवदत् ।
जनोऽपि जिनभिक्षायाः, स्थाने तत् तादृशं व्यधात् ॥ २८७ ॥

तदादि त्यक्ततत्त्वेन, तदाऽऽदित्यस्य मण्डलम् । जनेनाजानताऽद्यापि, नित्यं कृत्वाऽपि पूज्यते ॥ २८८ ॥
नाथोऽन्यदा विहारेण, दक्षस्तक्षशिलां पुरीम् । सायं बाहुबलेः प्राप, बहलीदेशमण्डनम् ॥ २८९ ॥
ज्ञात्वा तमागतं बाहुबलिश्चक्रे पुरोत्सवम् । पादारविन्दं वन्दिष्ये, सुप्रातेऽहं प्रभोरिति ॥ २९० ॥
अथाङ्गेनातिरम्येण, भूषणान्यपि भूषयन् । समं समन्तात् सामन्तैः, प्रातरानन्दमेदुरः ॥ २९१ ॥
यावत् पुरन्दरप्रायः, पश्यन् शृङ्गारितां पुरीम् । भगवान् विषयत्रासी, यत्रासीत् तत्र यातवान् ॥ २९२ ॥
॥ युग्मम् ॥

विजहारान्यतस्तावत्, प्रभञ्जन इव प्रभुः । तद्दुःखितं नृपं प्राह, सचिवः शुचिवागथ ॥ २९३ ॥
हृद्ये करोति हृद्येव, देवस्तव सदा पदम् । मा विषादनिषादस्य, सुखदस्योर्वशो भव ॥ २९४ ॥
पदानि पद्म-कुलिशा-ऽङ्कुशाङ्कानि जगद्गुरोः । एतानि तानि भूखण्डमण्डनानि नमस्कुरु ॥ २९५ ॥
सचिवस्य वचः कृत्वा, तथेति पृथिवीपतिः । धर्मचक्रमिह त्रुट्यत्कर्मचक्रः प्रचक्रमे ॥ २९६ ॥
नमोरत्नसपत्नोरुरत्नराजिविराजितम् । तद् विधाय व्यधादेष, स्पष्टामष्टाह्निकामिह ॥ २९७ ॥
अष्टयोजनविस्तीर्णे, चक्रेऽस्मिन् योजनोन्नते । सहस्रारे सहस्राणि, यामिकानां नृपोऽमुचत् ॥ २९८ ॥
ततश्च भगवान् भास्वाँस्तमःशमनकर्मठः । विहरन् म्लेच्छदेशेषु, पङ्कशेषमशेषयत् ॥ २९९ ॥
अथ वर्षसहस्रान्ते, घस्रान्त इव चन्द्रमाः । पुरं पुरिमतालाख्यं, प्राचीमुखमिवागमत् ॥ ३०० ॥

अयोध्याया महापुर्यास्तस्मिन् शाखापुरे स्थितः ।
फाल्गुने मासि कृष्णायां, प्रभुरेकादशीतिथौ ॥ ३०१ ॥

तदानीमुत्तराषाढावस्थिते सितदीधितौ । अवाप केवलज्ञानं, शुक्लध्यानधनो जिनः ॥ ३०२ ॥
ततश्चासनकम्पेन, समीयुस्तत्र वासवाः । अथाकारि चमत्कारि, त्रिदशैर्देशनासदः ॥ ३०३ ॥

---

१ रसं दद° खंता० ॥ २ °नेन जा° पातसं० विना ॥ ३ पुरम् पाता० ॥ ४ °षु, पापपङ्कमशोषयत् खंता० । °षु, कर्मपङ्कमशोषयत् पाता० ॥

प्रविश्य पूर्वद्वारेण, नत्वा तीर्थं च तीर्थकृत् । सिंहासनमलञ्चक्रे, दक्षिणः सप्रदक्षिणम् ॥ ३०४ ॥
यथास्थानं निविष्टेषु, सभालोकेषु वासवः । गत्वाऽन्तरुत्तरद्वारा, चकार त्रिः प्रदक्षिणम् ॥ ३०५ ॥
अथ स्तुत्वा नमस्कृत्य, कृतकृत्यः सुरेश्वरः । प्रभोरुपासनाहेतोरासन्नासनमासदत् ॥ ३०६ ॥
इतश्च भरतो भक्तिभरतो मातरं पितुः । तदाऽगमन्नमस्कर्तुं, स्वकुलस्येव देवताम् ॥ ३०७ ॥
तां च पुत्रवियोगेन, श्रवदश्रुपयःप्लवैः । उन्मीलन्नीलिकाल्लुसदर्शनां जननीं प्रभोः ॥ ३०८ ॥
पौत्रो ज्यायानयं मातर् !, नमति त्वत्पदाम्बुजम् ।
विज्ञप्यैवं नमस्कृत्य, भरतः पुरतोऽभवत् ॥ ३०९ ॥ युग्मम् ॥
अथ पुत्रप्रवासेन, समं प्रोषितसम्मदा । उच्छलच्छोककल्लोलकुल्यया साऽवदद् गिरा ॥ ३१० ॥
वत्स ! स्वच्छन्दमानन्दमेदुरां त्वं श्रितः श्रियम् । मदीयः पुत्रको गात्रमात्रस्तु वनवास्यभूत् ॥ ३११ ॥
शरीरं सुकुमारं तद् , यत् तेन तपसोऽर्पितम् । रम्भास्तम्भो गृहस्थूणास्थाने तद् विनिवेशितः ॥ ३१२ ॥
क तास्तस्य सुरस्त्रीणामास्पदं सुखसम्पदः ? । केदानीं शीत-वातादिपुष्टा कष्टपरम्परा ? ॥ ३१३ ॥
नैवासनं न वसनं, न गृहं न परिच्छदम् । अवगच्छामि वत्सस्य, जीवाम्यद्यापि पापिनी ॥ ३१४ ॥
तामित्थमथ शोचन्तीमपुञ्चन्तीं कदाग्रहम् । अभ्यधाद् भरतो मातस्तातस्य त्वं जनन्यसि ॥ ३१५ ॥
विज्ञाऽपि किमविज्ञेव, सुतवात्सल्यमोहिता । विचिन्तयसि तातेऽपि, मातर् ! मानवमात्रताम् ? ॥ ३१६ ॥
स हित्वा लौकिकीं लक्ष्मीं, लिप्सुर्लोकोत्तरां श्रियम् ।
यद् विधत्तेऽधुना मातः !, फलं त्वं तस्य पश्यसि ॥ ३१७ ॥
इत्यामिति समासाद्य, वाक्सुधां वसुधाभुजः । मरुदेवाऽभवद् यावन्निर्विषादविषोदया ॥ ३१८ ॥
ज्ञापितौ वेत्रिणा तावत्, पुरुषौ द्वौ समीयतुः । तयोराद्योऽवदन्नाम्ना, यमको घटिताञ्जलिः ॥ ३१९ ॥
दिष्ट्याऽद्य वर्धसे देव !, कानने शकटानने । उत्पेदे केवलज्ञानं, युगादिजगदीशितुः ॥ ३२० ॥
व्यजिज्ञपद् द्वितीयोऽथ, ख्यातः शमकसंज्ञया । आविरासीत् प्रभो ! चक्ररत्नमद्यास्त्रमन्दिरे ॥ ३२१ ॥
महःसहजमाहात्म्यविध्वस्तात्मविरोधिनः । पूर्वं प्रभोर्वा कुर्वेऽहमर्चां चक्रस्य वा स्वयम् ? ॥ ३२२ ॥
क वा जगत्त्रयत्राता, तातः शांतितकल्मषः ? । क चैनसां निधिश्चक्रं, भुवनैकभयङ्करम् ? ॥ ३२३ ॥
पारितोषिकदानेन, विसृज्य मुदितौ च तौ । मरुदेवामुवाचैवं, भरतो हर्षनिर्भरः ॥ ३२४ ॥
॥ विशेषकम् ॥
मातः ! सुतवियोगेन, त्वं सदा दुःखतः पुरा । रूक्षाक्षरं समादिक्षः, परं पश्य सुतश्रियम् ॥ ३२५ ॥
पितामहीं महीनाथस्तदेत्युक्त्वाऽधिरोप्य च । कुञ्जरे स्वयमारोहत्, कृतकौतुकमङ्गलः ॥ ३२६ ॥
अथ व्रजन् गजारूढो, मरुदेवीमुवाच सः । मातराकर्णयतामेतत्, पुत्रस्य विभुताद्भुतम् ॥ ३२७ ॥
रूप्य-कल्याण-माणिक्यमयवप्रत्रयावृतम् । देशनासदनं चक्रुः, शक्रादेशेन नाकिनः ॥ ३२८ ॥
अयं वृन्दारकैर्वन्दिवृन्दैरिव जयध्वनिः । त्वत्पुत्रस्य पुरो मातः !, क्रियमाणो विभाव्यते ॥ ३२९ ॥
अयमम्भोधरध्वानगभीरो दुन्दुभिध्वनिः । मातस्तनोति सोत्सेकाः, केकाः काननकेकिनाम् ॥ ३३० ॥
श्रुत्वेति मरुदेवायास्तदाऽऽनन्दाश्रुवारिभिः । नेत्रयोर्नीलिकातङ्कपङ्कः प्रक्षालितः क्षणात् ॥ ३३१ ॥

---

१ °वाशनं खंता० ॥ २ °श्चन्तीं क° वता० ॥ ३. द्वावुपेयतुः खंता० पाता० ॥ ४ शान्तित° पाता० ॥ ५ ध्यात्वेति तुष्टिदानेन खंता० ॥ ६ °स्तदित्यु° वता० पाता० ॥ ७ सुतस्य खंता० ॥

स्वयमेवाथ पश्यन्त्यास्तस्यास्तद् वैभवं विभोः । विलीनं मनसा सद्यः, परानन्दामृतद्रवैः ॥ ३३२ ॥
तदैव केवलज्ञानं, तस्याः प्रादुरभूत् ततः । प्राप्येव तपसा मातुः, प्रभुणा प्राभृतीकृतम् ॥ ३३३ ॥
अन्तकृत्केवलीभूय, लोकान्तमथ साऽगमत् । मन्ये मुक्तिपुरद्वारमपवारयितुं पुरः ॥ ३३४ ॥
अस्यामस्यावसर्पिण्यां, प्राच्यसिद्धस्य तद् वपुः । त्रिदशैर्निदधे तूर्णं, सत्कृत्य क्षीरनीरधौ ॥ ३३५ ॥
ततः प्रभृति लोकेषु, वृत्तं मृतकपूजनम् । सर्वो हि दर्शितां पूर्वैर्वर्तनीमनुवर्तते ॥ ३३६ ॥

व्याप्तोऽथ हर्ष-शोकाभ्यां, वद्धस्पर्धं धराधवः ।
निशां[1] प्रान्त इव ध्वान्त-प्रकाशाभ्याममभूत् समम् ॥ ३३७ ॥

पत्तिर्विमुक्तच्छत्रादिर्दूरादूरीकृताञ्जलिः । देशनासदनस्यान्तः, प्रविवेश विशांपतिः ॥ ३३८ ॥
त्रिश्च प्रदक्षिणीकृत्य, नमस्कृत्य जगद्गुरुम् । यथास्थानं निविष्टोऽथ, प्रहृष्टो भरतेश्वरः ॥ ३३९ ॥
अथा[2]ऽऽयोजनगामिन्या, सर्वभाषानुरूपया । गिरा जगद्गुरुस्तत्र, विदधे धर्मदेशनाम् ॥ ३४० ॥
असावसारसंसारवनसेचनसारणिः । दूरेण युज्यते त्यक्तुं, मोहनिद्रा महात्मनाम् ॥ ३४१ ॥
मोहभिल्लेशपल्लीव, तदिदं भवकाननम् । पुण्यरत्नहरैः क्रूरैश्चौरै रागादिभिर्वृतम् ॥ ३४२ ॥
अनाविले कुले जन्म, दुर्लभेभ्यो[3]ऽतिदुर्लभम् । चिन्तारत्नमिव प्राप्य, हार्यते किं मुधा बुधाः ! ? ॥ ३४३ ॥
यतध्वमपवर्गाय, तन्निर्विण्णा भवाद् यदि । स हि सर्वापदां पारमपारानन्दमन्दिरम् ॥ ३४४ ॥
प्राप्यते प्राणिभिर्नायं, धर्मस्याराधनां विना । किं कदापि क्वचिद् दृष्टस्तरुहीनः फलोद्गमः ? ॥ ३४५ ॥

तस्य सुश्रमणो[4] वा स्यान्मूलोत्तरगुणोत्तरः ।
श्राद्धो वाऽऽराधकः सम्यक्, सम्यक्त्वा[5]ऽणुव्रतादिभृत् ॥ ३४६ ॥

एतौ मोक्षस्य पन्थानौ, मन्थानौ भववारिधेः । कामं श्रामण्य-गार्हस्थ्यधर्मौ शाश्वतशर्मदौ ॥ ३४७ ॥
यानि चक्रिपदादीनि, स्पृहणीयानि देहिनाम् । असौ कुसुमसम्पत्तिस्तस्य धर्ममहीरुहः ॥ ३४८ ॥
फलं तु परमानन्दरसनिःष्यन्दसुन्दरम् । महोदयमयं किञ्चिल्लोकोत्तरमनश्वरम् ॥ ३४९ ॥
श्रुत्वेति देशनां भर्तुर्भरतस्याङ्गजन्मभिः । शतैः पञ्चभिरानन्दान्नप्तृभिः सप्तभिः शतैः ॥ ३५० ॥
तथा सोदरया ब्राह्म्या, परब्रह्मार्पितात्मभिः । तैस्तैर्ऋषभसेनाद्यैः, साग्रहैर्जगृहे व्रतम् ॥ ३५१ ॥
॥ युग्मम् ॥
दीक्षां तदाऽऽददे किञ्च, मरीचिश्चक्रिनन्दनः । सादरं सुन्दरी किन्तु, चक्रिणा वारिता व्रतात् ॥ ३५२ ॥

व्रतिनः पुण्डरीकाद्याः, साध्व्यो ब्राह्मीपुरःसराः ।
श्राद्धाः सोमात्मजप्रष्ठाः, श्राविकाः सुन्दरीमुखाः ॥ ३५३ ॥

इत्थं चतुर्विधः सङ्घः, स्थापितः प्रभुणा तदा । पूज्यतेऽद्यापि विश्वेऽस्मिन्, देव-दानव-मानवैः ॥ ३५४ ॥
श्रीपुण्डरीकमुख्यानां, यतीशानां जगद्गुरुः । ततश्चतुरशीतेरप्यादिदेश पदत्रयीम् ॥ ३५५ ॥
तेऽप्युत्पाद-व्यय-ध्रौव्यरूपां प्राप्य पदत्रयीम् । वितेनुरद्भुतप्रज्ञा, द्वादशाङ्गानि लीलया ॥ ३५६ ॥
शक्रानीतैरथो दिव्यैस्तूर्णं चूर्णैर्जगत्प्रभुः । अनुयोग-गणानुज्ञे, यच्छँस्तानभ्यषिञ्चत ॥ ३५७ ॥
जातेऽथ पौरुषीकाले, सकलैर्निस्तुषाक्षतैः । कृतः समङ्गलाचारं, वलिः पूर्वदिशाऽविशत् ॥ ३५८ ॥

---

१ निशाप्रा° खंता० ॥ २ अथ यो° खंता० ॥ ३ °भ्योऽपि दुर्ल° खंता० पाता० ॥
४ °श्रवणो वता० ॥ ५ °त्त्वादिम° वता० ॥

क्षिप्तः पुरः सुरैः सोऽर्धमर्धार्धं चक्रिणा पुनः । यथाविभागमन्यैश्च, जगृहे गृहमेधिभिः ॥ ३५९ ॥
अथ द्वितीयपौरुष्यां, देवच्छन्दं गते प्रभौ । पुण्डरीकमुनेर्व्याख्यां, श्रुत्वा जग्मुर्जना गृहान् ॥ ३६० ॥
सदा गोमुखयक्षेण, देव्या चाऽप्रतिचक्रया । अमुक्तसन्निधिः स्वामी, सर्वातिशयभाजनम् ॥ ३६१ ॥
पावनीमवनीं कुर्वन्, कोटिदैवतसेवितः । नानास्थानान्यथाक्रामन्, विजहारान्यतस्ततः ॥ ३६२ ॥
॥ युग्मम् ॥

इति ज्ञानोद्योतप्रशमितसमस्तान्तरतमाः,
क्रमात् क्रामन्नुर्वीतलमतुललोकम्पृणगुणः ।
स्फुरन्मार्गालोकं सकलमपि लोकं विरचयन्,
विवस्वान् विश्वाब्जे कृतसुकृतलक्ष्मीं जिनपतिः ॥ ३६३ ॥

**॥ इति श्रीविजयसेनसूरिशिष्यश्रीमदुदयप्रभसूरिविरचिते श्रीधर्माभ्युदयनाम्नि श्रीसङ्घपतिचरिते लक्ष्म्यङ्के महाकाव्ये श्रीऋषभस्वामि-जन्म-व्रत-ज्ञानवर्णनो नाम तृतीयः सर्गः ॥**

[3] या श्रीः स्वयं जिनपतेः पदपद्मसद्मा, भालस्थले सपदि सङ्गमिते समेता ।
श्रीवस्तुपाल ! तव भालनिभालनेन, सा सेवकेषु सुखमुन्मुखतामुपैति ॥

॥ ग्रन्थाग्रम् ३६८ । उभयम् ९४५ ॥

---

१ °सः पतन् सुरैः खंता० पाता० ॥ २ °लतिलकलो° खंता० ॥ ३ श्लोकोऽयं पाता० प्रतौ द्वितीयसर्गप्रान्ते वर्त्तते ॥ ४ ग्रन्थाग्रम् ३६५ । उभयं ९३३ ॥ इति पाता० ॥

## चतुर्थः सर्गः ।

इतश्च भरतश्चक्री, शस्त्रागारगतः स्वयम् । भक्त्या चक्रं नमश्चक्रे, क्षत्रप्रत्यक्षदैवतम् ॥ १ ॥
पूजां नित्यं वितन्वानो, नवनैवेद्यमेदुराम् । अष्टाह्निकोत्सवं चक्रे, तत्रैव निवसन्नसौ ॥ २ ॥
अथ प्रस्थानिके लग्ने, कृतप्रस्थानमङ्गलः । अनुचक्रं दिशि प्राच्यां, करिरत्नेन सोऽचलत् ॥ ३ ॥
छत्र-चर्मा-ऽश्व-सेनानी-खड्ग-दण्ड-पुरोधसः । कुटुम्बी मणि-काकिण्यौ, वर्धकिश्च नृपानुगः ॥ ४ ॥
चचाल रत्नस्तोमोऽयं, देवताकृतसन्निधिः । दिगन्तभूपतीनां तु, चकम्पे हृदयावनिः ॥ ५ ॥
॥ युग्मम् ॥
चेले समं ततस्तेन, सामन्तैश्च समन्ततः । सितांशुनेव नक्षत्रैः, स्फुरत्तेजोमयात्मभिः ॥ ६ ॥
तरङ्गैरिव पाथोधेस्तुरङ्गैर्वायुचञ्चलैः । चलितं कलितोत्साहैः, प्रतिकूलेऽप्यभङ्गुरैः ॥ ७ ॥
अथ प्रतस्थे वेगेन, हास्तिकं गर्जितोर्जितम् । प्रत्यर्थिक्षितिभृत्तेजोदाववारिदमण्डलम् ॥ ८ ॥
निजानाकारयन्तोऽथ, कारयन्तोऽरितर्जनम् । ध्वजाञ्चलैश्चलैश्चेलुः, समेनैव पथा रथाः ॥ ९ ॥
अनुचक्रं व्रजन्तीव, द्विगव्यूतिप्रयाणकैः । तीरे नीरेशितुः प्राप, पतिप्रीत्येव वाहिनी ॥ १० ॥
तत्र वर्धकिरत्नेन, निर्मितानमितश्रियः । आवासानावसन्ति स्म, सैनिकाः स्मेरविस्मयाः ॥ ११ ॥
चक्रे पौषधशालां च, विशालां रत्नशालिनीम् । वर्धकिर्वर्धितानन्दश्चक्रिणः पुण्यपुञ्जवत् ॥ १२ ॥
तस्यामुत्तीर्य सद्वीर्यः, कुञ्जराद् राजकुञ्जरः । प्रविवेश नभोदेशमिवार्कः पूर्वपर्वतात् ॥ १३ ॥
दर्भसन्दर्भनिष्पन्नसंस्तरे स्रस्तपातकः । उपवासत्रयं चक्रे, तत्र वक्रेतराशयः ॥ १४ ॥
अथ प्रथितचातुर्यस्तुर्येऽहनि महामहाः । सुगन्धिभिर्जलैः स्नातो, बली बलिविधिं व्यधात् ॥ १५ ॥
सर्वाण्यस्त्राण्युपादाय, शक्रदायादविक्रमः । अथारूढो रथं चक्री, गरुत्मन्तमिवाच्युतः ॥ १६ ॥
नाभेयभू रथं नाभिद्वयसे पयसि स्थिरम् । विरचय्य समुद्रान्तः, समुन्मुद्रितकार्मुकः ॥ १७ ॥
सौवर्णं विस्फुरद्वर्णं, नामाङ्कितमथो शरम् । पुङ्खमध्यमुखाधीशसुपर्णभुजगासुरम् ॥ १८ ॥
दिशि मागधतीर्थस्य, पत्युरत्युज्ज्वलाकृतिम् । क्ष्मापश्चिक्षेप साक्षेपं, विद्युद्दण्डमिवाम्बुदः ॥ १९ ॥
॥ विशेषकम् ॥
सभायां मागधेशस्य, पक्षसूत्कारदारुणः । स चेषुर्वेगसम्पन्नः, पन्नगारिरिवापतत् ॥ २० ॥
अथ भ्रुकुटिभीमास्यः, सलास्याधरपल्लवः । बालार्कशोणदृक्कोणः, प्राह मागधतीर्थपः ॥ २१ ॥
जिघृक्षुः को हरेर्दंष्ट्रां?, कः क्षेप्ता ज्वलने पदम्? । भ्रान्तारघट्टचक्रारमध्ये कः कुरुते करम्? ॥ २२ ॥
क एष मयि निःशेषशस्त्रविस्तृतकौशले । अक्षिपन्मार्गणं मृत्युमार्गमार्गणदूतवत्? ॥ २३ ॥
इत्युक्तस्थौ समं वीरैर्धीरैः कोपातिपाटलैः । स निस्त्रिंशैः स्फुरद्धूमैर्ज्वालावद्भिरिवानलः ॥ २४ ॥
अथ व्यालोकयामास, तन्मन्त्री तस्य पत्रिणः । अक्षराणि फले दूतजिह्वायामिव शुद्धधीः ॥ २५ ॥

---

१ °वर्णवि° खंता० ॥

**वृषभ**स्यादिदेवस्य, सूनु**र्भरत**चक्रभृत् । इत्यादिशति वो दण्डं, दत्त राज्ये स्पृहा यदि ॥ २६ ॥
वर्णानिमानमात्येन्द्रः, प्रबलोऽप्यवलोक्य सः । मुमोच मदमुद्दामः, प्रेक्ष्य मन्त्रमिवोरगः ॥ २७ ॥
पतिं प्रति प्रतिज्ञातत्यागहेतोरदोऽवदत् । स्वामिन् ! विमुञ्च संरम्भमम्भःपतिरिव प्रगे ॥ २८ ॥
असावसमशौडीर्यश्चक्री भूचक्रभूषणम् । **भरतो भरत**क्षेत्रपतिश्चिक्षेप सायकम् ॥ २९ ॥
एतस्य भागधेयानि, **मागधेश** ! विरेजिरे । प्रतिवासरवर्द्धीनि, स्पर्द्धीनि प्रथमेन्दुना ॥ ३० ॥
अनल्पोऽपि हि कल्पान्ते, क्षीयते क्षीरनीरधिः । सुपर्वपर्वतः सोऽपि, कम्पतेऽहर्पतिः पतेत् ॥ ३१ ॥
पोत्री धात्रीतलं मुञ्चेत्, पविश्छविमथ त्यजेत् । अङ्गभङ्गमसौ किन्तु, भजेन्नहि महाभुजः ॥ ३२ ॥
अस्मै षण्मेदिनीखण्डमण्डनाय महीभुजे । दण्डमुद्दण्डकोदण्डदोर्दण्डाय प्रयच्छ तत् ॥ ३३ ॥
निशम्य सम्यगित्येष, वचनं सचिवेशितुः । समं भुजाभृतां तत्या, तत्याज परुषां रुषम् ॥ ३४ ॥
तत्काण्डदण्डं दण्डं च, समादाय समागतः[१] । नत्वा श्री**भरतं** वाचमित्युवाच स **मागधः** ॥ ३५ ॥
ममैव पुण्यनैपुण्यं, ममैव प्रगुणा गुणाः । तेजस्वी यस्य नाथस्त्वमम्भोजस्येव भास्करः ॥ ३६ ॥
अतः परं गतः पारं, सिन्धोरप्यस्मि ते वशः । जानीहि मां हिमांशुश्रीश्चकोरमिव सेवकम् ॥ ३७ ॥
तं विसृज्य प्रसन्नेन, रथोऽथ पृथिवीभुजा । जवादवाल्यताम्भोधेः, संरम्भाच्च मनोरथः ॥ ३८ ॥
प्राप्तोऽथ क्ष्मापकोटीरः, कटकं जितकण्टकः । **मागधाधीश**मुद्दिश्य, स्पष्टामष्टाहिकां व्यधात् ॥ ३९ ॥
अथानुचक्रं चलिता, चक्रवर्तिचमूस्तदा । तटं जगाम सङ्ग्रामदक्षिणा दक्षिणोदधेः[३] ॥ ४० ॥
**वरदामाधिनाथो**ऽपि, तत्र **मागधनाथ**वत् । विगृह्य जगृहे दण्डमखण्डं चक्रवर्तिना ॥ ४१ ॥
विहिताष्टाहिकस्तत्र, चक्रमार्गानुगः क्रमात् । विपश्चित् पश्चिमं प्रापत्[४], तीरं नीरनिधेरयम् ॥ ४२ ॥
प्रभासान्द्रः **प्रभासेन्द्रं**, जित्वा तत्रापि पूर्ववत् । चिन्तारत्न-शिरोरत्न-सुवर्णादीन्यदण्डयत् ॥ ४३ ॥
तत्कृताष्टाहिकः[५] श्रीमाननुचक्रं चलद्बलः । ययौ चक्री महासिन्धु**सिन्धो**र्दक्षिणरोधसि ॥ ४४ ॥
पूर्ववत् पौषधागारे, विरचय्याष्टमं तपः । असावसाधयद् वेगादेव तां **सिन्धुदेवताम्** ॥ ४५ ॥
अथ सा नभसाऽभ्येत्य, रभसा **भरतेश्वरम्** । ऊचे तवाहं राजेन्दो !, किङ्करेव करोमि किम् ? ॥ ४६ ॥
अथो यथावदाधाय, प्राभृतं सा भृतं श्रिया । जगाम चामरीभूतमुक्ताताडङ्कदीधितिः ॥ ४७ ॥
तत्रापि तापितारातिर्विहिताष्टाहिकः क्रमात् । प्राचीं प्रति चचालायं, चक्रानुचरसैनिकः ॥ ४८ ॥
तटीर्बिभ्राणमद्वैताः, **वैताढ्य**मगमन्नगम् । **भरता**र्धद्वयीसीमारूपं **भरत**भूपतिः ॥ ४९ ॥
दक्षिणेऽथ नितम्बेऽस्य, स्तम्बेरममनोरमाम् । चमूममूमुचदमूममूढक्रमविक्रमः ॥ ५० ॥
राजाऽष्टमं तपस्तेने, तेनाथ चलितासनः । आययौ मङ्क्षु **वैताढ्यकुमारो**ऽवधिबोधितः ॥ ५१ ॥
प्रौढानि ढौकयित्वाऽथ, ढौकनान्येष चक्रिणे । अद्यादि तव दासोऽहमित्युदित्वा जगाम च ॥ ५२ ॥
प्रकल्पिताष्टमतपःपारणेनाथ भूभुजा । अष्टाह्निकोत्सवादूर्द्धमादिश्यत चमूपतिः ॥ ५३ ॥
**सुषेण** ! गच्छ **वैताढ्य-सिन्धु**दक्षिणनिष्कुटम् । शाधि निर्बाधमुत्तीर्य, निम्नगां चर्मरत्नतः ॥ ५४ ॥
इत्यादेशमथासाद्य, माद्यत्करिकुलाकुलैः । सार्धमर्धीकृतैः सैन्यैः, **सुषेणो** निम्नगामगात् ॥ ५५ ॥
नदीमदीनसत्कर्मा, चर्मानद्धेन वर्त्मना । अथोत्ततार सेनानी, रसेनानीतसम्मदः ॥ ५६ ॥

---

१ **किञ्चिद्, भ°** खंता० ॥ २ **समागधः** वता० ॥ ३ **°क्षिणाम्बुधेः** खंता० पाता० ॥ ४ **°प, तीरं** पाता० ॥ ५ **°ष्टाह्निकः** खंता० पाता० । एवमग्रेऽपि ॥

सिंहलान् सिंहतुल्यौजा, बर्बरान् गर्वपर्वतः । यवनान् यवनाश्वश्रीः, कालः कालमुखान् रणे ॥ ५७ ॥
अपरानपि राजश्रीजनको योनकादिकान् । पराजिग्ये सुखेनैव, सुषेणध्वजिनीपतिः ॥ ५८ ॥
॥ युग्मम् ॥
जित्वेति सिन्धुमुत्तीर्य, कीर्यमाणयशा जनैः । चक्रिणो ढौकयाञ्चक्रे, तद्दण्डान् दण्डनायकः ॥ ५९ ॥
तत्तमिस्रागुहाद्वारकपाटोद्घाटनाय सः । आदिष्टश्चक्रिणा चक्रे, गत्वा तत्राष्टमं तपः ॥ ६० ॥
कृतमालाभिधं देवमथोद्दिश्य चमूपतिः । तमिस्राकन्दरद्वारि, वितेनेऽष्टाहिकामहं ॥ ६१ ॥
हयारूढः प्रणम्याथ, कपाटे कन्दरामुखे । जघान दण्डरत्नेन, करेणेव तमोंऽशुमान् ॥ ६२ ॥
कपाटे अपि ते सद्यो, दण्डघातेन रंहसा । पश्चादभूतां वीरस्य, पक्षद्वयबले इव ॥ ६३ ॥
वाजिनं विनिवर्त्याथ, प्रतिलोमं चमूपतिः । राज्ञे विज्ञपयामास, कपाटोद्घाटनक्रियाम् ॥ ६४ ॥
सिन्धुरस्कन्धमारूढः, पुरतो भरतेश्वरः । मणिरत्नं समारोप्य, तमःशमनहेतवे ॥ ६५ ॥
प्रविवेश गुहागर्भं, समं निजचमूचरैः । तारकानिकरैः साकमभ्रान्तरिव चन्द्रमाः ॥ ६६ ॥ युग्मम् ॥
मार्गे चैकोनपञ्चाशन्मण्डलानि चकार सः । लोकालोकाय काकिण्या, वाम-दक्षिणपक्षयोः ॥ ६७ ॥
उन्मग्नां च निमग्नां च, नद्यौ वीक्षितवानथ । तरत्यश्माऽपि पूर्वस्यां, नान्यस्यां तूलमप्यहो ! ॥ ६८ ॥
बद्धया वर्धकेर्बुद्ध्या, पद्यया सोऽनवद्यया । समुत्ततार ते नद्यौ, यमभ्रूभङ्गभङ्गुरे ॥ ६९ ॥
अथोत्तरगुहाद्वारकपाटप्रत्तनिर्गमः । सचक्रः स व्रजन् रेजे, सभानुरिव वासरः ॥ ७० ॥
स तां गुहामतिक्रम्य, भरतार्धमथोत्तरम् । विवेश जेतुं कान्तारमिव सिंहोऽतिरंहसा ॥ ७१ ॥
तत्र चापातमात्रेऽपि, जनतात्रासहेतवः । मानिनो धनिनः शूराः, क्रूराकार-पराक्रमाः ॥ ७२ ॥
कालाः कालायसेनेव, क्लृप्ताङ्गा भिल्लभूभुजः । अदृष्टपूर्वाभिभवा, वसन्त्यापातसंज्ञकाः ॥ ७३ ॥
॥ युग्मम् ॥
किरातैरथ युद्धाय, सन्नद्धायतपत्तिभिः । चक्रिणः कृपणीचक्रे, चमूचक्रं रणाङ्गणे ॥ ७४ ॥
ततः सुषेणसेनानीः, सेनानीरनिधेर्विधुः । तुरङ्गरत्नमारूढः, खङ्गरत्नकरोऽचलत् ॥ ७५ ॥
तं समायान्तमालोक्य, भिल्लाः सम्मुखगामिनः । पतङ्गा इव रङ्गन्तः, प्रदीपस्य विरेजिरे ॥ ७६ ॥
सौवर्णं फलकं बिभ्रत्, कालकूरासिभासुरम् । सुषेणोऽभाजितं दीप्त्या, दिनेशमिव साङ्गजम् ॥ ७७ ॥
सोढुं प्रतापमेतस्य, क्षमायामक्षमा अमी । सिन्धोस्तीरगता गोत्रदेवताराधनं व्यधुः ॥ ७८ ॥
तेषामाराधनेनाथ, सुरा मेघमुखाभिधाः । एत्य प्रादुरहो वत्साः !, किमारब्धमिदं मुधा ? ॥ ७९ ॥
दूरे वयमयं जेतुं, शक्रेणापि न शक्यते । अलङ्घ्यशासनश्चक्री, पृथिवीपाकशासनः ॥ ८० ॥
तथापि वयमेतस्य, युष्माकमनुरोधतः । उपसर्गं करिष्याम, इत्युक्त्वा ते तिरोऽभवन् ॥ ८१ ॥
अथ मेघमुखैर्देवैर्घनडम्बरमम्बरे । विचक्रे चक्रिसैन्योर्द्ध्वं, दिगन्तातङ्ककारणम् ॥ ८२ ॥
रसन्तो विरसं मेघा, मुक्तं वार्भेजलैः समम् । उद्वमन्तो व्यलोक्यन्त, वाडवाग्निं तडिच्छलात् ॥ ८३ ॥
धारामुशलपातेन, खण्डयन्त इव क्षितिम् । राक्षसा इव तेऽभूवन्, घना भीषणमूर्तयः ॥ ८४ ॥
चर्मरत्नमथो चक्री, यावद्द्वादशयोजनीम् । पाणिस्पर्शेन विस्तार्यारोहत् सह चमूचरैः ॥ ८५ ॥
छत्ररत्नमथाप्युच्चैस्तावन्मात्रं नभोङ्गणे । चर्मरत्नस्थलोकानामुपरिष्टाद् व्यजृम्भत ॥ ८६ ॥

---

१ योनका° खंता० ॥ २ सार्धम° खंता० ॥

छत्रदण्डोपरिन्यस्तमणिरत्नप्रभावतः । शममन्तस्तमः प्राप, सम्पुटे च्छत्र-चर्मणोः ॥ ८७ ॥
प्रातरुप्तानि धान्यानि, गृहिरत्नेन चर्मणि । निष्पत्तिमापुः सन्ध्यायां, तथा शाक-फलान्यपि ॥ ८८ ॥
अन्नैः शाकैः फलाद्यैश्च, गृहिरत्नप्रभावतः । सद्यः प्रतिगृहं प्राप्तैर्लोकः स्वर्गीव सोऽभवत् ॥ ८९ ॥
तरदण्डमिवालोक्य, तल्लोकैः सम्पुटं जले । भुवनेषु कृता शङ्के, ब्रह्माण्डमिति कल्पना ॥ ९० ॥

सप्तमेऽह्नि व्यतिक्रान्ते, चक्री चिन्तामिति व्यधात् ।
प्रत्यनीकं ममाप्युच्चैः, प्रत्यनीको नु कोऽम्बुदः ? ॥ ९१ ॥

अथ तस्य प्रभोश्चित्तानुवर्तनपराः सुराः । सहस्राः षोडशाप्युद्यद्भ्रुकुटीभङ्गभीषणाः ॥ ९२ ॥
गत्वा **मेघमुखान्** देवान्, नेत्रारुणविभानिभात् । उद्गिरन्त इव क्रोधमिदं वचनमूचिरे ॥ ९३ ॥

अरे रे ! केन वो दत्ता, दुर्दैवेनेदृशी मतिः ? ।
चक्री न यदि दृष्टोऽयं, तत् किं नाम्नाऽपि न श्रुतः ? ॥ ९४ ॥

यात तद् दूरतः क्रूराः![1], नैव यावदयं प्रभुः । दम्भोलिनेव चक्रेणाभिहन्ति भवतां शिरः ॥ ९५ ॥
इति यक्षवचः श्रुत्वा, तैर्द्रुतं विद्रुतं ततः । दुग्धधौतमिव व्योम, वैमल्यमभजत् तदा ॥ ९६ ॥
ढौकने स्वर्ण-माणिक्य-गज-वाजिव्रजानथ । आदाय म्लेच्छपाः सर्वे, **भरतं** शरणं ययुः ॥ ९७ ॥
**भरतो**ऽपि प्रसद्यैतान्, विससर्ज महाशयः । नतेषु पक्षपातित्वमुत्तमानां हि लक्षणम् ॥ ९८ ॥
**सिन्धोरथोत्तरं** वार्धिगिरिसीमान्तनिष्कुटम् । जित्वा **सुषेण**तश्चक्री, ययौ **क्षुद्रहिमालयम्** ॥ ९९ ॥
दक्षिणेऽथ नितम्बेऽस्य, न्यस्य सैन्यं नरेश्वरः । व्यधादुद्दिश्य **हिमवत्कुमारं** स तपोऽष्टमम् ॥ १०० ॥
रथारूढोऽष्टमान्तेऽथ, रथाग्रेण **हिमाचलम्** । त्रिस्ताडयित्वा **हिमवत्कुमार**स्येषुमक्षिपत् ॥ १०१ ॥
द्वासप्ततिमथो गत्वा, योजनान्यम्बरात् पतन् । **हिमाचलकुमारेण**, वीक्षितः स शरः पुरः ॥ १०२ ॥

विद्यामिवाथ कोपाग्नेः, स्तम्भनीं स कुमारकः ।
वीक्ष्य नामाक्षरश्रेणिं, काण्डदण्डेऽतिभक्तिमान् ॥ १०३ ॥

सुमनःसुमनोमालां, तथा गोशीर्षमौषधीः । ह्रदाम्भः कटकान् बाहुरक्षान् दिव्यांशुकान्यपि ॥ १०४ ॥

गत्वा **भरत**पादान्ते, प्राभृतीकृतवानयम् ।
महात्मनां हि पुण्यानि, किं न यच्छन्ति वाञ्छितम् ? ॥ १०५ ॥ विशेषकम् ॥

**आर्षभिस्तं** विसृज्याथ, चलितः कलितः श्रिया । जघानर्षभकूटाद्रिं, त्रिः शीर्षेण रथस्य सः ॥ १०६ ॥
तत्पूर्वकटके चक्री, काकिणीरत्नतोऽलिखत् । चक्रवर्त्यवसर्पिण्यां, **भरतः** प्रथमोऽस्म्यहम् ॥ १०७ ॥
व्यावृत्त्याथ गतः सैन्ये, पारणं वैरिवारणः । विधायाष्टाह्निकां चक्रे, तत्र कृत्यविचक्षणः ॥ १०८ ॥
अथ निर्दैन्यसैन्योऽयं, चक्री चक्रमनुव्रजन् । उदग्नितम्बे **वैताढ्य**गिरेः सैन्यं न्यवीविशत् ॥ १०९ ॥
तस्मिन् **नमि-विनम्या**ख्यौ, जेतुं विद्याधरेश्वरौ । अक्षिपत् क्षितिपः क्षिप्रमभग्नप्रसरं शरम् ॥ ११० ॥
अथ तौ कुपितौ वीक्ष्य, चक्रनायकसायकम् । प्राप्तौ साकं निजानीकैर्युद्धश्राद्धांसदुर्धरौ ॥ १११ ॥
समं विद्याधरबलैर्व्योम्नि विद्याधरेश्वरौ । विलोक्य समरं घोरमारेभे **भरतेश्वरः** ॥ ११२ ॥
दोर्दण्डयोः समारोप्य, कोदण्डं विदधे तदा । जयश्रियः प्रवेशाय, **भरतो** रणतोरणम् ॥ ११३ ॥
अथ द्वादशवर्षान्ते, वर्षान्त इव भास्करः । करैरिव शरैश्चक्री, विपक्षानक्षिपद् घनान् ॥ ११४ ॥

---

[1] **न्योऽसौ, चक्री** खंता० ॥

प्रणष्टेऽथ बले प्रह्वौ, विद्याधरनरेश्वरौ । भरतेशं नमस्कृत्य, भक्तितो वाचमूचतुः ॥ ११५ ॥
त्वं क्षमस्व क्षमास्वामिन्नेतद् दुर्वृत्तमावयोः । प्रणिपातावधिः क्रोधः, सतां हि परिकीर्तितः ॥ ११६ ॥
स चिरत्नानि रत्नानि, नमिर्नमितमस्तकः । ढौकने ढौकयामास, क्षमाशक्राय चक्रिणे ॥ ११७ ॥
स्त्रीरत्नेनाथ कन्दर्पजगज्जयपताकया । स्थापत्येन भुवः पत्ये, प्राभृतं विनमिर्व्यधात् ॥ ११८ ॥
एतौ च सुतयोर्न्यस्य, विद्याधरधुरीणताम् । गृहीतदीक्षौ तीर्थेशसेवामेवाथ चक्रतुः ॥ ११९ ॥
अथ त्रिपथगातीरे, सैन्यं न्यस्य नरेश्वरः । असाधयत् सुषेणेन, गाङ्गमुत्तरनिष्कुटम् ॥ १२० ॥
तं चाष्टमतपःसम्पल्लम्पटीकृतमानसा । उपतस्थे स्वयं गङ्गादेवी विविधढौकनैः ॥ १२१ ॥
तदाऽसौ नृपमालोक्य, तस्मिन्नेवानुरागिणी । ईर्ष्ययेवेषुभिर्जघ्ने, विषमैर्विषमेषुणा ॥ १२२ ॥
असौ तत्रैव तत्प्रेमवारिवारणतां गतः । निनाय नायको भूमेः, सहस्राब्दीं घटीमिव ॥ १२३ ॥
अथ खण्डप्रपाताख्यां, गुहामभ्येत्य भूपतिः । नाट्यमालं सुरं तत्र, साधयामास पूर्ववत् ॥ १२४ ॥
गुहां तामप्यतिक्रम्य, तमिश्रावन्नरेश्वरः । सैन्यं निवेशयामास, सैकते सौरसैन्धवे ॥ १२५ ॥
तत्राष्टमेन तपसाऽसाधयद् वसुधाधवः । निधीन् यक्षसहस्रेण, प्रत्येकं कृतसन्निधीन् ॥ १२६ ॥
साधयित्वा सुषेणेन, गङ्गादक्षिणनिष्कुटम् । नृपोऽचालीदथायोध्यां, प्रति सिंहो गुहामिव ॥ १२७ ॥
सुखं सैन्यरजःकीर्णा, तुरङ्गैरुदतारि या । कष्टं मदाम्भोगम्भीरा, सैव शैवलिनी द्विपैः ॥ १२८ ॥
रथाश्वैलुर्जवाद् भूमेर्भ्रमयन्तो ध्वजांशुकम् । पत्तयोऽप्यनुकुर्वाणाः, कृपाणावर्तनैरिमान् ॥ १२९ ॥
गोरसप्राभृतभृतो, ग्रामवृद्धान् पदे पदे । भूपः स्वयमभाषिष्ट, तद्भाषा-मौग्ध्यकौतुकी ॥ १३० ॥
इति क्ष्मापश्चमूरेणुपूरैः पिहितभानुभिः । एकच्छत्रामिव भुवं, निर्माय स्वपुरीं ययौ ॥ १३१ ॥
बिम्बितान् रत्नवप्राग्रे, तदा पौरैश्चमूचरान् । आरोहत इवारूढैर्दृष्ट्वा हृष्टैः करोऽर्पितः ॥ १३२ ॥
अभ्युद्यातस्ततः प्रातर्गौरवात् पौर-मन्त्रिभिः । सैन्यैरनुगतः पुण्ये, मुहूर्ते कृतमङ्गलः ॥ १३३ ॥
स्फुरत्कपाटपक्ष्माढ्यप्रतोलीनेत्रवर्त्मना । अथाविशत् पुरस्तस्या, हृदि सौभाग्यभूर्नृपः ॥ १३४ ॥ युग्मम् ॥
वन्दिवृन्दमुखाम्भोजस्फुरत्षट्पदशब्दितैः । भासुराभ्युदयो भाभिर्दिवाकर इवापरः ॥ १३५ ॥
पश्यन्तीनां पुरो हारयष्टियुग्मेऽपि बिम्बितः । हृदि स्फुटीभवत्कामद्वितीय इव योषिताम् ॥ १३६ ॥
व्यालोलानिव कल्लोलानानन्दक्षीरनीरधेः । पश्यन् वातेरितान् केतुपटाननुनिकेतनम् ॥ १३७ ॥
भासुरं रभसाऽऽरब्धवाद्य-नृत्तादिकौतुकैः[1] । कृतमाङ्गलिकं लोकं, मञ्चे मञ्चे कृतार्थयन्[2] ॥ १३८ ॥
बालाः पुत्रीरिव तदा, सुप्रौढा भगिनीरिव । जननीरिव वृद्धास्तु, निर्विकारं विलोकयन् ॥ १३९ ॥
समाससाद सदनं, सदनन्तगुणो नृपः । अमन्दानन्दसन्दोहकन्दो हरिपराक्रमः ॥ १४० ॥

॥ षड्भिः कुलकम् ॥

अभ्येत्याभ्येत्य भूपालैः, क्रमशः परिकल्पितम् । स भेजे चक्रवर्तित्वाभिषेकं द्वादशाब्दिकम् ॥ १४१ ॥
स पश्यन् स्वजनान् सर्वान्, सुन्दरीं मन्दिरोदरे । ददर्श कर्शिताकारां, कलामिव कलावतः ॥ १४२ ॥
कृशत्वकारणं तस्याः, साक्षेपमथ भूभुजा । ऊचुर्नियोगिनः पृष्टा, नास्माकं देव ! दूषणम् ॥ १४३ ॥
प्रभोः षष्टिसहस्राब्दी, दिग्जयादिदिनादियम् । आचाम्लानि चकारोच्चैर्व्रतग्रहणसाग्रहा ॥ १४४ ॥

१ °नृत्यादि° खंता० ॥ २ °तुकी पाता० । °तुकम् खंता० ॥

चक्रिणाऽथ व्रतायासौ, विसृष्टाऽष्टापदे गिरौ। दक्षा दीक्षां प्रभोः पार्श्वे, जगृहे गृहनिस्पृहा ॥ १४५ ॥
चक्रिराज्याभिषेकेऽथ, तस्मिन् द्वादशवार्षिके। आगता-ऽनागतान् लोकान्, प्रभुत्वादवलोकयन् ॥१४६॥
निजानुजाननायातान्, विज्ञाय न्यायवित्तमः। तान् प्रति प्रेषयामास, दूतान् भूतलवासवः ॥ १४७ ॥
॥ युग्मम् ॥
यदि राज्यार्थिनस्तद्भोः !, भरतं कुरुत प्रभुम्। दूतोक्तिमिति ते श्रुत्वा, जगदुर्भरतानुजाः ॥ १४८ ॥
विभज्य राज्यमस्माकमेतस्यापि भवत्प्रभोः। तातेन दत्तमस्मत्तः, स किमाच्छेत्तुमिच्छति? ॥ १४९ ॥
अविकेन न नः कार्यं, रक्षितुं स्वं स्वयं क्षमाः। अयोग-क्षेमकृत् तस्मान्नाथः कथमयं भवेत्? ॥ १५० ॥
बलीयानथ यद्येष, निःशेषद्वेषिशातनः। तदेतु वयमप्येते, पितुस्तस्यैव सूनवः ॥ १५१ ॥
किन्तु तातमनापृच्छ्य, वयं स्वच्छन्दकारिणः[1]। अग्रजेन समं क्रोधाद्, योद्धुमीहामहे नहि ॥ १५२ ॥

इत्युक्त्वाऽष्टापदे गत्वा, नत्वा निर्वृजिनं जिनम्।
तत् ते भरतसन्दिष्टं, सर्वमूर्वीभुजोऽभ्यधुः ॥ १५३ ॥

सिञ्चन्निव सुधावृष्ट्या, वसुधामृषभप्रभुः। तानुवाच ज्वलत्क्रोधवह्नेरह्नाय शान्तये ॥ १५४ ॥
चपला चपलेव श्रीर्भात्यसौ भुवनान्तरे। कल्याणवाञ्छया वत्सास्तत् तां गृह्णीत किं मुधा? ॥ १५५ ॥
किञ्च स्वःसम्भवैर्भोगैर्या तृप्तिरभवन्न वः। सा मर्त्यभोगैरङ्गारकारकस्येव किं भवेत्? ॥ १५६ ॥

## अङ्गारकारकदृष्टान्तः

तथाह्यम्भोदृतिं कश्चिद्, गृहीत्वाऽङ्गारकारकः। रीणवारिण्यरण्येऽगादङ्गारकरणोद्यतः ॥ १५७ ॥
भीष्मग्रीष्मार्ककार्कश्यकृशानुकृतया तृषा। स तृप्तिं नाप्तवान् सर्वं, पायं पायं पयो दृतेः ॥ १५८ ॥
क्वचित् तरुतले सुप्तः, स्वप्ने सदनमागतः। परेत इव पानीयं, समग्रमपि सोऽपिबत् ॥ १५९ ॥
तथाऽप्यच्छिन्नतृष्णोऽयं, ग्रामं ग्रामं जलाशयान्। वह्निरौर्व इवापूर्वः, सर्वानुर्व्यामशोषयत् ॥ १६० ॥
अथैकं कश्मलक्षारदुरापसलिलं मरौ। कूपं प्राप्य भ्रमन् मेने, प्रत्यक्षं क्षीरनीरधिम् ॥ १६१ ॥
तत्रापि स तृषाऽऽक्रान्तः, पयसे कुशपूलकम्। संयोज्य रज्जुभिः क्षिप्त्वा, सरसं तरसाऽकृषत् ॥ १६२ ॥
अतिनिम्नतया कूपः, कुभूप इव सेवकात्। यातः स्वदत्तमादत्त, सर्वस्वं तृणपूलकात् ॥ १६३ ॥
पूलकादथ निश्चोत्य, पाश्चात्यास्तोयविप्रुषः। स चातक इवाम्भोदादुन्मुखस्तृषितः पपौ ॥ १६४ ॥
तत् तृष्णा याऽस्य न च्छिन्ना, वारिधेरपि वारिभिः। किं सा निरङ्कुशा पूलकुशाग्रपयसा त्रुटेत्? ॥ १६५ ॥
युष्माकमपि तद् वत्साः !, या दिव्यैरपि नात्रुटत्। मर्त्यलोकभवैर्भोगैः, किं सा तृष्णा त्रुटिष्यति? ॥ १६६ ॥
श्रुत्वेति देशनां भर्तुर्लक्ष्मीसुखपराङ्मुखाः। अथाष्टनवतिर्भेजुस्ते व्रतं भरतानुजाः ॥ १६७ ॥
दूतास्ततो निवृत्त्याथ, स्वामिने विस्मयस्मिताः। सोदराणां[2] यथावृत्तं, वृत्तान्तं ते व्यजिज्ञपन् ॥ १६८ ॥
अथ प्राज्यानि राज्यानि, तेषां भरतभूपतिः। जग्रसे सकलान्येष, सर्वान्नानीव भस्मकी ॥ १६९ ॥
अपरेद्युर्नृपश्रेणीवेणीसम्मार्जितक्रमम्। व्यजिज्ञपन्नृपं नत्वा, सुषेणो गर्वपर्वतः ॥ १७० ॥
कृत्वाऽपि दिग्जयं स्वामिश्चक्रमायुधमन्दिरे। एतद् विशति नाद्यापि, यथा शिष्यः शठो मठे[3] ॥ १७१ ॥
अथ सर्वोपधाशुद्धबुद्धिः सचिवपुङ्गवः। उवाच वाचमाचार्य, इव क्ष्मावासवाग्रतः ॥ १७२ ॥

१ स्वयं स्वच्छन्दकारिणा खंता० ॥ २ °से निखिलान्येष खंता० पाता० ॥ ३ मठम् पाता० ॥

स्वामिन् ! को नाम दिग्यात्राकर्तरि त्वयि भर्तरि । तिष्ठेताद्यापि ? चण्डांशौ, तमस्काण्डंकियच्चिरम् ? ॥ १७३ ॥
आः ! ज्ञातमथवा स्वामिन्नवश्यं न वशंवदः । स बाहुबलिभूपालस्तवैवावरजो बली ॥ १७४ ॥
अपि विश्वं स सामर्षः, सवायुरिव पावकः । विश्वं दग्धुमलं खड्गधूमान्धीकृतशात्रवः ॥ १७५ ॥
षट्खण्डं भरतक्षेत्रं, जित्वाऽपि जगतीपते ! । अजित्वा तं जगद्वीरं, वास्तवस्तव कः स्तवः ? ॥ १७६ ॥
एतस्याविजये देव !, दिग्जयव्याजतस्त्वया । अस्मिन् षट्खण्डभूखण्डे, कृतं देशान्तरेक्षणम् ॥ १७७ ॥
तदेष देव ! भवतो, युज्यते प्राज्यतेजसः । नोपेक्षितुं क्षितिस्वामिन् !, नमितामितशात्रवः ॥ १७८ ॥
अथ प्रथमतो न त्वं, बान्धवं बन्धुवत्सल[1] ! । योद्धुमुत्सहसे दूतं, तत् कञ्चित् प्रेषयाधुना ॥ १७९ ॥
वीरंमन्यो न मन्येत, तवाज्ञां यदि चानुजः । तदा यदायुधीयानां, बुध्यते तद् विधीयताम् ॥ १८० ॥
इत्यमात्योदिते[2] दूतं, दक्षस्तक्षशिलां प्रति । स वेगेन सुवेगाख्यं, निसृष्टार्थं विसृष्टवान् ॥ १८१ ॥
अथास्खलद्गतिर्वायुरिवायं वेगतोऽगमत् । निवारितोऽपि शकुनैः, सुवेगो दूत्यदक्षिणः[3] ॥ १८२ ॥
निम्नगा-नगर-ग्राम-कान्तार-गिरि-गह्वरान् । सुवेगः स लघूलङ्घ्य, बहलीदेशमासदत् ॥ १८३ ॥
श्रीमद्बाहुबलिस्वामियशःसुरभिताननैः । कान्तं वनान्तविश्रान्तैः, क्रीडद्गोपाङ्गनागणैः ॥ १८४ ॥
गायन्तीभिश्चरित्राणि, श्रीयुगादिजिनेशितुः । नन्दनादेत्य दैत्यारिस्त्रीभिः सान्द्रीकृतद्रुमम् ॥ १८५ ॥
अलङ्कारप्रभाभिन्नतमिस्रासु दिनेष्विव । तमिस्रास्वपि पान्थस्त्रीपाणिन्धमभवत्पथम्[4] ॥ १८६ ॥
उपेत्य स्वर्गिणां स्वर्गादद्भुतश्रीदिदृक्षया । हृष्टानामद्भुतैर्भोगैर्दुस्त्यजीभूतभूतलम् ॥ १८७ ॥
॥ पञ्चभिः कुलकम् ॥

असावासाद्य तं देशमपूर्वाद्भुतवैभवम् । जन्मान्तरमिव प्राप्तः, कृत्यं विस्मृतवानिव ॥ १८८ ॥
अथ तक्षशिलां बाहुबलिबाहुबलोर्जिताम् । नगरीं स गरीयस्याः, सम्पदः पदमासदत् ॥ १८९ ॥
पश्यन्नस्यामसौ पुर्यां, वैभवं भुवनाद्भुतम् । उन्मुखो ददृशे लोकैर्विक्रीतेभ्य इवोद्धृतः ॥ १९० ॥
क्षणं प्राप्य नृसिंहस्य, सिंहद्वारं महीभुजः । तस्थौ रथादथोत्तीर्य, स्मरन्निव स वाचिकम् ॥ १९१ ॥
गच्छन्नथाग्रतश्चक्रिप्रताप इव मूर्तिमान् । तस्थौ राजकुलद्वारि, वारितो वेत्रिभिः क्षणम् ॥ १९२ ॥
अथ बाहुबलेराज्ञां, द्वाःस्थेनासाद्य सादरम् । प्रावेश्यत सुवेगोऽयं, सहर्षः पर्षदन्तरे ॥ १९३ ॥
स सभान्तः सभासद्भिः, क्वचिन्नीलाश्मकुट्टिमे । जलभीत्योद्धरन् वासः, सहासमवलोकितः ॥ १९४ ॥
आकाशस्फटिकस्तम्भस्खलिताङ्गतया क्वचित् । अन्यत्रापि चचारासौ, हस्तैर्न्यस्तैः पुरः पुरः ॥ १९५ ॥
रत्नस्तम्भसमालम्बिप्रतिबिम्बभ्रमवेक्ष्य सः । कृच्छ्रेण जज्ञे विज्ञोऽपि, तत्त्वतः पृथिवीपतिम् ॥ १९६ ॥
नमस्कृत्य नृपं पुञ्जीभूतहारः स भूतले । विशिष्टो विष्टरे वेत्रिनिर्दिष्टे स निविष्टवान् ॥ १९७ ॥
मुखाब्जविलसद्वाणी, रणन्नूपुरहारिणीम् । उज्जगार गिरं कर्णसुधां स वसुधाधवः ॥ १९८ ॥
कच्चित् कुशलमार्यस्य ?, कच्चित् कुशलिनी प्रजा ? । कुशली कच्चिदार्यस्य, सेनान्यादिपरिच्छदः ? ॥ १९९ ॥
स षट्खण्डं क्षमाखण्डमाखण्डलपराक्रमः । साधयन्न क्वचित् कच्चिदार्यः प्राप पराभवम् ? ॥ २०० ॥
आवर्जिता जिताः कच्चिदार्येण जगतीभुजः । यथाऽन्वहं वहन्तस्तामाज्ञां न स्युर्विषादिनः ? ॥ २०१ ॥
समं जनानुरागेण, स्पर्धया वृद्धिगामिनः । आर्यस्य धर्म-कामा-ऽर्था, न बाधन्ते परस्परम् ? ॥ २०२ ॥

---

१ °त्सलः खंता० पाता० ॥ २ °त्योदितैर्दूतं खंता० ॥ ३ °गो दौत्यद° खंता० ॥
४ °नाजनैः खंता० पाता० ॥

इत्युक्त्वाऽवस्थिते राज्ञि, दूतः सद्भूतमब्रवीत् । कस्तस्य कुशलप्रश्नः?, कुशलं जगतोऽपि यः ॥ २०३ ॥
कस्तस्मिन् सैन्यलेशे[1]ऽपि, देशे चाकुशलक्रमः? । यस्मिन् सुरकृतोपास्तिः, शास्तिकृद् बान्धवस्तव ॥२०४॥
तिष्ठेत पुरतः कश्चिद्, दिग्जैत्रे तत्र शात्रवः? । अर्के विक्रामति ध्वान्तविक्रमः क्रमतां कुतः? ॥ २०५ ॥
अनेकैः सममेकाऽपि, नानादेशनिवेशिभिः[2] । तस्याज्ञा मान्यते मूर्ध्नि, विधेरिच्छेव जन्मिभिः ॥ २०६ ॥
भूभुजस्तस्य षाड्गुण्योपाय-शक्तित्रयादयः । फलन्ति चिन्तितैरर्थैः, साक्षात् कल्पद्रुमा इव ॥ २०७ ॥
निर्बाधमेव सेवन्ते, पुरुषार्थास्त्रयोऽपि तम् । विभागा इव सन्ध्यायाः, दिवसं भास्वरोदयम् ॥ २०८ ॥
नृपैर्ललाटिकीभूतैः, सेवितोऽपि परैः परम् । न[3] मोदते स दूरस्थानपश्यन्ननुजान् निजान् ॥ २०९ ॥
सत्यामपि स्यान्नो यस्यां, बान्धवानां विलोकनम् । श्रियं सारामिमां कारानुकारां गणयत्ययम् ॥ २१० ॥
विजित्य जगतीमस्य, **विनीता**यामुपेयुषः । सम्बन्धिभिः सुहृद्भिश्च, चक्रे चक्रिपदोत्सवः[4] ॥ २११ ॥
तवाग्रजन्मनस्तस्मिन्नुत्सवे पृथिवीभुजः । लक्ष्मी-जीवितरक्षार्थं, के स्वयं न समाययुः? ॥ २१२ ॥
अनायातानयं ज्ञात्वा, महे द्वादशवार्षिके । किलाऽऽकारयितुं भ्रातॄन्, प्रेषयामास पूरुषान् ॥ २१३ ॥
विकल्प्यानल्पसङ्कल्पाः, किमप्येते[5] सुमेधसः । आगत्य तातपादान्ते, दान्तात्मानो व्रतं व्यधुः ॥ २१४ ॥
तदयं तद्वियोगार्त्तिगर्तसम्पातकातरः । समागत्य समुद्धर्तुं, साम्प्रतं तव साम्प्रतम् ॥ २१५ ॥
यद्यपि भ्रातृभावेन, त्वं पुरा न समागमः । वक्त्यन्यथा तथाऽप्येष, सर्वथा दुर्मुखो जनः ॥ २१६ ॥
तत् स्वयं हर्षसोत्कर्षदृष्टिपीयूषवृष्टिभिः । द्विजिह्वप्रभवद्दोषमोषः कर्तुं तवोचितः ॥ २१७ ॥
स स्वयं दान-सम्मानपूरितार्थिमनोरथः । त्वत्प्रणाममात्र नामान्यज्जगन्मान्यः समीहते ॥ २१८ ॥
धीरा न चित्ते वित्तेष्टं, चेष्टन्ते किन्तु तेजसे । मुक्तापङ्क्तिधिया हन्ति, सिंहः किं हस्तिमस्तकम्? ॥ २१९ ॥
भ्राता ममायं भूभर्ता, मास्म भूरिति निर्भयः । राज्ञामाज्ञाधनानां हि, ज्ञातेयं क्वोपयुज्यते? ॥ २२० ॥
समन्युरथ तं वीरंमन्यस्त्वमवमन्यसे । भासि भास्वति तत् तस्मिन्नुद्यत्खद्योतपोतवत् ॥ २२१ ॥
पुत्रस्त्वमपि **नाभेय**प्रभोर्**भरत**वत् ततः । कुलप्रभुरसि स्वामिन्!, हितं जल्पामि तत् तव ॥ २२२ ॥
करालगरलः सर्पः, पावकः पवनोद्धतः[6] । प्रभुः प्रौढप्रतापश्च, विश्वास्या न त्रयोऽप्यमी ॥ २२३ ॥
जीवितव्येन राज्येन, कार्यं तद् विद्यते यदि । तदा रक्षौषधं मूर्ध्नि, धार्यतां भ्रातृशासनम् ॥ २२४ ॥
नित्यं वितन्यते यत्र, सेवा देवा-ऽसुरैरपि । भवतो मर्त्यमात्रस्य, सेवायां तत्र का त्रपा? ॥ २२५ ॥
एवं वदति दूतेऽत्र, **सुनन्दानन्दनः** स्वयम् । बाहुं विलोकयामास, रोमाञ्चकवचाञ्चितम् ॥ २२६ ॥
अवोचदधरज्योतिर्मिश्रदन्तांशुदम्भतः । कोपपाटलितां साक्षादिव वाचं धराधवः ॥ २२७ ॥
ज्यायानयं मम भ्राता, यदीच्छति समागमम् । युक्तं यदेष तातस्य, तुल्यः पूज्यो हि सर्वथा ॥ २२८ ॥
युक्तं तदपि यत् प्रैषीत्, प्रभुस्ते **भरतेश्वरः** । आकारणानि बन्धूनां, गुरोः कृत्यमिदं यतः ॥ २२९ ॥
तेषु तातानुयातेषु, स्वयं यत्त्वेष ते विभुः । तेषां राज्यानि जग्राह, स्नेहोऽयं दूत! नूतनः ॥ २३० ॥
कनिष्ठैर्विजितो ज्येष्ठः, प्रवादो मास्म भूदयम् । इत्यन्वगुरमी तातं, जितकाशी तदेष किम्? ॥ २३१ ॥
त्वद्भर्ता भरतक्षेत्रं, जित्वा तन्मां विरोधयन् । निष्पन्नं हेम नागेन, नियतं दूषयत्ययम् ॥ २३२ ॥

---

१ °शे च, देशे खंता० पाता० ॥ २ °शनिवासिभिः खंता० ॥ ३ नाऽऽमो° पाता० ॥ ४ °क्रिमहोत्स° खंता० ॥ ५ विकल्प्यानेकसङ्कल्पान्, किमप्येते खता० । विकल्पानल्पसङ्कल्पान्, विकल्पेते सुमे° पाता० ॥ ६ °नोद्धुरः । प्रभुः खंता० पाता० ॥

भ्रातृभावादनायाते, निर्भये वा स्वभावतः । किन्तु मय्येव लोकोऽयमवद्धवदनोऽभवत् ? ॥ २३३ ॥
किं वा यदेष भ्रातॄणां, राज्यानि नृपतिस्तव । जग्रसे श्वेव वान्तानि, तथा तत्राप्ययमूदयम् ? ॥ २३४ ॥
मम प्रभुरसावेव, सेव्यः श्रीनाभिनन्दनः । सुरा-ऽसुरनृपैः क्लृप्तप्रथः प्रथमतीर्थकृत् ॥ २३५ ॥
पिता गुरुर्वा स्वामी वा, जन्मन्येकत्र जन्मिनाम् । एक एव भवेन्नान्यस्तत् किं तेन करोम्यहम् ? ॥ २३६ ॥
स मम ज्येष्ठभावेन, प्रणामं यदि लप्स्यते । न प्रभुत्वाभिमानेन, पुनः स्वप्नेऽपि ते पतिः ॥ २३७ ॥
यच्च मत्तोऽपि तेजांसि, नाथस्ते नाथते ध्रुवम् । कक्षस्य वह्नितस्तेजोवाञ्छामनुकरोति तत् ॥ २३८ ॥
ज्ञातेयं कोपयुज्येत, राज्ञां ? मिथ्येति ते वचः । मयि सत्यप्ययं राज्यश्रियं भुङ्क्ते कुतोऽन्यथा ? ॥ २३९ ॥
ते चान्ये ये दधुर्भास्वत्यस्मिन् खद्योतपोतताम् । अहं तु हन्त ! तस्य स्यामस्तभूधरबन्धुरः ॥ २४० ॥
त्रैलोक्यपूजितो यस्य, पिता श्रीवृषभप्रभुः । किञ्चायमनुजः शौर्यतृणीकृतजगत्त्रयः ॥ २४१ ॥
सुरा-ऽसुर-नरैः सोऽयं, सेव्यो यत् तदिदं कियत् ? ।
इदं वद यदेतस्य, पुरः कोऽयं सुरेश्वरः ? ॥ २४२ ॥ युग्मम् ॥
तत्र त्रपाऽस्य सेवायां, करुणा तु ममाद्भुता । लज्जिष्यतेऽसौ मां वीक्ष्य, यत् पुरा खुरलीजितः ॥ २४३ ॥
पुरा कारासुखं प्राप, यत्रास्मद्भुजपञ्जरे । तत् किं विस्मृतमेतस्य, चाटुकृच्चाटुगर्विणः ? ॥ २४४ ॥
तद् गच्छ त्वं समायातु, स स्वयं भवतः प्रभुः । यथाऽस्य गर्वदुष्कर्मप्रायश्चित्तं करोम्यहम् ॥ २४५ ॥
दूतोऽथ धैर्यमालम्ब्य, सभयः स सभागृहात् । निस्ससार सभासद्भिः, कूणिताक्षं[1] विलोकितः ॥ २४६ ॥
सज्जीकृतायुधान् वीरान्, मृत्युभृत्यानिवोद्यतान् । पश्यन् सुवेगो वेगेन, निरगान्नृपमन्दिरात् ॥ २४७ ॥
नवः क इव दूतोऽयं, भरतस्य महीभुजः ? । किमन्योऽपि नृपो ज्येष्ठः, स्वामिनोऽस्यैव बान्धवः ॥ २४८ ॥
कियत्कालं गतः सोऽभूज्जयाय भरतक्षितेः ? । अत्रामुं स कुतः प्रैषीदनुजाकारणेच्छया ? ॥ २४९ ॥
अस्य बन्धौ किमुत्कण्ठा ?, न किन्तु प्राभवस्पृहा ।
मन्त्रे किं नाखुरप्यस्य, शतशः सन्ति मन्त्रिणः ? ॥ २५० ॥
तैः स किं बलिनं सिंहं, खलीकुर्वन्न वारितः ? । प्रत्युत प्रेरितोऽमीभिर्बुद्धिः कर्मानुसारिणी ? ॥ २५१ ॥
जितं किं हारयत्येष, षट्खण्डं मण्डलं भुवः ? । जितकाशितया वेत्ति, न मूढः प्रौढिमात्मनः ॥ २५२ ॥
इत्थं पथि कथाः शृण्वन्, मिथः पौरमुखोद्गताः । दूरादुल्लङ्घयामास, सुवेगो नगरीमिमाम् ॥ २५३ ॥
॥ षड्भिः कुलकम् ॥
क्रमेणाथ प्रयातोऽयमटवीं भिल्लसङ्कुलाम् । श्रीबाहुबलिभूपालबलैराटविकैर्वृताम् ॥ २५४ ॥
तत्र शार्ङ्गधरान् कांश्चित्, पर्शुस्पर्शपरान् परान् ।
एकानश्मायुधानन्यान्, कुन्तदन्तुरिताम्बरान् ॥ २५५ ॥
अयं मूर्त्तानिवोत्साहान्, श्रीबाहुबलिभूभुजः । भिल्लानालोकयामास, सुवेगः कम्पिताकृतिः ॥ २५६ ॥
अटवीं तामथोल्लङ्घ्य, कथञ्चिदतिभीषणाम् । चक्रिणो देशमासाद्य, स्वं मेने स पुनर्नवम् ॥ २५७ ॥
अपक्वान्यपि धान्यानि, लुनीत ननु रंहसा । अपूतान्यपि गुप्तासु, क्षिपत क्षोणिखानिषु ॥ २५८ ॥
अतिभारसहानुच्चैः, शकटान् कुरुतोत्कटान् । लभ्य-देयानि सङ्कोच्योच्चलितुं[2] भवतोद्यताः ॥ २५९ ॥
यस्माद् भरतभूपालमभिषेणयितुं बली । श्रूयतेऽभ्युद्यतो बाहुबलिर्बाहुबलोन्मदः ॥ २६० ॥

१ °क्षं निरीक्षितः खंता० पाता० ॥ २ सङ्क्षिप्योच्च° खता० पाता० ॥

प्रतिक्षेत्रं प्रतिग्रामं, चक्रिदेशनिवासिनाम् । व्याकुलत्वं विलोक्येति, चिन्तयामासिवानसौ ॥ २६१ ॥
॥ कलापकम् ॥
अहो ! विग्रहवार्तेयमस्मत्तो वेगवत्तमा । अग्रे भूत्वा यतः कश्चिन्नागतः श्रूयते त्वसौ ॥ २६२ ॥
अहो ! प्रौढप्रतापत्वं, श्रीबाहुबलिभूभुजः । स्वस्थानस्थेऽपि यत् तस्मिन्नस्माकं भयमीदृशम् ॥ २६३ ॥
चिन्तयन्निति सम्प्राप्तो, विनीतायां स नीतिमान् । विज्ञो विज्ञपयामास, यथावन्नृपतेः पुरः ॥ २६४ ॥
पटाञ्चलेन चेद् भानुश्छाद्यः स्यात् तरुणच्छविः । यदि ज्वालाकुलो वह्निर्भवेद् ग्राह्यश्च मुष्टिना ॥ २६५ ॥
तवानुजस्तथाप्येष, स्वामिन् ! षट्खण्डभूपते ! । उत्कर्षिपौरुषो नान्यैर्जेतुं शक्यः सुरैरपि ॥ २६६ ॥
॥ युग्मम् ॥
श्रुत्वेति भरताधीशः, सोत्साहो मन्त्रिभाषितैः । प्रयाणं कारयामास, पुरीं तक्षशिलां प्रति ॥ २६७ ॥
सम्पन्नपुलका कुन्तैः, स्विन्ना करिमदाम्बुभिः । स्वैरं भर्त्रा बलाक्रान्ता, चकम्पे काश्यपी तदा ॥ २६८ ॥
मारुतस्य मुखे धूलिं, क्षिपन्तश्चरणोद्धृताम् । वाजिनः परितोऽधावन्, सत्वराः सत्त्वराजिनः ॥ २६९ ॥
द्विषद्यशोमहश्चन्द्र-भानुच्छादनहेतवे । वहन्तो मेघलेखावत्, खड्गान् वीरास्तदाऽचलन् ॥ २७० ॥
वंशनासास्तुरङ्गाक्षाः, पताकातिलकास्तदा । प्रचेलुश्चक्रताडङ्का, रथाः सेनाननश्रियः ॥ २७१ ॥
स्थिरामस्थिरयद् वेगात्, तच्चचाल बलं तदा । उद्यद्धूलिभरैरब्धिं, गम्भीरमगभीरयत् ॥ २७२ ॥
बहलीदेशसीमानमसमानपराक्रमः । आचक्राम क्रमाच्चक्री, वियद्देशमिवांशुमान् ॥ २७३ ॥
ज्ञात्वा तत् परिघोत्तालबाहुर्बाहुबलिर्बलम् । प्रेरयामास कल्पान्तोत्पातवात इवोदधिम् ॥ २७४ ॥
तद्भेरीनलिकायन्त्रप्रेरितैः समिरोर्मिभिः । भटाः प्रदीपितक्रोधवह्नयश्चेलुरुच्चकैः ॥ २७५ ॥
नेदुस्तदा रिपुप्राणप्रयाणपटहोपमाः । निःस्वानप्रकराः शब्दैरुदरम्भरयो दिशाम् ॥ २७६ ॥
संसिच्य मदपाथोभिः, संवीज्य श्रुतिमारुतैः । करिणः कम्पयामासुः, शीतार्तामिव मेदिनीम् ॥ २७७ ॥
खनन्ति स्म खुरैः क्षोणिं, जवना वाजिराजयः । आक्रष्टुमिव पानीयं, सेनायास्तृप्तिहेतवे ॥ २७८ ॥
तरङ्गैरिव सध्वानैर्वल्गैर्बाहुबलिस्ततः । महीमाच्छादयामास, कल्पान्तभ्रान्तवार्द्धिवत् ॥ २७९ ॥
उपान्ते चक्रिसेनायाः, सेनामयमवासयत् । प्रातस्तिमिरधोरण्याः, शूरोऽनूरुप्रभामिव ॥ २८० ॥
गाम्भीर्यं दर्शयन्तोऽपि, तदा सैन्यैः कदर्थिताः । तत्कालं कलयामासुः, कलुषत्वं जलाशयाः ॥ २८१ ॥
स्थूला स्थुलततिस्तेने, तदा गुरुगिरिश्रियम् । तटार्गलितमातङ्गगण्डशैलाऽतिदुर्गमा ॥ २८२ ॥
गुरुडम्बरमौलिस्थरत्नकुम्भसमानताम् । रविर्लिप्सुरिव प्राप, तदाऽस्तगिरिमस्तकम् ॥ २८३ ॥
अस्ताचलपतद्भानुगोलकोच्छलितैरथ । पाथोभिरिव पाथोधिस्तमोभिर्व्यानशे नभः ॥ २८४ ॥
तदाऽर्क-मन्दरक्षोभान्निःसरन्त्या इव श्रियः । उन्ममज्ज मुखाम्भोजमम्भोधेरिन्दुकैतवात् ॥ २८५ ॥
सेनाभटेषु कुर्वत्सु, शस्त्रजागरणोत्सवम् । खड्गं जागरयामास, शशाङ्कोऽप्यङ्ककैतवात् ॥ २८६ ॥
स्तुतिव्रतानामन्योन्यं, वचनाहुतिभिर्भृशम् । दिदीपे नृपयोर्बद्धबोधः क्रोधधनञ्जयः ॥ २८७ ॥
ततस्तत्तरणोत्साहैः, सैन्ययोरुभयोर्भटैः । रणदेव्याः पुरस्तेने, निद्रैव प्रथमं बलिः ॥ २८८ ॥
बलयोस्तूर्यनिर्घोषैर्मृगं त्रस्तमिवाङ्कतः । दिदृक्षुरथ शीतांशुरगादस्ताद्रिकाननम् ॥ २८९ ॥
ततः पूर्वाद्रिमारूढे, देवे दिवसभर्तरि । रागेणाभ्यागमस्ताभ्यां, चक्राभ्यामुपचक्रमे ॥ २९० ॥

१ प्रेषया° वता० ॥ २ सूरो° पाता० ॥

सुभटः सुभटं हस्ती, हस्तिनं रथिनं रथी । आसदत् सादिनं सादी, बलयोरुभयोरपि ॥ २९१ ॥
छिन्नाः प्रोड्डीनकाण्डालीमण्डपेन रवेः कराः । पतिता इव भान्ति स्म, क्षितौ क्षतजकैतवात् ॥ २९२ ॥
उद्धूतधूलिजे ध्वान्ते, द्रष्टुं द्विष्टानिव क्रुधा । धावन्ति स्म भटाः प्रेङ्खत्कुन्तदीपकपाणयः ॥ २९३ ॥
भुजाभृतां भुजादण्डैः, शिरोभिश्च क्षितिच्युतैः । कृतान्तकिङ्कराश्चक्रुर्दण्ड-कन्दुककौतुकम् ॥ २९४ ॥
ये तरस्वितया तेरुर्भटाः सङ्गरसागरम् । आसन् रुधिरवाहिन्यस्तेषामप्यतिदुस्तराः ॥ २९५ ॥
अश्वानामश्ववाराणामप्यङ्गमिलितैर्मिथः । शिरोभिः पतितैर्युद्धं, किन्नराणामिवैक्ष्यत ॥ २९६ ॥
दन्तिदन्ताग्रसङ्घट्टजन्मा वह्निकणोत्करः । रेजे रजोघनध्वान्तखेलत्खद्योतपोतवत् ॥ २९७ ॥
प्रस्थानानि सुबाहूनामिव प्रीताः सुरस्त्रियः । भटानां भाविभर्तॄणां, स्रजः कण्ठेषु चिक्षिपुः ॥ २९८ ॥
बिभ्रद्भिः शुशुभे खड्गलेखां धूमशिखासखीम् । रुषाऽरुणैर्भटैर्मूर्तैर्मूर्तैस्तेजोऽनलैरिव ॥ २९९ ॥
अथ **बाहुबलेः** सैन्यैर्**भरतेश**स्य वाहिनी । कल्लोलिनीशकल्लोलैरिव पश्चाद् व्यधीयत ॥ ३०० ॥
पुरस्कृतसुषेणोऽथ, रणाय **भरतेश्वरः** । स्वयं रविरिवोत्तस्थेऽग्रसरारुणसारथिः ॥ ३०१ ॥
युद्धश्रद्धालुमालोक्य, ज्यायांसं भ्रातरं पुरः । तुल्यं **बाहुबलि**र्भूपोऽभूदोकः शोक-हर्षयोः ॥ ३०२ ॥
गृहीतरणदीक्षोऽथ, प्रज्वलन्निव तेजसा । रवेः समः समारोहत्, कुञ्जरं राजकुञ्जरः ॥ ३०३ ॥
तौ स्वयं जगतीमल्लौ, वीक्ष्य युद्धोद्यतौ तदा । हन्त ! चेतांस्यकम्पन्त, त्रिविष्टपसदामपि ॥ ३०४ ॥

अथो **भरत**मभ्येत्य, दत्त्वाऽऽशीर्वादमादरात् । देवा एवमवोचन्त, प्रशान्तं स्वान्तशान्तये ॥ ३०५ ॥
षट्खण्ड**भरत**क्षेत्रविजये तव सर्वतः । सम्मुखीनोऽभवत् कश्चिन्न **चेन्नाभेयनन्दन** ! ॥ ३०६ ॥
दोर्दण्डकण्डूभेदाय, तत् किं नाम महाभुज ! । निजेन बन्धुना सार्धं, युद्धसज्ज ! न लज्जसे ? ॥ ३०७ ॥
॥ युग्मम् ॥

अथाऽऽह चक्री गीर्वाणाः !, युक्तमेतद् भवद्वचः । किन्तु सम्यग् न जानीथ, बन्धुना रणकारणम् ॥३०८॥
न दोःकण्डूभरच्छेदबुद्धिर्युद्धे निबन्धनम् । हेतुः किन्तु रथाङ्गस्याप्रवेशः शस्त्रमन्दिरे ॥ ३०९ ॥
अनुप्रविश्य मां शस्त्रगृहे चक्रं प्रवेश्य च । षट्खण्ड**भरत**क्षेत्रपतिर्भूयान्ममानुजः ॥ ३१० ॥
अनेन वचसा **बाहुबलिं** बोधयताधुना । यदि युद्धनिषेधाय, युष्माकमयमुद्यमः ॥ ३११ ॥
अथोचुस्ते पुनर्देवा, यद्यसौ नहि बुध्यते । तथापि नास्त्रैर्योद्धव्यमाज्ञाऽत्र **ऋषभ**प्रभोः ॥ ३१२ ॥
दृष्टि-वाग्-दण्ड-दोर्दण्डयुद्धैरेव बलाबलम् । युवयोर्ज्ञास्यते किं तदायुधैर्दारुणै रणे ? ॥ ३१३ ॥
ओमित्युक्तवति क्ष्मापे, ततो जग्मुर्दिवौकसः । नृपं **बाहुबलिं** मूर्तमिव वीररसं प्रति ॥ ३१४ ॥
जयेत्याशिषमुद्दाम्नीं, दत्त्वा प्रीतेन चेतसा । सुधामधुमुचा वाचा, प्राहुर्**बाहुबलिं** सुराः ॥ ३१५ ॥
ज्यायानयं नयोत्तंस !, किं न सत्क्रियते त्वया ? । संरम्भः किमयं वीर !, **भरतं** प्रति सम्प्रति ? ॥ ३१६ ॥
जेया रागादयस्तावद्, ये **युगादि**जिनेशितुः । तदङ्गजस्य ते तात !, पोषस्तेषां किमु क्षमः ? ॥ ३१७ ॥
नतिमात्रेण यत् तोषं, भजत्येष तवाग्रजः । कथङ्कारं तमाराध्य, नात्मसात् कुरुषे क्षमाम् ? ॥ ३१८ ॥
अथ **बाहुबलिः** प्राह, सुरान् गम्भीरया गिरा । इत्थं कथमविज्ञातवस्तुतत्त्वैरिवोच्यते ? ॥ ३१९ ॥
यद्यसौ भ्रातृभावेन, मत्तः सत्कारमिच्छति । युक्तं तदेव यत् तातसम एव ममाग्रजः ॥ ३२० ॥
परं प्रौढप्रतापत्वाज्जितकाशितया तया । आक्रम्य नमयेद् यन्मां, न तदेतदहं सहे ॥ ३२१ ॥

---

१ स्वया° खंता० ॥

विनष्टं न तदद्यापि, किमप्यस्ति महौजसः । दूरादपसरत्वेष, वलितोऽस्मि रणादहम् ॥ ३२२ ॥
अपरक्ष्मापसामान्यामाज्ञां कर्तुमयं पुनः । मयि क्रोधोद्धतं धावन्, दन्तीवाद्रौ भविष्यति ॥ ३२३ ॥
तदनिष्टफलो भाति, मन्त्रहीनस्य निश्चितम् । वह्निमुष्टिन्धयस्येव, नरेन्द्रस्यायमुद्यमः ॥ ३२४ ॥
ऋते न तातपादाँस्तु, स्वामी मम भवेत् परः । विना दिनाधिपं किं स्यात्, कोकस्यान्यः प्रियाकरः? ॥३२५॥
अथाऽऽहुरमराः श्रीमन्!, निस्सीमगुणगौरव ! । कार्येऽत्र विशदाऽप्येषा, नास्माकं क्रमते मतिः ॥३२६॥
एकतश्चक्रिणश्चक्रं, त्वत्प्रणामसमीहया । न विशत्यायुधागारं, बिभ्राणमकृतार्थताम् ॥ ३२७ ॥
अन्यतस्तव पश्यामः, सर्वथा विनयं वयम् । तत् किं युक्तं भवेद् वक्तुमस्माकं जगतीपते ! ? ॥ ३२८ ॥
अभ्यर्थयामहे किन्तु, भवन्तं भुवनप्रभो ! । युद्धेन नहि योद्धव्यं, प्राणिप्राणापहारिणा ॥ ३२९ ॥
दृग्-वाग्-दण्डादियुद्धेन, बलाबलपरीक्षणम् । कृत्वा जयो व्यवस्थाप्यः, साक्षिणोऽमी भवामहे ॥ ३३० ॥
तथेति प्रतिपेदाने, प्रार्थनां[१] नाभिनन्दने । नातिदूरस्थितास्तस्थुर्मध्यस्थास्ते दिवौकसः ॥ ३३१ ॥
अथ स्वामिसमादेशादारुह्य करिणो रणात् । जवान्निवारयामासुर्नृपयोः पुरुषा भटान् ॥ ३३२ ॥
राजाज्ञामथ राजन्याः, सेनयोरुभयोरपि । श्रुत्वा ववलिरे कष्टं, रुष्टा मुष्टा इवाहवात् ॥ ३३३ ॥
श्रुत्वा सङ्गरमङ्गाङ्गि, सैनिकास्तेऽथ चक्रिणः । परस्परमिति प्रोचुः, शोचन्तो देवमन्त्रितम् ॥ ३३४ ॥
अहो ! धिगिदमायातं, सङ्कटं स्वामिनोऽधुना । समं श्रीबाहुबलिना, बलिना सह यो रणः ॥ ३३५ ॥

नियुद्धबुद्धिदानेऽस्मिन्, दोषः को वा दिवौकसाम् ? ।
ईदृशानां मुधा नाम, कौतुकं को न पश्यति ? ॥ ३३६ ॥

जानता भुजयोर्वीर्यमनुजस्य महीभुजा । एतन्मेने न जानीमस्तत् काऽपि भवितव्यता ? ॥ ३३७ ॥
स्वसैनिकानां श्रुत्वेति, गिरो भरतभूपतिः । बलं दर्शयितुं स्वस्य, तानाहूयेदमब्रवीत्[२] ॥ ३३८ ॥
मया दृष्टोऽद्य दुःस्वप्नः, किल शृङ्खलमण्डलैः । बद्धाऽऽकृष्य तटाद् भूपाः, कूपान्तर्मामपातयन् ॥ ३३९ ॥
अशिवस्य विभेदाय, स्वप्नार्थोऽयं ततोऽधुना । अवश्यं सत्यतां नेयो, भवद्भिर्बलशालिभिः ॥ ३४० ॥
अनिच्छतामिदं राज्ञां, प्रभोर्व्यसनसाहसम् । आज्ञां दत्त्वा स राजेन्दुः, कूपमेकमकारयत् ॥ ३४१ ॥
अवटस्य तटे तस्य, निविष्टो भरतेश्वरः । शृङ्खलानां सहस्रेण, वामहस्तावलम्बिना ॥ ३४२ ॥
सर्वसैन्याभिसारेण, सर्वैरुर्वीभुजां गणैः । सर्वस्थाम्ना समालम्ब्य, समाकृष्यत भूपतिः ॥ ३४३ ॥ युग्मम् ॥
ससैन्यानपि राजन्यान्, शृङ्खलासु विलम्बिनः । रोमभ्यो नाधिकान् मेने, बलवान् भरतेश्वरः ॥ ३४४ ॥
हृद्यं हृद्यङ्गरागं स, तेने तेनैव पाणिना । पेतुस्ते तु समं दत्तसङ्केता इव भूभुजः ॥ ३४५ ॥
दृष्टेन च बलेनास्य, सम्भावितपराक्रमाः । भूभुजो भेजिरेऽम्भोजस्मेरवक्त्रास्तदा मुदम् ॥ ३४६ ॥
अथ श्रीबाहुबलिना, समं समरसीमनि । प्रथमं दृष्टियुद्धाय, प्रतिज्ञां कृतवान् नृपः ॥ ३४७ ॥
उभावभिमुखौ तत्र, निमेषविमुखेक्षणौ । प्रत्यूषपूष-पूर्णेन्दुविभ्रमं बिभ्रतुश्चिरम् ॥ ३४८ ॥
निरीक्ष्य निर्निमेषत्वं, समरं यातयोस्तयोः । तदाद्यनिमिषीभावं, मन्ये मन्युभुजोऽभवन् ॥ ३४९ ॥
सन्तप्ते सोष्मणो बाहुबलेरालोकनाच्चिरम् । स्नपयित्वाऽश्रुभिश्चक्री, प्रावृणोत् पक्ष्मणा दृशौ ॥ ३५० ॥
अहो ! जितं जितं बाहुबलिना बलिनाऽमुना । इत्थं कलकलं चक्रुस्तदा विजयसाक्षिणः ॥ ३५१ ॥
दृक्संग्रामजितेनाथ, समं भरतभूभुजा । प्रारेभे शब्दसमरं, दक्षस्तक्षशिलाविभुः ॥ ३५२ ॥

१ °नां पृथिवीपतौ । नाति° खंता० ॥ २ तानह्वाये° खंता० ॥

विवस्वदश्ववित्रासी, शशिसारङ्गभङ्गकृत् । चक्रिणा सिंहनादोऽथ, क्ष्वेडितः क्ष्वेडिताम्बरः ॥ ३५३ ॥
चमत्कारिणि विश्वानां, विरते भरतध्वनौ । सिंहनादो महान् बाहुबलिनो व्यानशे दिशः ॥ ३५४ ॥
क्षयाब्दगर्जिसंवादे, नादे तस्मिन् विसर्पति । अभूदकालकल्पान्तशङ्कातङ्कातुरं जगत् ॥ ३५५ ॥
त्रुट्यत्पर्वतखण्डेन, क्षुभ्यद्दम्भोधिनाऽधिकम् । विजिग्ये तेन शब्देन, भूयो भरतभूपतिः ॥ ३५६ ॥
अथ हस्तप्रहारेण, रणं निश्चित्य दुर्मदौ । तावपासरतां शक्तिधन्यौ वन्यौ गजाविव ॥ ३५७ ॥
भरतेनाऽऽहतः प्राणपुष्टया मुष्ट्याऽथ मूर्धनि । क्षणं बाहुबलिर्ध्वान्तैर्वव्रे रविरिवाम्बुदैः ॥ ३५८ ॥
सद्वृत्तस्येव कौलीनं, मुनेर्मन्युरिव क्षणात् । ययौ शशधरस्येव, राहुर्बाहुबलेस्तमः ॥ ३५९ ॥
ततो बाहुबलेर्मुष्टिवज्रपातेन ताडितः । पपात शैलवच्चक्री, समं सैन्यमनोरथैः ॥ ३६० ॥
बन्धुना चन्दनस्यन्दैः, सिक्तश्चन्द्रकरैरिव । कैरवाकरवन्मूर्च्छामथामुञ्चत चक्रभृत् ॥ ३६१ ॥
निश्चित्याथ प्रचण्डेन, दण्डेन समरोत्सवम् । अधावतामुभौ भीष्मौ, धृतदण्डौ यमाविव ॥ ३६२ ॥
ततः शिरसि दण्डेन, हतो भरतभूभुजा । सुनन्दासूनुराजानु, ममज्ज भुवि कीलवत् ॥ ३६३ ॥
अथ मग्नौ क्रमौ तस्माद्, भूतलात् पङ्किलादिव । लीलयैव क्रमेणायमुद्दधार धराधवः ॥ ३६४ ॥
तद् बाहुबलिना मौलौ, दण्डेन भरतो हतः । ममज्ज लज्जयेवोच्चैराकण्ठमवनीतले ॥ ३६५ ॥
बभूव क्षितिमग्नस्य, चक्रिणः स्फुटमाननम् । शोकश्यामं निजयशःशशिग्रासेन राहुवत् ॥ ३६६ ॥
मग्नो गर्तादथाकर्षि, चक्री कोद्दालिभिर्भटैः । उत्तमर्णैरिव प्रत्तदेयवित्तोऽधमर्णकः ॥ ३६७ ॥
आससाद विषादस्तद्, भरतं परितो जितं । चक्री नाहमसौ चक्री, ध्यायन्तमिति चेतसि ॥ ३६८ ॥
अथाकस्मात् करेऽमुष्य, चक्रित्वभ्रान्तिभित्तये । आरुरोह ज्वलच्चक्रं, रविबिम्बमिवाम्बरे ॥ ३६९ ॥
तेन पार्श्वगतेनोच्चैश्चक्री चक्रेण सोऽज्वलत् । मार्तण्डमण्डलेनेव, मार्तण्डोपलपर्वतः ॥ ३७० ॥
अथ ज्योतिःपथे सुस्थाँस्त्रासयँस्त्रिदिवौकसः । वधाय बन्धोर्निःशङ्कश्चक्री चक्रं मुमोच तत् ॥ ३७१ ॥
कल्याणशालिनो बाहुबलेर्मेरोरिव व्यधात् । चक्रं प्रदक्षिणाचक्रं, चक्रबान्धवबिम्बवत् ॥ ३७२ ॥
गोत्रे न प्रभवत्येव, चक्रमित्यवलिष्ट तत् । अमोघमप्यनिष्पन्नचक्रवर्तिमनोरथम् ॥ ३७३ ॥
ससमयं भस्मयिष्यामि, सचक्रं चक्रवर्तिनम् । इत्युत्पाट्य क्रुधा मुष्टिं, सुनन्दाभूरधावत ॥ ३७४ ॥
गतो वक्त्रं हहा ! चक्रवर्त्यसौ समवर्तिनः । ईदृक् कलकलारावो, बभाराम्बरगह्वरम् ॥ ३७५ ॥
अत्रान्तरे विवेकार्कतेजःशाम्यन्मनस्तमाः । दध्यौ प्रवीरतामानी, मानी नाभेयसम्भवः ॥ ३७६ ॥
जगतीं जिष्णुरप्येष, योधैः क्रोधादिभिर्जितः । तदन्यविजितं जेतुमेतं धिग् ! धिग् ! ममोद्यमम् ॥ ३७७ ॥
तज्जयामि यदि प्रेतानेतान् जितजगत्त्रयान् । सत्यं तत्तनुजन्माऽस्मि, तस्य विश्वप्रभोरहम् ॥ ३७८ ॥
स ध्यात्वेति नवद्वारे, पुरे तेषां सदास्पदे । शिरःपरिसरोदुच्चखान तत् केशकाननम् ॥ ३७९ ॥
निवार्य सर्वव्यापारानसौ निश्चलनिश्चयः । स्वतन्त्रस्तत्र पाना-ऽन्नप्रवेशमरुधत् ततः ॥ ३८० ॥
बान्धवो लघवः सर्वे, केवलज्ञानशालिनः । कथं वन्द्या मया साक्षाद्, गत्वा तातस्य सन्निधौ ? ॥ ३८१ ॥
तत् प्राप्य केवलज्ञानमिहैवानन्दमन्दिरम् । भूत्वा समः स्वबन्धूनां, गन्ताऽहं तातसंसदि ॥ ३८२ ॥
निश्चित्येति चिरं चित्ते, तत्रैव कृतवान् कृती । कायोत्सर्गविधिं मोहमहीपतिजयोर्जितः ॥ ३८३ ॥

---

१ °भ्यत्पाथोधिना° खंता० ॥ २ °राहुच्च° पाता० ॥

तं तथास्थितमालोक्य, बान्धवं वसुधाधवः । विषण्णः कर्मणा स्वेन, बाष्पाविलविलोचनः ॥ ३८४ ॥
धिगेतच्चक्रवर्तित्वं, बन्धुभिर्विरहो यतः । किं तेन काञ्चनेनापि, येनाऽऽशु त्रुटति श्रुतिः ? ॥ ३८५ ॥
मन्ये धन्यमहं काकं, साकं यः स्वजनैर्निजैः । अप्यल्पां बलिमादत्ते, नात्मानं त्यक्तबान्धवम् ॥ ३८६ ॥
या निजैर्बन्धुभिः सार्कं, संविभज्य न भुज्यते । पुंसः श्रियमिमां मेने, विधिर्व्याधिमिव व्यधात् ॥ ३८७ ॥
इति ध्यायन् विषण्णात्मा, बन्धुमध्यात्मबन्धुरम् । निपत्य पादयोश्चक्री, निजगाद सगद्गदम् ॥ ३८८ ॥
सूनुस्त्वमेव तातस्य, नाहं हतकविक्रमः । वध्ये मयि दयालुर्यः, शमं सोम ! समासदः ॥ ३८९ ॥
हतकोऽहं पुरा मुक्तः, समग्रैरपि बन्धुभिः । एकं त्वमपि मुञ्चन् मां, तात ! मा कृपणं कृथाः ॥ ३९० ॥
तात ! राज्यमिदं पातु, ताततुल्यगुणो भवान् । चक्रवर्त्यपि वर्तिष्ये, तवाहं वाहनोपमः ॥ ३९१ ॥
स्वचेष्टिताग्निसन्तप्ते, मुञ्च वागमृतच्छटाम् । मयि प्रलपति भ्रातः !, दयाकर ! दयां कुरु ॥ ३९२ ॥
वदन्निति नतश्चक्री, सचिवैरुच्यते स्म सः । नाथ ! बाहुबलिः सोऽयं, न वक्ता निश्चितव्रतः ॥ ३९३ ॥
इति तद्वचनैश्चक्री, जानन् बान्धवनिश्चयम् । उन्मुखः साश्रुदृक् पादन्यस्तहस्तोऽवदत् पुनः ॥ ३९४ ॥

न चेद्धास्यसि तन्मा दा, वाचं वाचंयमाग्रणीः ।
किं प्रसन्नाक्षिदानेऽपि, काऽपि स्यादवकीर्णता ? ॥ ३९५ ॥

अथ तुष्टिसुधावृष्ट्या, दृष्ट्या किञ्चिन्मुनीश्वरः । अपश्यद् भरतं हर्षोदञ्चिरोमाञ्चकञ्चुकम् ॥ ३९६ ॥
अथ नेत्राम्बुसम्पातनिर्धौतौ शमिनः क्रमौ । केशपाशेन सम्मार्ज्य, निर्ययौ भरतेश्वरः ॥ ३९७ ॥
ततः सोमयशाः सोमयशा बाहुबलेः सुतः । स्वयं तक्षशिलाराज्ये, भरतेनाभ्यषिच्यत ॥ ३९८ ॥
ततः समं समग्रेण, बलेन बलिनांवरः । ययावयोध्यां चक्रं च, विवेशायुधवेश्मनि ॥ ३९९ ॥

इति जितपुरुहूतः पुण्यसंहूतसम्प-
त्परिचयचयभास्वद्भाग्यसौभाग्यलक्ष्मीः ।
अनिलचलितचेलोत्सेधमेध्यामयोध्या-
मविशदविशदात्मा बन्धुभिर्विप्रयोगात् ॥ ४०० ॥

**॥ इति श्रीविजयसेनसूरिशिष्यश्रीमदुदयप्रभसूरिविरचिते श्रीधर्माभ्युदयनाम्नि श्रीसङ्घपतिचरिते लक्ष्म्यङ्के महाकाव्ये श्रीभरतदिग्विजय-बाहुबलिव्रतवर्णनो नाम चतुर्थः सर्गः समाप्तः ॥**

त्रिजगति यशसस्ते तस्य विस्तारभाजः,
कथमिव महिमानं ब्रूमहे वस्तुपाल ! ? ।
सपदि यदनुभावस्फारितस्फीतमूर्ति-
र्विधुरगिलदरातिं राहुमाहुस्तमङ्कम् ॥ १ ॥

॥ ग्रन्थाग्रम् ४०४ ॥ उभयम् १३४९ ॥

---

१ सार्धं, सं खंता० पाता० ॥ २ दयाङ्कुर ! पाता० ॥ ३ °म् १३३७ पाता० ॥

# पञ्चमः सर्गः ।

इतश्च सत्त्वावष्टम्भनिस्तरङ्गीकृताकृतिः । तस्थौ बाहुबलिर्ध्यानबद्धनिश्चलनिश्चयः ॥ १ ॥

ततः क्षमाभृतां नाथे, तत्र त्रैलोक्यजित्वरे । क्रुधा हैमनवातास्त्रं, हिमालय इवामुचत् ॥ २ ॥

ज्वल[1]द्ध्यानानलध्वस्तजाड्यज्वरविजृम्भिते । तस्मिन् हेमन्तमाहात्म्यं, तदेतन्मोघतां गतम् ॥ ३ ॥

स्वनामधेयचौराणां, तपसां वासदायिनः । बाधामाधातुमेतस्य, माघमासः समासदत् ॥ ४ ॥

लोहं वज्रे खलः साधौ, ग्रीष्मकाल इवोदधौ ।
दधौ तपोनिधौ तस्मिन्, शिशिरः फल्गु बल्गितम् ॥ ५ ॥

चक्रिणाऽप्यजितं बाहुबलिं जेतुमिवोत्सुकः । पुष्पमासं पुरश्चक्रे, पुष्पेषुस्त्रिजगज्जयी ॥ ६ ॥

भ्रमद्भ्रमरधूमाढ्यैः, किंशुका-ऽशोक-चम्पकैः । मधुः कुसुमबाणस्य, ज्वलनास्त्रनिभैर्बभौ ॥ ७ ॥

जितमोहमहीनाथे, तस्मिन् मथितमन्मथे । मधोः किं नाम कुर्वन्तु, सायकाः शीर्णनायकाः ? ॥ ८ ॥

अजितेऽथ स्मरेणास्मिन्, मुनौ च[2]क्रिविजित्वरे ।
भीष्मो ग्रीष्मो दधाञ्चक्रे, चक्रबन्धुः पराक्रमम् ॥ ९ ॥

करानथ किरत्यर्के, खादिराङ्गारदारुणान् । अभूद् बाहुबलिः कामं, प्रशमामृतवा[3]रिदः ॥ १० ॥

जगज्जनानुरागेण, स्फूर्जतेव समन्ततः । मुनिरासीत् किलाऽऽताम्रो, न पुनस्तपनातपात् ॥ ११ ॥

पश्यन्नस्य तपस्तीव्रमाग्नेयास्त्रमिवोदितम् । रविरुल्लासयामास, जलदास्त्रं तपात्यये ॥ १२ ॥

चक्रिदण्डनिपातं यस्तृणायापि न मन्यते । प्रभवन्तु कुतस्तस्मिन्, धारादण्डाः पयोमुचाम् ? ॥ १३ ॥

ऊढप्रतिज्ञाभारोऽयं, न वोढुं शक्यते मया । इतीव पन्नगेन्द्रेण, प्रेरिताः फणिनां गणाः ॥ १४ ॥

रसातलोद्गताः श्यामाः, कुटिलै[4]र्भ्रान्तिशालिनः । दध्रुः सर्वाङ्गमुल्लास्य, तं लताततिकैतवात् ॥ १५ ॥
॥ युग्मम् ॥

शिलीमुखगणैर्बाणासनान्तर्विनियोजितैः । तस्य क्षोभाय संरम्भमथाऽऽरेभे घनात्ययः ॥ १६ ॥

अथ सत्त्वाद्भुतेनास्य, जलैरप्यमलाशयैः । अहासि शरदि प्रीतैर्विकस्वरमुखाम्बुजैः ॥ १७ ॥

शुक्लध्यानेऽमुनाऽऽरब्धे, भ्रष्टकेकिच्छदच्छलात् । शेषध्यानमहांसीव, महीपीठे शुचाऽलुठत् ॥ १८ ॥

मुनेर्यशः-प्रतापाभ्यामिव नैर्मल्यमर्जितम् । क्रमादम्बुदमुक्तेन्दु-भानुमन्मण्डलच्छलात् ॥ १९ ॥

अथ सम्प्रेषिते ब्राह्मी-सुन्दर्यौ नाभिसूनुना । ज्ञानाधीशप्रवेशार्हतन्मनःसौधशुद्धये ॥ २० ॥

कुञ्जरादुत्तर भ्रातर् !, वाच्यमेतदिति प्रभुः । शिक्षां ददौ तयोर्यान्त्योर्ज्ञानश्रीकुट्टिमभ्रवत् ॥ २१ ॥

स्थानं तदथ ते याते, न मुनीशमपश्यताम् । दृष्टो गुल्मस्तु वल्लीनां, सोच्छ्वासः पुरुषाकृतिः ॥ २२ ॥

तत्र सम्भाव्य तं ताभ्यामुक्तां शुश्राव तां गिरम् । पार्श्वस्थगुप्तकैवल्यलक्ष्मीकर्णेजपां मुनिः ॥ २३ ॥

---

१ °लद्घनाघनध्वस्त° खंता० ॥ २ °चक्रवि° खंता० पाता० ॥ ३ °वारिधिः खंता० ॥
४ °ला भ्रा° खंता० ॥

भ्रातरुत्तर मातङ्गादित्याकर्ण्य तयोर्वचः । चिन्ताचान्तमतिर्भ्रान्तस्तस्थिवान् स मुनिश्चिरम् ॥ २४ ॥
शब्दोऽयं नियतं ब्राह्मी-सुन्दर्योः श्रुतिसुन्दरः । भाषेते चानृतं नैते, न चारूढोऽस्मि हस्तिनम् ॥ २५ ॥
विकल्पं कल्पयन्नेवं, दध्यौ वन्दे लघून् न यत् ।
मानोऽयमेव मे हस्ती, तत्राऽऽरूढोऽस्मि धिग् ! जडः ॥ २६ ॥
सत्यं मत्वेति तातेन, दयां मयि वितन्वता । व्रतिन्यौ प्रतिबोधाय, प्रेषिते शीलसद्मनी ॥ २७ ॥
केवलज्ञानिनो बन्धून्, लघूनपि गुणाधिकान् । करिष्ये तदहं मूर्ध्नि, पुष्पस्तोमानिवामलान् ॥ २८ ॥
ध्यात्वेति पादमुत्क्षिप्य, भिन्ने मानमतङ्गजे । अलाभि मुनिसिंहेन, केवलं मौक्तिकं फलम् ॥ २९ ॥
मानेऽथ सर्वथा मुक्ते, स्फुरन्त्या केवलश्रिया । आश्लिष्टस्य तदा तस्य, विलीनं मनसा रसात् ॥ ३० ॥
दिवि दुन्दुभयो नेदुरभवन् पुष्पवृष्टयः । प्रापास्तं वन्दितुं भक्तिभासुराश्च सुरा-ऽसुराः ॥ ३१ ॥
अथो परिवृतः श्रीमान्, सुरसार्थैर्महामुनिः । जगदीशस्य समवसरणं प्राप पापभित् ॥ ३२ ॥
प्रभुं प्रदक्षिणीकृत्य, गत्वा केवलिपर्षदि । उपाविक्षन्मुनिर्मुक्तालतायामिव नायकः ॥ ३३ ॥
आरुरोहान्यदा स्वामी, स्पष्टमष्टापदाचलम् । समं मुनीन्द्रैः पूर्वाद्रिं, नक्षत्रैरिव चन्द्रमाः ॥ ३४ ॥
त्रिविष्टपसदस्तत्र, विदधुर्देशनासदः । प्रभुश्चतुर्मुखीभूय, तस्मिन् धर्ममुपादिशत् ॥ ३५ ॥
ततः समं समायातौ, भरतेश-सुरेश्वरौ । निन्यतुः कर्णपूरत्वं, विभोर्वचनपल्लवान् ॥ ३६ ॥
देशनान्ते ततश्चक्री, बन्धूनालोक्य वत्सलः । तेषां भोगविभागाय, जिनराजं व्यजिज्ञपत् ॥ ३७ ॥
अथाऽऽदिशज्जिनाधीशो, भरतक्ष्मापतिं प्रति । भोगानभिलषन्त्येते, किमभङ्गुरसङ्गराः ? ॥ ३८ ॥
आनाय्य न्याय्यवित् क्षोणीपती रसवतीमथ । हेतवे निजबन्धूनामन्धूनां प्रशमाम्भसः ॥ ३९ ॥
विज्ञो विज्ञपयामास, सानन्दो नाभिनन्दनम् ।
भोजनायाऽऽदिश स्वामिन् !, शमिनो बान्धवानिति ॥ ४० ॥ युग्मम् ॥
आदिदेशाथ तीर्थेशः, कारितं कल्पते न यत् । भुञ्जते तत् कुतो ज्ञानबन्धुरास्तव बन्धवः ? ॥ ४१ ॥
पुनर्विज्ञपयामास, नृपस्तर्हि जगत्प्रभो ! । स्वामिन्नकारितान्नाय, प्रेष्यन्तां मद्गृहानमी ॥ ४२ ॥
तमादिदेश तीर्थेशो, यथार्थमथ पार्थिवम् । राजन् ! न कल्पते राजपिण्डः शमभृतामिति ॥ ४३ ॥
नरेन्द्रेऽस्मिन् जिनेन्द्रेण, निषिद्धे सर्वथेत्यथ । पराभवभवन्मानम्लानिश्यामलिताननै ॥ ४४ ॥
माऽसौ खेदस्य पात्रं भूदित्यवेत्य मरुत्वता । अवग्रहभिदाः पृष्टः, स्पष्टमूचे जगद्गुरुः ॥ ४५ ॥
॥ युग्मम् ॥
शक्रस्य चक्रिणो राज्ञः, स्थानेशस्य गुरोरिति । पञ्चधाऽवग्रहो भावात्, पञ्चानामपि पुण्यकृत् ॥ ४६ ॥
अथ शक्रः प्रणम्याऽऽह, प्रभो ! क्षेत्रेऽत्र भारते । मया वासाय साधूनां, प्रदत्तोऽयमवग्रहः ॥ ४७ ॥
आकर्ण्य भरतोऽपीति, प्रीतो नत्वा जगद्गुरुम् । अनुजज्ञे निवासाय, साधूनां भारतीं भुवम् ॥ ४८ ॥
अथापृच्छन्महीभर्त्ता, द्युभर्तारं ससम्मदः । देयं कस्यान्नमानीतमिदमेवं निवेद्यताम् ॥ ४९ ॥
गुणाधिकेषु कर्तव्या, पूजेत्युक्ते बिडौजसा ।
साधून् विना गुणी कोऽस्ति, मत्तोऽपीति व्यचिन्तयत् ॥ ५० ॥
ज्ञातं सन्तितरां सन्तः, श्रावका मद्गुणाधिकाः । तेभ्यः पूजा विधेयेति, निश्चयं भरतो व्यधात् ॥ ५१ ॥

१ आरोहदन्य° खंता० ॥ २ सभासदः खंता० ॥

अथ प्रणम्य तीर्थेशं, ययौ दिवि दिवस्पतिः । भरतस्तु विनीतायां, पुर्यां धुर्यो मनस्विनाम् ॥ ५२ ॥

अन्यतो विजहाराथ, प्रभुरष्टापदाचलात् ।
निर्दम्भं लम्भयन् लक्ष्मीं, पुराम्भोजानि भानुवत् ॥ ५३ ॥

भरतोऽपि रतो धर्मे, श्राद्धानाहूय भूरिशः[1] । इदं जगाद भोक्तव्यं, भवद्भिर्मम मन्दिरे ॥ ५४ ॥
क्रियासु कृषिमुख्यासु, कार्यं चेतोऽपि न क्वचित् । भवद्भिः केवलं भाव्यं, धर्मकर्मैककर्मठैः ॥ ५५ ॥
इदं च पाठ्यं निःशाठ्यं, भोजनान्ते मदग्रतः[2] । वर्तते[3] भीर्भवान् जिग्ये, ततो मा हन मा हन ॥ ५६ ॥
मत्वेदमथ ते श्राद्धा, भवने तस्य भुञ्जते । पठन्ति च वचस्तत् ते, सम्मोहगरगारुडम् ॥ ५७ ॥
प्रमादी मेदिनीशोऽपि, मग्नो रतिमहानदे । नित्यमाकर्ण्य तद् वाक्यं, विचिन्तयति किञ्चन ॥ ५८ ॥
अहं केन जितो? ज्ञातं, कषायैस्तेभ्य एव भीः । वर्तते[4] दुर्धरा तेन, न घात्याः प्राणिनो मया ॥ ५९ ॥
नित्यं ते स्मारयन्तीति, नीतिशक्राय चक्रिणे । विरागसागरोल्लासनिशाकरनिभं वचः ॥ ६० ॥
प्रमादपादपाकीर्णे, तस्मिन् भरतभूभृति । पावनैस्तद्गिरां पूरैर्धर्मध्यानानलोऽज्वलत् ॥ ६१ ॥
श्राद्धा-ऽश्राद्धविवेकज्ञैस्तदाऽध्यक्षैर्निवेदिते । चक्री चक्रे परीक्षां तदणु-शिक्षा-गुणव्रतैः[5] ॥ ६२ ॥
श्रावकाणां तदा चक्रे, निर्व्यूढानां परीक्षणे । रेखात्रयं स काकिण्या, रत्नत्रितयसूचकम् ॥ ६३ ॥
स्वाध्यायहेतवे तेषां, वेदानार्यान् नृपार्यमा । स चकार परार्था हि, प्रवृत्तिः स्यान्महात्मनाम् ॥ ६४ ॥
अथान्तरेऽस्य तीर्थस्य, व्यवच्छेदे कदाग्रहात् । अनार्यत्वममी मोहान्मिथ्यात्वं च प्रपेदिरे ॥ ६५ ॥
इतश्च भगवानष्टापदमापदमंहसाम् । आययाविति विज्ञाय, वन्दितुं गतवान् नृपः ॥ ६६ ॥
नत्वा तत्र जगन्नाथं, प्राञ्जलिर्जगतीपतिः । कथां शलाकापुरुषत्रिषष्टेरपि सोऽश्रृणोत् ॥ ६७ ॥

अथ विज्ञपयामास, स्वामिनं भरतेश्वरः ।
अस्यां सभायां कोऽप्यस्ति, प्रभो! भावी समस्त्वया ? ॥ ६८ ॥

अथ प्रथमतीर्थेशः, प्रोवाच भरतेश्वरम्[6] । यस्त्वत्पुत्रोऽग्रहीद्दीक्षां मरीचिर्मत्पुरः पुरा ॥ ६९ ॥
स दीक्षाभारमुद्वोढुमशक्तः सुखलालसः । छत्रमावारकं बिभ्रत्, कर्म मूर्त्तमिवात्मनः ॥ ७० ॥
सकषायोऽहमित्युच्चैः, कषायवसनान्वितः । त्रिदण्डदण्डितश्चाहमिति दण्डत्रयं वहन् ॥ ७१ ॥
न स्वभावसुगन्धोऽहमिति श्रीखण्डमण्डितः । पारिव्राज्यं किलाऽऽदत्त, नोल्लङ्घ्या भवितव्यता ॥ ७२ ॥
॥ विशेषकम् ॥

ततोऽनुपदिकोऽस्माकं, विहरन्नेष भूपते ! । नवीनरुचिभिर्लोकैः, पृष्टो धर्ममवोचत ॥ ७३ ॥

महाव्रतानि पञ्च स्युः, श्रमणानां महात्मनाम् ।
मुख्यो[7] मोक्षस्य मार्गोऽयमशक्तौ श्रावको भवेत् ॥ ७४ ॥

अणुव्रतानि पञ्च स्युः, सप्त शिक्षाव्रतानि च । श्राद्धेन पालनीयानि, यदीच्छाऽनुपमे सुखे ॥ ७५ ॥
प्रतिबुद्धयाथ तन्मध्यात्, संसारोद्वेगशालिनः । श्राद्धानामथ साधूनामयाचन्त व्रतानि ये ॥ ७६ ॥
स तानाह ततानाहमशक्तो हीदृशे व्रते । पारिव्राज्यमिदं मन्दमतिस्तद् गच्छत प्रभुम् ॥ ७७ ॥

---

१ भूयसः खंता० पाता० ॥ २ ममाग्र° पाता० ॥ ३ वर्धते खंता० पाता० ॥ ४ वर्धते खंता० पाता० ॥ ५ अणु-शिक्षाव्रतैश्चक्रे, परीक्षां भरतोऽन्यदा इतिरूपमुत्तरार्धं पाता० ॥ ६ °रताधिपम् खंता० पाता० ॥ ७ मुमुक्षोर्मोक्षमार्गो खंता० ॥

यथोचितमथो चक्रुर्मर्मित्य भवभीरवः । जनास्ते यत्प्रवृत्तिः स्याद्, यथा स्वार्थमिहार्थिनाम् ॥ ७८ ॥
एवं विहरमाणोऽयमस्माभिः सह सम्प्रति । इतः स भवतः पुत्रो, धर्मध्यानमना मुनिः ॥ ७९ ॥
सुरा-ऽसुरशिरःश्रेणिमणिभासुरितक्रमः । भावी मम समानश्रीश्चतुर्विंशो जिनेश्वरः ॥ ८० ॥ युग्मम् ॥
**भरतो**ऽथ समुत्थाय, **मरीचिं** निकषा गतः । एनं प्रदक्षिणीकृत्य, नमश्चक्रे कृताञ्जलिः ॥ ८१ ॥
उक्तवाँश्च न ते पारिव्राज्यमेतन्न जन्म च । किन्तु यत् तीर्थकृत्त्वं ते, भावि तद् वन्द्यते मया ॥ ८२ ॥
भगवन्तमथो नत्वा, गतवान् **भरतेश्वरः** । विजहार च तीर्थेशोऽन्यतो वायुरिवास्खलन् ॥ ८३ ॥
अथ लोकस्य दुःकर्मशत्रूच्छेदाय तीर्थकृत् । पुनानः पृथिवीं पादैः, **शत्रुञ्जयगिरिं** ययौ ॥ ८४ ॥
तं विलोक्य त्रिलोक्यन्तर्द्धर्मस्योच्चैः क्षमाभृतः । दुर्गप्रायगिरिं मेने, मुनीन्द्रो निरुपद्रवम् ॥ ८५ ॥
अथ प्रथमसर्वज्ञः, स विज्ञाय जगद्गुरुः । नगेन्द्रमिह[1] माहात्म्यनिधानमिव पिण्डितम् ॥ ८६ ॥
तमारोहन्महामोहद्रोहाय परमेश्वरः । शत्रुवित्रासनायेव, कुञ्जरं वीरकुञ्जरः ॥ ८७ ॥ युग्मम् ॥
मुनयः **पुण्डरीका**द्याः, सहैवाऽऽरुरुहुर्गिरिम् । सोपानमिव निर्वाणसौधस्यात्यन्तमुत्सुकाः ॥ ८८ ॥
बभौ स तं समारूढः, शैलं त्रैलोक्यनायकः । मुक्तिद्वीपमिव[3] प्राप्तस्तीर्त्वा संसारवारिधिम् ॥ ८९ ॥
पिङ्गैः प्रभोः प्रभाभारैः, कीर्णैः कुसुमवृष्टिभिः । ताराभाराकुलस्वर्गशैललीलामगाद् गिरिः ॥ ९० ॥
पवित्रयति मूर्धानं, तदा त्रिजगतीगुरौ । प्रभावप्रणमद्वृक्षभुजाग्रैर्नृत्यति स्म सः ॥ ९१ ॥
प्रमुदस्था सुप्रावृष्णा, पुनः प्रारूढपक्षतिः । अभितः स समारोहल्लोललोकनिभादभात् ॥ ९२ ॥
विबुधास्त्रिविधास्तूर्णं, देवं सेवितुमाययुः । स्वस्थानस्था निरायासं, ज्योतिष्कास्तु सिषेविरे ॥ ९३ ॥
जन्तूनां पापभीतानां, दुर्गभूतस्य भूभृतः । मौलौ वप्रत्रयं रत्न-स्वर्ण-रूप्यैः सुरा व्यधुः ॥ ९४ ॥
प्राकारद्वारदम्भेन, सज्जितानि कुतूहलात् । दिग्वधूभिर्मुखानीव, स्मेराणि जिनमीक्षितुम् ॥ ९५ ॥
सर्वतः पर्वतेष्वेकः, पवित्रोऽहमिति ब्रुवन् । अशोकानोकहव्याजादयमूर्द्ध्वं व्यधाद् भुजम् ॥ ९६ ॥
माहात्म्येन महीध्रेषु, गिरिर्गुरुरसाविति । रत्नसिंहासनव्याजादस्योष्णीषं व्यधुः सुराः ॥ ९७ ॥
चतुर्मूर्तिभृतस्तत्र, स्थितस्याऽऽस्येन्दुभिर्विभोः । स जज्ञे पर्वतः पूर्वैः, सर्वासामप्यसौ दिशाम् ॥ ९८ ॥
तद्देशनां समारेभे, स मारेभैककेसरी । विभुर्भविकलोकानां, कर्णामृतकिरा गिरा ॥ ९९ ॥
महीरुहेषु कल्पद्रुः, स्वयम्भूरमणोऽब्धिषु[4] । ज्योतिष्केषु रविः सोऽयं, शैलः शैलेषु शस्यते ॥ १०० ॥
तुङ्गतां सर्वतः सर्वपर्वतेषु दधात्ययम् । यन्मौलिवर्तिनां हस्तप्राप्यं मुक्तिलताफलम् ॥ १०१ ॥
जलकान्तमणिश्रेणिमयवत् प्रतिभात्ययम् । विघटन्ते झटित्येव, भवाब्धेर्यत्र वीचयः ॥ १०२ ॥
नृणामिहाधिरूढानां, शुक्लध्यानविभानिभात् । हस्तावलम्बनं दत्ते, मुक्तिश्रीः कुन्दसुन्दरा ॥ १०३ ॥
भ्रूण-ब्रह्मर्षिघातादिपातकान्यपि तत्क्षणात् । व्यपोहत्यस्य महिमा, हिमानीवाहिमत्विषः ॥ १०४ ॥
व्यक्तं विमुक्तकाठिन्यमिह क्रूरात्मनां मनः । प्रयाति खादिराङ्गारकुण्डेऽयस्पिण्डवद् द्रवम् ॥ १०५ ॥
अतः शमसुधाकुण्ड !, **पुण्डरीक** ! त्वयाऽऽस्यताम् ।
अस्मिन् धराधरे सिद्धिलोलुभैः साधुभिः समम् ॥ १०६ ॥
इत्यासाद्य प्रभोराज्ञां, पादौ नत्वाऽत्र भूधरे । अस्थायि **पुण्डरीके**ण, मुनिहंसैः सहामलैः ॥ १०७ ॥

---

१ °रनरश्रेणि° वता० ॥ २ तमद्रिमिह पाता० ॥ ३ °मिवोत्तीर्णस्ती° खंता० ॥
४ °ऽद्रिषु वता० ॥

ततश्च विहृतेऽन्यत्र, जगत्त्रितयनेतरि । शुचाऽमुचदयं शैलः, शालादिमणिमण्डनम् ॥ १०८ ॥
तत्रादिगणभृद् दुर्गे, श्रीजिनेशनिदेशतः । सहितः साधुभिस्तन्त्रैस्तन्त्रपाल इव स्थितः ॥ १०९ ॥
तदुवाच मुदा साधूनग्रणीर्गणधारिणाम् । मनःसंवेगसंवेगगौरगौरवया गिरा ॥ ११० ॥
तपःश्रीदूतिकाक्लृप्तसिद्धिसम्बन्धकाङ्क्षिणाम् । कोऽपि केवलसङ्केतनिकेतनमयं गिरिः ॥ १११ ॥
अस्मिन्नाकारणं मुक्तेस्तद्वः केवलमेष्यति । तदात्मा तपसा शुद्धो, वास्यतां ध्यानसौरभात् ॥ ११२ ॥
इति संवेगसश्रीकपुण्डरीकगिरा चिरात् । सर्वेऽप्यालोचनारोचमाना मानादिमाथिनः ॥ ११३ ॥
क्षणक्षामितनिःशेषजन्तवोऽनन्तबोधयः । कर्मदानवभेदाय, साधवो माधवोपमाः ॥ ११४ ॥
गृहीतानशनाः शुक्लध्याननिर्धौतकल्मषाः[1] । बभूव भूभृतस्तस्य, ते लीलामौलिमण्डनम् ॥ ११५ ॥

॥ विशेषकम् ॥

गणभृन्मुक्तिनिःश्रेणिं, क्षपकश्रेणिमाश्रितः । तैः सार्द्धं साधुभिर्लेभे, द्वादशीं गुणभूमिकाम् ॥ ११६ ॥
[2]मासान्ते चैत्रराकायामथ प्रथमतोऽभवत् । केवलं पुण्डरीकस्य, ततोऽन्येषां तपोभृताम् ॥ ११७ ॥
अथैतान् मुक्तिवनिता, नितान्तमनुरागिणी । निर्मुक्तकर्मावरणानात्मसादकृत स्वयम् ॥ ११८ ॥
गीर्वाणास्तत्र निर्वाणगमनोत्सवमुत्सुकाः । आगत्य चक्रिरे तेषां, हर्षसोत्कर्षचेतसः ॥ ११९ ॥
तदेष प्रथमं तीर्थं, शत्रुञ्जयधराधरः । बभूव पुण्डरीकादिसाधुसिद्धिनिबन्धनम् ॥ १२० ॥
तत्र रत्नमयं चैत्यमुदितं मुदितो व्यधात् । उदयाद्रिशिरश्चुम्बिरविबिम्बविडम्बकम् ॥ १२१ ॥
जितस्तेनैव चैत्येन, प्रभया सुरभूधरः । प्रस्वेदबिन्दुसन्दोहं, धत्ते तारावलिच्छलात् ॥ १२२ ॥
पुण्डरीकप्रभोर्मूर्त्या, युतामत्र नृपो व्यधात् । युगादिजिननाथस्य, प्रतिमां मतिमानसौ ॥ १२३ ॥
विहरन्नथ देशेषु, विविधेषु जगद्गुरुः । भविनां मुक्तिमार्गाय, धर्मं युग्यमिवार्पयन् ॥ १२४ ॥
पूर्वलक्षं परिक्षिप्य, दीक्षाकालात् त्रिकालवित् । निर्वाणकालं विज्ञाय, स्पष्टमष्टापदं ययौ ॥ १२५ ॥

॥ युग्मम् ॥

अष्टापदाद्रिमारूढः, परीतः स्फटिकांशुभिः । शुशुभे स विभुः शुभ्रैः, सिद्धेरालोकजैरिव ॥ १२६ ॥
प्रत्यपद्यत साधूनां, सहस्रैर्दशभिर्युतः । चतुर्दशतपोयोगात्, पादपोपगमं जिनः ॥ १२७ ॥
तथाऽवस्थितमद्रीन्द्रपालो व्यालोक्य तं प्रभुम् । गत्वा विज्ञपयामास, भरतं भूमिवासवम् ॥ १२८ ॥
श्रुत्वा चतुर्दशाहारपरिहारं जगद्गुरोः । न चतुर्दशभिर्भेजे, रत्नैरपि नृपः सुखम् ॥ १२९ ॥
ततश्चरणचारेण, चचाल भरतेश्वरः । परिवारैर्दिशो रुन्धन्नष्टावष्टापदं प्रति ॥ १३० ॥
अनुयाताऽपि वातेन, वेगादचलचीवरः । आजगाम गिरेर्मौलिमाक्रुष्टो मनसेव सः ॥ १३१ ॥
अप्राप्तपूर्वाऽऽजन्म, चरणौ प्राप्य चक्रिणः । मार्गभूर्दुर्भगेव स्त्री, रक्ताऽभूत् क्षरताऽसृजा ॥ १३२ ॥
अशक्तेऽपि सहाऽऽगन्तुं, छत्रधारिणि चक्रिणः । अपनिन्ये मनस्तापस्तपनातपवेदनाम् ॥ १३३ ॥
अथाष्टापदमारूढस्तं तथाऽवस्थितं प्रभुम् । अपश्यत् प्रसभोन्मीलद्बाष्पाविलविलोचनः ॥ १३४ ॥
स प्रणम्याभवद् यावदुपास्तिन्यस्तमानसः । अपश्यत् तावदायातान्, सर्वान् गीर्वाणनायकान् ॥ १३५ ॥
भक्ति-शोकभराभोगभङ्गुरीकृतकन्धरः । तैः समं शमिनामीशमुपासामासिवानसौ ॥ १३६ ॥

---

१ °निर्धूत° खंता० पाता० ॥ २ अथ प्रथममुत्पेदे, पुण्डरीकस्य केवलम् । मासान्ते चैत्रराकायां, ततोऽन्येषां तपोभृताम् ॥ ११७ ॥ इति रूपेणायं श्लोक. पाता० उपलभ्यते ॥

माघकृष्णत्रयोदश्यां, पूर्वाह्णेऽभीचिगे विधौ । समाहितमनाः काययोगे स्थित्वाऽथ बादरे ॥ १३७ ॥
अरौत्सीद् बादरौ शब्द-चित्तयोगौ जगद्गुरुः । कायस्य बादरं योगं, सूक्ष्मेणैव रुरोध सः ॥ १३८ ॥
क्षिप्तसूक्ष्मतनूयोगं, सूक्ष्मक्रियमिति क्रमात् । तार्तीयीकं स तीर्थेशः, शुक्लध्यानमसाधयत् ॥ १३९ ॥
ततश्चतुर्थमुच्छन्नक्रियं ध्यानमशिश्रियत् । पञ्चह्रस्वाक्षरोच्चारकालमालम्बनातिगम् ॥ १४० ॥
प्रक्षीणाशेषकर्मौघः, संत्यक्ततनुपञ्चकः । स्वभावसिद्धोर्ध्वगतिर्ज्वालावदृजुनाऽध्वना ॥ १४१ ॥
अस्पृष्टाकाशगमनः, सिद्धानन्तचतुष्टयः । एकेन समयेनाऽऽप, मुक्तिलक्ष्मीवतंसताम् ॥ १४२ ॥
॥ युग्मम् ॥

क्षपकश्रेणिमारुह्य, परेऽपि परमर्षयः । तदा दश सहस्राणि, मुक्तिं प्रभुवदभ्ययुः ॥ १४३ ॥

प्रथममयमुदारां प्राप्य सम्यक्त्वलक्ष्मीं,
तदनु मनुजवर्ग-स्वर्गसाम्राज्यलक्ष्मीम् ।
अथ निरुपमसम्यग्ज्ञान-चारित्रलक्ष्मीं,
भुवनपतिरवाप श्रायसीं शर्मलक्ष्मीम् ॥ १४४ ॥

**॥ इति श्रीविजयसेनसूरिशिष्यश्रीमदुदयप्रभसूरिविरचिते श्रीधर्माभ्युदयनाम्नि श्रीसङ्घपतिचरिते लक्ष्म्यङ्के महाकाव्ये श्रीशत्रुञ्जयमहातीर्थोत्पत्ति-श्रीऋषभस्वामिनिर्वाणवर्णनो नाम पञ्चमः सर्गः ॥**

श्रीवस्तुपालसचिवस्य परे कवीन्द्राः,
कामं यशांसि कवयन्तु वयं तु नैव ।
येनेन्द्रमण्डपकृतोऽस्य यशःप्रशस्ति-
रस्त्येव शक्रहृदि शैलशिलाविशाले ॥ १ ॥

॥ ग्रन्थाग्रम् १४९ । उभयम् १४९८ ॥

---

१ मू १५० । उभयम् १४८५ इति पाता० ॥

# षष्ठः सर्गः ।

**ऋषभजिननिर्वाणमहोत्सवः**

प्रभोर्मोक्षक्षणे तत्र, नारकेष्वपि सौख्यदे । अज्ञातरुदितश्चक्री, मूर्च्छितः क्ष्मातलेऽपतत् [1] ॥ १ ॥
शोकग्रन्थिविभेदाय, रुदितं शिक्षयन् हरिः । तस्य कण्ठमथाऽऽलम्ब्य, पूत्कारं तारमातनोत् ॥ २ ॥
लब्धसंज्ञोऽथ राजाऽपि, रुदन्नुच्चैःस्वरं पुरः । विह्वलः शोकपूरेण, विललापेति बालवत् ॥ ३ ॥
नाथ ! त्यक्तः कुतो दोषादनाथोऽयं त्वया जनः ? ।
युष्मद् विना कथं भावी, भवारण्येऽशरण्यकः ? ॥ ४ ॥
वियोगः सह्यते भानोः, पुनरुद्गमनाशया । अनावृत्तिपदस्थस्य, भवतस्तु सुदुःसहः ॥ ५ ॥
मूलतोऽसि न यैर्दृष्टस्तेऽप्यस्मत्तः प्रभो ! वरम् । अदृष्टेऽर्थे न तद् दुःखं, दृष्टनष्टे तु यद् भवेत् ॥ ६ ॥
बन्धवोऽप्यनुगन्तारस्त्वाममी मम सर्वथा । एक एवाहमत्रास्मि, त्वया पङ्क्तिबहिष्कृतः ॥ ७ ॥
भूत्वा तस्य सुतः श्रीमन्निति शोकवशंवदः । अपि मुक्तिपदप्राप्तं, किं व्रीडयसि तं प्रभुम् ? ॥ ८ ॥
नृपः प्रलापान् कुर्वाणो, गीर्वाणपतिना स्वयम् । इत्थं प्रबोधितः शोकशङ्कुं किञ्चिन्मुमोच सः ॥ ९ ॥
॥ युग्मम् ॥
अथाऽऽदिष्टाः सुरेन्द्रेण, चन्दनैर्नन्दनोद्गतैः । पूर्वस्यां दिशि याम्यायां, प्रतीच्यामपि च क्रमात् ॥ १० ॥
वृत्तां प्रभोः कृते त्र्यस्रामिक्ष्वाकुकुलजन्मनाम् [2] । चतुरस्रां परेषां तु, चितां चक्रुर्दिवौकसः ॥ ११ ॥
॥ युग्मम् ॥
ततो मुक्तशरीराणि, निवेश्य शिबिकान्तरा । चितासमीपमानिन्युस्ते महेन महीयसा ॥ १२ ॥
अथो यथोचितं तेषु, निहितेषु चितान्तरे । वह्निं विचक्रुर्वायुं च, वह्नि-वायुकुमारकाः ॥ १३ ॥
तं च व्यध्यापयन् वह्निमह्नायाऽब्दकुमारकाः । सुगन्धिभिरुपानीतैः, क्षीरवारिधिवारिभिः ॥ १४ ॥
ततः सर्वेऽपि देवेन्द्राः, देवाश्च जगृहुर्मुदा । दंष्ट्रा-दन्तादिकान्यस्थिशकलानि यथोचितम् ॥ १५ ॥
याचमानाश्च देवेभ्यो, लब्धकुण्डत्रयाग्नयः । श्रावकास्तत्प्रभृत्येवमभूवन्नग्निहोत्रिणः ॥ १६ ॥
भस्मभूषणतां प्रापुः, परे तद्भस्मवन्दकाः । ततश्चितात्रयस्थाने, रत्नस्तूपान् व्यधुः सुराः ॥ १७ ॥
इन्द्राश्चाष्टाह्निकां नन्दीश्वरे कृत्वाऽञ्जनाद्रिषु । न्यस्य माणवकस्तम्भे, दंष्ट्रा भर्तुरपूपुजन् ॥ १८ ॥
भरतोऽपि प्रभोरङ्गसंस्कारासन्नभूतले । त्रिगव्यूतोच्छ्रयं चैत्यं, चक्रे योजनविस्तृतम् ॥ १९ ॥
रत्नाश्मनिर्मितेनाथ, तेन चैत्येन भासुरः । आविर्भूतो बभौ रत्नगर्भागर्भ इवाचलः ॥ २० ॥
तत्र चैत्ये चतुर्द्वारे, प्रतिद्वारं स मण्डपान् । विचित्रान् सूत्रयामास, प्रभापल्लविताम्बरान् ॥ २१ ॥
प्रत्येकं तत्पुरः प्रेक्षामण्डपानां चतुष्टयम् । अक्षपाटक-चैत्यद्रु-पीठ-पुष्करिणीयुतम् ॥ २२ ॥
तं गिरिं दण्डरत्नेन, समीकृत्य नृपो व्यधात् । अष्टापदं स सोपानैरष्टभिर्मेखलानिभैः ॥ २३ ॥

१ °तलेऽलुठत् खंता० पाता० ॥ २ °जन्मिनाम् पातासं० ॥

लोहयन्त्रमयानेष्यज्जनताशातनाभयात् । रक्षकानार्षभिस्तत्राकार्षीत् कीनाशदासवत् ॥ २४ ॥
तस्य सिंहनिषद्याख्यप्रासादस्य च मध्यतः । देवच्छन्दं व्यधाच्चक्री, रत्नपीठप्रतिष्ठितम् ॥ २५ ॥
यथामानं यथावर्णं, यथालाञ्छनमत्र च । बिम्बानि ऋषभादीनां, चतुर्विंशतिमातनोत् ॥ २६ ॥
कृत्वा रत्नमयीः सर्वभ्रातॄणां प्रतिमा अपि । तत्रोपास्तिपरां भूपः, स्वमूर्तिमपि निर्ममे ॥ २७ ॥
बहिश्चैत्यं चितास्थाने, प्रभोः स्तूपमपि व्यधात् । भ्रातॄणामपि च स्तूपान्, नवतिं स नवाधिकाम् ॥ २८ ॥
प्रतिष्ठाप्याथ बिम्बानि, तत्र चैत्ये यथाविधि । पयोभिः स्नपयामास, मांसलामोदमेदुरैः ॥ २९ ॥
प्रमृज्य गन्धकाषाय्या, चन्दनेन विलिप्य च । अर्चयामास माणिक्य-सुवर्ण-कुसुमांशुकैः ॥ ३० ॥
तत्र चागुरु-कर्पूर-धूपधूम्या घनावृते । कुर्वन् घण्टारवैर्गर्जिं, विद्युतं भूषणद्युता ॥ ३१ ॥
तूर्य-चामर-सोत्कर्षपुष्पवर्षमनोहरम् । कर्पूरारात्रिकं चक्री, चक्रे शक्रेण संनिभः ॥ ३२ ॥ युग्मम् ॥
तदन्ते च विधायोच्चैर्विधिवच्चैत्यवन्दनाम् । महीमहेन्द्रस्तुष्टाव, भावपावनमानसः ॥ ३३ ॥
अहो ! सहोत्थितज्ञानत्रयो विश्वत्रयीपतिः । दुःखत्रयात् परित्राता, त्रिकालज्ञो जयत्ययम् ॥ ३४ ॥
जयत्येष स्व-परयोर्निर्विशेषमना मुनिः । समीपदीपस्त्रैलोक्येऽप्युच्चैस्तमतमश्छिदे ॥ ३५ ॥
अयं जयति कन्दर्पसर्पदर्पपतत्पतिः । सुरा-ऽसुरशिरोरत्नराजिनीराजितक्रमः ॥ ३६ ॥
जयत्यसावसामान्यधामधामजिनाग्रणीः । समग्रजगदम्भोजविकाशनविभाविभुः ॥ ३७ ॥
असौ दिशतु विश्वेऽपि, हर्षमुत्कर्षयन् गुणान् । स्पष्टमष्टमहाकर्ममर्मनिर्मन्थकर्मठः ॥ ३८ ॥
सम्पिष्टविष्टपानिष्टदुरितोऽङ्कुरितोत्सवः । जयत्ययं महामायात्रियामाया दिवाकरः ॥ ३९ ॥
असावपारसंसारसमुत्तारतरण्डकः । जयताटुज्ज्वलज्ञानमुक्ताधानकरण्डकः ॥ ४० ॥
सिद्धिसौधोन्मुखप्राणिश्रेणिनिःश्रेणिसन्निभः । रोहन्मोहद्रुमद्रोहलोहपर्शुर्जयत्ययम् ॥ ४१ ॥
आदिनाथमिति स्तुत्वा, परानपि जिनेश्वरान् । पुनः पुनर्नमश्चैत्यान्, कथञ्चिन्निर्ययौ नृपः ॥ ४२ ॥
गिरिं विलोकयन् वारंवारं वलितकन्धरः । भोक्तुं मोक्तुं चासमर्थो, निधानमिव तद्धनः ॥ ४३ ॥
वस्त्रान्तमार्जितोन्मज्जद्बाष्पप्लुतविलोचनः । निभृतैर्मौनिभिर्भूपैर्वृतोऽप्येक इव व्रजन् ॥ ४४ ॥
मन्दमन्दाङ्घ्रिसञ्चारमुत्ततार गिरेस्ततः । नृपः शोकतमःपूरैरपश्यन्निव वर्त्तनीम् ॥ ४५ ॥
॥ विशेषकम् ॥
असौ सैन्यजनैः स्वस्ववाहनत्वरणालसैः । शोकप्रच्छादितोत्साहमयोध्यामविशत् पुरीम् ॥ ४६ ॥
नाभेयप्रभुपादानां, दिवानिशमसौ स्मरन् । त्यक्तान्यव्याप्रतिस्तत्र, तस्थावस्वस्थमानसः ॥ ४७ ॥
तममात्यजनो वीक्ष्य, सर्वकृत्यपराङ्मुखम् । इति प्रबोधयामास, पितृ-भ्रातृशुचाकुलम् ॥ ४८ ॥
जगतोऽपि कृतालोकं, लोकोत्तरपदास्पदम् । तातं हतविपत्तापं, शोचितुं तव नोचितम् ॥ ४९ ॥
तद्वचःकुसुमासारसारसौरभसम्भृतः । शोच्यस्त्वया न चात्माऽपि, पुण्यलक्ष्मीस्वयंवरः ॥ ५० ॥
मूर्खो दुःखार्दितोऽभ्येति, लोकः शोकस्य वश्यताम् । सेवते न पुनर्धर्म्मं, तत्प्रतीकारकारणम् ॥ ५१ ॥
त्वमप्याक्रान्तलोकेन, शोकेन यदि जीयसे । शौडीर्यगर्जितं तत्ते, न धत्ते ध्रुवमूर्जितम् ॥ ५२ ॥
शक्रोऽप्यक्रीडयत् पीडाविस्मारणविधित्सया । एनं प्रतिदिनं नानाविनोदैरात्तसम्मदम् ॥ ५३ ॥

---

१ °नमेव च खंता० ॥ २ दुग्धावनिपतिस्तुतः वता० खंता० ॥ ३ °भावसुः पाता० ॥ ४ लोकान्तर° वता० खंता० ॥ ५ °परपातं, शो° खंता० पाता० ॥

जलैर्जितामृतैः स्वामिदेशनावन्धबन्धुभिः । सह मित्रसमूहेन, चक्रे केलिं कदाऽपि सः ॥ ५४ ॥
आदायाऽऽदाय पद्मानि, तत्र मूर्धनि धारयन् । नृपः प्रमोदमाप्नोति, नाभेयाङ्घ्रिभ्रमादिव ॥ ५५ ॥
कदाऽप्युपवनोत्सङ्गे, धत्ते मुदमसौ लसन् । पुष्पाणि वासिताशानि, पश्यन् नाभेयकीर्तिवत् ॥ ५६ ॥
वहन् स कौसुमीं मालां, हृदि तत्र प्रमोदते । प्रभोर्न्याख्याक्षणोन्मीलद्दशनद्युतिकौतुकात् ॥ ५७ ॥
भूनेता नित्यमित्यादिकेलिकल्लोलकौतुकी । मुदा निर्गमयामास[1], दिनानि घटिकार्द्धवत् ॥ ५८ ॥
सांसारिकसुखाम्भोधिमग्नो भरतभूपतिः । विभोर्मोक्षदिनात् पञ्च, पूर्वलक्षाण्यवाहयत् ॥ ५९ ॥

## भरतचक्रवर्त्तिकेवलज्ञान-निर्वाणे

अन्येद्युः स्नात्र[2]निर्णिक्तगात्रो धात्रीभृतांवरः । अन्तरन्तःपुरावासं, भूरिभूषणभूषितः ॥ ६० ॥
रत्नादर्शगृहं प्राप, वैरस्त्री[3]परिवारितः । भरतेशो नभोदेशं, विभाभिरिव भास्करः ॥ ६१ ॥ युग्मम् ॥
शुशुभे स स्थितस्तत्र, दर्पणप्रतिबिम्बितः । विजितेन स्मरेणेव, सेवितुं कृतसन्निधिः ॥ ६२ ॥
तदा विलोकमानस्य, नृपस्य मणिदर्पणम् । अभवद् द्विगुणा मूर्त्तिः, कान्तिः कोटिगुणा पुनः ॥ ६३ ॥
न्यस्तं मोहेन हिञ्जीरमिव तस्य महीशितुः । तदा लीलालुलत्पाणेर्निजगालाङ्गुलीयकम् ॥ ६४ ॥
विना तेनाङ्गुलीयेन, दृष्टा तेनाङ्गुली ततः । निःश्रीका निष्पताकेव, मणिकेतनयष्टिका ॥ ६५ ॥
सौभाग्यं भूषणैरेव, बिभर्ति वपुरङ्गिनाम् । निश्चेतुमिति मोक्तुं स, प्रारेभे भूषणावलीम् ॥ ६६ ॥
विमुच्य मुकुटं हेममयं मौलिं व्यलोकयत् । श्रिया विरहितं चैत्यमिव निष्कलशं नृपः ॥ ६७ ॥
मुक्ते मुक्तावलीनद्धे, कुण्डलद्वितयेऽथ सः । शताङ्गमिव निश्चक्रं, स्वास्यं निःश्रीकमैक्षत ॥ ६८ ॥
व्यलोकयत् परित्यक्तहारां स हृदयावनीम्[4] । संशुष्कनिर्झरोद्गारां, स्वर्णाचलतटीमिव ॥ ६९ ॥
ग्रीवामुत्तारितस्मेरमणिग्रैवेयकामसौ । अतारापरिधिं मेरुमेखलामिव चैक्षत ॥ ७० ॥
स भुजौ च्युतलक्ष्मीकौ, निरैक्षत निरङ्गदौ । प्रतिमानविनिर्मुक्तौ, सुरेभदशनाविव ॥ ७१ ॥
हस्तावपास्तमाणिक्यकङ्कणौ पश्यति स्म सः । तोरणस्तम्भवद् वातहृतवन्दनमालिकौ ॥ ७२ ॥
शेषा अप्यङ्गुलीर्मुक्ताङ्गुलीयाः स्रस्ततेजसः । शाखा इव परिभ्रष्टपल्लवाः स व्यलोकयत् ॥ ७३ ॥
एवं विमुक्तालङ्कारं, सोऽपश्यद् वपुरप्रभम् । शुष्कं सर इव भ्रष्टहंस-राजीव-कैरवम् ॥ ७४ ॥
अचिन्तयच्च ही ! देहो, भूषणैरेव भासते । पङ्कोत्कर्षाकुलो वर्षाकालः सस्योद्गमैरिव ॥ ७५ ॥
शरीरं मलमञ्जूषा, बहिर्दुर्गन्धिभीरुभिः । मूढैः कर्पूर-कस्तूरी-चन्दनैरधिवास्यते ॥ ७६ ॥
मलोत्पन्नान्मलैः पूर्णादतोऽङ्गाल्लीनमन्तरा । धौतं बोधिजलैः ज्ञानरत्नमाद्रियते बुधैः ॥ ७७ ॥
स्वकीयान् बान्धवानेव, मन्ये धन्यतमानिमान् । यैरिदं राज्यमुत्सृज्य, लेभे लोकोत्तरं पदम् ॥ ७८ ॥
अहं तु विषयातङ्कपङ्कनिःशूकशूकरः । गणयामि न नामाहमात्मानं मानुषेष्वपि ॥ ७९ ॥
चिन्तयन्नित्ययं धीमानपूर्वकरणक्रमात् । भावनां भवनाशाय, भावयामास भूविभुः ॥ ८० ॥
अथोच्चैः सिद्धिसौधाग्रसङ्गजाग्रन्मनोरथः । क्षितीशः क्षपकश्रेणीनिःश्रेणीमारुरोह सः ॥ ८१ ॥
मुनिस्तदानीमानीतकेवलश्रीकरग्रहः । उत्सवोत्सुकचित्तेन, सुरेन्द्रेणाभ्यगम्यत ॥ ८२ ॥

---

१ °स, वासरान् घटि° खंता० ॥ २ स्नानर्नि° खता० ॥ ३ प्रियाभिरभितो वृतः खंता० ॥
४ °वनिम् खंता० ॥

ख्यापयित्वा बलीयस्त्वं, व्यवहारनयस्य सः । शक्रेणाभिदधे दीक्षावेषग्रहणहेतवे ॥ ८३ ॥
केशसम्भारमुत्पाट्य, मुष्टिभिः पञ्चभिर्नृपः । दत्तं देवतयाऽशेषं, मुनिवेषं तदाऽऽददे ॥ ८४ ॥
सममेव महीशानां, सहस्रैर्दशभिस्तदा । साग्रहैर्जगृहे दीक्षादक्षैः स्वाम्यनुवर्तने ॥ ८५ ॥
तदानीं केवलज्ञानमहिमानं महामनाः । व्यधत्त तस्य नाभेयप्रभोरिव ऋभुप्रभुः ॥ ८६ ॥
भरतोऽपि ततस्तातवर्तनीमनुवर्तयन् । असिञ्चद् देशनासारसुधाभिरवनीवनीम् ॥ ८७ ॥
अतिक्रम्य ततः पूर्वलक्षं दीक्षादिनादसौ । आरोहन्मुषिताशेषकष्टमष्टापदाचलम् ॥ ८८ ॥

कृत्वा मासोपवासक्षपणमकृपणध्यानशुद्धान्तरात्मा,
शैलेशीं प्राप्य योगव्यतिकरहरणोपात्तसौस्थ्यामवस्थाम् ।
तत्रायं त्रातपाताकुलसकलजगज्जन्तुजातः प्रयातः,
सिद्धिं सौधर्मनाथप्रथितपृथुमहःश्लाघ्यनिर्वाणलक्ष्मीः ॥ ८९ ॥

**॥ इति श्रीविजयसेनसूरिशिष्यश्रीमदुदयप्रभसूरिविरचिते श्रीधर्माभ्युदयनाम्नि श्रीसङ्घपतिचरिते लक्ष्म्यङ्के महाकाव्ये भरतनिर्वाणवर्णनो नाम षष्ठः सर्गः ॥**

एतेऽन्योन्यविरोधिनस्त्वयि गुणाः श्रीवस्तुपाल ! क्षमा-
शक्ति-प्रातिभ-वैभवप्रभृतयः सौस्थ्येन तस्थुः कथम् ? ।
नाश्चर्यं यदि वा दिवानिशमसौ हृत्पङ्कजान्तस्तव,
स्वैरस्मेरविरोधवारिधिमदागस्त्यो यदास्ते जिनः ॥ १ ॥

॥ ग्रन्थाग्रम्[2] ९२ ॥ उभयम् १५९० ॥

---

१ °स्तावद्वर्त्तनीमनुवर्त्तनीम् । असि° खंता० ॥ २ °म् ९० । उभयं १५९० खंता० । °म् ९६ । उभयं १५८१ पाता० ॥

## सप्तमः सर्गः ।

इत्थं परोपकारस्य, विपुलाः फलसम्पदः । धनसार्थेशदृष्टान्तात्, तवामात्य! प्रदर्शिताः ॥ १ ॥
यदुत्तरोत्तरश्रीणां, सञ्जज्ञे भाजनं धनः । सर्वं परोपकारस्य, तदेतन्महिमाऽद्भुतम् ॥ २ ॥
किञ्च विश्वोपकाराय, तद् युगादिजिनेन्दुना । तीर्थेषु धुर्यतां नीतः, सोऽपि शत्रुञ्जयो गिरिः ॥ ३ ॥
मन्त्रिन्नेतस्य तीर्थस्य, प्रभावविभवोऽद्भुतः । यं वक्तुं सङ्कुचन्त्युच्चैर्वाचो वाचस्पतेरपि ॥ ४ ॥
मनोरथेऽपि सम्पन्ने, यत्र यात्रोत्सवं प्रति । सम्यक्त्वरत्नं निर्यत्नं, सद्योऽप्यासाद्यते जनैः ॥ ५ ॥
दृष्टेऽपि यत्र पुण्यश्रीः, स्यादवश्यं वशंवदाः । स्पृष्टे तु साऽपि निर्वाणपदवी न दवीयसी ॥ ६ ॥

**कपर्दियक्षोत्पत्तिः**

उपत्यकायां किञ्चास्य, पञ्चास्यध्वनितादपि । जयत्यभीरुकामीरं, पुरं पालित्तपालितम् ॥ ७ ॥
तत्राभवत् कपर्दीति, नाम ग्राममहत्तरः । चौर्य-क्रौर्य-मृषा-मद्य-द्यूतस्यूतमनोरथः ॥ ८ ॥
पूरिताऽप्यघसङ्घातैरनघा नाम विश्रुता । उद्दण्डा चण्डतेवाऽभूद्, देहिनी तस्य गेहिनी ॥ ९ ॥
अन्येद्युर्मद्यपानेन, ताम्रास्यो मद्यभाण्डभृत् । अपश्यन्मञ्चकासीनो, मुनिद्वन्द्वमुपागतम् ॥ १० ॥
नत्वा भ्रूभङ्गमात्रेण, तौ मुनी निजगाद सः । हंहो ! निवेद्यतामत्र, समागमनकारणम् ॥ ११ ॥
तक्रेण दध्ना दुग्धेन, सर्पिषा वा प्रयोजनम् ? । यद्यस्ति किञ्चित् तद् ब्रूत, नूतनं दर्शनं हि वः ॥ १२ ॥
तमूचतुर्मुनी हंहो !, महत्तर ! निशम्यताम् । त्वदन्तिकमुपागन्तुमस्ति नौ कारणान्तरम् ॥ १३ ॥
तीर्थयात्रार्थमायाताः, सन्त्यत्र गुरवोऽधुना । सोऽयं तोयदकालोऽपि, समं दैवादवातरत् ॥ १४ ॥
गुरूणां युज्यते स्थातुं, चतुर्मासीमिहैव यत् । उपाश्रयार्थमायातौ, ततश्चावां तवान्तिके ॥ १५ ॥
सोऽप्यब्रवीन्निराबाधो, गृह्यतामयमाश्रमः । निजोपदेशलेशोऽपि, देयो नात्र स्थितैः पुनः ॥ १६ ॥
तथेति प्रतिपद्याथ, तस्थुस्ते तत्र सूरयः । स्पर्द्धिष्णवः पयोवाहं, स्वाध्यायामृतवृष्टिभिः ॥ १७ ॥
प्रतिश्रयान्तः संलीनैरदीनैर्मुनिपुङ्गवैः । अत्यवाह्यत बाह्या-ऽन्तःसंयतैः स तपात्ययः ॥ १८ ॥
मानसादिव तद्ग्रामान्मुनिहंसा विहारिणः । ऊचुः कपर्दिनं प्राणिमर्दिनं तेऽनुयायिनम् ॥ १९ ॥
अस्माकं स्थानदानेन, सर्वथोपकृतं त्वया । तवोपकारिणोऽप्युच्चैरस्माभिस्तु न किञ्चन ॥ २० ॥
तदद्य यद्यनुज्ञा ते, ज्ञातेयमनुरुध्यते । दत्त्वोपदेशं तत् किञ्चिन्निर्धुनीमोऽधमर्णताम् ॥ २१ ॥
महत्तरोऽवदद् देयः, स्तोकोऽपि नियमो न मे । कथयन्तु पुनः किञ्चिदक्षरं परमाक्षरम् ॥ २२ ॥
ततस्ते गुरवस्तस्मै, स्मितनेत्राम्बुजन्मने । परमेष्ठिमयं मन्त्रं, मानसान्तर्न्यवीविशन् ॥ २३ ॥
एनमन्वशिषंश्चैते, त्वया मन्त्रोऽयमद्भुतः । शयने भोजने पाने, स्मर्तव्यः प्रथमं सदा ॥ २४ ॥
महीयान् महिमा भद्र !, कतमोऽस्य प्रशस्यते ? । स्वल्पः कल्पद्रुमो यत्र, चिन्ता चिन्तामणौ वृथा ॥ २५ ॥
पञ्चाननवधूः पञ्चपरमेष्ठिनमस्कृतिः । स्थित्वा मनोवनोद्देशे, हन्ति दन्तिसमं तमः ॥ २६ ॥

---

१ °ग्रास्यो मद्य° खंता० ॥ २ °व तत् खंता० ॥ ३ °श्रयः । नि° पाता० ॥

दुरितानि दुरन्तानि, तस्य नश्यन्ति दूरतः । यच्चित्ते यामिकी पञ्चपरमेष्ठिनमस्कृतिः ॥ २७ ॥
अत्र **शत्रुञ्जयाद्रौ** च, **श्रीयुगादिजिनेश्वरः** । नमस्कार्योऽन्वहं सन्ध्यामवन्ध्यां तन्वता त्वया ॥ २८ ॥
अयं हि **विमलो** नाम, गिरिर्धुरि[1] धराभृताम् । स्थानमासूत्रयद् यत्र, जगत्त्रयगुरुः स्वयम् ॥ २९ ॥
ख्यातिर्**विमल** इत्यस्य, विश्वान्तरमलव्ययात् । जयादान्तरशत्रूणां, **श्रीशत्रुञ्जय** इत्यपि ॥ ३० ॥
भावेन भजतामेतं, मुक्तिः साऽपि स्वयंवरा । लक्ष्मीरिव भवेन्न्यायवर्तनीवर्तिनां नृणाम् ॥ ३१ ॥
यदस्मिन् **पुण्डरीकेण**, धुर्येण गणधारिणाम् । लेभे मुक्तिर्मुनीन्द्राणां, पञ्चभिः कोटिभिः सह ॥ ३२ ॥
**द्रविडा वालिखिल्याश्च**, नरेशा दश कोटयः । सहैव सिद्धिसौधाग्रमारोहन् मोहनिर्जयात् ॥ ३३ ॥
ख्यातनामा **नमिः** कोटिद्वयेन **विनमिश्च** सः । **वालिर्दाशरथी राम-भरतौ** च शमे रतौ ॥ ३४ ॥
**थावच्चानन्दनः** सोऽपि, ध्वस्तशोकः **शुको**ऽपि च । मुनीनां द्विसहस्रेण, पञ्चशत्या तु **शैलकः**[2] ॥ ३५ ॥
**पाण्डवाः** किञ्च पञ्चापि, जनन्या सह धन्यया । **प्रद्युम्ना**दिकुमाराणां, सार्द्धास्तिस्रश्च कोटयः ॥ ३६ ॥
॥ पञ्चभिः कुलकम्[3] ॥

**नारदः** पारदस्वच्छसच्चरित्रपवित्रधीः । अस्मिन्नवासवान् मुक्तिमतिमुक्तमुनेर्गिरा ॥ ३७ ॥
तीर्थाधिपतिभिः सर्वैरेकं श्रीनेमिनं विना । अत्र पावित्र्यमासूत्रि, पावनैः पादपांशुभिः ॥ ३८ ॥
तिर्यञ्चोऽपि हि धन्यास्ते, येऽत्र संजज्ञिरे गिरौ । मन्ये धन्यतमं त्वां तु, नित्योपासनवासनम् ॥ ३९ ॥
शिक्षाभङ्गीमिमामङ्गीकार्य तं सूरयो ययुः । शिक्षाऽपि क्रियया भेजे, **कपर्दि**नमहर्दिनम् ॥ ४० ॥
निरस्तः सोऽन्यदा क्रोधचण्डया रण्डया तया । बहिर्गृहाद् विनिर्यातः, **शत्रुञ्जय**तले ययौ ॥ ४१ ॥
श्रमाद् विश्रामकामोऽथ, वटं विटपिनं श्रितः । आसन्नभूतले सद्यो, मद्यभाण्डं मुमोच सः ॥ ४२ ॥
क्षणमात्रेण विश्रान्तः, स्मृतपञ्चनमस्कृतिः । पातुकामः सुरां पात्रे, विषबिन्दुं ददर्श सः ॥ ४३ ॥
कुतोऽयमिति तेनाथ, दूरोदञ्चितचक्षुषा । दृष्टो गृध्रः फणिग्रासव्यग्रो न्यग्रोधपादपे ॥ ४४ ॥
मदिराक्षीमिव त्यक्त्वा, मदिरामप्ययं ततः । आरुरोह गलन्मोहः, **शत्रुञ्जय**गिरेः शिरः ॥ ४५ ॥
तत्र नेत्रसुधावृष्टौ, दृष्टे भुवनभर्तरि । पराभवभवस्तस्य, तापः प्रापत् तदा शमम् ॥ ४६ ॥
ततः कन्दलितानन्दः, प्रणम्य परमेश्वरम् । स पश्यन्नात्मनो ग्राममुत्तरं शिखरं ययौ ॥ ४७ ॥
तत्र पश्यन् प्रभोश्चैत्यं, स्मरन् पञ्चनमस्कृतिम् । मुक्त्वा प्रचारमाहारपरिहारं चकार सः ॥ ४८ ॥
ततस्तीर्थप्रभावेन, भावेन च शुभेन सः । यक्षतामक्षतां प्राप, सप्रभावां भवान्तरे ॥ ४९ ॥
ततः सोऽवधिना बुद्ध्वा, **कपर्दी** वृत्तमात्मनः । परित्यज्यान्यकार्याणि[4], वेगादिह समागमत् ॥ ५० ॥
स्नपयित्वाऽर्चयित्वा च, स्तुत्वा च भुवनप्रभुम् । ततो विज्ञः कृतज्ञोऽसौ, जगाम गुरुसन्निधौ ॥ ५१ ॥
गुरून् सोऽथ नमस्कृत्य, दिव्यरूपधरः पुरः । ज्ञापयित्वा स्ववृत्तान्तमुवाच रचिताञ्जलिः ॥ ५२ ॥
ममैतास्तात ! यक्षत्वसुलभाः सुखसम्पदः । तवोपदेशकल्पद्रोरुत्फुल्लपल्लवश्रियः ॥ ५३ ॥
प्रभवोऽन्येऽपि दृष्टेभ्यः, कष्टेभ्यस्त्रातुमातुरम् । दृष्टादृष्टं पुनः कष्टं, पेष्टुमीष्टे परं गुरुः ॥ ५४ ॥
वस्तुनोऽन्यस्य दत्तस्य, फलं क्षयि मुहुर्मुहुः । गुरूपदेशस्य पुनः, फलं गुरु पुरः पुरः ॥ ५५ ॥
तदादेशं प्रयच्छन्तु, गुरवः करवाणि किम् ? । कथञ्चित् तनुतामेति, मम येनाधमर्णता ॥ ५६ ॥

१ °रि महीभृ° खंता० पाता० ॥ २ शेलकः वंता० ॥ ३ कलापकम् वंता० पाता० ॥
४ न्यकर्माणि खंता० ॥

ऊचिरे सूरयोऽप्येतत्, कृतज्ञस्य तवोचितम्। तीर्थप्रभावप्रभवं, वैभवं भवतः पुनः ॥ ५७ ॥
तदत्रावस्थितेनैव, सेव्यः शश्वदसौ प्रभुः। तदाराधकलोकस्य, दुरितं हरता त्वया ॥ ५८ ॥
ततो गुरूणामादेशाद्, देशान्तरपराङ्मुखः। यक्षः कपर्दी तीर्थेऽस्मिन्, विघ्नमर्दी स्थितः स्वयम् ॥ ५९ ॥
वृत्तान्तमेनमाकर्ण्याऽनघा कौलीनशङ्किनी। शाकिनीवातिदुष्टाऽपि, स्वपापेनान्वतप्यत ॥ ६० ॥
सा विवेकमिवोत्तुङ्गमारुह्य शिखरं गिरेः। प्रभुमेनं नमस्कृत्य, कृत्यज्ञा भक्तमत्यजत् ॥ ६१ ॥
ततः सा तीर्थमाहात्म्याद्, द्विपरूपधरः सुरः। भर्तुर्वाहनतां प्रापदाभियोगिककर्मणा ॥ ६२ ॥
यक्षस्ततः प्रभृत्येष, कपर्दी करिवाहनः। पाशा-ऽङ्कुशलसद्वाम-दक्षिणोपरिपाणिकः ॥ ६३ ॥
द्रव्यप्रसेविका-बीजपूराङ्काधःकरद्वयः। स्थापितः शिखरेऽत्रैव, भजते जनपूजनम् ॥ ६४ ॥
समस्तेष्वपि सङ्घेषु, तीर्थयात्राविधायिषु। कुरुते दुरितोच्छेदमेदुरं प्रमदोदयम् ॥ ६५ ॥
दिवानिशमसौ तीर्थरक्षादक्षिणमानसः। विधत्ते प्रत्यनीकेषु, सम्प्रत्यपि विनिग्रहम् ॥ ६६ ॥

## शत्रुञ्जयतीर्थोद्धारवर्णनम्

अपि चात्र जिनाधीशचैत्यं भरतकारितम्। भूयोभिरुद्धृतं भूपैर्गतं कालेन जीर्णताम् ॥ ६७ ॥
ततश्चेक्ष्वाकुवंश्येन, स्मरता निजपूर्वजान्। पुनः सगरसंज्ञेन, तच्चक्रे चक्रिणा नवम् ॥ ६८ ॥
ततः क्रमेण रामेण, निर्जित्य दशकन्धरम्। धरोद्धरणधुर्येण, चैत्यमेतत् समुद्धृतम् ॥ ६९ ॥
इत्यत्रिजभुजौर्जित्यजितकौरवगौरवैः। पुनर्नवभवल्लक्ष्मीताण्डवैरथ पाण्डवैः ॥ ७० ॥
ततो मधुमतीजातजन्मना सत्त्वसद्मना। देवतादेशमासाद्य, तपो-ब्रह्ममयात्मना ॥ ७१ ॥
पुण्यप्राप्यं प्रतिष्ठाप्य, प्रभूतद्रविणव्ययात्। ज्योतीरसाश्मनो बिम्बं, जावडेन न्यवेश्यत ॥ ७२ ॥
॥ युग्मम् ॥
शिलादित्यक्ष्मापालो, वलभीवलभित् ततः। पुनर्नवीनतारुण्यपुण्यं चक्रे जिनालयम् ॥ ७३ ॥
गूर्जरत्राधरित्रीशे, ततः सिद्धाधिपे सति। श्रीमानाशुकमन्त्रीशस्तीर्थमेनमपूपुजपत् ॥ ७४ ॥
उपत्यकायामेतस्य, निवेश्य च निवेशनम्। स चैत्यं नेमिनाथस्य, भक्तिसारमकारयत् ॥ ७५ ॥
वापीमप्यत्र लोकस्य, तृष्णाविच्छेददायिनीम्। भगवद्देशनासारनीरां स निरमापयत् ॥ ७६ ॥
किञ्च तीर्थेऽत्र पूजार्थं, द्वादशग्रामशासनम्। अदापयदयं मन्त्री, सिद्धराजमहीभुजा ॥ ७७ ॥
कुमारपालभूपाले, पालयत्यवनीतलम्। मन्त्री वाग्भटदेवोऽभूदथोदयननन्दनः ॥ ७८ ॥
निदेशादथ भूभर्तुरभ्यमित्रीणताजुपः। समं सुराष्ट्रापतिना, पितुः सङ्ग्रामगामिनः ॥ ७९ ॥
समायातस्य तीर्थेऽस्मिन्, तीर्थोद्धारमनोरथम्।
विज्ञो विज्ञातवान् सोऽयं, परिवारगिरा चिरात् ॥ ८० ॥ युग्मम् ॥
पुण्यलक्ष्मीं भवाम्भोधेरुद्धर्तुं पुरुषोत्तमः। स नाभेयप्रभोर्नव्यं, मन्दिरं मन्दरं व्यधात् ॥ ८१ ॥
विशालशालं शैलाधो, मुक्ताभकपिशीर्षकम्। ताडङ्कवद् भुवश्चक्रे, श्रीकुमारपुरं पुरम् ॥ ८२ ॥
त्रिभुवनपालविहारो, नीलमणिविडम्बिपार्श्वजिनबिम्बः।
इह वहति मध्यनिहितस्तवकतुलामतुलसौभाग्यः ॥ ८३ ॥

१ °दयं प्र° खंता० ॥ २ °धराधीशे खंता० ॥ ३ °जुषा खंता० पाता० ॥
४ पुरा खंता० पाता० ॥ ५ °ध्यविनि° वता० ॥

नन्दनाभिनयनाय नाटिकाः, वाटिकाश्च धृतपुष्पसाटिकाः
कर्तुमस्य जिनभर्तुरर्चनं, तत्पुरः परिसरेऽकरोदसौ ॥ ८४ ॥

इत्थं यथाश्रुतमयं[1] कथितः कथञ्चित्, किञ्चित् प्रभावविभवस्तव वस्तुपाल ! ।
वाग्गोचरे चरति सैष पुनः समस्त-स्तीर्थस्य[2] पश्य महिमा नहि मादृशानाम् ॥ ८५ ॥

संसारसागरपतज्जनतान्तरीप-मारोहतां शिवपदं प्रथमावतारः ।
पापप्रपातधुतधर्मनिवासदुर्गं, शत्रुञ्जयो जयति पुञ्जितपुण्यलक्ष्मीः ॥ ८६ ॥

## ॥ इति श्रीविजयसेनसूरिशिष्यश्रीमदुदयप्रभसूरिविरचिते श्रीधर्माभ्युदयनाम्नि श्रीसङ्घपतिचरिते लक्ष्म्यङ्के महाकाव्ये श्रीशत्रुञ्जयमाहात्म्यो-त्कीर्तनो[3] नाम सप्तमः सर्गः ॥

श्रीवासाम्बुजमाननं परिणतं पञ्चाङ्गुलिच्छद्मतो,
जग्मुर्दक्षिणपञ्चशाखमयतां पञ्चापि देवद्रुमाः ।
वाञ्छापूरणकारणं प्रणयिनां जिह्वैव चिन्तामणि-
र्जाता यस्य किमस्य शस्यमपरं श्रीवस्तुपालस्य तत् ? ॥ १ ॥

स्वस्ति श्रीपुण्डरीकक्षितिधरशिखराद् यक्षमुख्यः कपर्दी,
भूमौ श्रीवस्तुपालं कुशलयति मुदा क्षेमवानस्मि सौम्य ! ।
सान्निध्यं सङ्घलोकेऽद्भुतमिति भवता कुर्वता सर्वथाऽहं,
चक्रे सौख्यैकपात्रं त्रिजगति सततं जीव तत् कल्पकोटीः ॥ २ ॥

॥ ग्रन्थाग्रम् ९५ । उभयम्[4] १६८५ ॥

---

१ यथाश्रुतिपथं कथि° पातासं० ॥ २ °स्ततीर्थं° पाता० ॥ ३ °त्म्यकी° पाता० ॥
४ °म् १६८६ संता० । °म् १६७६ पाता० ॥

## अष्टमः सर्गः ।

जितचिन्तामणिप्रायरत्नसम्भववैभवम् । जयत्यमेयमाहात्म्यं, ब्रह्मचर्यमयं महः ॥ १ ॥
तदेतद् दुरितध्वान्तबन्धविध्वंसनौषधम् । त्रैधं समिद्धमाधेयं, श्रीजम्बूस्वामिना यथा ॥ २ ॥

### जम्बूस्वामिपूर्वभवचरितम्

**मगधो**ऽध्वगधोरण्याः, श्रान्तिहर्ता श्रियः पदम् । अस्ति त्रिविष्टपादेशो, देशो भूखण्डमण्डनम् ॥ ३ ॥
छायोच्छेदितसन्तापाः, स्फुरच्छत्राद्भुतश्रियः । भूपरूपा बभुर्यत्र, तरवः सरवद्विजाः ॥ ४ ॥
यस्मिन् हरन्ति पर्यन्तहरितः सरितः सदा । भूमेः श्यामांशुकस्यूतप्रान्तकान्तदुकूलताम् ॥ ५ ॥
ग्रीष्मेऽपि वारि यच्छन्तो, महिषैः स्थानपूरुषैः । यस्मिन्नदुर्न दुर्भिक्षमम्भसां जातुचिद् घनाः ॥ ६ ॥
काष्ठासु दशसु ग्रामः, **सुग्राम** इति विश्रुतः । तदन्तर्विधते ह्यविधितेजस्विपूरुषः ॥ ७ ॥
यल्लक्ष्मीलेखया शेष-लेखपुर्यौ विनिर्जिते । स्थानं निम्नं च शून्यं च, जग्मतुर्लज्जिते ध्रुवम् ॥ ८ ॥
**राष्ट्रकूटा**न्वयः श्रीमानार्यवानार्यवागभूत् । तत्राद्रिकूटतुल्यान्नकूटः कौटुम्बिकाग्रणीः ॥ ९ ॥
तस्याजनि गुणैर्वर्या, मर्यादाजलधेर्वधूः । जाह्नवीशुभ्रनीरेव, **रेवती** शीलशालिनी ॥ १० ॥
एतयोर्**भवदत्त**श्च, **भवदेव**श्च विश्रुतौ । अभूतां निहताशर्मधर्मकर्मयुतौ सुतौ ॥ ११ ॥
इभ्यः **सुस्थितसूरि**भ्यः, स्वैरं वैराग्यतोऽन्यदा । **भवदत्तो** निजगृहे, निःस्पृहो जगृहे व्रतम् ॥ १२ ॥
अनुसूरिपदद्वन्द्वमथासौ पृथिवीतले । बभ्राम ग्रामकाश्मानमश्मसारवदन्वहम् ॥ १३ ॥
एकदाऽऽत्मद्वितीयः सैत्सूरीनापृच्छ्य कश्चन । निजग्रामे जगामेच्छन्, बन्धुं व्रतयितुं व्रती ॥ १४ ॥
साधुः पाणिग्रहारम्भग्रहिलेन कनीयसा । न वीक्षितोऽप्यसौ हर्षप्रकर्षान्धेन बन्धुना ॥ १५ ॥
कनिष्ठमथ धिक्कुर्वन्, गुर्वन्तिकमगान्मुनिः । विलक्षो रविलक्षोरुतपस्तेजास्तनोतु किम् ? ॥ १६ ॥

गुरोः पुरो मुनौ तस्मिन्, तत् तथ्यं कथयत्यथ ।
**भवदत्तो**ऽवदत् तोषिन् !, धिक् ! तत्कठिनतामिति ॥ १७ ॥

तदोचे मुनिनाऽन्येन, **भवदत्तो** वदन्नदः । भ्राताऽस्य कठिनस्त्वं तन्मृदुं दीक्षय सोदरम् ॥ १८ ॥
सन्धासन्धानतोऽभाषि, **भवदत्ते**न तन्मुदा । इदं बुध ! विधातव्यं, गुरौ **मगध**गामिनि ॥ १९ ॥
विहरन् मिहिरश्रीको, देशाद् देशान्तरं क्रमात् । अगमन्**मगधान्** सूरिर्नभोभागानिवामलान् ॥ २० ॥
स्वग्रामं **भवदत्तो**ऽथ, ययावेको गुरोर्गिरा । भयाय नासहायत्वं, सिंहस्येव महामुनेः ॥ २१ ॥
**नागिलां** वासुकीजानेर्**नागदत्त**स्य नन्दनीम् । कनीयान् **भवदेवो**ऽग्रे, पाणौ जग्राह साग्रहः ॥ २२ ॥

---

१ °ण्डभूषणम् खंता० पाता० ॥ २ °न् भजन्ति खंता० पाता० ॥ ३ °घस्तेज पाता० ॥ ४ भाव° वता० ॥ ५ सन्, सू° खंता० ॥

जनान्मत्वेति तत्त्वज्ञः, किङ्कर्तव्यतया जडः । मन्दमन्दममन्दश्रीर्निजं धाम जगाम सः ॥ २३ ॥
अब्जखण्डं त्रियामार्तं, मार्तण्ड इव दूरतः । स्वजनं स्मेरयन्नग्रे, शमभूः समभूत् ततः ॥ २४ ॥
ते तु हेतुममुं पुण्यनैपुण्यस्य मुनिं जनाः । नमश्चक्रुर्निचक्रुश्च, दुरितं स्फुरितोद्यमाः ॥ २५ ॥
मुनिना धर्मलाभोऽथ, निर्मलाभो विनिर्ममे । तेषां तमस्ततिच्छेदी, दिशामिव निशाधवः ॥ २६ ॥
अस्ति मे गुरुरासन्नग्रामे सन्नतमाः शमी । भोक्तव्यं तत्र गत्वेति, स जगाद जनं मुनिः ॥ २७ ॥
तदाऽऽशु प्राशुकान्नेन, स यतिः प्रतिलाभितः । उत्सुकस्तैः सदाचारसहकारशुकैः स्वकैः ॥ २८ ॥

**नागिलायाः** किलाऽऽयाम-रम्याक्ष्या वक्षसि स्वयम् ।
तन्वानो मण्डनं तन्व्याः, सम्पूर्णाखिलभूषणम् ॥ २९ ॥

बन्धुमागतमाकर्ण्य, वधूं मुक्त्वाऽर्धमण्डिताम् । द्विपो वल्लीरिव सखीरवधूयाग्रतो गताः ॥ ३० ॥
स्फूर्तिमन्तर्वहन् धर्मं, मूर्तिमन्तमिवाग्रजम् । **भवदेवो** जवादेव, जगाम च ननाम च ॥ ३१ ॥
॥ विशेषकम् ॥

सर्पिषः कल्पनीयस्य, पात्रं भ्रात्राऽर्पितं करे । प्रस्थानकं व्रतस्येव, **भवदेवः** सुधीर्दधौ ॥ ३२ ॥
प्रचचाल स चालस्यमुक्तो मुनिमतल्लिका । अस्तोकबन्धुलोकेन, परितः परिवारितः ॥ ३३ ॥
दूरतो वलितास्तस्य, नत्वा नत्वा च बान्धवाः । समीरे सम्मुखे सिन्धुप्रवाहस्येव वीचयः ॥ ३४ ॥
बाल्यक्रीडादिवार्ताभिरनार्ताभिः प्रवर्तकम् । घृताज्यभाजनः साधुमनुजस्त्वनुजग्मिवान् ॥ ३५ ॥
आनिनाय भवान् बन्धुं, मानिनायक! दीक्षितुम् ?। इत्यथ व्रतिभिः पृष्टः, प्राप साधुर्गुरोः पुरः ॥ ३६ ॥
प्रणम्य रम्यचारित्ररत्नरत्नाकरं गुरुम् । मुनिर्न्यवेदयद् बन्धुं, समायातं व्रताय तम् ॥ ३७ ॥
सत्यमित्यथ पृष्टोऽसौ, **भवदेवो**ऽपि सूरिभिः । ज्यायान्नृषिर्मृषाभाषी, मा भूदित्यन्वमंस्त तत् ॥ ३८ ॥
ततः स्वबन्धुसम्बन्धबन्धनाबद्धचेतसः । **नागिला**गुणरक्तस्य, तस्य दीक्षां ददौ गुरुः ॥ ३९ ॥
**भवदत्त**प्रयुक्तेन, नियुक्तो गुरुणा स्वयम् । एकेन मुनिना साकं, ग्राममन्यं जगाम सः ॥ ४० ॥
अद्यापि **भवदेवो**ऽयं, नायातीति समागताः । बन्धवो **भवदत्तेन**, साक्षाद् गत इतीरिताः ॥ ४१ ॥
बन्धूपरोधरुद्धात्मा, **भवदेवो** व्रते स्थितः । नित्यं ध्यायति चित्तेन, **नागदत्त**सुतां तु ताम् ॥ ४२ ॥
कालेन सुचिरेणाथ, शुचिरेणाङ्कवन्मुनिः । तपस्तपनपूर्वाद्रिर्भ**वदत्तो** दिवं ययौ ॥ ४३ ॥
अकुर्वता व्रतादीनि, भ्रातरि स्वर्गयातरि । अलागि **नागिला**ध्याने, **भवदेवेन** तेन तु ॥ ४४ ॥
अथ सुप्तां मुनिश्रेणीं, निशि मुक्त्वाऽब्जिनीमिव । स भृङ्ग इव गन्ताऽभूत्, कान्तां कैरविणीमिव ॥ ४५ ॥
अथ श्लथगुणग्रामः, **सुग्राम**ग्रामसीमनि । गत्वाऽसौ मण्डपाहूतशैत्ये चैत्ये स्थितः क्वचित् ॥ ४६ ॥
आययौ वृद्धया साकमेकया सविवेकया । तदत्र काऽपि कामद्रुवात्या कात्यायनी पुरः ॥ ४७ ॥

एतां **श्वेताम्बरो**ऽपृच्छत्, **रेवत्यार्यवतोः** कथाम् ।
तौ प्रमीतौ ततः श्रुत्वा, सोऽपृच्छन्**नागिला**कथाम् ॥ ४८ ॥

स्वयं सा **नागिला** चित्ते, भवदेवं विचार्य तम् । पप्रच्छ **भवदेवो**ऽसि?, **नागिला**जानिरित्यमुम् ॥ ४९ ॥
एष प्रियाविशेषोत्कस्तदाऽऽह स्मरदाहवान् । भवत्या **भवदेवो**ऽहं, भद्रे! कथमबोधिषि ? ॥ ५० ॥
सद्मनश्छद्मना नीत्वा, पुराऽहं ग्राहितो व्रतम् । भ्रात्रा मात्राधिकप्रीतिर्**नागिला**वशगोऽपि सन् ॥ ५१ ॥

---

१ **बन्धवः** पाता० ॥ २ **पृष्टेऽसौ** खंता० ॥

तद्भ्रातरि गते स्वर्गमनर्गलमनस्य मे । मानसं नागिलाप्रीतिरधुनाऽतिधुनाति सा ॥ ५२ ॥
मन्मनःसहकारस्य, सा शुकी धामुकीनुना । अस्ति वा नास्ति वा साक्षादिदं वद मदग्रतः ॥ ५३ ॥
तदेवं भवदेवेऽस्मिन्, जल्पाके सस्मरस्मरे । वृद्धाया नागिलासख्याः, सूनुः प्राप्तः पुरो वटुः ॥ ५४ ॥
जगादायमिदं मातरहमस्मि निमन्त्रितः । दक्षिणार्थं गमिष्यामि, गेहमेहि त्वरातुरा ॥ ५५ ॥
दुग्धमुच्चालयिष्यामि, पतन्यं भाजने त्वया । भुक्तं श्राद्धान्नमुद्गीर्य, यथाऽऽगत्य पिबामि तत् ॥ ५६ ॥
वदन्तमिलवार्दीन्, तं, भवदेवो स्मेभिव । भविष्यसि कथं न त्वमितिलिप्सुर्जुगुप्सितः ? ॥ ५७ ॥
भवदेवमुवाचाथ, नागिला चेत्सि यद्यदः । प्रिया तवाहं सा वान्तां, तद् भोक्तुं यतसे कुतः ? ॥ ५८ ॥
मूढाशय ! नवामूढामिव मामागतः स्मरन् । जराजर्जरितां पश्य, संसारस्य क्व सारता ? ॥ ५९ ॥
एतस्मिन् शुचिवस्तूनां, मलिनीकारकारणे । देहे जरापगामिनि, मुधा मुह्यन्ति जन्तवः ॥ ६० ॥
चिरं मानसृतं दीक्षामन्याय्यां मागम मन्युधाः । तद् व्याघुट्य व्रजस्वेव, गुरुं भज कुरु व्रतम् ॥ ६१ ॥
इति प्रबोधितः प्रीतो, नागिलाया गिरा चिरात् ।
साधु साध्विति तां स्तुत्वा, साधु सूरिं समादयात् ॥ ६२ ॥
आलोच्य तद् गुरोरग्रे, तदुग्रं स ततं व्यधात् । तेनाऽजनिष्ट सौधर्मे, प्रभाभिर्भासुरः सुरः ॥ ६३ ॥
क्षेत्रे महाविदेहेऽथ, विजये पुष्कलाभिधे । देशे विधप्रिये पुण्डरीकिण्यां पुरि चक्रिणः ॥ ६४ ॥
पत्न्यां यशोधराख्यायां, वज्रदत्तस्य नन्दनः । नाम्ना सागरदत्तोऽभूद्, भवदत्तो दिवश्च्युतः ॥ ६५ ॥
॥ युग्मम् ॥
अथ पित्रा पवित्राङ्गीस्त्याः कन्याः सहस्रशः । पुत्रः शक्रद्रुमद्रोहकरिणा परिणायितः ॥ ६६ ॥
स समन्तात् समं ताभिः, क्रीडन् कमलभूर्वशौ । सुर्वितराङ्गिरिव स्फीतैः, स्वैर्भोगफलकर्मभिः ॥ ६७ ॥
एकदाऽनेकदारान्तर्वर्ती मन्दिरमूर्धनि । स्थितोऽन्तरिक्षे सोऽद्राक्षीत्, स्वर्णवर्णं पयोमुचम् ॥ ६८ ॥
तमाकाशतलमध्यस्थं, हिमाद्रिमिवशोभितं । पश्यन् मेरुमिव स्मेरस्मराज, समजायत ॥ ६९ ॥
क्षणाद् वातोद्धते तस्मिन् विधुरतां गते । भावेषु भङ्गुरीभावं, कुमारः स व्यचारयत् ॥ ७० ॥
प्रतिबुद्धः स्वयं बुद्ध्वा, मनं जग्राह साग्रहः । ततः सागरदत्तोऽयं, सूरेरमृतसागरात् ॥ ७१ ॥
कृपाणतीव्रतां जित्वा तपस्तेन तत् । अज्ञानमवधि ज्ञानमवधिं व्याप्ति विश्रुता ॥ ७२ ॥
तत्रैव विजये वीतशोकानामनि पत्तने । भवदेवोऽभवच्च्युत्वा, दिवः शिव इति श्रुतः ॥ ७३ ॥
पुत्रः पद्मरथस्याथो, वनमालाङ्गसम्भवः । कुमारः सुकुमाराभिः, कुमारीभिर्विवाहितः ॥ ७४ ॥
॥ युग्मम् ॥
स्थितः सह महेलाभिः, सोऽन्यदा सदनोपरि । नाम्ना कामसमृद्धस्य, सार्थवाहस्य वेश्मनि ॥ ७५ ॥
मुनिं सागरदत्ताख्यमात्तभिक्षं विलोकयन् । स्वर्णवृष्टिं सुरैः सृष्टां, दृष्ट्वा हृष्टोऽभवत् तदा ॥ ७६ ॥
॥ युग्मम् ॥
अथ स्थानगतं पापतारणं कृतपारणम् । गत्वा नत्वा मुनिं राजाङ्गजोऽन्ते समुपाविशत् ॥ ७७ ॥
ततोऽसौ देशनां तेने, मुनिर्मानिभकेशरी । सर्वास्तथा कथाः पूर्वजन्मजाता न्यवेदयत् ॥ ७८ ॥

---

१ °स्यासौ, वन° संता० पाता० ॥ २ °क्षं व्यलोकयत् वता० ॥ ३ स्थाने गतं पाता० ॥
४ °पवारणं संता० ॥

सोऽपि भूपाङ्गभूः श्रुत्वा, विशुद्धः प्रतिबुद्धवान् । नत्वा यतिं गतः प्रष्टुं, पितरौ निश्चितव्रतः ॥ ७९ ॥
पितृभ्यामननुज्ञातस्ततश्चाकृतभोजनः । गत्वा पौषधशालायां, तस्थावस्थानमंहसाम् ॥ ८० ॥
इभ्यात्मजेन भूभर्तुरादेशाद् दृढधर्मणा । श्राद्धेन बोधितोऽभुङ्क्त, षष्ठादाचाम्लपारणः ॥ ८१ ॥
ईदृक्तपःप्रकाशी च, प्राशुकाशी व्रतीव सः । तत्र शुश्रूषितस्तुष्यत्कर्मणा दृढधर्मणा ॥ ८२ ॥
अथ द्वादशवर्षान्ते, भावनिर्व्यूढसंयमः । विद्युन्मालीति देवोऽभूद्, ब्रह्मलोकेऽद्भुतद्युतिः ॥ ८३ ॥
श्रीवीरः समवासार्षीत्, पुरे राजगृहेऽन्यदा । तदीयपदपद्माली, विद्युन्माली तदाऽभवत् ॥ ८४ ॥
शक्रादिसुरचक्रेषु, काचेष्विव मणिर्ज्वलन् । अकरोद्दुष्करं किं किं, देवोऽसौ पूर्वजन्मनि ? ॥ ८५ ॥
श्रेणिकक्षोणिकान्तेन, पृष्टः स्पष्टमिति प्रभुः । तद् विद्युन्मालिनः सर्वं, पूर्ववृत्तं न्यवेदयत् ॥ ८६ ॥
॥ युग्मम् ॥
भविष्यति भुवि स्वामिन् !, कीदृशोऽयमतश्च्युतः ? । इति पृष्टे नृपेणाऽऽह, पुनस्त्रिभुवनप्रभुः ॥ ८७ ॥

## जम्बूस्वामिचरितम्

राजन् ! राजगृहेऽत्रैव, ऋषभश्रेष्ठिसूरसौ । जम्बूनामाऽवसर्पिण्यां, भावी चरमकेवली ॥ ८८ ॥
तद् विद्युन्मालिनः कान्ताश्चतस्रो विनयाऽऽनताः ।
तीर्थेशमिति पप्रच्छुः, काऽस्माकं भाविनी गतिः ? ॥ ८९ ॥
श्रेष्ठिनां तनुजीभूय, यूयमप्यस्य योषितः । भविष्यथ पुरेऽत्रैव, तदिदं विभुरभ्यधात् ॥ ९० ॥
अथ तद्दिवसादेव, स देवः सप्तमेऽहनि । धारिण्या ऋषभश्रेष्ठिपत्न्याः कुक्षाववातरत् ॥ ९१ ॥
पूर्णैरथ दिनैः श्रेष्ठिप्रिया सुतमसूत सा । आनन्दामृतरोचिष्णुः, सरसीव सरोरुहम् ॥ ९२ ॥
पुरा च नगरेऽत्रैव, वैभारगिरिकानने । सुधर्मस्वामिनं नन्तुं, गताऽभूदृषभप्रिया ॥ ९३ ॥
सा शुश्राव तदा सिद्धपुत्रं विद्याधरं प्रति । कथ्यमानं गणभृता, ध्रुवं जम्बूविचारणम् ॥ ९४ ॥
ततो जम्बूविचारान्ते, सा पप्रच्छ गणेश्वरम् । भविष्यति तनूजन्मा, कथं मे ? कथ्यतामिति ॥ ९५ ॥
गणेशं वीक्ष्य सावद्यप्रश्नतो मौनमास्थितम् । साऽभाषि धारिणी शीलधारिणी सिद्धसूनुना ॥ ९६ ॥
सति ! व्रतिपतिर्नेदं, सावद्यं कथयिष्यति । भवत्यै कथयिष्यामि, सुतार्थमहमप्यदः ॥ ९७ ॥
मम वाचा त्वमाचाम्लान्यष्टोत्तरशतं कुरु । पुत्रस्तदन्ते भावी ते, सिंहस्वप्नेन सूचितः ॥ ९८ ॥
इत्याकर्ण्य गृहं गत्वा, सा सर्वं तत् तथा व्यधात् । अपश्यच्चान्यदा स्वप्ने, सिंहमुत्सङ्गसङ्गतम् ॥ ९९ ॥
प्रातश्च पत्युराख्याय, वितेने जिनपूजनम् । अथ प्राचीव भास्वन्तं, काले सुतमसूत सा ॥ १०० ॥
असौ जम्बूविचारस्य, प्रक्रमे समभूदिति । पितृभ्यां विहितो जम्बूकुमार इति नामतः ॥ १०१ ॥
पद्मावती समुद्रस्य, प्रेयसी सुषुवे सुताम् । समुद्रश्रियमुन्मुद्रचन्द्रसान्द्रमुखत्विषम् ॥ १०२ ॥
समुद्रदत्तप्रेयस्या, जज्ञे कमलमालया । नन्दनी किल पद्मश्रीः, पद्मश्रीदस्युलोचना ॥ १०३ ॥
पुत्री सागरदत्तस्य, जनिता विजयश्रिया । पद्मसेनेति निश्छद्मसेनेव स्मरभूभुजः ॥ १०४ ॥
सुता कुबेरदत्तस्य, दयितायां जयश्रियाम् । आसीत् कनकसेनेति, कनकस्पर्धिदीधितिः ॥ १०५ ॥
विद्युन्मालिसुरस्यैताश्चतस्रश्चित्तवल्लभाः । गृहेषु श्रेष्ठिनामेषामवतेरुर्दिवश्च्युताः ॥ १०६ ॥

१ देवोऽसौ खंता० पाता० ॥ २ °मेवमव° खंता० ॥

तथा कुबेरसेनस्य, नभःसेनेति नन्दनी। सञ्जाता कमलवतीकुक्षिपल्वलवारला ॥ १०७ ॥
श्रेष्ठिश्रमणदत्तस्य, सुषेणाकुक्षिसम्भवा। सुताऽभूत् कनकश्रीस्तां, न कः श्रीवद्मन्यत? ॥ १०८ ॥
सुषुवे च सुषेणस्य, प्रिया वीरमती[1] पुनः। सुतां कमलवत्याख्यां, साक्षादिव दिवः श्रियम् ॥ १०९ ॥
वसुपालितगेहिन्या, सुषुवे जयसेनया। जयश्री रतिरूपस्य, जयश्रीरिति नन्दनी ॥ ११० ॥
दिक्पालराजधानीनामष्टौ मूर्ता इव श्रियः। सेवन्ते तत्पुरं बाला, जैत्रं जम्बूगुणेन[2] ताः ॥ १११ ॥
दातुं ताः पितृभिर्जम्बूस्वामिने ऋषभोऽर्थितः। सर्वं मेने न कस्तुल्यगुणसङ्गाय कौतुकी? ॥ ११२ ॥
तदानीं च महामोहमेघसन्दोहमारुतः। श्रीसुधर्मा समायासीद्, वैभारगिरिकाननम् ॥ ११३ ॥
श्रुते तस्मिन् समायाते, निर्यातं नगरादथ। जनैर्भृङ्गैरिवाम्भोजादुदितेऽम्भोजबान्धवे ॥ ११४ ॥
श्रीसुधर्मगणाधीशं, नमस्कर्तुं समागमत्। तदा जम्बूकुमारोऽपि, समारोपितसम्मदः ॥ ११५ ॥
तदा मुनीन्दुः प्रारेभे, देशनां दशनांशुभिः। पुरो जम्बूवपुः सिञ्चन्, प्रसादैरिव[3] देहिभिः ॥ ११६ ॥
भवेद् भवार्णवः पुंसां, सुतरः सुतरामसौ। न्यञ्चनोदञ्चनोग्राश्चेन्न स्युः श्रीचयवीचयः ॥ ११७ ॥
मेघानामिव लोकानामायुर्गलति नीरवत्। चपलेव चला लक्ष्मीः, पाण्डुतेवैति विश्रसा ॥ ११८ ॥
तदायुषा च लक्ष्म्या च, वपुषा चास्थिरात्मना। चिरस्थिरतरं रत्नत्रयं ग्राह्यं विवेकिना ॥ ११९ ॥

तत्रोपाश्रय-भैषज्य-पुस्तका-ऽन्नां-ऽशुकादिभिः।
साहाय्यं ज्ञानिनां तन्वन्, ज्ञानमाराधयेद् गृही ॥ १२० ॥

सङ्घवात्सल्य-जैनेशवेश्म-यात्रा-ऽर्चनादिभिः। प्रभोः प्रभावयँस्तीर्थं, सम्यक् सम्यक्त्वमर्जयेत् ॥ १२१ ॥
भक्त्या चारित्रपात्रेषु, तथाऽऽवश्यककर्मभिः। तपोभिरपि चारित्रं, गृहमेधी समेधयेत् ॥ १२२ ॥
काले पाठादिभिर्ज्ञानमशङ्काद्यैश्च दर्शनम्। मूलोत्तरगुणैः शुद्धैश्चारित्रं भजते यतिः ॥ १२३ ॥
इति रत्नत्रयाल्लेभे, हतमोहतमोभरैः। चिराद् गृहस्थैः सद्योऽपि, यतिभिः शाश्वतं पदम् ॥ १२४ ॥
ये तु मोहग्रहग्रस्ताः, प्रमादस्य वशंवदाः। अशरण्यैर्भवारण्ये, भ्रमितव्यं सदाऽपि तैः ॥ १२५ ॥
जम्बूरम्बूज्ज्वलं पीत्वा, घनादिव गुरोर्वचः। महीरुह इवामुञ्चत्, सद्यो भवदवव्यथाम् ॥ १२६ ॥
नत्वा मुनीन्द्रमुन्निद्रव्रतग्रहमहोद्यमः। जगामायममायः सन्, सदनं मदनं द्विषन् ॥ १२७ ॥
सत्वरः पितरौ नत्वा, जम्बूः कम्बूल्लसद्यशाः। स जगादायमादाय, व्रतं प्रीतो भवाम्यहम् ॥ १२८ ॥
इत्याकर्ण्य ततः कर्णतप्तत्रपुनिभं वचः। सुतं व्रतनिषेधाय, पितरावूचतुस्तराम् ॥ १२९ ॥
एकस्त्वमावयोर्दीपो, भानुर्भू-नभसोरिव। त्वां विना वत्स! नितमां, तमांस्यभिभवन्ति नौ ॥ १३० ॥
मनोरथशताहूतस्तपोभिरतिदुष्करैः। दुर्लभस्तात! लब्धोऽसि, त्वमुदुम्बरपुष्पवत् ॥ १३१ ॥
तच्चिरोद्भूतमस्माकं, मनोरथमहीरुहम्। विदग्ध! दग्धुं किं नाम, वाग्ज्वालाभिः प्रगल्भसे? ॥ १३२ ॥
ययाचिरे चिरेणैताः, दासीकृतरतिद्युतः। अष्टौ याः कन्यकास्तुभ्यं, त्यजस्येताः कुतः सुत!? ॥ १३३ ॥
विवाहमण्डपान्तस्त्वं, वधूभिरमितो वृतः। वशाभिरिव यूथेशो, मानसं नौ प्रमोदय ॥ १३४ ॥
त्वत्सङ्गसुभगम्मन्याः[4], कन्याः परिणयन्निमाः। कुतूहलं श्रुतोल्लुरावयोः[5] पूरयाऽऽवयोः ॥ १३५ ॥
आशानामिव तत् तासामन्तश्चन्द्र इव स्फुरन्। पुण्यवन्नावयोर्नेत्रकुमुदानां मुदं कुरु ॥ १३६ ॥

---

१ वारिमती पाता० ॥ २ °गुणानताः खंता० ॥ ३ प्रमोदैरि° खंता० ॥ ४ स्वसङ्ग° वता०। स्वःसङ्ग° पातासं० ॥ ५ °तोल्लोलरा° पाता० ॥

श्रुत्वा पित्रोरिमां वाचमचलव्रतनिश्चयः । उचितज्ञः कुमारोऽयमभ्यधान्मधुरं वचः ॥ १३७ ॥
तावदाचर्यत ब्रह्मचर्याय नियमो मया । कुतूहलाय वां कार्य, पाणिग्रहणमप्यदः ॥ १३८ ॥
विवाहस्य द्वितीयेऽह्नि, ग्रहीष्यामि पुनर्व्रतम् । क्षेप्यस्तद्वत्सवात्सल्यान्नाहं भवदवानले ॥ १३९ ॥
आसां मृगीदृशां प्रेमस्थेमसम्बन्धबन्धने । पतित्वेन पतित्वाऽसौ, क्व मोक्षाय यतिष्यते ? ॥ १४० ॥
इत्यालोच्य मिथस्ताभ्यां, पितृभ्यां तन्मतं वचः । अकारि च मुदा पाणिग्रहोपक्रमणक्रमः ॥ १४१ ॥
॥ युग्मम् ॥
अथ जम्बूकुमारेण, ज्ञापिते स्वव्रतोद्यमे । पितॄन् किंकार्यतामूढानाहुस्तानिति कन्यकाः ॥ १४२ ॥
इहापि परलोकेऽपि, जम्बूस्वामी गतिः स नः । मार्तण्ड इव मार्तण्डग्रावपावकरोचिषाम् ॥ १४३ ॥
स मन्मथपथेऽस्माभिस्तेनाऽऽत्माध्वनि वा वयम् । नेतव्याः सत्यमित्यस्तु, स्पर्धाबन्धः परस्परम् ॥ १४४ ॥
महासतीषु धन्यानां, कन्यानां वचनैरिति । तेऽप्युद्दिश्य विवाहस्य, दिनमानन्दिनः स्थिताः ॥ १४५ ॥
अथाऽऽननेन्दुनिर्गच्छदुल्लसुधया तया । स्त्रीषु सञ्जीवयन्तीषु, भवदग्धं मनोभवम् ॥ १४६ ॥
बन्धूनामुपरोधेन, विरोधेन तु चेतसः । लग्ने जम्बूकुमारोऽयमुपयेमे कुमारिकाः ॥ १४७ ॥
स हताभिः स्मरशरैः, सह ताभिस्तदा वदन् । गतस्पृहो गृहावासे, वासवेश्मन्यवास्थित ॥ १४८ ॥
इतश्च विन्ध्यो विन्ध्याद्रौ, व्यधाज्जयपुरेश्वरम् ।
पुत्रं प्रभमथ ज्येष्ठः, प्रभवो निरगात् क्रुधा ॥ १४९ ॥
चौरपञ्चशतीयुक्तः, कुर्वन्नुर्व्यां स चौरिकाम् । जज्ञेऽवस्वापिनी-तालोद्घाटनीविद्ययोः पदम् ॥ १५० ॥
गृहं तदा तदागत्य, जम्बूस्वामिनिषेवितम् । विद्ये प्रयुज्य तन्वानश्चौर्य स्तम्भमवाप सः ॥ १५१ ॥
केनाहं स्तम्भितो भृत्यैः, सहितोऽपीति चिन्तयन् । दृशं प्रतिदिशं चौरग्रामणीरक्षिपत् ततः ॥ १५२ ॥
अथ सुप्तेऽखिले लोके, कुमारं स्त्रीभिरावृतम् । अपश्यज्जाग्रतं सोऽब्जषण्डे कैरवषण्डवत् ॥ १५३ ॥
प्रभवस्तमुवाचाथ, जम्बूनामानमानतः । स्तम्भनीं देहि मे विद्यां, गृह्णन् विद्याद्वयं मम ॥ १५४ ॥
जम्बूस्वामी ततो वाचमाचष्टे स्म शमैकभूः ।
नास्ति मे स्तम्भनी विद्या, त्वद्विद्याभ्यां च किं मम ? ॥ १५५ ॥
काङ्क्षामि यदहं गेहविरहं निरहङ्कृतिः । व्रतं प्रातर्ग्रहीष्यामि, सुधर्मस्वामिसन्निधौ ॥ १५६ ॥
अथाऽऽह प्रभवः श्रीमन्निति प्राभवभाग् भवान् ।
भुनक्ति नैव किं भोगान् ?, व्रताय यतते कुतः ? ॥ १५७ ॥
वरेणेदमथावादि, तथावादिनि तस्करे । सावधानीभवत्कर्णस्त्वमाकर्णय मद्गिरम् ॥ १५८ ॥

## मधुबिन्दूदाहरणम्

अशरण्यो महारण्ये, सार्थः कोऽपि मलिम्लुचैः । अमुष्यत यथा व्योम्नि, ताराभारः पयोधरैः ॥ १५९ ॥
सार्थे त्रस्ते समस्तेऽपि, पुमानटविकोटरे । तस्मिन्नेकः स्थितो मूढः, शाखीवोग्रदवोद्धृतः ॥ १६० ॥

१ पतित्वे विनिपत्यासौ, पाता० ॥ २ °स्तासां, पितृभिः तन्म° पाता० ॥ ३ स्पर्धैव° खंता० पाता० ॥ ४ °दुल्लोलसु° पाता० ॥ ५ °दग्धम° पाता० ॥ ६ °न्यवस्थितः खंता० पाता० ॥ ७ प्रभाव° खंता० पाता० ॥

सिन्धुरेणोद्धुरेणाथ, समारब्धः स कानने । धावन् मृत्युभयाज्जीर्णकूपे झम्पामयं ददौ ॥ १६१ ॥
तत्रावटतटोद्भूतवटशाखाविनिर्गतम् । पादं बन्धुमिवाभीष्टमाश्लिष्टः सोऽन्तरापतन् ॥ १६२ ॥
अथ कूपतलेऽद्राक्षीत्, करालमुखकोटरम् । क्षणादजगरं कालनगरोदरसोदरम् ॥ १६३ ॥
परितोऽपश्यदाशासु, निराशासु स्थितिश्च सः । चतुरो यमनिर्मुक्तान्, यामिकानिव पन्नगान् ॥ १६४ ॥
किञ्चाऽऽलम्बनशाखायामीक्षामास सिता-ऽसितौ । आखू मूलं खनन्तौ स, निष्कारणखलाविव ॥ १६५ ॥
तस्य दुर्भूपवत् कूपद्वारस्थस्य विषाणिनः । स ददर्श कुटुम्बीव, क्लीबः प्रसृमरं करम् ॥ १६६ ॥
मधुच्छत्रोत्थिता हस्तिहस्ताहतिचले वटे । लग्नाश्च मक्षिकास्तस्मिन्, ऋजौ लुब्धा इवेश्वरे ॥ १६७ ॥
मधुमण्डाच्च्युतास्तस्य, वदने मधुबिन्दवः । निपेतुश्चातकस्येव, मन्दवारिदविप्रुषः ॥ १६८ ॥
नासौ मधुरसास्वादसुखलालसमानसः । तदनेकविधं दुःखं, स्मरति स्म रतिं वहन् ॥ १६९ ॥
अथ व्योमपथक्रोडे, कोऽपि विद्याधरश्चरन् । तं वीक्ष्य करुणाविष्टः, क्रष्टुं बन्धुरिवाऽऽययौ ॥ १७० ॥
दत्तहस्ते ततस्तस्मिन्नुपहासिनि हर्षितः । स्थितिर्वा निर्गमो वाऽस्य, किं युक्तमिति कथ्यताम् ॥ १७१ ॥
अथो हसन्नसावाह, कुमारमिति राजसूः । किं पृष्टं ? वेत्ति मूढोऽपि, निःसृतिस्तस्य शस्यते ॥ १७२ ॥
व्यक्तमित्युक्तवत्यस्मिन्नुपहासिनि हर्षितः । ऊचे **जम्बूकुमारो**ऽपि, सुधाकवचितं वचः ॥ १७३ ॥

## मधुबिन्द्वाख्यानकोपनयः

पुरुषो यः स संसारी, संसारस्तु महाटवी । मानुष्यं जन्म कूपश्च, नरकोऽजगरस्त्वधः ॥ १७४ ॥
तथा कषायाश्चत्वारश्चतुर्दिक्षु भुजङ्गमाः । यमश्च मूर्ध्नि मातङ्गो, मक्षिका व्याधयः पुनः ॥ १७५ ॥
छिन्तश्च द्रुलतामायुराखू पक्षौ सिता-ऽसितौ । प्रीणन्ति जन्तुं कष्टेऽस्मिन्, विषया मधुबिन्दवः ॥ १७६ ॥
**सुधर्मस्वामिना** विद्याधरेणेवेति कष्टतः । कृष्यमाणो निषिध्येऽहं, किं त्वया विषयेच्छया ? ॥ १७७ ॥
इत्थं विषयसम्बन्धनिषेधेन निरुत्तरः । **प्रभवः** प्राह दन्तांशुनासीरविदितं वचः ॥ १७८ ॥
कुटुम्बमिति सन्त्यज्य, निःशेषं निर्विशेषधीः । कुर्वन् जनकयोः पीडां, व्रीडामपि विमुञ्चसि ॥ १७९ ॥
उक्ते च **प्रभवे**णेति, श्रीजम्बूरवदत्तदा । महात्मन् ! श्रूयतामेकं, ज्ञातेयस्य कथानकम् ॥ १८० ॥

## कुबेरदत्त–कुबेरदत्ताख्यानकम्

आसीत् **कुबेरसेने**ति[3], **मथुरा**यां पणाङ्गना । यदीयवदनस्येव, स्नपनप्रतिमा शशी ॥ १८१ ॥
सा कदाऽप्यथ कष्टेन, तनयां तनयं च तौ । कीर्ति-प्रतापौ भूपासिलेखेवासूत नूतनौ ॥ १८२ ॥
तौ त्याजयन्त्या कुट्टिन्या, निराकृत्य वचोविषम् । एकादशाहं सा हन्त !, पाययामास तौ पयः ॥ १८३ ॥
**कुबेरदत्त** इत्याख्याजुषं पुत्रस्य मुद्रिकाम् । पुत्र्याः **कुबेरदत्ते**ति, नामभाजं च सा व्यधात् ॥ १८४ ॥
मञ्जूषायामथो रत्नराजिभाजि न्ययोजयत् । तदपत्यद्वयं माता, कातरा कुट्टनीभयात् ॥ १८५ ॥
**यमुना**म्भसि मञ्जूषां, सुखपेटामिवात्मनः । चिक्षेप वितरन्तीव, सा जलाञ्जलिमश्रुभिः ॥ १८६ ॥
अथ **सूर्यपुरो**पान्ते, **यमुना**वारिवाहिता । पेटेयमिभ्ययुग्मेन, दृष्टा हृद्यान्तरात्मना ॥ १८७ ॥
आकृष्योद्घाट्य तां पेटामन्तर्वीक्ष्य शिशुद्वयम् । दायादाविव सर्वस्वमाददातां विभज्य तौ ॥ १८८ ॥

---

१ °ण्डच्यु° पाता० ॥ २ °स्मिन्, मधुबिन्दुविलोभितः । स्थिति° खंता० पाता० ॥ ३ °ति वेश्या कापि पुरे पुरा । यदी° पाता० ॥

तौ तयोः श्रेष्ठिनोर्यत्नात्, संवर्धेते सहोदरौ । यथा बलक्षपक्षस्य, कौमुदी-कौमुदीपती ॥ १८९ ॥
अङ्गुलीमुद्रिकानाम्ना, ख्यातयोरेतयोर्मिथः । विवाहं चक्रतुः श्रेष्ठिमुख्यौ तौ युग्मिनोरिव ॥ १९० ॥
क्षिप्ता कुबेरदत्तेन, प्रेमवत्याः करेऽन्यदा । निजनामाङ्किता मुद्रा, वैराग्यस्येव पत्रिका ॥ १९१ ॥
वीक्ष्य मुद्रां स्वमुद्रावत्, प्रियं सा प्राह विस्मिता । नाम्नाऽङ्केन च किं साम्यमनयोरावयोरिव ? ॥ १९२ ॥
तदावां सोदरौ शङ्के, नानयोः श्रेष्ठिनोः सुतौ । आभ्यामपि क्वचिल्लब्धावज्ञानात् परिणायितौ ॥ १९३ ॥
सत्यमत्याग्रहादद्य, प्रष्टव्यौ पितरौ ततः । ज्ञातव्यमेव जन्म स्वमालोच्येति समुत्थितौ ॥ १९४ ॥
पितरावाग्रहात् पृष्ट्वा, मत्वाऽऽत्मचरितं च तत् । निश्चित्य सोदरत्वं च, पाणिग्रहमशोचताम् ॥ १९५ ॥
इति निःसारसंसारवैराद् वैराग्यवासितौ । स्थितावधोमुखावेव, प्रगे कुमुदिनीन्दुवत् ॥ १९६ ॥
ततः कुबेरमापृच्छ्य, पितरौ च विरक्तया । कुबेरदत्तयाऽग्राहि, जिनदीक्षाऽतिदक्षया ॥ १९७ ॥
स्वयं नामाङ्कितं मुद्रारत्नमस्थगयच्च सा । बोधं कुबेरदत्तस्य, मूर्तिमन्तमिवोज्ज्वलम् ॥ १९८ ॥
गतः कुबेरदत्तस्तु, भूरिक्रीतक्रयाणकः । मथुरायां पुरि स्फारव्यवहारविहारतः ॥ १९९ ॥

यस्यां कुबेरसेनायामुत्पन्नः स किलाऽभवत् ।
शशी निशीव कान्तोऽभूत्, तस्या एव स धिग् ! विधिम् ॥ २०० ॥

कालात् कुबेरसेनायां, कुबेरस्य सुतोऽभवत् । भवव्यामोहसर्वस्वसारेणेव विनिर्मितः ॥ २०१ ॥
अथोत्पन्नावधिज्ञाना, बन्धोर्बोधार्थिनी ततः । सर्वं कुबेरदत्ता तदपश्यदसमञ्जसम् ॥ २०२ ॥
गोपितस्वाङ्गुलीयाऽसावनुज्ञाप्य प्रवर्तिनीम् । भवाब्धौ मज्जतो भ्रातुर्वेडेव मथुरां ययौ ॥ २०३ ॥
पुरः कुबेरसेनाया, याचित्वा वसतिं च सा । तस्थावस्थानकेऽप्यन्योपकृतिः कृतिनां व्रतम् ॥ २०४ ॥
पुरः स्फुरन्तमालोक्य, कुबेराङ्गजमन्यदा । व्रतिनी व्रतिनीतिज्ञा, सा बभाषे मृषोज्झिता ॥ २०५ ॥
बाल ! त्वमसि मे पत्युः, सोदरत्वेन देवरः । माता तथाऽऽवयोरेका, तेनासि मम सोदरः ॥ २०६ ॥
जातोऽसि मम पत्या त्वमपत्यमिति तेन मे । त्वत्पिता मे सपत्नीभूः, पौत्रस्त्वमसि मे ततः ॥ २०७ ॥
मन्मातुः पतिसोदर्यस्त्वं पितृव्योऽसि तन्मम । सहोदरस्य सूनुस्त्वं, भ्रातृव्योऽप्यसि मे ततः ॥ २०८ ॥
माताऽपि तव माता मे, धृतावावां ययोदरे । सा मन्मातृभुजङ्गस्य, माता तन्मे पितामही ॥ २०९ ॥
मत्सपत्नीतनूजस्य, पत्नी सा मे वधूरिति । मद्भर्तुः साऽभवन्माता, मम श्वश्रूरतो मता ॥ २१० ॥
मद्भ्रान्धवस्य पत्नी सा, भ्रातृजाया ततो मम । सा पुनर्मत्पतेः पत्नी, सपत्नीति ममाभवत् ॥ २११ ॥

मज्जनन्या भुजङ्गो यत्, त्वत्पिता तत् पिता मम ।
मत्पितृव्यस्य ते सोऽभूत्, पिता तन्मे पितामहः ॥ २१२ ॥

मम तस्य च माताऽभूदेका मे सोदरः स तत् । मद्भर्तृजननीभर्ता, स तेन श्वशुरोऽपि मे ॥ २१३ ॥
स च जग्राह मत्पाणिं, जातः पतिरतो मम । स मदीयसपत्न्याश्च, सूनुः सूनुर्ममाऽप्यतः ॥ २१४ ॥
अथो मिथोविरुद्धं तन्निशम्य शमिनीवचः । कुबेरोऽपृच्छदागत्य, किमेतदिति विस्मयी ॥ २१५ ॥
इति तस्मै कुबेराय, पृच्छते व्रतिनी ततः । तन्मुद्रारत्नमज्ञानध्वान्तदीपमिवाऽऽर्पयत् ॥ २१६ ॥
मुद्रारत्नेन तेनाथ, दिननाथनिभेन सः । प्रबुद्धोऽन्तर्गतं मोहं, भृङ्गं पद्म इवामुचत् ॥ २१७ ॥
लज्जितः स्वचरित्रेण, गृहीत्वा व्रतमुज्ज्वलम् । धीमान् कुबेरदत्तोऽसौ, यौवनेऽपि ययौ वने ॥ २१८ ॥

---

१ °नोर्गेहे, संव° खंता० ॥ २ °त्यमित्या° खंता० ॥ ३ मत्सपत्न्या त्व° खंता० ॥ ४ °व्यः स ते पाता० ॥

व्रतव्रततिवृक्षेण, यशोनिर्झरभूभृता। कर्मकुञ्जरसिंहेन, तेनारण्यानि रेजिरे ॥ २१९ ॥
भावनां भावयन्नेष, स्मृतपञ्चनमस्कृतिः। जगाम त्रैदिवं धाम, कामसामजकेशरी ॥ २२० ॥
मत्वा **कुबेरसेना**ऽपि, तादृग् विषयविप्लवम्। भवे विरक्ता जग्राह, गृहवासोचितं व्रतम् ॥ २२१ ॥
इत्थं कथाप्रथापाथोधौतमोहमलस्य मे। कुतो ज्ञातेयसम्बन्धः, प्रभव! प्रभविष्यति ? ॥ २२२ ॥
राजपुत्रः पुनः प्राह, कुतोऽपुत्रस्य ते गतिः ?। जगाद **जम्बूः** पुत्रस्य, कथयामि कथां शृणु ॥ २२३ ॥

## महेश्वरदत्ताख्यानकम्

अस्ति देवालयस्तम्भोत्तम्भितव्योममण्डपा। निकेतमालिनी ख्याता, पुरी नाम्ना **तमालिनी** ॥ २२४ ॥
श्री**महेश्वरदत्तो**ऽभूदिभ्यस्तत्र पुराग्रणीः। प्रथितः[1] प्रौढमिथ्यात्वपाथोधिजलकुञ्जरः ॥ २२५ ॥
दुश्चारिणीकुलाचार्यभूता भूताऽस्य वल्लभा। **नागिले**ति पुरि ख्याता, कामारामैकसारणिः ॥ २२६ ॥
सोऽन्यदा महिषं हत्वा, जनकश्राद्धपर्वणि। अङ्कस्थं तस्य मांसेन, लग्नो भोजयितुं सुतम् ॥ २२७ ॥
तदा च गृहमभ्येत्य, वलितो वक्रितावननः। दृष्टश्रेष्ठी मुनिश्रेष्ठः, पठन् श्लोकमिमं मुहुः ॥ २२८ ॥
पुष्णाति स्वपितुर्मांसैः, शत्रुमुत्सङ्गसङ्गिनम्। विधत्ते च पितुः श्राद्धमहो! मोहविजृम्भितम् ॥ २२९ ॥
**महेश्वर**स्तदाकर्ण्य, तूर्णमेत्य मुनीश्वरम्। नत्वाऽपृच्छत् प्रभो! प्रोक्तं, किमेतदसमञ्जसम् ? ॥ २३० ॥
इत्याग्रहपरे तत्रोवाच वाचंयमाग्रणीः। विज्ञाय ज्ञानतस्तस्योपकारं करुणापरः ॥ २३१ ॥

**नागिला**याः किलाऽऽयातो, यस्त्वयोपपतिः पुरा।
अघानि घनमावासक्रोडे क्रीडन् यदृच्छया ॥ २३२ ॥

तत्कालमेव मुक्तात्मवीर्य एवावतीर्य सः। **नागिलो**दरजातत्वात्, तवायं तनयोऽभवत् ॥ २३३ ॥
महिषस्याऽऽमिषैर्यस्य, भवता तर्पितः पिता। जीवः **समुद्रदत्त**स्य, स एष भवतः पितुः ॥ २३४ ॥
याऽसौ शुनी पुनर्द्वारि, महिषास्थीनि खादति। मन्यस्व मतिमन्नेतां, स्वामम्बां **बहुला**भिधाम् ॥ २३५ ॥
त्वद्गृहे ज्ञानतो ज्ञात्वा, तदेतदसमञ्जसम्। तद्बोधाय तव श्लोकं, पठित्वा वलितोऽस्म्यहम् ॥ २३६ ॥
यदिदं भवताऽऽख्यातमत्र कः प्रत्ययः प्रभो!?। पृष्टो **महेश्वरे**णेति, स मुनिः पुनरब्रवीत् ॥ २३७ ॥
अन्तर्गृहं शुनी नीता, जातजातिस्मृतिः सती। रत्नजातं तदेषा तन्निखातं दर्शयिष्यति ॥ २३८ ॥
इत्युदित्वा मुनौ याते, या तेन कथिता शुनी। तत्तथा दर्शितं तस्मै, तयाऽन्तर्गृहनीतया ॥ २३९ ॥
साधोराधोरणस्येव, स तस्माद् वचनाङ्कुशात्। उत्पथस्थितिमव्याजं, तत्याज श्रेष्ठिकुञ्जरः ॥ २४० ॥
पितृ-पुत्रादिसम्बन्धमवबुध्येति विप्लुतम्। मन्यते मित्र! न त्राता, तदात्माऽपि कुतः सुतः ? ॥ २४१ ॥
अमुद्रश्रीः **समुद्रश्रीः**, प्रियमित्थमथाभ्यधात्। प्रेममुक्त! मयाऽप्युक्तं, युक्तमित्यवधार्यताम् ॥ २४२ ॥
इमां विभूतिमुद्भूतां, मुक्त्वा मुक्त्यै कृताग्रहः। मा भूस्त्वमुभयभ्रष्टः, स्वामिन्! स इव **कर्षुकः** ॥ २४३ ॥

## कृषिकाराख्यानकम्

ग्रामः **सुसीम**नामाऽस्ति, सीमन्तो देशसम्पदः। निवासदुर्गं यः श्रीणां, सर्वतः कणपर्वतैः ॥ २४४ ॥

---

१ प्रथितप्रौढ° खंता० ॥

तत्राऽभूत् कर्षुकः कोऽपि, ग्रामीणग्रामणीर्महान् ।
कङ्गु-कोद्रवमुख्यानि, धान्यानि वपति स्म सः ॥ २४५ ॥
अथ धान्योत्करे तस्मिन्, प्राच्यपुण्य इवोद्गते । अकुण्ठस्वजनोत्कण्ठो, दूरग्रामं जगाम सः ॥ २४६ ॥
जहृषुः कर्षुके तत्र, दृष्टेऽपि स्वजनास्ततः । घनाघन इवौत्सुक्यप्रचलाः प्रचलाकिनः ॥ २४७ ॥
तं नमश्चक्रिरे केऽपि, केऽपि तेन च नीचकैः । गृहं तदा तदीयं तत्, तोषैकार्णवतां गतम् ॥ २४८ ॥
अथो पृथुगुडस्पष्टस्वादुमण्डकमण्डलीम् । अभुक्तपूर्वी पूर्णेन्दुमालामिव स भोजितः ॥ २४९ ॥
सहर्षः कर्षुकोऽवादीत्, ततस्तान् स्वजनान् निजान् ।
भोः! सुधाऽपि सुधा तत्र, यत्रैते गुडमण्डकाः ॥ २५० ॥
तद् दत्त बीजमेतेषां, निजग्रामे वपामि यत् । येन तस्मिन् समस्तोऽपि, स्यात् सुधाभोजनो जनः ॥ २५१ ॥
इक्षु-गोधूमयोर्बीजमेतैस्तस्य समर्पितम् । अरघट्टेक्षुवाटादिकर्मापि ज्ञापितं ततः ॥ २५२ ॥
बीजं मुदा तदादाय, सदनाय समुत्सुकः । दुःस्थो धनमिवोपार्ज्य, तदाऽनार्यः स निर्ययौ ॥ २५३ ॥
सद्यः स्वग्राममासाद्य, वार्यमाणोऽपि नन्दनैः । जातकल्पमपि[1] स्वल्पमतिः क्षेत्रं लुलाव सः ॥ २५४ ॥
सञ्चितेनाथ वित्तेन, तेन मण्डकलोभिना । पातालरूपः कूपोऽत्र, निर्मातुमुपचक्रमे ॥ २५५ ॥
खानं खानं ततः कूपं, नोदबिन्दुरपीक्षितः । तेन भाग्यच्युतेनेव, द्रव्यांशोऽपि धनार्थिना ॥ २५६ ॥
अधन्यस्य न धान्यानि, न चार्थश्चिरसञ्चितः[3] । अतिलुब्धस्य तस्याऽऽसन्, न च ते गुडमण्डकाः ॥ २५७ ॥
त्वमप्युपनतानेवं, प्रभो! भोगान् परित्यजन् । मुक्तिश्रीसुखलोभेनोभयभ्रष्टो भविष्यसि ॥ २५८ ॥
अथ जम्बूकुमारोऽपि, तामुवाच वचस्विनि! । मांसातिलोलकाकोलकेलिं न कलयाम्यहम् ॥ २५९ ॥

## मांसलोलुपस्य काकस्याख्यानकम्

धात्रीधम्मिल्लतुल्योऽस्ति, प्रसिद्धो विन्ध्यभूधरः । सोत्सेकाः केकिनो यत्र, गर्जद्भिः कुञ्जरैर्घनैः ॥ २६० ॥
सङ्क्षेप इव विन्ध्यस्य, महिमेव च जङ्गमः । कोऽपि क्रोडेऽस्य चिक्रीड, दुर्धरः सिन्धुरेश्वरः ॥ २६१ ॥
अथ दुर्भूपवद् भीष्मे, ग्रीष्मे तापयति क्षितिम् । विन्ध्याद्रितनयां रेवां, सेवार्थमुपजग्मिवान् ॥ २६२ ॥
स कुञ्जरो जरोपात्तशक्तिर्ग्रावस्खलत्पदः । स्रोतस्तीरावनीखण्डे, गण्डशैल इवापतत् ॥ २६३ ॥
॥ युग्मम् ॥
दन्तिनो दुर्बलस्यास्य, कान्तारान्तरपातिनः । असुरत्नं हृतं कालकिङ्करैस्तस्करैरिव ॥ २६४ ॥
दुष्टाः संवेष्टयामासुर्गतासुमथ तं द्विपम् । शृगालप्रमुखाः स्वामिमुक्तं पुरमिवारयः ॥ २६५ ॥
आहृत्याऽऽहृत्य[5] मांसानि, विस्तीर्णे ते वितेनिरे । द्विरदस्य गुदे द्वारं, नरकस्येव दुर्धियः ॥ २६६ ॥
द्वारेण[6] करिणस्तेन, करटाश्चरटा इव । सारमास्वादयामासुः, प्रविश्याऽऽशु सहस्रशः ॥ २६७ ॥
निगोद इव तत्रैव, तन्वानानां गताऽऽगतम् । जन्तूनामिव काकानां, कोऽप्यभव्य इव स्थितः ॥ २६८ ॥
अन्तरन्तर्ययौ काको, मांसान्यास्वादयन्नयम् । खनन् गजपतेरङ्गं, सुरङ्गाकृदिव क्षितिम् ॥ २६९ ॥

---

१ °धाऽप्यत्र पाता० ॥ २ °मतिस्व° खंतासं० पाता० ॥ ३ चार्थश्चिरसञ्चिताः खंता० ॥
४ °ष्मग्री° खंता० ॥ ५ आहार्याऽऽहार्य मां° पाता० ॥ ६ द्वारा करटिनस्तेन, पाता० ॥

करटेऽन्तर्गते तत्र, क्रूरे चौर इव क्षणात् । आरक्षक इव ग्रीष्मो, गुदद्वारममीमिलत् ॥ २७० ॥
भूरिवर्षासु वर्षासु, परासुस्तदसौ द्विपः । क्रोडे वीचीकरैर्नीतो, मात्रेव सरिता सुतः ॥ २७१ ॥
गतोऽन्तर्वारिधेरेव, रेवावारिप्रवाहितः । इभः पोतनिभः काकं, साकं तमपि सोऽनयत् ॥ २७२ ॥
अथ तस्य गुदद्वारि, विशद्वारिविदारिते । निःससाराहिदष्टस्य, चिराज्जीव इव द्विकः ॥ २७३ ॥
आशु निःसृत्य संश्रित्य, वपुस्तस्य द्विपस्य सः । दिक्षु काको वराकोऽथ, साक्षेपं चक्षुरक्षिपत् ॥ २७४ ॥
अयं तोयमयं विश्वं, पश्यन् नश्यँश्चतुर्दिशम् । पुनर्व्यावृत्य तत्रैव, तस्थौ करिकलेवरे ॥ २७५ ॥
अथ वारिभरापूर्णे, मग्ने करिणि मग्नवान् । द्विकः सोऽपि तदाधारः, स्वामिनीवानुजीवकः ॥ २७६ ॥
काकवत् करिणः काये, स्त्रीनिकायेऽनुरागवान् । कथं नाम निमज्जामि, सोऽहं मोहेऽम्बुधाविव ? ॥ २७७ ॥
अथाभाषिष्ट निश्छद्मश्रीः पद्मश्रीरदस्तदा । न वा नरवर ! प्रज्ञा, वानरस्येव तस्य ते ॥ २७८ ॥

## वानराख्यानकम्

जातख्याति क्षितावस्ति, हस्तिनागपुरं पुरम् । चन्द्राश्मकलशैर्यत्र, स्वयम्भुपयसः प्रपाः ॥ २७९ ॥
तत्रारिकेशरी नाम, क्षोणिशुश्रोणिवल्लभः । यद्यशोभिरशोभिष्ट, विष्टपं नित्यचन्द्रिकम् ॥ २८० ॥
अनेकदास-भूपालैरेकदा सहितो नृपः । मृगव्यायां जगामायमानीलनिचुलाञ्चितः ॥ २८१ ॥
वीरैः सह सहस्रेण, स विवेश वनाद् वनम् । घनाघनं निशानाथ, इव ताराभरैः समं ॥ २८२ ॥
वर्षत्सु शरधाराभिर्वीरेषु जलदेष्विव । निकुञ्जपुञ्जगेहेषु, निलीनं वनचारिभिः ॥ २८३ ॥
गर्वात् तथा स्थिरीभूताः, सिंहास्तद्दत्तदृष्टयः । यथा मृगैर्भयोत्तालैर्दत्तफालैर्ललङ्घिरे ॥ २८४ ॥
अथायं पृथिवीनाथो, मृगमाथोद्गतश्रमः । अवाप तापच्छेदाय, जाह्नवीं स्वयशःसखीम् ॥ २८५ ॥
जाह्नवीतीरकान्तारे, तद्वीरैः स्वैरचारिभिः । नानाविधसुधाह्वयविद्यमानफलोत्सुकैः ॥ २८६ ॥
अदर्शि कामिनी काऽपि, पुष्पभूषणभूषिता । प्रत्यक्षा वनदेवीव, वनश्रीरिव जङ्गमा ॥ २८७ ॥
॥ युग्मम् ॥

अथाऽऽदाय नरेन्द्राय,ताममी काममूर्तये । अदर्शयन् वनाम्भोधिलब्धां श्रियमिव स्त्रियम् ॥ २८८ ॥
एतां सुरनदीसेवाफलमाकलयन् नृपः । आदाय कुन्ददायाददशनामविशत् पुरीम् ॥ २८९ ॥
सपत्नीं रत्नगर्भाया, रत्नगर्भितभूषणाम् । पुण्यपण्यपरिक्रीतस्तां वितेने नरेश्वरः ॥ २९० ॥
अपरेद्युः पुमान् कश्चिदिदं पुरमरञ्जयत् । अनार्तं नर्तयन्नेकं, वानरं नरजित्वरम् ॥ २९१ ॥
अथ भूपाय केनापि, तदकथ्यत कौतुकम् । सोऽपि चाऽऽकारयाञ्चक्रे, तं नरं धृतवानरं ॥ २९२ ॥
तां प्रियां स्वर्वधूवद्धस्पर्द्धामर्धासनस्थिताम् । कुर्वन्नुर्वीपतिर्भेजे, सम्मदैकास्पदं सदः ॥ २९३ ॥
अनीनृतत् ततः सोऽपि, नरस्तं वानरं पुरः । तूर्याणि वादयन् दिक्षु, जिघृक्षुर्जनमानसम् ॥ २९४ ॥
न वानरो नरीनर्ति, ताडितोऽप्यमुना पुनः । नृपप्रियामुखाम्भोजन्यस्तदृष्टिस्तु रोदिति ॥ २९५ ॥
विलक्षे भिक्षुकेऽथास्मिन्, सा राज्ञी वानरं जगौ । अये ! मया निषिद्धस्त्वं, तदा किमकृथास्तथा ? ॥ २९६ ॥
कृतक्षोभेण लोभेन, लम्भितोऽसीदृशीं दशाम् । हृताखिलकलाशोभोऽतिलोभो हि न शोभनः ॥ २९७ ॥

---

१ °द्वारे, वि° वता० ॥ २ °र्व्याघुट्य तत्रै° पाता० ॥ ३ °वीतार° खंता० ॥ ४ °ना ततः । नृप° खंता० ॥

बोधयित्वा तदात्मानं, मानं वानर! मा कुरु। यो यथा वर्तते कालस्तं तथैवानुवर्तय ॥ २९८ ॥
इति प्रबोधितो देव्या, नृत्यन्नत्यद्भुतं तदा। निर्व्याजं रञ्जयामास, वानरः स नरेश्वरम् ॥ २९९ ॥
कृतार्थीकृत्य पृथ्वीशस्तं वानरधरं नरम्। किमेतदिति तां राज्ञीं, पप्रच्छ सपरिच्छदः ॥ ३०० ॥
विस्मितेनावनीशेन, पृष्टा स्पष्टमुवाच सा। स्वःसोपानतरङ्गाया, गङ्गायास्तीरकानने ॥ ३०१ ॥
किलाऽऽसीद् वानरद्वन्द्वमद्वैतप्रीतिमन्दिरम्। निर्दम्भस्मरसंरम्भरसप्रसरपेशलम् ॥ ३०२ ॥
तदन्यदा निदाघर्तौ, क्रीडारसवशंवदम्। सममेव समारूढं, तीरवानीरभूरुहम् ॥ ३०३ ॥
ततः शाखामृगः शाखां, मन्दमन्दोलयन्नयम्। दूरतो विनिपाताख्यं, प्राप कापेयतः फलम् ॥ ३०४ ॥
वानरोऽयं नरो भूतस्तीर्थस्यास्य प्रभावतः। प्रियामालोकयामास, हर्षौत्सुक्यस्पृशा दृशा ॥ ३०५ ॥
भैरवादिव वानीराद्, वानरी साऽपतत् ततः। नारीभूता पतीयन्ती, तमेव निजवल्लभम् ॥ ३०६ ॥
गता ननु मनुष्यत्वमथ साऽप्यहह! क्षणात्। जातजातिस्मृतिरिव, स्मरन्ती कपिजन्म तत् ॥ ३०७ ॥
ततो रतिः स्मरेणेव, प्रीतेन प्रेयसाऽथ सा। हर्षोत्कर्षादिहारण्ये, चिरं चिक्रीड संयुता ॥ ३०८ ॥
सुधाकृतसुधासाररससारतरैः फलैः। मुदा तदानीमेताभ्यां, हसिता द्युसदोऽपि ते ॥ ३०९ ॥
क्रीडँस्तया सहाऽन्येद्युस्तं वानीरमवाप्य सः। तामुवाच युवा चक्षुः, क्षिपन् प्रेमोन्मुखं मुखे ॥ ३१० ॥
असौ पशूनां वानीरो, नरतां प्रथते यथा। तथा मन्ये मनुष्याणां, देवभावं प्रदास्यति ॥ ३११ ॥
प्रिये! तदेहि वानीरमेनमारुह्य लीलया। पुनर्भूतलपातेन, देवभावोऽनुभूयते ॥ ३१२ ॥
मनुष्यत्वेऽपि किं तुच्छमावयोर्विद्यते प्रिय!?। तेन वल्लभ! लोभोऽयमतिमात्रो न युज्यते ॥ ३१३ ॥
वार्यमाणोऽपि वानीरात्, स वानरवरो नरः। झम्पासम्पातमाधाय, पुनर्वानरतां गतः ॥ ३१४ ॥
पूरितो दुःखपूरेण, नरत्वस्पृहयाऽथ सः। पुनः पपात वानीराद्, गतः पुरुषतां न तु ॥ ३१५ ॥
मानुष्यभावमोक्षाय, चटून्यतिपटूनि सः। तस्याश्चकार चक्रे तु, न तया तदमूढया ॥ ३१६ ॥
साऽहं तस्य प्रिया प्राप्ता, वसन्ती निर्जने वने। त्वत्पत्तिभिः सरित्तीरे, कृष्टैर्मत्पुण्यतन्तुभिः ॥ ३१७ ॥
अटव्यामटताऽनेन, पतिः प्राप्तः स एष मे। दक्षेण शिक्षितो नृत्यं, मां वीक्ष्य विकलोऽभवत् ॥ ३१८ ॥
तत् प्राणेश! मया सोऽयं, निर्बुद्धिर्बोधितोऽधुना। ततो मयि विसस्मार, प्रेमापस्मारमात्मनः ॥ ३१९ ॥
इत्याकर्ण्य कृताश्चर्यां, कपेश्चर्यां स भूपतिः। लोभातिशयमेतस्य, दूषयामास मांसलम् ॥ ३२० ॥

तत् पुण्यसम्भवान् भोगान्, मुक्त्वा काङ्क्षन् परं पदम्।
नाथ! त्वमुभयभ्रष्टो, हास्यः स इव मास्म भूः ॥ ३२१ ॥

अथ स्म वाचमाचष्टे, जम्बूस्तां प्रेयसीं प्रति। न स्यां विप्रतिसारस्य, वश्योऽहं पुण्यसारवत् ॥ ३२२ ॥

## पुण्यसाराख्यानकम्

पुरं **भोगपुरं** भोगहारिनारीमनोहरम्। अस्ति हस्तिमदामोदराजिराजगृहाङ्गणम् ॥ ३२३ ॥
श्रेष्ठी **धनावहो** नाम, तत्राजनि जनप्रियः। विभाव्य वैभवं यस्य, धनदोऽप्यधनायते ॥ ३२४ ॥
प्रिया **गुणवती** तस्य, जज्ञे श्रीः श्रीपतेरिव। मीनकेतुः स मीनत्वं, यल्लावण्योदधौ दधौ ॥ ३२५ ॥
देवोपयाचितशतैः, पूज्यपूजोपबृंहितैः। कृतप्रमोदसन्दर्भमथ गर्भं बभार सा ॥ ३२६ ॥

---

१ तथा प्रतिवर्तय खंता० ॥

गृहं कलाकलापस्य, निष्पुण्यानां शिरोमणिः । तनयस्तव भावीति, तां कोऽपि ब्राह्मणोऽवदत् ॥ ३२७ ॥
अथासौ वासरैः पूर्णैः, पुण्यसाराभिधं सुतम् । असूत नूतनं चूतमिव काननमेदिनी ॥ ३२८ ॥
कलाचार्यकदम्बेभ्यः, स पपौ सकलाः कलाः । मुखेभ्यः सरितां श्रीमानपः पतिरपामिव ॥ ३२९ ॥
नन्दनीं बन्धुदत्तस्य, नाम्ना बन्धुमतीमसौ । धनावहेन सप्रीतिप्रवाहेण विवाहितः ॥ ३३० ॥
कदाचित् त्रिदिवं याते, ताते कृतमृतक्रियः । समुद्धुरतरस्कन्धो, गृहभारं बभार सः ॥ ३३१ ॥
अभाग्यैर्वैभवं तस्य, क्षीणं तच्चिरसञ्चितम् । सलिलं पल्वलस्येव, चण्डरोचिर्मरीचिभिः ॥ ३३२ ॥
अथासौ वैभवभ्रंशविगलत्पौरगौरवः । समारुरोह बोहित्थं, सुस्थितश्रेष्ठिना समम् ॥ ३३३ ॥
लङ्घयन् लहरीः पोतो, हरीनिव महाभटः । तीर्त्वा युद्धमिवाम्भोधिं, परं पारमवातरत् ॥ ३३४ ॥
आकारितं पताकाभिरिव सम्मुखमागतम् । रत्नद्वीपमथ प्राप्तः, पोतः पवनवेगतः ॥ ३३५ ॥
अन्तर्जलधि चाविश्य, दर्शितस्फारगौरवैः । नागरैस्त्याजितः कामं, पोतस्तरलतां तदा ॥ ३३६ ॥
उत्तीर्य धैर्यमालम्ब्य, पोतात् प्राणभयादिव । अहंपूर्विकया लोकः, प्रपेदे द्वीपमेदिनीम् ॥ ३३७ ॥
पुण्यसारस्तदा रत्नद्वीपे रत्नमहीतलम् । नित्यं खनत्यनिर्विण्णः, स्वदारिद्र्यमिवोन्नतम् ॥ ३३८ ॥
निष्पुण्यः पुण्यसारोऽसावसाराणि कथञ्चन । रत्नान्यवाप नो चिन्तामणिं तु चिरचिन्तितम् ॥ ३३९ ॥
अहं समं[1] समेष्यामि, नासम्पूर्णमनोरथः । इत्थं स कथयामास, गन्तुकामोऽथ सुस्थिते ॥ ३४० ॥
समं तमसमायान्तमपि वित्तप्रदानतः । कृत्वा[2] समुदितं तीर्णः, पोतेनार्णःपतिं वणिक् ॥ ३४१ ॥
स तथैव ततो रत्नखानिं खनति नित्यशः । शतशो वार्यमाणोऽपि, तदधिष्ठातृदैवतैः ॥ ३४२ ॥
अपरेद्युः खनन्नेष, दारिद्र्यध्वान्तदीपकम् । चिन्तामणिं पुरोऽपश्यद्, दुरापं किंमु निश्चितैः[3] ? ॥ ३४३ ॥
असावथ नमस्कृत्य, चिन्तामणिमयाचत । स्वर्णलक्षमपश्यच्च, तत् तदैव गृहान्तरे ॥ ३४४ ॥
स्वर्णं रत्नं च तत् प्राप्य, तीरे नीरेशितुः स्थितः । नरस्य भग्नपोतस्य, संज्ञापदमुदञ्चयन् ॥ ३४५ ॥
नौवित्तधनदेवस्य, गन्तुर्भोगपुरं[4] प्रति । आरुरोह स बोहित्थे, नीतस्तत्प्रेषितैर्नरैः ॥ ३४६ ॥
पोते तद्विदितं हेम्नामारोपयदयं चयम् । तेषामकथयच्चिन्तामणिं न तु रहस्यवत् ॥ ३४७ ॥
एकदाऽसौ त्रियामायां, यामयुग्मे समुत्थितः । प्रीतो विधुं विभावर्यां, विभावर्ये न्यभालयत् ॥ ३४८ ॥

एताः श्वेतांशुभासः किं ?, किं ताश्चिन्तामणित्विषः ? ।
भान्ति क्रान्तिभिदः सोऽथ, चेतस्येतदचिन्तयत् ॥ ३४९ ॥

अथ भ्रान्तिभिदे मूढः, कटीपटकुटीपुटात्[5] । चकर्ष हर्षसम्पूर्णः, पूर्णेन्दुस्पर्धिनं मणिम् ॥ ३५० ॥
पश्यन्नसौ निशारत्नं, चिन्तारत्नं च तन्मुहुः । युतजातसुतद्वन्द्वनिभालिस्त्रीनिभो बभौ ॥ ३५१ ॥
पपात वातकम्पेन, प्रमोद इव पिण्डितः । मणिस्तस्य करादब्धौ, रविरस्तगिरेरिव ॥ ३५२ ॥
स्थाप्यतां स्थाप्यतां पोतो, मुषितोऽस्म्यहमब्धिना । इत्थं कलकलैः पूर्णं, तेने तेनेदमम्बरम् ॥ ३५३ ॥
धनदेवस्ततः पोतं, मरुद्गतिमतिष्ठिपत् । कुतस्त्वमाकुलतमस्तमपृच्छदतुच्छधीः ॥ ३५४ ॥
प्रभाजितनभोरत्नं, चिन्तारत्नं ममापतत् । तदुद्धारय पाथोधेरस्मादस्मांश्च दुःखतः ॥ ३५५ ॥
जीवितव्यं मयि स्वस्मिन्, कीर्तिरारोप्यतां त्वया । हर्षात् कर्षय रत्नं तमित्युवाच शुचैव सः ॥ ३५६ ॥

---

१ सह खंता० ॥ २ °सह समे° खंता० ॥ ३ °त्वा प्रमुदि° खंता० पाता० ॥ ४ किं सुनि° खंता० ॥ ५ गन्तुं भोग° खंता० ॥ ६ °कुटीपटा° खंता० पाता० ॥

यत्र लोकचमत्कारि, भवताऽकारि शब्दितम् । तदत्याजि पयो दूरे, वायुपूरेद्धपोततः ॥ ३५७ ॥
उत्तीर्य तन्मनः खेदान्नेदानीं लभ्यते मणिः । नौवित्तेनेति नीतिज्ञो, बोधितो मौनमाप सः ॥ ३५८ ॥
तद्वदत्र भवाम्भोधौ, रत्नं मानुषजन्म यत् । सुधर्मस्वामिपोतेऽपि, लब्धे किं हारयामि तत् ? ॥ ३५९ ॥
**पद्मसेना**ऽथ निश्छद्मसेना कन्दर्पभूभुजः । श्रीजम्बूस्वामिनं प्राह, व्रतोत्साहधुरन्धरम् ॥ ३६० ॥
मा भूस्त्वमुभयभ्रष्टस्तौ राज्ञी-जम्बुकौ यथा । तयोः शृणु कथामेतामस्मिन्नेव पुरे पुरा ॥ ३६१ ॥

## राज्ञी-जम्बुकयोराख्यानकम्

धनेन धनदाकारः, स्वर्णकारशिरोमणिः । **देवदत्त** इति ख्यातिपात्रं धात्रीतलेऽभवत् ॥ ३६२ ॥
तस्याभूद् **देवदिन्ना**ख्यः, सूनुर्विष्णोरिव स्मरः । कामभूमीपतेर्दुर्गं, **दुर्गिला**ऽस्य प्रियाऽभवत् ॥ ३६३ ॥
एकदा सा स्वयं नद्यास्तीरे नीरेच्छया ययौ । वक्षोजतुल्यताप्रीत्या, कुम्भौ मूर्धनि बिभ्रती ॥ ३६४ ॥
घटौ तटे तटिन्याः सा, मुक्त्वा मज्जनकाङ्क्षया । विवेश पयसः क्रोडं, निर्व्रीडक्रीडया रयात् ॥ ३६५ ॥
सहेलं तत्र खेलन्तीं, महिलां ग्रहिलां मदात् । व्यालोकयद् युवा कोऽपि, कन्दर्पज्वरजर्जरः ॥ ३६६ ॥
तरुणस्तां प्रति प्राह, स साहसनिधिस्ततः । तव पृच्छन्ति सुस्नातं, तरवस्तन्वि ! नन्विमे ॥ ३६७ ॥
तयाऽपि तन्मनःसभ्यमभ्यधायि तदा मुदा । एभ्यः स्वस्ति तरुभ्योऽस्तु, स्पृहा पूर्णाऽस्तु पृच्छते ॥ ३६८ ॥
मदनस्तदनेनामुं, वचसा जितपत्रिणा । जघान हृदये तूर्णं, घूर्णमानशिरोऽम्बुजम् ॥ ३६९ ॥
तत्तद्भाषितपीयूषैः, सिक्तेऽस्य वपुषि क्षणात् । श्यामो रराज रोमाञ्चः, शृङ्गाराङ्कुरकोटिवत् ॥ ३७० ॥
बालान् फलार्थिनस्तीरसहकारतरोस्तले । कृत्वा फलभरैः प्रीतानपृच्छत् केयमित्यसौ ॥ ३७१ ॥
नाम्ना धाम्ना च तां मत्वा, शिशुभ्यः स वहन् मुदम् । कृतार्थप्रायमात्मानं, मेने मन्मथसन्निभः ॥ ३७२ ॥
स्नात्वा साऽपि सरित्तीरे, स्थिता साकं सखीजनैः । जलक्लिन्नाङ्गसंलग्नस्वप्रभानिह्नुतांशुका ॥ ३७३ ॥
प्रती कटाक्षनाराचैरमुं भ्रूचापचापलात् । चचालाथ मनःस्मेरमदना सदनाय सा ॥ ३७४ ॥
चक्षुष्पथमथ त्यक्त्वा, गतायां तत्र तापवान् । तदङ्गसङ्गसुभगे, तत्राम्भसि ममज्ज सः ॥ ३७५ ॥
उपचारैस्ततः स्फारैः, कामी कामपि तापसीम् । अयमाराधयामास, कुलटाकुलदेवताम् ॥ ३७६ ॥
तापसी तापशीर्णाङ्गमनङ्गाहतमाह तम् । प्रीता क्रीताऽस्मि दानेन, किङ्करेव करोमि किम् ? ॥ ३७७ ॥
युवाऽप्युवाच तां मातर् !, **देवदिन्न**स्य वल्लभाम् । **देवदत्त**स्नुषां नाम्ना, **दुर्गिलां** मम मेलय ॥ ३७८ ॥
प्रार्थिता कुर्वती केलिलीलां कल्लोलिनीजले । मम भ्रूभङ्गभङ्गीभिः, सङ्गमङ्गीचकार सा ॥ ३७९ ॥
तद्दूरीकृत्य सा भैक्षच्छद्मना सद्मगामिनी । जगाद **दुर्गिलां** व्यग्रां, स्थालीक्षालनकर्मणा ॥ ३८० ॥
तया कुपितया तादृग्, वदन्ती तापसी ततः । निर्भर्त्स्य पृष्ठे हस्तेन, हता स्थालीमषीजुषा ॥ ३८१ ॥
इत्यवज्ञावशाज्जातपश्चात्तापाऽथ तापसी । तदेतत् कथयामास, तस्यावासमुपेयुषी ॥ ३८२ ॥
वीक्ष्य दक्षः स तं हस्तं, श्यामं पञ्चाङ्गुलीयुतम् । स्वं कृष्णपञ्चमीरात्रौ, निमन्त्रितममन्यत ॥ ३८३ ॥
स पञ्चेषुप्रपञ्चेषु, विपश्चित् पञ्चमीतिथौ । तपस्विनीं पुनः प्रैषीद्, भक्तिभिर्दुर्गिलां प्रति ॥ ३८४ ॥
अविलक्षा च सा भिक्षादम्भसंरम्भसंवृता । **देवदत्त**गृहं गत्वा, पुनस्तामाह साहसात् ॥ ३८५ ॥

---

१ °त्तार्य त° पाता० ॥ २ मा भूदुभयथा भ्रष्टो, दुर्गिलावद् भवानपि । तथा शृणु खंता० ॥ ३ कदापि सा खंता० ॥ ४ °लीवृतम्° खंता० पाता० ॥ ५ सा दक्षा खंता० ॥

उच्चैः प्रपञ्चिताटोपा, सकोपा साऽपि तापसीम् । निर्भर्त्स्य गृहपाश्चात्यद्वारेण निरसारयत् ॥ ३८६ ॥
व्रीडा-पीडाभरानुम्रकन्धराबन्धबन्धुरा । अथाकथयदस्मै सा, रुदती सुदती कथाम् ॥ ३८७ ॥
तदुक्तपश्चिमद्वारनिष्कासकथया ततः । अयमाहूतमात्मानं, मेने पश्चिमवर्त्मना ॥ ३८८ ॥
निष्पन्नमात्मनः कार्यं, मत्वा स प्राह तापसीम् । वाच्या न कापि पापिष्ठा, मातः! साऽतः परं त्वया ॥ ३८९ ॥
इमां च शान्तसन्तापां, दत्तप्रस्तुतवस्तुतः । चकार कारणं सिद्धेः, स्मरस्मरणदुर्मदः ॥ ३९० ॥
अथ मन्मथदीपेन, प्रकाशितपथो निशि । स्मरार्तो देवदत्तस्य, तस्य धाम जगाम सः ॥ ३९१ ॥
पाश्चात्यवर्त्मना कामविवशः प्रविशन्नसौ । ददर्श दुर्गिलामग्रे, साऽपि तं स्निग्धया दृशा ॥ ३९२ ॥
समाप्य गृहकृत्यानि, पत्यौ निद्रावशंवदे । ययावुपपतिं दृष्ट्वा, सा गृहोपवनावनौ ॥ ३९३ ॥
अनारतरतश्रान्ता, सह तेन हताशया । सा स्वापमाप तत्रैव, समं भर्त्रेव निर्भरम् ॥ ३९४ ॥
तदानीं कायचिन्तार्थमुत्थायोपवनं गतः । देवदत्तः स्नुषां तत्र, तदवस्थां व्यलोकयत् ॥ ३९५ ॥
विपश्चिन्निश्चयायाथ, सुतवासगृहं गतः । एकाकिनं सुतं वीक्ष्य, प्राप्तस्तत्र वने पुनः ॥ ३९६ ॥
रुषा स्नुषापदाम्भोजादभिज्ञानकृते कृती । मन्दं मन्दं स्वहस्तेन, मञ्जीरमुदतीतरत् ॥ ३९७ ॥
क्रमादुत्तार्यमाणे सा, नूपुरे जातजागरा । गुरुमालोकयामास, यान्तं कलितनूपुरम् ॥ ३९८ ॥
ससम्भ्रममथोत्थाय, कृपणा प्राणवल्लभम् । नूपुरोत्तारवृत्तान्तं, सनिर्वेदं न्यवेदयत् ॥ ३९९ ॥
क्रियमाणे प्रिय! प्रातर्दिव्ये साहायकं त्वया । किञ्चिन्मम विधातव्यं, सेत्युक्त्वा विससर्ज तम् ॥ ४०० ॥
वहन्नत्यद्भुतं भीतिभारं सोऽपि युवा जवात् । पथा यथागतेनाधोवदनः सदनं ययौ ॥ ४०१ ॥
दुर्गिला तु समालिङ्ग्य, निद्रारसवशीकृतम् । पतिं जागरयामास, मांसलस्नेहनाटिका ॥ ४०२ ॥
महेलया तया सार्धं, वर्धितोद्दामहेलया । तदा विद्राणनिद्रोऽयं, चिक्रीड व्रीडमुक्तया ॥ ४०३ ॥
तत्राथोपवने नीत्वा, तं रतिश्रान्तिशान्तये । निद्रामुद्रितनेत्राब्जं, व्रीडितेव जगाद सा ॥ ४०४ ॥
पादादुत्तार्य मञ्जीरं, मम पश्य पिता तव । अयं प्रयाति निर्लज्जः, कुलाचारः क एष वः? ॥ ४०५ ॥
सहोपपतिना सुप्ता, सुप्ताऽसौ विपिनान्तरे । ध्यात्वेति त्वत्पिता मन्ये, चकर्ष मम नूपुरम् ॥ ४०६ ॥
तत् साक्षादेव भाषस्व, पितरं हितरञ्जक! । कलङ्कं मत्कुले प्रातरयमानेष्यतेऽन्यथा ॥ ४०७ ॥
निशम्येति गिरं देवदिन्नः कान्तामवोचत । शीलैकसज्जे! लज्जेऽहमिदानीमेव तं ब्रुवन् ॥ ४०८ ॥
वक्ष्ये प्रातस्त्विति स्पष्टसन्धाकर्तरि भर्तरि । असौ सुष्वाप निस्तापा, पटुः कपटनाटके ॥ ४०९ ॥
देवदिन्नोऽथ कोपेन, पावकेनेव सञ्ज्वलन् । प्रियोत्थापितः प्रातः, प्रयातः पितरं प्रति ॥ ४१० ॥
मयैव सह सुप्ताया, वध्वास्त्वा नूपुरं हृतम् । भ्रान्तेन भवता यत् तदर्प्यतामित्यवोचत ॥ ४११ ॥
॥ युग्मम् ॥
सुतं तमिति वक्तारमाह स्वर्णकृदग्रणीः । त्वां वीक्ष्य सुप्तमत्रास्याः, पांशुलाया हृतं मया ॥ ४१२ ॥
अथेति श्वशुरेणोक्ते, दुर्गिला साऽऽह साहसात् । मुच्यते प्रविधाय स्वं, निष्कलङ्कं कुलं किल ॥ ४१३ ॥
अथो सुवर्णकारेण, कुटुम्बं मेलितं निजम् । स्वजना दुर्गिलायाश्च, समाहूताः समन्ततः ॥ ४१४ ॥
असत्यं हन्ति पादाधश्चारिणं यः क्षणाज्जनम् । यक्षस्य तस्य ते चैत्ये, जग्मुर्दुर्गिलया समम् ॥ ४१५ ॥

---

१ °च सान्तःसन्ता° खंता० ॥ २ °हकर्माणि, पत्यौ खंता० ॥ ३ °द्वानेन पाता० ॥ ४ °निश्चिकायाथ वता० ॥ ५ °वनं नी° वता० ॥

स्नात्वा पवित्रगात्रा सा, यावच्चैत्याय गच्छति। तावद् ग्रहिलतादम्भाज्जारेणाऽऽलिङ्गिताऽग्रतः॥ ४१६ ॥

धिग्! धिग्! मा मा स्पृश त्वं मां, वदन्तीत्यथ दुर्गिला।
तस्माद् विमोचिता पार्श्ववर्तिभिः स्नपिता पुनः ॥ ४१७ ॥

अथ चैत्यान्तरे गत्वा, यक्षं सम्पूज्य च स्वयम्। सा भालकुड्मलीभूतपाणिपद्मा व्यजिज्ञपत्॥ ४१८ ॥

मुक्त्वा करग्रहीतारं, ग्रहिलं च नरो यदि। कोऽपि लग्नो मदङ्गे तद्, देव! कार्याऽस्मि भस्मसात्॥ ४१९ ॥

इत्युदीर्य तदा यक्षे, संशयारूढचेतसि। अधश्चरणयोरेषा, निःससार धियांनिधिः ॥ ४२० ॥

शुद्धा शुद्धेति वाचस्तत्, तालास्फालनगर्भिताः। उल्लासिता जनशतैः, रुरुधुर्गगनाङ्गणम् ॥ ४२१ ॥

स्वयंदृष्टान्यपार्श्वस्थस्नुषासंशुद्धिचिन्तया। तदादि देवदत्तस्य, निद्रा नायादहर्निशम्॥ ४२२ ॥

दिनैः कतिपयैर्मत्वा, विनिद्रं तं पुराधिपः। निजस्यान्तःपुरस्यान्तश्चकार किल यामिकम् ॥ ४२३ ॥

सुप्तो जागर्ति वा सोऽयमित्युत्थाय मुहुर्मुहुः। राज्ञीमेकां स पश्यन्तीं, ज्ञात्वा सुप्तोऽथ कैतवात्॥ ४२४ ॥

सत्यसुप्तमिमं ज्ञात्वा, राज्ञी जालकनिर्गता। अधस्ताद्धस्तिना निन्ये, भूतलं तलवर्तिना ॥ ४२५ ॥

अथ हस्तिपकेनासौ, कुपितेन चिरागता। हस्तिहिञ्जीरघातेन, निजघ्ने जघने घनम् ॥ ४२६ ॥

जाग्रद्यामिकवृत्तान्तकथनेन प्रसेदुषा। तेन सा ध्वस्तकोपेन, समं चिक्रीड निर्भरम् ॥ ४२७ ॥

तूर्णं गवाक्षमारुह्य, स्वर्णकारोऽपि कौतुकी। सविस्मयस्तयोस्तानि, क्रीडितानि व्यलोकयत्॥ ४२८ ॥

तं हस्तिपकमालिङ्ग्य, प्रत्यूषसमयेऽथ सा। राज्ञी करिकरेणैव, प्रस्थिता प्रतिजालकम् ॥ ४२९ ॥

स्वस्थाने स्वर्णकारोऽपि, समागत्याऽऽशु सुप्तवान्। वासवेश्मनि सुष्वाप, साऽपि क्षितिपवल्लभा॥ ४३० ॥

हृदि दध्यावथ स्वर्णकारस्तच्चरितस्मितः। के वयं? यन्नरेन्द्राणामप्यसौ विप्लवप्लवः ॥ ४३१ ॥

इति निर्वृतिमासाद्य, सद्यो निद्रां प्रियामिव। भेजे चिरतरप्राप्तिगाढाश्लेषपरामसौ ॥ ४३२ ॥

अथाकथ्यत भूपाय, सुप्तः परिजनैरयम्। सुघोरघुर्घुरारावजितसूकरयूथपः ॥ ४३३ ॥

निद्रा तथा विनिद्रेण, तेनाद्य यदवाप्यत। तन्मन्ये कारणं किञ्चिदुत्थाप्यस्तदसौ नहि ॥ ४३४ ॥

इत्यादिष्टपरिवारस्तं सप्तमदिनोत्थितम्। रहस्याकार्य पप्रच्छ, क्ष्मापः स्वापस्य कारणम् ॥ ४३५ ॥

समग्रं चरितं तस्मिन्, निवेद्याथ गते सति। राजा समजनि क्रोध-त्रपासन्तप्तमानसः ॥ ४३६ ॥

अथ कृत्वा किलिञ्जेन, कुञ्जरं राजकुञ्जरः। स्थित्वा रहसि राज्ञीः स्वाः, समाहूयेदमब्रवीत् ॥ ४३७ ॥

दुःस्वप्नोऽद्य मया दृष्टस्तत् सत्यीकृत्य हन्यताम्। पर्यस्तवसनं हस्तिन्यस्मिन्नारुह्यतामिति ॥ ४३८ ॥

इत्यादिष्टा नरेन्द्रेण, सर्वाः शुद्धान्तयोषितः। उच्चैरुर्द्विपमारुह्य, पूर्वाद्रिमिव तारकाः ॥ ४३९ ॥

सा तु दुष्टा बिभेमीति, भाषमाणा महीभुजा। हताऽभिमन्त्रितेनेव, पद्मेन पतिता भुवि ॥ ४४० ॥

अथास्या जघनं राजा, शृङ्खलाकिणकश्मलम्। ददर्श शैवलालीढजाह्नवीपुलिनोपमम् ॥ ४४१ ॥

अथाऽऽह तां हतां राजा, कोपाटोपारुणेक्षणः। अन्यासामपि भीरूणां, भीरुतां प्रतिपादयन्॥ ४४२ ॥

यासि द्विपकराज्जारं, बिभेषि तु कटद्विपात्। मोदसे शृङ्खलाघातैः, पद्मघातैस्तु मूर्च्छसि ॥ ४४३ ॥

इति ब्रुवन् भ्रुवं भाले, समारोप्यातिकोपनः। धृत्वा केशेषु लोकेशः, कृष्टवान् पिष्टवांश्च ताम्॥ ४४४ ॥

---

१ °चैद्गत्वा खंता० ॥ २ किं मां पश्यति राज्ञीति, ध्यात्वा सुप्तः स कै° पाता० ॥ ३ सुप्तः स कै° खंता० ॥ ४ °समसुं ज्ञा° खंता० ॥ ५ °स्तिहञ्जी° पाता० ॥ ६ °रघर्घरारा° खंता० ॥ ७ °त्वा कलि° पाता० ॥ ८ °ह्यतां ततः खंता० ॥ ९ तारिकाः खंता० ॥

अथ हस्तिपकं हस्तिराजं हस्तिगतिं च ताम् । हन्तुं नूतनमारेण, नृपः किञ्चिदचिन्तयत् ॥ ४४५ ॥
ततः क्षितिपतिः साकं, साकम्पैः स्वजनैर्भयात् । वैभारपर्वतं यातो, निन्ये तत्र च तत् त्रयम् ॥ ४४६ ॥
अथाऽऽदिशन्नृपो हस्तिपकं साकं स्त्रियाऽनया । आरुह्यारोपय स्याद्, द्विपं मूर्ध्नि गिरेरिति ॥ ४४७ ॥
सममृत्यु-समस्थानगतिहर्षादुभाविभम् । अधिरूढावथाम्भोदं, रोहिणी-शशिनाविव ॥ ४४८ ॥
हस्ती हस्तिपकेनाथ, प्रेरितो गिरिमूर्धनि । आरुरोह पयोवाह, इव मन्देन वायुना ॥ ४४९ ॥
अथाऽऽरूढं गिरेर्मूर्ध्नि, मेण्ठमाज्ञापयन्नृपः । पातयैनं द्विपं शैलात्, कैलासगिरिगौरवात् ॥ ४५० ॥
इत्युक्ते क्षितिनाथेन, निषादिकृतसंज्ञया । एकोऽम्बरे निरालम्बश्चरणः करिणा कृतः ॥ ४५१ ॥
पातयेति नृपादेशान्मेण्ठनुन्नः पुनः करी । पदं द्वितीयमुद्दध्रे, समारोढुमिवाम्बरम् ॥ ४५२ ॥
हाहाकारमथाऽऽधाय, पूर्लोकः शोकपूरितः । ईदृक्षं रक्ष रक्षेममिति भूपं व्यजिज्ञपत् ॥ ४५३ ॥
रोषदोषखनिः क्ष्मापस्तमुपेक्ष्य पुरीजनम् । उवाच पातयेत्युच्चैस्तदा हस्तिपकं पुनः ॥ ४५४ ॥
तृतीयं मेण्ठनुन्नोऽथ, पादमुत्पाटयन् करी । गिरावेकपदस्तस्थौ, तपस्यन्निव मुक्तये ॥ ४५५ ॥
लोकैरथ भृशं हाहाकारव्याहारवीचिभिः । क्षपितः क्षितिपालस्य, कोपाग्निः करिणं प्रति ॥ ४५६ ॥
अथावनीधवेनायं, निषादी भाषितस्तदा । कथञ्चिदुत्तरत्येष, करी जीवन् गिरेरिति ॥ ४५७ ॥
आवां मुञ्चसि जीवन्तौ, यद्युत्तरति तत् करी । इति विज्ञपयामास, मेण्ठः पृथ्वीपतिं प्रति ॥ ४५८ ॥
अभयं ते वयं दद्मः, पश्चात्सत्त्व द्विपं मम । उत्तारय स्यादेतत्, तदाऽऽदिशदमुं नृपः ॥ ४५९ ॥
इत्यादेशान्नरेशस्य, मुदितेन निषादिना । उत्तारितः करी शैलादात्मा च यममन्दिरात् ॥ ४६० ॥
अथ चक्षुष्पथं भर्तुर्विहाय सहितस्तया । चचाल सोऽयमुत्तालगतिर्देशान्तरं प्रति ॥ ४६१ ॥
प्रान्ते ग्रामस्य कस्यापि, निशि देवकुलान्तरे । तौ लीनौ नलिनक्रोडे, तस्थतुर्भ्रमराविव ॥ ४६२ ॥
समयेऽथ निशीथस्य, ग्रामतः कोऽपि तस्करः । सलोप्त्रः प्राविशच्चैत्यं, तलारक्षैरनुद्रुतः ॥ ४६३ ॥

उदिते विदितो भानौ, ग्राह्योऽयमिति निश्चयात् ।
ऊर्द्ध्वास्ते पत्तयश्चैत्ये, दध्रुर्नीरन्ध्रवप्रताम् ॥ ४६४ ॥

सोऽपि चौरश्चरन्नन्तश्चैत्यमग्रस्फुरत्करः । लुठितस्याथ मेण्ठस्य, शरीरं पाणिनाऽस्पृशत् ॥ ४६५ ॥
निद्राविद्राणचैतन्ये, तस्मिन्नथ निषादिनि । चौरः सञ्चारयाञ्चक्रे, करं कमलकोमलम् ॥ ४६६ ॥
कथञ्चिदप्यथो राज्ञीकुचभूधरमूर्धनि । प्राणरक्षणदुर्गेऽस्य, तस्करस्य करो ययौ ॥ ४६७ ॥
तत्कोमलकरस्पर्शमनुभूय नृपाङ्गना । मनोभवार्ता तं वार्तामपृच्छत् को भवानिति ॥ ४६८ ॥
तेनोक्तमस्मि चौरोऽहमधिरोहन्मृतिर्यतः । एतच्चैत्यं चतुर्दिक्षु, मत्कृते वेष्टितं भटैः ॥ ४६९ ॥
भयवन्तं ब्रुवन्तं तमित्याह क्षितिपाङ्गना । मा भैषीर्भवतः प्राणरक्षा दक्ष ! करिष्यते ॥ ४७० ॥
हृत्वा त्वया यदानीतं, तदस्योच्छीर्षके त्यज । तदेहि दूरतो यावत्तावदावां स्मितसरौ ॥ ४७१ ॥
निशम्य सम्यगायातमृत्युशान्तिमहौषधम् । एतस्या वचनं चौरश्चकार स यथोदितम् ॥ ४७२ ॥
क्षणेन साऽपि गौराङ्गी, चौराङ्गीकरणोद्यता । हस्त्यारोहमुञ्चत् तं, चित्तं को वेत्ति योषिताम् ? ॥ ४७३ ॥
अथोदिते द्युतिपतौ, ध्वान्तद्रुमदवानले । विविशुर्विवशाः कोपाच्चैत्यं चौरार्थिनो भटाः ॥ ४७४ ॥
लोप्त्रवन्तं तदाऽऽरक्षाः, क्रोधाद् दध्रुर्निषादिनम् । तन्वन्तस्तुमुलारावमुल्लन्तस्तदा मुदा ॥ ४७५ ॥

सेयं मुग्धा मम वधूश्चौरेण जगृहे पुनः । नाहं चौर इदं जल्पन्, स ततश्चक्षेपे भटैः ॥ ४७६ ॥
समं मलिम्लुचेनाथ, नाथभूतेन पांशुला । चचाल चैत्यतस्तस्मात्, कलङ्कैकनिकेतनम् ॥ ४७७ ॥
प्रस्थिताभ्यामथैताभ्यां, ददृशे पुरतः सरित् । अम्भःकुम्भिकरोदञ्चदम्बुचुम्बितटद्रुमा ॥ ४७८ ॥
चौरोऽथ चिन्तयाञ्चक्रे, न या निजविभोरभूत् । भविष्यति कुतः सा मे, कामेषुविवशीकृता ? ॥ ४७९ ॥
अस्याः सर्वस्वमादाय, मायया तद् व्रजाम्यहम् । मनोरथं मदीयं हि, नदीयं पूरयिष्यति ॥ ४८० ॥
इति निश्चित्य तामूचे, चौरश्चपललोचनाम् । दुस्तरा सिन्धुरेषाऽस्ति, गतिनिर्जितसिन्धुरे ! ॥ ४८१ ॥
एककालं न भवतीं, वसना-ऽऽभरणादि च । उत्तारयितुमीशोऽहं, तत् पूर्वं सर्वमर्पय ॥ ४८२ ॥
ततस्तीरे विमुच्यैतत्, सर्वं सर्वाङ्गसुन्दरि ! । भवतीं पुनरानेतुमहमेष्यामि सत्वरम् ॥ ४८३ ॥

साऽपि तद्वचसा प्रीता, वसना-ऽऽभरणादिकम् ।
तस्याऽर्पयित्वा चौरस्य, शरस्तम्बान्तरे स्थिता ॥ ४८४ ॥

स्वभावनिस्त्रपां दौष्ठ्यनिस्त्रपस्तां विलोकयन् । दायादवत् तदादाय, स विवेशाऽऽपगापयः ॥ ४८५ ॥
स्वपतित्यागिनीं न त्वां, स्वप्नेऽपि स्पृहयाम्यहम् । तामित्युक्त्वा नदीं तीर्त्वा, तस्करः स तिरोदधे ॥ ४८६ ॥
साऽपि किं करवाणीति, वाणिनी मूढमानसा । एकं जम्बुकमद्राक्षीन्मांसखण्डजुषं मुखे ॥ ४८७ ॥
जिघृक्षुः स तिमिं सिन्धोरम्बुकच्छेऽथ जम्बुकः । मांसखण्डं पुरो मुक्त्वाऽधावद् यावदयं रयात् ॥ ४८८ ॥

तावदम्बुनिमग्नेऽस्मिन्, मत्स्ये विवलितस्तदा ।
चक्रन्द जम्बुको दुःखी, शकुन्या पिशिते हृते ॥ ४८९ ॥ युग्मम् ॥

तं तथास्थितमालोक्य, गतदुःखेव साऽहसत् । प्रौढान्यपि हि दुःखानि, विस्मर्यन्तेऽतिकौतुकैः ॥ ४९० ॥
हसन्तीमसतीमेतां, व्यक्तमूचेऽथ जम्बुकः । मां किं मांस-तिमिभ्रष्टं, नग्ने ! हससि निस्त्रपे ! ? ॥ ४९१ ॥
भ्रष्टं जाराच्च चौराच्च, किं नात्मानं हसस्यहो ! ? । मूढो ह्यद्रौ ज्वलत् पश्येन्न पुनः पादयोरधः ॥ ४९२ ॥
जल्पाके जम्बुके तस्मिन्निति वृत्तं नृभाषया । चिन्तयामास सा यावदाविष्कृतचमत्कृतिः ॥ ४९३ ॥
स दिव्यपुरुषो भूत्वा, भूरिभूषणभूषितः । जगाद जम्बुको वाचं, भूयस्तां तावदुच्चकैः ॥ ४९४ ॥
॥ युग्मम् ॥

निजं जानीहि मां पूर्णहिमांशुमुखि ! कामुकम् । अहं स हंसगमने !, शिखारत्नं निषादिनाम् ॥ ४९५ ॥
त्वामादाय गते चौरे, चौरबुद्ध्याऽथ रक्षकैः । अहं दुःखलतामूलशूलायामधिरोपितः ॥ ४९६ ॥
जिनदासं तदाऽऽसन्नचरं वीक्ष्य वणिग्वरम् । आर्तोऽयाचं पयः पातुं, पयोदमिव चातकः ॥ ४९७ ॥
नमोऽर्हद्भ्य इति न्यस्य, मन्त्रं मयि तदाऽऽतुरे । पानीयाय जगामाऽयमन्तर्ग्रामं वणिग्वरः ॥ ४९८ ॥
अथ शूलास्थितस्तेन, मन्त्रेण मुखरस्तदा । जातोऽहं केतकीपत्रप्राग्रजाग्रद्द्विरेफवत् ॥ ४९९ ॥
आरक्षानुज्ञया श्रेष्ठी, पयः पाययितुं मया । दृष्टो हृष्टेन मातेव, वेगादागामुकस्तदा ॥ ५०० ॥
अपीतेनापि तृप्तोऽहं, पयसा दृक्पथस्पृशा । स्मरन्नतितरां मन्त्रं, प्राणैर्मुक्तोऽस्मि तत्क्षणात् ॥ ५०१ ॥

तन्मन्त्रध्यानमाहात्म्याद्, भूत्वाऽहं ज्ञानवान् सुरः ।
तव मोहव्यपोहाय, व्यधां फेरुण्डताण्डवम् ॥ ५०२ ॥

जैनं भज ततो धर्ममम्मुं त्वमपि भामिनि ! । नैव स्वर्गा-ऽपवर्गश्रीर्यत्प्रसादाद् दुरासदा ॥ ५०३ ॥

१ °हेऽमुना । ना° खंता० ॥

चन्द्रचारूणि चीराणि, परिधाप्य प्रबोध्य ताम् । अथायमानयत् क्वापि, पत्तने व्रतिनीमठे ॥ ५०४ ॥
इत्यसौ बोधिता तेन, रविणेव सरोजिनी । दधौ हृदि[1] तदा साधुधर्मं हंसमिवोज्ज्वलम् ॥ ५०५ ॥
तद् त्वं सा कम्बुकण्ठीव, स जम्बुक इवापि च । मास्म भूरुभयभ्रष्टो, मुक्त्यर्थं मुक्तवैभवः ॥ ५०६ ॥
अथ श्रीजम्बूरूचे तां, स्त्रीचेतांसि प्रबोधयन् । विद्युन्मालीव नैवाहं, मोहे मज्जामि कामिनि ! ॥५०७॥

## विद्युन्माल्याख्यानकम्

अस्ति सन्ततसञ्चारिताराविश्राममूमिका । नभः स्तम्बेरमस्तम्भो, वैताढ्य इति भूधरः ॥ ५०८ ॥
तस्यावनिस्तनस्येव, मूर्ध्नि काश्मीरपत्रवत् । पुरमस्ति मणिस्तोममयं **गगनवल्लभम्** ॥ ५०९ ॥
तत्र विद्याधरौ **विद्युन्मालि-मेघरथा**विति । वैताढ्यश्रीमुखस्यास्य, नगरस्य दृशाविव ॥ ५१० ॥
अथ साधयितुं विद्यां, **मातङ्गी**संज्ञया श्रुताम् । मन्त्रयामासतुर्विद्याधरौ प्रीतिधुरन्धरौ ॥ ५११ ॥
चण्डालकन्यामुद्वाह्य, तद्गृहे विहितास्पदैः । विद्या वर्षावधि ब्रह्मचर्यादेषा तु साध्यते ॥ ५१२ ॥
भूखण्डमण्डने गत्वा, साधयावः क्वचित् पुरे । तदेतामिति निश्चित्य, तौ **वसन्तपुरं** गतौ ॥ ५१३ ॥
स्थित्वा चण्डालवेषेण, तत्र चण्डालपाटके । एतौ चण्डालमुख्यानां, चक्रतुः सेवनक्रियाम् ॥ ५१४ ॥
ततस्तैः[2] सेवया प्रीतै, रतौ सम्भाषितौ मिथः । किमङ्गजौ ? कुतः प्राप्तौ ?[3], किमारम्भौ युवामिति ? ॥ ५१५ ॥
तावूचतुरिति म्लेच्छराजपुत्राविहागतौ । **साकेतपुर**वास्तव्यावावां पित्रा निराकृतौ , ॥ ५१६ ॥
तदावाभ्यामिहागत्य, यूयमेव निषेविताः । विना सत्प्रभुसेवाभिः, क्व पूर्यन्ते मनोरथाः ? ॥ ५१७ ॥
इति श्रुत्वा तयोर्वाचं, तदा चण्डालशेखराः । ते बभूवुर्मुदाऽऽमोदमन्दिरं मेदुरप्रभाः ॥ ५१८ ॥
तदाऽऽनन्दमयैरेभिस्तावेतौ परिणायितौ । स्वाजन्याय स्वपुत्रीभ्यां, लताभ्यामिव भूरुहौ ॥ ५१९ ॥
ब्रह्मचर्येण रोचिष्णुरथ **मेघरथः** कृती । वसँस्तत्रैव वर्षेण, तां विद्यां वशमानयत् ॥ ५२० ॥
**विद्युन्माली** तु चाण्डाली, तामकामयताधमः । साऽपि गर्भं दधौ तस्य, स्थिरीकरणकार्मणम् ॥ ५२१ ॥
असिद्धमथ सिद्धस्तमाह **मेघरथ**स्तदा । किमकारि त्वया मूढ !, मग्नोऽसि म्लेच्छवारिधौ ॥ ५२२ ॥
इत्याकर्ण्य त्रपानम्रो, **विद्युन्माली** जगाद तम् । एकवारं सदाचार ![4], क्षम्यतां विप्लवो मम ॥ ५२३ ॥
इदानीं साधयिष्यामि, विद्यां निर्जितमन्मथः । वाच्यः प्रीतिप्रकर्षेण, वर्षेणाहं त्वया पुनः ॥ ५२४ ॥
एवमस्तु गदित्वेति, स्फुरद्विद्यापदच्छदः । धीमान् पक्षीव वृक्षाग्रमारुरोह नभस्तलम् ॥ ५२५ ॥
समयान्ते समायातः, समया तं पुनः कृती । बन्धुप्रेमगुणाकृष्टो, म्लेच्छं विद्याधरोऽपि सः ॥ ५२६ ॥
अग्रे तावदसौ **विद्युन्माली** बालं करे धरन् । पुनर्गर्भितचण्डालीशाली तेनैं विलोकितः ॥ ५२७ ॥
सोऽपि **मेघरथं** वीक्ष्य, त्रपयाऽभूदधोमुखः । रसातलप्रवेशाय, द्रष्टुं रन्ध्रमिवावनौ ॥ ५२८ ॥
उक्तो **मेघरथे**नाथ, बन्धो ! बन्धोऽयमेतया । कुतः शटितया रज्ज्वा, गजस्येवाभवत् तव ? ॥ ५२९ ॥

अथाधोमुख एवेदं, **विद्युन्माली** जगाद तम् ।
बन्धो ! विद्याऽमुनाऽब्देन, साध्या शोध्योऽस्म्यहं पुनः ॥ ५३० ॥

---

१ °दि सदा साधु° पाता० ॥ २ ततस्तौ सेवया प्रीतौ, रतौ वता० ॥ ३ °प्ताौ ? कुतः वता० ॥ ४ तेनावलो° खंता० ॥

निशम्येति गतः सोऽपि, यावद् वर्षत्रयं पुनः । एहिरेयाहिरां चक्रे, मग्नो मोहे तु सोऽधमः ॥ ५३१ ॥
दुःखदावाग्निदाहाय, नाहं मोहाटवीतरुः । तन्वि ! तद्वद् भविष्यामि, स्त्रीलताजालवेष्टितः ॥ ५३२ ॥
गिरं कनकसेनाऽथ, सुधामाथभवामिव । अभ्यधाद्धारिणीपुत्रं, प्रति प्रतिकृती रतेः ॥ ५३३ ॥
शास्त्रव्यापारपारीणो, धुरीणो बुद्धिशालिनाम् । एष्यस्यनुशयं नाथ !, त्वं शङ्खधमको यथा ॥ ५३४ ॥

## शङ्खधमकाख्यानकम्

**शालिग्राम** इति ग्रामः, ख्यातः क्ष्मातलभूषणम् । लोलश्रीकेलिशैलाभकणकूटोऽस्ति विस्तृतः ॥ ५३५ ॥
कौटुम्बिकस्य कस्यापि, तत्रैकः क्षेत्ररक्षकः । प्रेष्योऽजनि ध्वनत्कम्बुनादत्रासितभक्षकः ॥ ५३६ ॥
एकदाऽयमुपादाय, पाणौ शङ्खं निशामुखे । दूरे जगाम ग्रामस्य, क्षेत्ररक्षणदक्षिणः ॥ ५३७ ॥
निशीथसमये हृत्वा, कुतोऽप्यतिघनं धनम् । तत्क्षेत्रस्य समीपेन, चौराः केचित् तदाऽचलन् ॥ ५३८ ॥
तेन तत्रान्तरे क्षेत्रान्तरे मालाग्रवर्तिना । कम्बुरम्बुधरध्वानवाद्यऽवाद्यत हेलया ॥ ५३९ ॥
तदाकर्ण्य तदा कम्बुशब्दितं ते मलिम्लुचाः । त्यक्त्वाऽऽशु गोधनं नेशुः, प्राप्तारक्षकशङ्कया ॥ ५४० ॥
तत् तस्य गोधनप्राप्तिपुण्याकर्षणमन्त्रताम् । ततान कम्बुनिःस्वानगौरवं चौरवञ्चकम् ॥ ५४१ ॥
विभातायां विभावर्यां, चर्यां कुर्वन् स गोधनम् । वीक्ष्य निःशेषमादाय, दातुं ग्रामाय चागमत् ॥ ५४२ ॥
अथ ग्रामस्य, कामं सं, पूरयन् भूरिगोधनैः । दत्तैस्तदा यथौ दुःस्थं, ययौ धनदयक्षताम् ॥ ५४३ ॥
अन्यदाऽपि निशीथिन्या, निशीथे गोधनाशया । क्षेत्रमालाधिरूढोऽसौ, शङ्खं धमति धैर्यवान् ॥ ५४४ ॥
त एव तस्करास्तत्र, निशीथेऽन्येद्युरराययुः । हृताद्भुतधना धैर्यजितकीनाशकिङ्कराः ॥ ५४५ ॥
दध्मौ शङ्खं क्षणेऽमुष्मिन्, सोऽपि क्षेत्रस्य रक्षकः । आह्वातुमिव दुर्बुद्धिर्दूरादापदमात्मनः ॥ ५४६ ॥
आकर्ण्य ते तदा कम्बोः, शब्दमब्दविजित्वरम् । किमेतदिति संरब्धाश्चौराश्चिरमचिन्तयन् ॥ ५४७ ॥
अत्रैव शङ्खशब्दोऽभूत्, पुराऽपि प्रापितज्वरः । भयादकस्मादस्माकमाकस्मिकविकस्वरः ॥ ५४८ ॥
नरः शङ्केऽस्ति केदाररक्षकः शङ्खवादकः । भ्रमिताः स्मः पुरा स्पष्टं, कष्टं तेन दुरात्मना ॥ ५४९ ॥
इति निश्चित्य ते चौराः, शङ्खस्वनमनूव्रताः । स शङ्खधमको यत्र, तत्र क्षेत्रान्तरे ययुः ॥ ५५० ॥
मुष्टिभिस्ताडयित्वा तं, भंक्त्वा शङ्खं च सक्रुधः । हृत्वा च तद्धनं मङ्क्षु, चौरास्ते जग्मुरुन्मुदः ॥ ५५१ ॥
प्रभूते सति वित्तेऽस्मिन्नधिकाधिकवाञ्छया । स इव त्वं विदग्धोऽपि, भव मा पदमापदाम् ॥ ५५२ ॥
अथ जम्बूः स तामाह, सतामाहतविप्लवः । स्यामहं किमु ? मूर्खत्वान्मुमूर्षुः स कपिर्यथा ॥ ५५३ ॥

## वानराख्यानकम्

अस्ति हस्तिकुलोत्खातै, रत्नै रेवाम्बुवाहितैः । रत्नाकरीकृताम्भोधिर्विन्ध्यो नाम धराधरः ॥ ५५४ ॥
अनेकमुनिमाहात्म्याददाहात्मकतां गतः । तद्वनान्तर्दव इवाभवत् कोऽपि कपीश्वरः ॥ ५५५ ॥
उद्भूतरुचिसम्भारास्तारा इव निशाकरः । कामं कामयते सर्वाः, स एकः कपिकामिनीः ॥ ५५६ ॥

---

१ सोऽपूरयद् भू° खंतासं० ॥ २ °थाऽतुच्छं, ययौ पाता० ॥ ३ °न्यां, नि° वता० ॥ ४ °पदः खंता० पाता० ॥ ५ अशेषमुनि° वता० ॥ ६ °वाऽभूत् कोऽपि कपियूथपः इत्येवंरूपः पाठः खंता० पाता० ॥ ७ °तभूरिसञ्चारा° खंता० ॥

कपिः कोऽप्यंसलंमन्यः, कदाचिन्मदनातुरः । वञ्चयित्वाऽधिपं रेमे, तत्प्रियाभिर्भयोज्झितः ॥ ५५७ ॥
तं युवानं वलिष्ठं च, वीक्ष्य शाखामृगस्त्रियः । जरत्कपिरतोद्विग्ना, दधुर्मुदमुदित्वरीम् ॥ ५५८ ॥
सममेष परीरम्भसम्भ्रमेण कपिस्त्रियः । काम-कोपवशात् कम्पसम्पदां पदमादधौ ॥ ५५९ ॥
स ताश्च नख-दन्तादिमृदुकण्डूयनादिकम् । रचयामासुरन्योन्यं, रहो गलितचेतनम् ॥ ५६० ॥
अथ यूथपतिर्दूरादेतदालोक्य दुःसहम् । अधावत् तारं[1]बूत्कारं, लहरीजित्वरत्वरः ॥ ५६१ ॥
युवा कपिरपि प्रेक्ष्य, तं समायान्तमभ्यगात् । जवाज्जितं तु चेतोऽपि, मुक्त्वा स्त्रीमध्य एव सः ॥ ५६२ ॥
गृहीतगृहिणीकोपसाटोपहृदयं तदा । स तं वालीव सुग्रीवमुग्रक्रोधमयोधयत् ॥ ५६३ ॥
परस्परपरिक्षिप्तप्रतीष्टग्रावे[2]लोष्टकैः । तौ घ्नन्तौ वनदेवीनामाश्चर्यं चक्रतुश्चिरम् ॥ ५६४ ॥
अथ कच्छाभपुच्छौ तौ, क्षुरीकाराविव क्षणात् । ऊर्द्ध्वौ पाश्चात्यपादाभ्यामङ्गं विविशतुर्मिथः ॥ ५६५ ॥
जवेनाथ जरन् दूरागतिखिन्नः कपीश्वरः । यूना स्त्रीदृष्टिपुष्टेन, निर्भग्नस्त्रासमासदत् ॥ ५६६ ॥
शिलाजतुनि स क्षिप्त्वा, मुखं सलिलकाङ्क्षया । उद्धर्तुमक्षमः पाणी, मूर्खः प्राणकृतेऽक्षिपत् ॥ ५६७ ॥
तावत् तावपि तत्रैव, विलग्नौ वज्रलेपवत् । तदुद्धारधिया मूर्खः, पश्चात् पादौ न्ययुङ्क्त तत् ॥ ५६८ ॥
[3]लग्नौ तावपि [4]तत् तत्र, सतृष्णस्य क्रमौ हरेः । तेन कीलितसर्वाङ्ग, इव मृत्युमवाप सः ॥ ५६९ ॥
तदक्षिप्तपदः पूर्वमाकृषेद् वदनं स चेत् । अवश्यं तस्य तन्न स्याद्, दुर्मतेर्मृत्युरीदृशः ॥ ५७० ॥
भवा[5]दृशां वचस्तृष्णाप्रेरितोऽहमपि भ्रमात् । सजामि रागगैरेये, गौराङ्गि! कपिवन्नहि ॥ ५७१ ॥
नभःसेनाऽथ वक्ति स्म, व्यक्तं लोभेन भूयसा । नाथ! यास्यसि निर्बुद्धि[6]र्बुद्धिस्त्रीवोपहास्यताम् ॥५७२॥

## बुद्धिस्त्रिया आख्यानकम्

ग्रामः सस्यश्रियां धाम, नन्दिग्राम इति श्रुतः । अस्ति विस्तीर्णकेदारसङ्कीर्णीभूतभूतलः ॥ ५७३ ॥
तत्र सिद्धिश्च बुद्धिश्च, प्रसिद्धे वृद्धयोषितौ । अभूतां स्फारदारिद्र्यमन्दिरे सख्यसोदरे ॥ ५७४ ॥
ग्रामेऽत्र भोलिगो नाम, यक्षो विख्यातवैभवः । वित्तस्याभूत् प्रभूतस्य, दाता सेवाधने जने ॥ ५७५ ॥
सिद्धिराराधयामास, ततस्तं भक्तिभासुरा । दीनारद्वितयं तुष्टो, ददौ तस्यै स चान्वहम् ॥ ५७६ ॥
[7]अभुक्त काष्ठपात्रे या, सा भुङ्क्ते हेमभाजने । दास्यं व्यधत्त याऽन्येषां, तस्या दास्योऽभवन् गृहे ॥ ५७७ ॥
कुटीरे याऽवसद् भग्ने, सौधे वसति साऽनिशम् । दधौ या चीवरं जीर्णं, दुकूलैः साऽनुकूल्यते ॥ ५७८ ॥
इत्थमालोक्य तां बुद्धिः, सिद्धिं सिद्धोरुवैभवाम् । प्रीत्या रहसि पप्रच्छ, साकूतं कौतुकादिति ॥ ५७९ ॥
॥ विशेषकम् ॥
कुलक्रमागतः स्वामी, दारिद्र्यं तावदावयोः । कुतो विभवपा[8]थोधिजलदेवीव वर्तसे ? ॥ ५८० ॥
अथ सा कथयामास, तुष्टो यक्षः स भोलिगः । दीनारद्वितयं दत्ते, सम्पन्नेत्राभमन्वहम् ॥ ५८१ ॥
इति तस्य निशम्यासौ, वाचं निश्चित्य चेतसि । तमाराद्धवती यक्षं, बुद्धिर्भक्तिभरोत्तरा ॥ ५८२ ॥

---

१ °रपूत्कारलह° पाता० ॥ २ °वगोलकैः खंता० पाता० ॥ ३ ५६९-७० श्लोकयुगलस्थाने—लग्नौ तावपि तत् तत्र, मृत्युमाप स दुर्मतिः । अप्रक्षिप्तपदः प्राणानाचकर्ष यदाननम् ॥ इत्येवंरूप एक एव श्लोकः पाता० पुस्तके वर्त्तते ॥ ४ तत्रैव, सतृ° खंता० ॥ ५ °दृशवच° पाता० ॥ ६ °द्धिस्त्वं बुद्धिस्त्रीव हास्य° खंता० पाता० ॥ ७ अभुङ्क्त खंता० ॥ ८ °थोधेर्जल° पाता० ॥

तुष्टो जगाद यक्षोऽथ, किमु त्वं याचसीति ताम्। द्विगुणं सिद्धितो देयं, ममेत्येषाऽवदन्मुदा ॥ ५८३ ॥
ददौ यक्षोऽन्वहं तस्यै, दीनाराँश्चतुरस्ततः। अथ सा प्रथते बुद्धिरपि सिद्धिरिवान्वहम् ॥ ५८४ ॥
बुद्धेः[1] सिद्धिमिति ज्ञात्वा,[2] सिद्ध्याऽऽराद्धः पुनर्ददौ। ततोऽपि द्विगुणं यक्षः, सेवाकृत्कल्पपादपः ॥ ५८५ ॥
आराद्धस्तत् पुनर्बुद्ध्या, यक्षः प्रत्यक्षतां गतः। द्विगुणं कल्पयामास, प्रत्यहं सिद्धिऋद्धितः ॥ ५८६ ॥
आराधयत् पुनः सिद्धिस्तं यक्षं क्रूरमानसा। किं ते ददामि? तुष्टोऽस्मि, सोऽपि तामित्यभाषत ॥ ५८७ ॥
सिद्ध्या तदूचे तच्चक्षुरेकं मे काणय प्रभो!। तामेकचक्षुषं यक्षस्ततः कृत्वा तिरोदधे ॥ ५८८ ॥
बुद्ध्याऽथ पुनराराद्धो, यक्षः साक्षात् पुरोऽभवत्। निगदन् किं ददामीति, प्रीतिपूर्वं[3] वरम्? ॥ ५८९ ॥
विधेहि द्विगुणं नाथ!, मम त्वं सिद्धिदानतः। तदाकर्ण्य विधायान्धां, बुद्धिं यक्षस्तिरोऽभवत् ॥ ५९० ॥
तद्वत् त्वमपि तन्नाथ!, ऋद्धिं प्राप्यापि दुर्लभाम्। अनुत्तरां श्रियं वाञ्छन्नपाये निपतिष्यसि ॥ ५९१ ॥
ऊचे जम्बूकुमारोऽथ, समारोपितनिश्चयः। उत्पथप्रस्थितिं कुर्वे, नैवाहं वाजिराजवत् ॥ ५९२ ॥

## वाजिराजाख्यानकम्

श्रीवशंवदसौन्दर्यं, श्रीवसन्तपुरं पुरम्। अस्ति क्षितिवधूहारतारप्राकारभासुरम् ॥ ५९३ ॥
जितशत्रुर्नृपस्तत्र, सुत्रामप्रतिमः श्रिया। आसीद् दोःस्तम्भदम्भोलिलोलितापरभूमिभृत् ॥ ५९४ ॥
असौ यशःकुमारस्य, यदीयस्य विसर्पतः। बभौ नभःपथोत्सङ्गे, शशी सहचरश्चिरम् ॥ ५९५ ॥
अन्यदा स नृपोऽवादीद्, वाहरत्नपरीक्षकान्।
सर्वोत्कृष्टोऽस्ति मे वाजी, राज्ये कोऽपीति कथ्यताम् ॥ ५९६ ॥
अथ ते गदिते राज्ञा, हयविद्याविदो हयम्। चक्रुषुः सैन्यतो वार्द्धेरिन्द्रवाहमिवामराः ॥ ५९७ ॥
भूपाय दर्शयामासुर्दर्शनीयममुं हयम्। ते पूर्णलक्षणं भानुरथाकृष्टमिवाष्टमम् ॥ ५९८ ॥
किञ्च विज्ञपयाञ्चक्रुस्ते महीशक्रमक्रमात्। वाहोऽयं यस्य राज्ये स्यान्न स जेयः परैरिति ॥ ५९९ ॥
तदसौ वसुधाहार!, सुधाहारहयोपमः। रक्षणीयः प्रयत्नेन, सम्पूर्णाष्टाङ्गलक्षणः ॥ ६०० ॥
इत्याकर्ण्य गिरं तेषां, सविशेषां मुदं वहन्। किञ्चिद् विचिन्तयामास, हयन्यासकृते नृपः ॥ ६०१ ॥
अथ दध्यौ नृपो योग्यं, जिनदासं वणिग्वरम्। भाति यद्यशसः शैलनाथः प्राथमकल्पिकः ॥ ६०२ ॥
असावगर्ह्यगार्हस्थ्यव्रतमाणिक्यवारिधिः। धर्मैकध्यानधन्यस्य, तस्य न्यासाय कल्पते ॥ ६०३ ॥
इत्यालोच्य तमाकार्य, कार्या-ऽकार्यविवेककृत्। तं न्याससमर्पयामास, मेदिनीवासवो हयम् ॥ ६०४ ॥
अर्पितः स नरेन्द्रेण, समुद्रेणेव चन्द्रमाः। जगृहे जिनदासेन, नभसेव महीयसा ॥ ६०५ ॥
जिनदासोऽद्भुततमं, तमङ्गीकृत्य वाजिनम्। निशान्तमाप तेजस्वी, निशान्तमिव भास्करः ॥ ६०६ ॥
तच्चारुचतुरङ्गाय, तुरङ्गाय व्यधाद् वणिग्। इन्दिरामन्दिरायास्मै, मन्दुरां मन्दिरान्तरे ॥ ६०७ ॥
श्वेतस्यास्य हयस्याधः, क्षिप्ता कोमलवालुका। प्राप्ता दीप्तिजितेवासौ, सेवार्थं चन्द्रगोलिका ॥ ६०८ ॥
समग्रभुवनव्यापिश्रीवशीकारकारणम्। श्रीजिनं वाजिनं वाऽयमेकं ध्यायति धीरधीः ॥ ६०९ ॥

---

१ बुद्धिसि° पाता० ॥ २ °मिमां ज्ञा° खंता० पाता० ॥ ३ °तसम्मदः। उत्पथ° खंता० ॥
४ °थात् कृ° खंता० पाता० ॥

यथा यथा हयो वृद्धिं, स प्रयाति तथा तथा । खुरैर्नृपविपद्वल्लिमूलानि खनति ध्रुवम् ॥ ६१० ॥
सह स्वराज्यसम्पत्त्या, विपक्षविपदा समम् । सर्वाङ्गाणि तुरङ्गोऽयं, तुङ्गच्छविरवीवृधत् ॥ ६११ ॥
निनाय नीरपानाय, हयनायकमन्वहम् । स श्रेष्ठी स्वयमारुह्य, रक्षादक्षः सरोवरे ॥ ६१२ ॥
वलमानोऽन्तरा तीर्थनाथं वाहस्थितस्ततः । त्रिः स प्रदक्षिणीकृत्य, नत्वाऽभ्येति निकेतनम् ॥ ६१३ ॥
निजावास-जिनावास-जलावासपथत्रयम् । मुक्त्वा हयो न जानाति, मार्गमन्यं पुरान्तरे ॥ ६१४ ॥
अथारिपृथिवीनाथश्चेतस्येतदचिन्तयन् । कुतोऽस्य वर्धते राज्यमस्माकं क्षीयते पुनः ? ॥ ६१५ ॥
अथाकथ्यत सर्वेषां, तेषां गूढचरैश्चरैः । वाहरत्नस्य माहात्म्यं, तस्य तेजोमयाकृतेः ॥ ६१६ ॥
भूनाथस्याथ कस्यापि, मन्त्री प्राह ससाहसः । तं वाहमहमानेष्ये, नचिराच्चौर्यचर्यया ॥ ६१७ ॥
इति प्रतिज्ञां स प्राज्ञंमन्यः कृत्वा नृपाज्ञया । श्रावकारम्भदम्भेन, प्रचचाल घनैर्घनैः ॥ ६१८ ॥
**श्रीवसन्तपुरे** तत्र, गत्वा श्रावकतत्त्ववित् । वक्रेच्छो रचयाञ्चक्रे, स चैत्यपरिपाटिकाम् ॥ ६१९ ॥
स श्रद्धावानिव श्राद्धसद्मसु च्छद्मसुस्थितः । जिनार्चाभ्यर्चनं कुर्वन्, **जिनदास**गृहं गतः ॥ ६२० ॥
तन्वानस्तीर्थनाथस्य, पूजामथ यथाविधि । स्वावासे **जिनदासेन**, सानन्देनाभिनन्दितः ॥ ६२१ ॥
अथ भक्तिपथन्यस्तमनाः सम्मानतो मतः । तं साधर्मिकवात्सल्याज्जिनदासोऽवदन्मुदा ॥ ६२२ ॥
अथानवद्यजैनेन्द्रधर्मसम्बन्धबान्धव ! । भोजनेन विधेहि त्वं, मम धाम्नि पवित्रताम् ॥ ६२३ ॥
विनते **जिनदासे**ऽस्मिंन्नतिभक्त्या वदत्यपि । अनिच्छन्निव तस्थौ स, कार्यं पूर्णमिति स्मरन् ॥ ६२४ ॥
अथासौ गाढमभ्यर्थ्य, भोजितो भक्तिपूर्वकम् । स्वावासे **जिनदासेन**, निशायामपि वासितः ॥ ६२५ ॥
केनापि सुहृदा श्रेष्ठी, **जिनदासो**ऽप्यनीयत । महोत्सवजुषा सौधे, निजे स्वापयितुं निशाम् ॥ ६२६ ॥
असावथ निशीथिन्यामुत्थितः कूटधार्मिकः । आशु तं वाहमारुह्य, निःससार त्वरातुरः ॥ ६२७ ॥
सोऽन्यतः प्रेर्यमाणोऽपि, जगाम सरसीं हयः । पीत्वाऽम्बु वलितः प्रासो, यत्राऽऽस्ते जिनमन्दिरम् ॥ ६२८ ॥
प्रदक्षिणात्रयं तत्र, दत्त्वा पुनरगाद् गृहम् । अत्यर्थं नुद्यमानोऽपि, स वाजी नान्यतो ययौ ॥ ६२९ ॥
ततो विभातशेषायां, विभावर्यां भयैकभूः । मुक्त्वा वाहवरं धूर्तश्चपलः स पलायितः ॥ ६३० ॥
अथाखिलनिशावाहखिन्नो वाहशिरोमणिः । विवेश मन्दुरामिन्दुः, प्रत्यग्गिरिगुहामिव ॥ ६३१ ॥
अथ प्रातः समायातः, स मायातरुपावकः । **जिनदासो** निजं धाम, धामनाथ इवाम्बरम् ॥ ६३२ ॥
अथ पृष्टो निशावृत्तं, वृत्तान्तं वाजिनो जनैः । तद्भीतो मन्दुरां गत्वा, श्रेष्ठी हृष्टोऽश्ववीक्षणात् ॥ ६३३ ॥
वाजिनं तमगन्तारमगं तारमयं यथा । सोल्लासमर्चयामास, **जिनदासः** प्रमोदवान् ॥ ६३४ ॥
रत्नत्रयत्रिमार्गीं तद्, भवाहकप्रेरितोऽस्त्यजन् । अहं पूज्यो भविष्यामि, महतां स हयो यथा ॥ ६३५ ॥
**कनकश्री**रथ प्राह, स्वामिन्नित्यातुरः स्फुरन् । **पुण्यहीन** इव प्रौढपुण्योऽपि परितप्यसे ॥ ६३६ ॥

## पुण्यहीनाख्यानकम्

हंसाभवैजयन्तीभिर्भ्राजयन्ती नभोनदीम् । जयन्ती स्वःपुरीमस्ति, जयन्तीति पुरी स्मृता ॥ ६३७ ॥

---

१ °दत्तरे° खंता० पाता० ॥ २ °तो नतः खता० पाता० ॥ ३ °स्मिन्निति खंता० पाता० ॥
४ °मार्गात् त° पाता० ॥ ५ °तुरं स्फु° पाता० ॥ ६ °री श्रुता खंता० पाता० ॥

धनदत्तोत्सवस्तत्र, धनदत्तो महावणिक् । आसीद् वसुमतीसाहचर्यवर्यगृहस्थितिः ॥ ६३८ ॥
एकदा बिभरामास, गर्भे वसुमती सुतम् । दोषाकरं तं प्राचीव, सवितुर्व्ययकारकम् ॥ ६३९ ॥
जातमात्रे पुनस्तत्र, प्रदोषे तमसां पदे । गृहस्य गगनस्येव, क्षीणो भास्वद्वसुव्रजः ॥ ६४० ॥
जातेऽष्टवर्षमात्रेऽस्मिन्, माता मृत्युमवाप सा ।
पुण्यहीन इति ख्यातिं, तल्लोके गतवानयम् ॥ ६४१ ॥
तदन्यसद्मसु स्वैरं, कर्म निर्माय जीवति । मत्वेति स गृहे निन्ये, मातुलेनातुलेच्छया ॥ ६४२ ॥
मातुलस्य गृहं तस्मिन्, गते कतिपयैर्दिनैः । मुष्टं चौरैर्निशाखातभित्तिकृष्टधनोच्चयैः ॥ ६४३ ॥
अथ तं प्रथते लोको, निर्भाग्यैकशिरोमणिम् । तन्निर्वेदनिधिः सोऽपि, ययौ देशान्तरं प्रति ॥ ६४४ ॥
असौ पुरि तमालिन्यां, मालिन्याङ्गीकृतस्ततः । सिषेवे वणिजां नाथं, विनयी विनयन्धरम् ॥ ६४५ ॥
गतेऽस्मिन् दिवसैः कैश्चित्, शिखिदग्धालयो वणिक् ।
स जनैः पुण्यवान् मेने, जीवन्निःसृतमानुषः ॥ ६४६ ॥
तत् खिन्नः पुण्यहीनोऽयं, बोहित्थमधिरूढवान् । धनावहेन वणिजा, मणिजालजुषा समम् ॥ ६४७ ॥
प्रवीर इव बोहित्थः, प्रत्यर्थिपृतना इव । वीचीर्विदारयन्नब्धेः, परं पारं स यातवान् ॥ ६४८ ॥
अथोपार्ज्य धनं भूरि, वलितोऽसौ धनावहः । सहैव पुण्यहीनेन, धनोपार्जनशालिना ॥ ६४९ ॥
अमज्जत् तज्जले सिन्धोरन्तः प्रवहणं ततः । तत्रापि फलकं प्राप्य, पुण्यहीनस्तु निर्ययौ ॥ ६५० ॥
पुण्यहीनोऽम्बुधिं तीर्त्वा, संसारं शमवानिव । अवापदटवीं काञ्चित्, कस्तूरीपत्रवद् भुवः ॥ ६५१ ॥
अथो चरन्नरण्यान्तः, स ददर्श मुदाऽऽस्पदम् । विस्मितो वेश्म यक्षस्य, वनीधम्मिल्लसन्निभम् ॥ ६५२ ॥
स तमाराधयामास, यक्षमक्षोभमानसः । आत्माहृतैर्जलैः पुष्पैः, फलैश्चाद्भुतभक्तिभाक् ॥ ६५३ ॥
अथ तुष्टोऽवदद् यक्षः, पुण्यहीनं प्रति द्रुतम् । मम हेममयः केकी, पुरो नर्तितुमेष्यति ॥ ६५४ ॥
पिच्छं गच्छन्नसावेकं, केकी यन्मुञ्चति स्वयम् । ग्राह्यं तद् भवता नित्यं, चामीकरमयं स्यात् ॥ ६५५ ॥
यक्षस्येति वचः श्रुत्वा, प्रीतस्तत्र स तस्थिवान् । प्रनृत्य गच्छतो हैमं, पिच्छं गृह्णाति केकिनः ॥ ६५६ ॥
एकदा तेन मूर्खेण, गच्छन् हैमः शिखी धृतः । एककालमशेषाणि, पिच्छान्यादातुमिच्छता ॥ ६५७ ॥
तत्पाणिस्पर्शमात्रेण, केकी काकीबभूव सः । पिच्छान्यग्रे गृहीतानि, काकपिच्छानि चाभवन् ॥ ६५८ ॥
आत्मानमथ निर्भाग्यमन्वशोचदसौ तदा । तुल्यकालं ददद् दृग्भ्यां, जलं लक्ष्म्यै सुखाय च ॥ ६५९ ॥
ततः स इव मूर्खत्वं, वृथा त्वमपि मा कृथाः । आश्रमादिक्रमज्ञोऽपि, किमज्ञ इव वर्तसे ? ॥ ६६० ॥
तारुण्येऽपि व्रतग्राही, कदाऽपि विकृताशयः । पूर्वोपार्जितपुण्यानामपि नाशाय जायसे ॥ ६६१ ॥
अथावादि सुधावादि, वचस्तां प्रति जम्बुना । न भवामि मनस्तापैकमठः कमठो यथा ॥ ६६२ ॥

## कूर्माख्यानकम्

भूधरो विन्ध्यनामाऽस्ति, यत्र स्पर्धात् परस्परम् । वियदुर्वीजुषः कुर्युर्गर्जि पर्जन्यदन्तिनः ॥ ६६३ ॥
अभूत् कादम्बिनी तस्य, कामिनीवाटवी तटे । गम्भीरोऽस्यां बभौ नाभीरूपः कूपश्च कश्चन ॥ ६६४ ॥

---

१ यत्र कुञ्जरगर्जया । प्रावृषीव सदाऽम्भोदभ्रान्त्या नृत्यन्ति केकिनः ॥ ६६३ ॥ पाता० ॥

भूरिशेवालजालेन, तत्र च्छन्नमुखाम्भसि । कूपेऽन्तः कोटिशोऽभूवन्, जीवाः क्षीबा जलोद्भवाः ॥ ६६५ ॥
कदाचिद् वातसञ्जातशैवलच्छिद्रवर्त्मना । कूर्मः कूपगतः कश्चिदिन्दुं शारदमैक्षत ॥ ६६६ ॥
स्वकीयजन्मसाफल्यश्रियो मुखमिवामलम् । विलोक्य कूर्मस्तं पर्वशर्वरीशममोदत ॥ ६६७ ॥
आलोकयतु मे लोकः, सर्वस्तदिदमद्भुतम् । इति वात्सल्यतोऽगच्छत्, कच्छपः पयसस्तलम् ॥ ६६८ ॥
कूर्मः समानयद् यावत्, कुलं तद्दर्शनाकुलम् । तावत् तच्छिद्रमाच्छादि, पुनः सेवालजालकैः ॥ ६६९ ॥
भ्रामं भ्रामं जले चक्षुश्चिक्षेपोर्द्ध्वं स कच्छपः । शेवालजटिले तत्र, न तु पूर्णेन्दुमैक्षत ॥ ६७० ॥
तदेनं प्राप्य सूरीन्दुं, कूर्मवन्न त्यजाम्यहम् । कुतोऽस्य दर्शनं भूयो, मोहच्छन्ने भवावटे? ॥ ६७१ ॥
अथो कनकवत्याह, जितवाक्पतिमर्तिं पतिम् । प्रति प्रतिकृतिर्मा भूस्त्वं मासाहसपक्षिणः[1] ॥ ६७२ ॥

## मासाहसपक्षिण आख्यानकम्

अटवी विद्यते काऽपि, व्योमव्यापिमहीधरा । शिबिरस्थितिवन्मृत्योः[2], क्रूरसत्त्वौघभीषणा ॥ ६७३ ॥
इन्धनार्थमथान्येद्युः, समं सार्थेन केनचित् । अटव्यां कोऽप्यगात् तस्यां, प्रान्ते कस्यापि भूभृतः ॥ ६७४ ॥
सुप्तं मृगेन्द्रमद्राक्षीत्, स तत्रोत्कटदंष्ट्रकम् । आसन्नभग्नविलग्नेन्दुकलं कालमिवाङ्गिनम् ॥ ६७५ ॥
कृतान्तस्येव सिंहस्य, मुखे तस्य विदारिते । दन्ताग्रलग्नमांसांशलोभात् कोऽप्यविशत् खगः ॥ ६७६ ॥
मा साहसमिदं कार्षीर्ब्रुवन्निति मुहुर्मुहुः । मासाहसमिति[3] ख्यातिं, तत् प्राप स विहङ्गमः ॥ ६७७ ॥
वार्यमाणोऽपि तेनायं, पुरुषेण पुनः पुनः । मांसलोभाभिभूतत्वात्, तत्याज नहि साहसम् ॥ ६७८ ॥
सिंहेनाथ प्रबुद्धेन, प्रविशन् स मुखान्तरे । उच्चैश्चपेटापातेन, हतो हस्तिविघातिना ॥ ६७९ ॥
भार्याभिर्वार्यमाणोऽपि, स इव त्वमपि स्फुटम् । पश्चात्तापास्पदं भावी, तदिदं मा कृथा वृथा ॥ ६८० ॥
अथ जम्बूर्वचः प्राह, शुचि प्राहतकल्मषम् । अशर्मभाजनं सोमशर्मेव न भवाम्यहम् ॥ ६८१ ॥

## सहजमित्रादिमित्रत्रितयसङ्गतं सोमशर्माख्यानकम्

पत्तनं पाटलीपुत्रमित्यस्ति क्षितिमण्डनम् । शौर्यवज्रायुधस्तत्र, राजा वज्रायुधोऽभवत् ॥ ६८२ ॥
आसीत् पुरोहितस्तस्य, राज्यव्यापारभारभृत् । प्रख्यातः सोमशर्मेति, शर्मश्रीकेलिमन्दिरम् ॥ ६८३ ॥
एकः सखा सुखाधारः, सहमित्राभिधोऽन्वहम् । बद्धः प्रेमगुणेनेव, तेन सञ्चरते सह ॥ ६८४ ॥
पर्वण्येव सखाऽभ्येति, पर्वमित्राभिधोऽपरः । तं प्रति श्रीनिधिं प्रातः, सरोजमिव षट्पदः ॥ ६८५ ॥
प्रणाममित्रनामाऽन्यः, सखा तेन कदाचन । आपतन् प्रतिपच्चन्द्र, इवाग्रे नम्यते ततः ॥ ६८६ ॥
अन्वहं सहितस्तेन, सहमित्रेण स स्फुरन् । पुर्याः पुरोहितस्तस्याश्चक्षुःश्रियमशिश्रियत् ॥ ६८७ ॥
कथञ्चित् कुपितं भूपं, सम्यग् विज्ञाय सोऽन्यदा । सदनं सहमित्रस्य, ययौ निशि पुरोहितः ॥ ६८८ ॥
तदनुद्घाटितद्वारं, बहिः स्थित्वा कृतारवः । स भृङ्ग इव तन्मित्रसद्म पद्ममिवाशुचत् ॥ ६८९ ॥

---

[1] °ह, मत्वा हसितवाक्पतिम् । पतिं प्रति कृतिन् ! मा भूस्त्वं मासाहसपक्षिवत् ॥ ६७२ ॥ इतिरूपः पाठः खंता० पाता० ॥ [2] गर्जद्वनगजध्वाननृत्यत्केकिकुटुम्बका ॥ इति पाता० पाठः ॥
[3] °स- इति खता० पाता० ॥

पुरोधाः पर्वमित्रस्य, ततो धाम जगाम सः । विकस्वरमुखं शैलनिकुञ्जमिव कुञ्जरः ॥ ६९० ॥
अभ्युत्थानमथाऽऽधत्त, तस्यायं सम्मदी सुहृत् । आयातायात मद्गेहमद्य पूतमिति ब्रुवन् ॥ ६९१ ॥
पुरोहितोऽथ पर्यङ्के, तन्निर्दिष्टे निविष्टवान् । पुरःस्थं तं प्रति प्राह, मौढ्यप्रीतिधुरन्धरः ॥ ६९२ ॥
क्रुद्धः कृतान्तरूपोऽयं, भूपो मां प्रति सम्प्रति । यदि नश्यामि नेदानीं, तन्मां निर्दलयत्ययम् ॥ ६९३ ॥
तदशेषं विहाय त्वं, सहायत्वं मम व्रज । गमिष्यामि विदेशेऽपि, प्राणत्राणपरोऽधुना ॥ ६९४ ॥
निशम्येदं तदा पर्वमित्रेणोक्तं त्रुटन्मुदा । यदि ते मम देहेन, गेहेन विभवेन च ॥ ६९५ ॥
भवेदत्र परित्राणं, ददामि तदिदं मुदा । परं राजविरुद्धेऽर्थे, किं कुर्वेऽहं कुटुम्बवान् ? ॥ ६९६ ॥
॥ युग्मम् ॥

ततः सत्यतया मित्रं, यदि त्वमसि तत् प्रभो ! । कथमप्यन्यथाकारमितो देशान्तरं कुरु ॥ ६९७ ॥
अन्यथा मद्गृहे स्वामिन् !, यदि त्वामागतं नृपः । प्रातर्ज्ञास्यति तद् यन्त्रे, मत्कुलं पीलयिष्यति ॥ ६९८ ॥
इत्युक्ते तेन तद् गच्छन्, नरेश्वरपुरोहितः । अन्ववर्ति स्वयं किञ्चिद्, दाक्षिण्यादा गृहाङ्गणम् ॥ ६९९ ॥
तद्गृहान्निःसृतो गच्छन्नचिन्तयदयं स्वयम् । अहो ! मे मन्दभाग्यस्य, न किञ्चित् त्राणकारणम् ॥ ७०० ॥
तावेवैतौ स एवाहं, जातौ किमधुनेदृशौ ? । आः ! ज्ञातमथवा नास्ति, प्रसादो जगतीभुजः ॥ ७०१ ॥
न मे कुत्रापि कोऽप्यस्ति, किमभ्रात् पतितोऽस्म्यहम् ? ।
आसीन्मम ययोरास्था, तयोश्चर्येयमीदृशी ॥ ७०२ ॥
अहो ! मे निर्विवेकत्वं, यन्नीतौ मित्रतामिमौ । यौ मयि क्षीणदाक्षिण्यावित्थं दुर्व्यसनातुरे ॥ ७०३ ॥
तृतीयस्यापि पश्यामि, सुहृदः सौहृदक्रमम् । पश्चान्नहि मनो येन, क्षिणोति तदवीक्षणम् ॥ ७०४ ॥
इति निश्चित्य चित्तेन, तदगारमगादसौ । सचक्रशक्रः सच्चक्रे, सोऽप्यमुं गृहमागतम् ॥ ७०५ ॥
अब्रवीच्च कथं दुःस्था, तवावस्थेयमीदृशी ? । मन्दमन्दमिदानीं च, किमागमनकारणम् ? ॥ ७०६ ॥
अथास्य कथयामास, विप्रो वृत्तान्तमात्मनः । मित्रद्वयविमुक्तस्य, परित्राणार्थितां च ताम् ॥ ७०७ ॥
परं पुरा मया किञ्चिन्न तवोपकृतं तथा । इत्यात्मनश्च न्यूनत्वं, मन्दागमनकारणम् ॥ ७०८ ॥
सोऽप्यवोचत मित्राहं, समीहे नहि किञ्चन । सद्भूतभक्तिग्राह्योऽस्मि, तत्राभून्न्यूनता न ते ॥ ७०९ ॥
तद्भद्र ! मास्म कार्षीस्त्वं, शङ्कातङ्कातुरं मनः । परित्रातरि मित्रेऽस्मिन्, कुतस्त्यं भूभुजो भयम् ? ॥ ७१० ॥
इत्थं वाक्सुधया दत्त्वा, स्वस्ति सौवस्तिकं प्रति । स गुणी प्रगुणीचक्रे, रथं जवनवाजिनम् ॥ ७११ ॥
दोःस्तम्भे बिभ्रता तेन, मित्रेणासदृशं बलम् । शम्बलं च रथे तस्मिन्नारोप्यत पुरोहितः ॥ ७१२ ॥
राज्यान्तरमथो नीत्वा, समुपस्थाय पार्थिवम् । तेनासौ लम्भितः कीर्त्तेरास्पदं सुखसम्पदाम्[3] ॥ ७१३ ॥
त्रयाणामपि मित्राणां, स स्वभावं विभावयन् । प्रणाममित्रमद्राक्षीत्, प्राणेभ्योऽप्यतिवल्लभम् ॥ ७१४ ॥
दृष्टान्तोपनयश्चायं, योऽत्र भूपः प्रकीर्तितः । स कर्मपरिणामोऽस्य, सोऽयं जीवः पुरोहितः ॥ ७१५ ॥
सहजं मित्रमेतस्य, शरीरं परिभाव्यताम् । तत् कर्मनृपतेः कोपे, जीवेन सह न व्रजेत् ॥ ७१६ ॥
ज्ञातिप्रभृतयः सर्वे, पर्वमित्रस्य सन्निभाः । श्मशानस्थानपर्यन्तमनुयान्तीह देहिनम् ॥ ७१७ ॥
प्रणाममित्रतुल्यस्तु, धर्मोऽयमवगम्यताम् । जन्मान्तरेऽपि यो जीवं, गच्छन्तमनुगच्छति ॥ ७१८ ॥
जीवस्य यः परत्रापि, श्रियं यच्छति वाञ्छिताम् । ज्ञाति-देहौ विहायाहं, तत् तमाराद्धुमुद्यतः ॥ ७१९ ॥

---

१ भूपः सम्प्रति मां प्रति खंता० ॥ २ प्रतिज्ञास्यति खंता० ॥ ३ °स्पदः खंता० ॥

अथ मन्मथवीरस्य, मूर्तयेव जयश्रिया । जयश्रिया प्रभुः प्रोचे, शौचेनाञ्चितमानसः ॥ ७२० ॥
इत्थं मोहयतो नाथ !, नागश्रीवत् तवाकृतैः । नागः श्रीमन् ! किमत्युग्रं, मानसं साधु बाधते ? ॥ ७२१ ॥

**नागश्र्याख्यानकम्**

नगरे नगरे कारंकारप्राकारचारुणि । रमणीयाभिधे राजा, जज्ञे किल कथाप्रियः ॥ ७२२ ॥
अचीकथत् कथाः पौरान्, वारंवारेण सोऽन्वहम् ।
स च कस्यचिदन्येद्युर्वारकोऽभूद् द्विजन्मनः ॥ ७२३ ॥
दुष्कर्मजन्मनां मौर्ख्य-दारिद्य-व्यसना-ऽऽपदाम् । क्रमागत इवाऽऽवासः, स द्विजोऽचिन्तयत् तदा ॥७२४॥
रसना रसनायैव, मम धिग् ! वेधसा कृता । आयसीव कुशी स्तब्धा, स्वनामग्रहणेऽपि या ॥ ७२५ ॥
ब्रुवे यदि न जानेऽहमिति तद् दुष्टभूपतिः । प्रवेशयति कारायां, दुर्ग्राहग्रहिलो हि माम् ॥ ७२६ ॥
चिन्ताहेतुं दुहित्रा स, कुमार्या भाषितोऽब्रवीत् ।
साऽप्यूचे तात ! मा कार्षीश्चिन्तासन्तापितं मनः ॥ ७२७ ॥
वारे तव मया तात !, कथनीया कथानिका । इत्युक्त्वा सा शुचिर्वेषं, वासोभिर्विशदैर्व्यधात् ॥ ७२८ ॥
गत्वा नृपान्तिकं दत्त्वा, जयेत्याशिषमाह सा । कथां शृणु यदि श्रीमन् !, कथाकौतुहली भवान् ॥ ७२९ ॥
दक्षो निःक्षोभतां वीक्ष्य, तादृक्षां क्षितिवल्लभः । मेने तद्वचनस्यैव, कथातः कौतुकं महत् ॥ ७३० ॥
साऽप्याचख्यौ पुरेऽत्रैव, नागशर्माऽस्ति माणवः ।
सोमश्रियामभूत् पत्न्यां, नागश्रीस्तस्य नन्दनी ॥ ७३१ ॥
कस्मैचिद् द्विजचट्टाय, दत्त्वा तां पितरौ स्वयम् । कार्येणौद्वाहिकेनैव, जग्मतुर्नगरान्तरम् ॥ ७३२ ॥
एकाकिन्यां गृहे तस्यां, स चट्टः सायमागमत् । तया श्रियोऽनुसारेण, चक्रे भोज्यादिरौचिती ॥ ७३३ ॥
सतूलीकं च पल्यङ्कं, निजालयमहाधनम् । शयनायार्पयित्वाऽस्मै, चिन्तयामासुषीति सा ॥ ७३४ ॥
महीमहीनामहिभिर्जनेऽस्ति च न मञ्चकः । शयनं तत् क्व मे भूमौ, वर्यं पर्यङ्कवर्जितम् ? ॥ ७३५ ॥
शये पर्यङ्कपर्यन्तेऽत्रैव तावन्निशामिमाम् । कोऽपि नो पश्यति ध्वान्तैर्यदन्धङ्करणौषधैः ॥ ७३६ ॥
इति सुष्वाप सा तत्र, निर्विकारैव बालिका । तदङ्गसङ्गे शृङ्गारसङ्कटे स द्विजोऽपतत् ॥ ७३७ ॥
लज्जा-क्षोभादिसंरुद्धमनःशूलाकुलीकृतैः । प्राणैः स तत्यजे चट्टो, वचनीयभयादिव ॥ ७३८ ॥
अचिन्तयत् ततः साऽपि, पापिन्या धिगसौ मम । एकत्र स्वापपापद्रुरिहापि सफलोऽभवत् ॥ ७३९ ॥
विभावरी विभात्येषा, यावत् तावदमुं द्विजम् । निक्षिपामि क्षितेरन्तर्यथा जानाति कोऽपि न ॥ ७४० ॥
इत्यसौ खण्डशोऽकार्षीत्, तूर्णं तस्य कलेवरम् । न्यधान्निधानवद् गर्ते, खनित्वा च स्वयं रयात् ॥ ७४१ ॥
गर्तं ततस्तमापूर्य, लिप्त्वाऽसौ गोमयद्रवैः । पुष्पैर्गन्धैश्च धूपैश्च, वासयामास तां रसां ॥ ७४२ ॥
पितरौ चागतौ तस्या, गृहीत्वौद्वाहिकं विधिम् । अतीतस्तु कथाकालः, श्रीमन्नुत्सूरतोऽमुना ॥ ७४३ ॥
कथं द्रक्ष्याम्यहं तामित्युक्ते राज्ञा जगाद सा । स्वामिन्नहं सा संसारनाटिकानटने नटी ॥ ७४४ ॥
'कुमारि ! तदिदं सत्यं, यदत्र कथितं त्वया ?' । पृष्टेति सा पुनर्वाचमुवाच नृपतिं प्रति ॥ ७४५ ॥

---

१ °रकरिप्रा° खंता० ॥ २ शुचिं वेषं, खंता० ॥ ३ °मासिवानिति खंता० पाता० ॥

याः कथास्त्वं पुराऽश्रौषीस्तथ्यास्ता भूपते ! यथा । तथेयमपि तथ्याऽस्तु, चित्रहेतुविशेषतः ॥ ७४६ ॥
एवं विप्लावितः क्ष्मापस्तया नागश्रिया यथा । तथा त्वमपि किं नाथ !, विप्लावयसि कल्पितैः ? ॥ ७४७ ॥
कल्याणसलिलाधारकम्बुना जम्बुना ततः । समगद्यत सद्यस्कहारहूरानिभं वचः ॥ ७४८ ॥
सन्तु दन्तुरितानन्दाः, कथास्तन्वि ! तथाविधाः । असावस्तु विचारस्तु, प्रमाणं यस्त्वया कृतः ॥ ७४९ ॥

## ललिताङ्गाख्यानकम्

तथाहि गाहितस्वर्गनगरीवैभवं भुवि । पुरं कन्दर्पकोशाख्यमस्ति कन्दर्पदर्पभूः ॥ ७५० ॥
धराधौरेयतां भेजे, राजा तत्र शतायुधः । पञ्चेषुं तृणवन्मेने, यं विलोक्य त्रिलोक्यपि ॥ ७५१ ॥
सुवर्णभूमिभृद्वंश्यजातमात्रगिरिस्तनी । तस्य लीलावती नाम, बभूव प्राणवल्लभा ॥ ७५२ ॥
शृङ्गारभारं निर्माय, सा कदाचन कामिनी । तस्थौ गवाक्षमारुह्य, मुग्धजननिरीक्षिता ॥ ७५३ ॥
तन्मुखेन्दुस्तदा चन्द्रजयश्रीनाटिकानटः । बभौ मौक्तिकताडङ्कपारिपार्श्वकपेशलः ॥ ७५४ ॥
लावण्यामृतसिक्तेऽस्याः, सिन्दूरतिलकं मुखे । त्रिनेत्रदग्धकामद्रुनवकन्दलवद् बभौ ॥ ७५५ ॥
तन्मुखावासिनः कामभूपतेश्चामरायितम् । भेजेऽलकैर्मृदुमरुल्लोलैर्भ्रूच्छत्रपार्श्वयोः ॥ ७५६ ॥
चिक्रीड नासिकाशाखिभ्रूशाखाप्रेङ्खणाद्भुते । तस्या नेत्रद्वयीरश्मिदोलाबन्धे मनोभुवः ॥ ७५७ ॥
अदर्शि तरुणैस्तस्या, रदपङ्क्ते रुचिः शुचिः । मनोरथस्फुरत्पुष्पायुधचापोत्थबाणवत् ॥ ७५८ ॥
वैकक्षमाल्यचापस्य, पुष्पेषोरिषुधिश्रियम् । तस्याः शिश्राय धम्मिल्लः, पुष्पपूरेण पूरितः ॥ ७५९ ॥
इत्यसौ नित्यसौभाग्यभङ्गीभाग्यनिकेतनम् । श्लिष्टा स्मरपिशाचेन, सर्वाङ्गमुदयन्मुदा ॥ ७६० ॥
शम्भुक्षोभादिव दिवः, समुत्तीर्णं मनोभवम् । साऽपश्यल्ललिताङ्गाख्यं, नरं तुरगगामिनम् ॥ ७६१ ॥
शिरःपरिसरप्रेङ्खन्मायूरातपवारणम् । हरिणाक्षीमनोरत्नहरणैकमलिम्लुचम् ॥ ७६२ ॥
किञ्च श्रीचन्दनस्यन्दजनिताङ्गविलेपनम् । स्मरं रचितसन्नाहमिव लोकत्रयीजये ॥ ७६३ ॥
मानिनीमानभङ्गाय, शुभ्रचीरापदेशतः । पर्वगर्वितशीतांशुस्फीतांशुपरिवारितम् ॥ ७६४ ॥
स्कन्धदेशसमारूढप्रौढधम्मिल्लकैतवात् । मूर्तशृङ्गारभारस्य, नित्यं वाहीकतां गतम् ॥ ७६५ ॥
॥ पञ्चभिः कुलकम् ॥

दत्तदृष्टिमथैतस्मिन्, स्वस्य द्वैराज्यकारिणि । पञ्चेषुः पञ्चभिर्बाणैस्तां जघान घनस्तनीम् ॥ ७६६ ॥
तामसौ कामसौन्दर्यजयशाली व्यलोकयत् । ललिताङ्गोऽपि तत्कालं, कौतुकोत्तानलोचनः ॥ ७६७ ॥
कामस्य तां वशीकारमन्त्रसिद्धिमिवाङ्गिनीम् । वीक्ष्योन्मुखः कृतस्तम्भ, इति चिन्तितवानयम् ॥ ७६८ ॥
मुखे वसति मन्येऽस्याः, स्वयं मदनभूपतिः । अन्यथा कथमत्रैव, स्फुरत्यविरतं रतिः ॥ ७६९ ॥
विष-पीयूषयोरेषा, किमुपादानकारणम् ? । अस्याः कटाक्षा येनैते, सम्मोह-सुखयोः क्षमाः ॥ ७७० ॥
अस्याः काममभूत् कामः, स्वयं वेधा मृगीदृशः । क्व पुराणमुनिस्त्वेतन्निर्मातुं रूपमीश्वरः ? ॥ ७७१ ॥
शिरो विधुन्वन् कामेषूनितस्तत इव क्षिपन् । विचिन्त्येत्यचलद् गेहं, प्रति स श्रेष्ठिनन्दनः ॥ ७७२ ॥
तस्मिन् दृष्टिपथातीते, सा महीपतिवल्लभा । अभूत् कामग्रहग्रस्ता, योगिनीवैकमानसा ॥ ७७३ ॥

---

१ 'हेतुर्विशे' खंता० ॥ २ वाहेक' खंता० ॥ ३ कुतुकोत्ताललोचनः खंता० पाता० ॥

प्रीतिर्न गीते नानन्दश्चन्दने न धृतिर्विधौ । आत्मनेव विना तेन, जज्ञे तस्यास्तनोरिव ॥ ७७४ ॥
ज्ञात्वा विकारमाकार-चेष्टिताभ्यामथ स्वयम् । यथार्थनामा तामाह, चेटी चतुरिकाह्वया ॥ ७७५ ॥
सत्यं स्वामिनि! किं नाम, तं युवानं समीहसे ? । युक्तं वा यन्मृणालिन्या, रविरेव प्रियङ्करः ॥ ७७६ ॥
अथ लीलावती प्राह, स्मरदाहातुराक्षरम् । हञ्जे! चतुरिकैवासि, यदिदं कौशलं तव ॥ ७७७ ॥
वशीकृतावलालोकं, पुष्पपेशलया दृशा । कथञ्चित् तं स्मराकारं, प्रीतये मर्म मेलय ॥ ७७८ ॥
ज्ञात्वा कुतोऽपि तं साऽपि, समुद्रप्रियनन्दनम् । ललिताङ्गमुपेत्यैवं, व्याजहार चटूक्तिभिः ॥ ७७९ ॥
त्वया लीलावतीदेव्याश्चौर! जह्रे मनः किल । गताश्रयस्तु तां हन्ति, हन्त! बाणैर्मनोभवः ॥ ७८० ॥
त्वद्वियोगेऽभवत् तस्याः, प्रावृट्कालस्तथाऽश्रुभिः । प्रयाणोन्मुखतां भेजे, यथा हंसोऽतिबाधितः ॥ ७८१ ॥
अयं वियोगो दावाग्निर्न दीपकलिका पुनः । शान्तिं याति न तन्मुग्ध!, किन्तु हन्तोपचीयते ॥ ७८२ ॥
इत्थं भवद्वियोगोत्थसन्तापोपशमाशया । वीजयन्तीं हसत्येषा, मामहो! कदलीदलैः ॥ ७८३ ॥
॥ युग्मम् ॥

विशिष्टयोगतां यस्यास्त्वद्वियोगः किलाभजत् । भवन्मयमतः सर्वं, सा पश्यत्यवनीतलम् ॥ ७८४ ॥
स्वयं तत् त्वमुपागत्य, तापनिर्वापणं कुरु । युक्तं तु नायशस्तस्या, ग्रहीतुं तव सर्वथा ॥ ७८५ ॥

अथोचे ललिताङ्गोऽपि, सङ्गोपितनिजाशयः ।
अयि! क्वाहं वणिग्मात्रं[१], सा क्व वा राजवल्लभा ? ॥ ७८६ ॥

प्रच्छन्नमपि कर्मैतत्, कर्तुं किमिति शक्यते ? । सुप्तस्यापि हरेर्दंष्ट्रां, को वीक्षितुमपि क्षमः ? ॥ ७८७ ॥

साऽप्यूचे न त्वया सौम्य!, चिन्ताऽर्थेऽस्मिन् विधीयताम् ।
अस्मिन् संयोजनोपाये[२], विधिमूर्तिमवेहि माम् ॥ ७८८ ॥

अथानुमतिमासाद्य, सद्यः सा तस्य दूतिका । विज्ञा विज्ञपयामास, राज्ञीं गत्वा यथातथम् ॥ ७८९ ॥
तद्योगकामा वामाक्षी, यावदस्त्यन्यदा मुदा । पुरे तावदभूत् तत्र, प्रमोदी कौमुदीमहः ॥ ७९० ॥
स्वयं तदा मुदा द्रष्टुं, शरत्कालभवां श्रियम् । आखेटकार्थं भूमीभृदलञ्चके वनावनिम् ॥ ७९१ ॥
तदा च राजवेश्मान्तर्विजनीभूतभूतले । साऽनङ्गप्रतिमाव्याजाल्ललिताङ्गमवीविशत् ॥ ७९२ ॥
सस्वजे सुचिरात् प्राप्य, लीलावत्यथ तं तथा । यथा तेनैकतामाप, चेतनेवात्मना समम् ॥ ७९३ ॥
कथञ्चिच्च विचारैककोविदाः सौविदास्तदा । निश्चितं कश्चिदप्यत्र, प्रविवेशेति तेऽवदन् ॥ ७९४ ॥
समाप्याखेटकं राज्ञे, सम्प्राप्ताय तदाऽथ ते । ऊचुर्निशान्ते कोऽप्यस्तीत्यच्छलादानपूर्वकम् ॥ ७९५ ॥
स्वयं सशब्दं पन्नद्धा, द्वयं हित्वाऽथ भूपतिः (?) । चौरादप्यधिकं मन्दमन्दमन्तःपुरेऽविशत् ॥ ७९६ ॥
तदा चतुरिकाद्वारदत्तदृष्टिर्महीपतिम् । दृष्ट्वाऽऽयान्तं द्रुतं तत्र, लीलावत्यै व्यजिज्ञपत् ॥ ७९७ ॥
स जालकपथेनाथ, लीलावत्या तयाऽपि च । क्षिप्तः पश्चात्प्रदेशस्थाशुचिकूपेऽपतत् कुधीः ॥ ७९८ ॥

दौर्गन्ध्येनान्धलस्तत्र, प्राच्यभुक्तं स्मरन् सुखम् ।
दध्यौ भोक्ष्ये[३] पुनर्भोगान्, निर्यातो नेदृशानहम् ॥ ७९९ ॥

राज्ञी-दास्यौ च कूपेऽस्मिन्, प्रेम्णा चिक्षिपतुः सदा । फेलां तयाऽभवत्[४] तस्य, वृत्तिर्जीवनमात्रिका ॥ ८०० ॥

---

१ °म मील° पाता० ॥ २ °पायवि° पाता० ॥ ३ °क्ष्ये कदा भोगा° वता० ॥
४ तदाऽभ वता० ॥

सोऽथ प्रावृषि कूपोर्द्ध्वगामिभिर्मलवारिभिः । प्रवाह्य बाह्यपरिखां, नीतो वप्रप्रणालकैः ॥ ८०१ ॥
क्षिप्तोऽथ परिखातीरे, लोलकल्लोललीलया । दैवादागतया प्राप्तो, धात्र्या देवतयेव सः ॥ ८०२ ॥
अथ सञ्ज्ञोप्य मूर्च्छान्ते, निजं नीतो निकेतनम् ।
अभ्यङ्ग-स्नान-भोज्याद्यैः, पाल्यमानोऽभवन्नवः ॥ ८०३ ॥
अत्र चोपनयो योऽभूल्ललिताङ्गोऽतिकामुकः । अतृप्तः कामभोगेषु, स संसारी शुचिस्मिते ! ॥८०४॥
आपातमधुरो यस्तु, परिणामे सुदुःसहः । राजस्त्रीभोगतुल्योऽसौ, विषयोत्थः सुखोदयः ॥ ८०५ ॥
तत्कूपकल्पगर्भान्तर्वासिनः फेलिकोपमैः । मातृभुक्तान्न-पानाद्यैर्धिगेतस्य भुजिक्रियाम् ॥ ८०६ ॥
कूपादिव ततो गर्भाद्, वाहितस्याथ वायुतः । सूतिकासदने तस्य, परिखोपमिका स्थितिः ॥ ८०७ ॥
धात्रिकोपमिता चात्र, सर्वोपग्रहकारिणी । सेयं परिणतिः पूर्वकर्मणां परिभाव्यताम् ॥ ८०८ ॥
पुनः पुनर्नवीभूतं, वीक्ष्य राज्ञी स्मरातुरा । अन्तराऽऽकारयेच्चेत्तं, तत् किं तस्यात्र युज्यते ? ॥ ८०९ ॥
अथोचुर्वनिताः सोऽयमल्पबुद्धिरपि प्रभो ! । स्मरन् विष्ठावटोद्भूतदुःखानां तत् करोति किम् ? ॥८१०॥
अथोवाच प्रभुः सोऽपि, कदाचिन्मनुतेऽल्पधीः ।
अहं तु नानुमन्ये वो, वचः संसारकारणम् ॥ ८११ ॥
इति **जम्बूकुमारस्य,** संवेगामृतनिर्झरैः । वचोभिर्विषयाकाङ्क्षातापस्तासां शमं ययौ ॥ ८१२ ॥
अथोऽन्तरङ्गवैराग्यरसार्द्रीभूतचेतसः । अष्टावपि समं **जम्बूकुमार**मिदमभ्यधुः ॥ ८१३ ॥
प्रमुखे सुखदैः[1] स्वामिन् !, परिणामेऽतिदुःखदैः । इयत्कालं हहा ! कष्टं, विषयैर्वञ्चिता वयम् ॥ ८१४ ॥
तत् त्वद्विवाहसम्बन्धादन्[2]धात्तमसमज्जनात् । उद्धृताः स्मस्त्वया यद्वा, श्रेयसे सङ्गतं सताम् ॥ ८१५ ॥
आश्रितस्तत् त्वया पन्थाः, श्रितोऽस्माभिरपि स्वयम् ।
सहैवं[3] नेतर्नेतासि, त्वमस्मान् शिवपत्तनम् ॥ ८१६ ॥
उवाच **प्रभवो**ऽप्युच्चैर्महासत्त्व ! भवद्गुणैः । कृष्टस्त्वामनुयास्यामि, पितॄनापृच्छ्य निश्चितम् ॥ ८१७ ॥
मा प्रमादीर्महाभाग !, विवेकोचितमाचरेः । इत्युक्तो[4] **जम्बुना** यातः, **प्रभवो** भवनं निजम् ॥ ८१८ ॥
ज्ञात्वा **जम्बूकुमारस्य,** सदारस्यापि निश्चयम् । श्वशुराः पितरौ चासँस्तमेवानुयियासवः ॥ ८१९ ॥
अथ **जम्बूकुमारो**ऽपि, विधाय जिनपूजनम् । सङ्घं विधिवदभ्यर्च्य, सम्मान्य स्वजनादिकान् ॥ ८२० ॥
स्नानीयगन्धपानीयकृतमज्जनमङ्गलः[5] । चन्दनेन सितध्यानेनेव सर्वाङ्गभासुरः ॥ ८२१ ॥
रत्नाभरणसम्भारैः, सत्त्वसारैरिवाञ्चितः । असमैः कुसुमैः[6] स्वस्य, यशोभिरिव शोभितः ॥ ८२२ ॥
लावण्याम्भोधिडिण्डीरपिण्डैरिव सितांशुकैः । दिव्यैः संवीतसर्वाङ्गः, कर्पूरा-ऽगुरुधूपितैः ॥ ८२३ ॥
दानैरानन्दयन् दीनाँस्तूर्यैर्मुखरिताम्बरः । वाह्यां नरसहस्रेण, शिबिकामधिरूढवान् ॥ ८२४ ॥
जननान्तरसौहार्दरसेन सहचारिणा । **अनादृतेन** देवेन, कृतनिष्क्रमणोत्सवः ॥ ८२५ ॥
प्रवेशिताभिराक्रम्य, सैन्ये चारित्रभूभृतः । स्मरसेनासमानाभिः, प्रियाभिस्ताभिरन्वितः ॥ ८२६ ॥
स्फूर्जज्जयजयारावप्रतिध्वानितदिङ्मुखः । मङ्गल्यधवलध्वानाकृष्टपौरवधूजनः ॥ ८२७ ॥
दुर्घटं घटयन् घण्टापथे पाणिन्धमायितम् । मायूरच्छत्रखण्डेन, मण्डलं तिरयन् रवेः ॥ ८२८ ॥

---

१ °ष्ठाचयोर्द्ध° पाता० ॥ २ °न्धाम्भसि निमज्ज° पाता० ॥ ३ °व तेन नेता° खंता० ॥ ४ °त्युक्ते ज° खंता० ॥ ५ °नमज्जन° खंता० ॥ ६ °मैः कामं, य° खंता० पाता० ॥

आलोक्यमानो लोकेन, विस्मयालोलमौलिना । पौरीभिर्दीयमानाशीरक्षतक्षेपपूर्वकम् ॥ ८२९ ॥
बन्दिवृन्दमुखोद्घुष्टस्मरवीरजयोर्जितः । महामोहमहीपालमभिषेणयितुं ययौ ॥ ८३० ॥
॥ एकादशभिः कुलकम् ॥

सुधर्मस्वामिपादाब्जपावनं वनमीयिवान् । याप्ययानात् समुत्तीर्य, प्रतीष्टाचारमङ्गलः ॥ ८३१ ॥
प्रविश्य मध्यं पञ्चाङ्गसङ्गतक्षितिमण्डलः । प्रणम्य गणभृन्नाथं, जम्बूस्वामी व्यजिज्ञपत् ॥ ८३२ ॥
॥ युग्मम् ॥

संसारसागरोत्तारकर्णधार ! मुनीश्वर ! । मां कुटुम्बं च चारित्रयानपात्रेण तारय ॥ ८३३ ॥
ततः स्वपाणिपद्मेन, गणधारिधुरन्धरः । स्वजनैरन्वितं जम्बूकुमारं तमदीक्षयत् ॥ ८३४ ॥
प्रभवोऽप्यन्यदाऽभ्येत्य, सुधर्मस्वामिसन्निधौ । भावशत्रुप्रतिक्षेपदक्षो दीक्षामुपाददे ॥ ८३५ ॥
गणधारिधुरीणेन, तदानीं प्रभवो मुनिः । कृतः सुकृतवान् जम्बुपादाम्बुजमधुव्रतः ॥ ८३६ ॥
जम्बूप्रभृतिभिः शिष्यैः, कलितः कलभैरिव । अन्यदा गणभृच्चम्पां, यूथनाथ इवागमत् ॥ ८३७ ॥
तस्यां च बहिरुद्याने, गणभृत् सपरिच्छदः । देहिनां देहवान् पुण्यवासरः समवासरत् ॥ ८३८ ॥
ततस्तदीयपादारविन्दवन्दारवो जनाः । आययुर्युयुमुख्यानि, वाहनानि समाश्रिताः ॥ ८३९ ॥
लोकमालोकयन् यान्तं, कोणिकः श्रेणिकात्मजः । सद्यो मेदुरितानन्दो, राजाऽप्युद्यानमागमत् ॥ ८४० ॥
स पुण्यलभ्यमभ्यर्च्य, गणभृच्चरणाम्बुजम् । आसीनः श्रोत्रमसृणामश्रृणोद्धर्मदेशनाम् ॥ ८४१ ॥
देशनान्ते प्रभोः शिष्यवर्गे जम्बूमुनिं नृपः । पुरः स्मरमिवाद्राक्षीद्, भवभीत्या धृतव्रतम् ॥ ८४२ ॥
अपृच्छच्च प्रभो ! कोऽयं, द्विपेष्विव सुरद्विपः । सुधांशुरिव धिष्ण्येषु, त्रिदशाद्रिरिवाद्रिषु ॥ ८४३ ॥
शालिधान्यमिवान्नेषु, कल्पद्रुम इव द्रुषु । अम्भोधिष्विव दुग्धाब्धिश्चम्पकं कुसुमेष्विव ॥ ८४४ ॥
हिरण्यमिव लोहेषु, रसेष्विव सुधारसः । अद्भुतस्तव शिष्येषु, सविशेषं प्रदीप्यते ? ॥ ८४५ ॥
॥ विशेषकम् ॥

भूनाथं प्रत्यथोवाच, वाचंयमचमूपतिः । श्रीजम्बूस्वामिनः पूर्वजन्मवृत्तान्तमादितः ॥ ८४६ ॥
तपःप्रभावप्रभवं, रूपं सौभाग्यमस्य च । चरमं केवलित्वं च, विच्छेदं च ततः परम् ॥ ८४७ ॥
॥ युग्मम् ॥

तदाकर्ण्य महीनाथो, हृष्टश्चम्पापुरीं ययौ । जम्बूयुतः सुधर्माऽपि, श्रीमहावीरमभ्यगात् ॥ ८४८ ॥
श्रीमहावीरपादान्ते, दान्तेन्द्रियगणो गणी । जन्तुजातोपकाराय, विजहार धरातले ॥ ८४९ ॥
ततः श्रीवीरनिर्वाणाद्, व्यतीत्य दशहायनीम् । जम्बूस्वामिनमाधाय, गच्छभारधुरन्धरम् ॥ ८५० ॥
श्रीसुधर्मगणाधीशो, श्रिते निःश्रेयसश्रियम् । जम्बूः प्रबोधयामास, महीं नवदिवाकरः ॥ ८५१ ॥ युग्मम् ॥
अथ वर्षचतुःषष्टौ, गतायां वीरनिर्वृतेः । श्रीजम्बूस्वामिना चक्रे, गच्छेशः प्रभवः प्रभुः ॥ ८५२ ॥

इत्थं ब्रह्मव्रतमयमहःसंहृतध्वान्तबन्धः,
श्रीमज्जम्बूमुनिदिनपतिर्दत्तविश्वप्रबोधः ।
निःसामान्यक्रमसमुदितोद्दाममाहात्म्यसम्प-
ल्लक्ष्मीं नित्याभ्युदयसुभगम्भावुकामाससाद ॥ ८५३ ॥

---

१ °रः स्मेर° पाता० ॥ २ आपृच्छच्च खंता० ॥

जीयात् काचिद् विश्वजैत्री धरित्र्यां, सौभाग्यश्रीरद्भुता जम्बुनाम्नः ।
लब्धे यस्मिन् केवलज्ञानलक्ष्मीर्धन्यंमन्या नान्यमभ्याजगाम ॥ ८५४ ॥

**॥ इति श्रीविजयसेनसूरिशिष्यश्रीमदुदयप्रभसूरिविरचिते श्रीधर्माभ्युदयनाम्नि श्रीसङ्घपतिचरिते लक्ष्म्यङ्के महाकाव्ये जम्बूस्वामिचरितवर्णनो नामाष्टमः सर्गः ॥**

खेलद्भिः खरदूषणास्तसुभगैः क्षीराब्धिबन्धोद्धतै-[1]
रुच्चै रावणनाशभासुरतमैरेभिर्यशोभिर्निजैः[2] ।
भूमिं भूषयति त्रयी तनुकुलक्षोणीधवस्पर्धया,
श्रीसोमान्वयसम्भवोऽपि सपदि श्रीवस्तुपालः कृती ॥ १ ॥
अन्तः कज्जलमञ्जुलश्रि यदिदं शीतद्युतेर्द्योतते,
[3]तन्मूढाः कथयन्ति लक्ष्म न वयं सूक्ष्मेक्षिकाकाङ्क्षिणः ।
यद् यात्रोत्सवमद्भुतं रचयता श्रीवस्तुपाल ! त्वया,
शीतांशौ लिखितं स्वनाम तदिदं प्रत्यक्षमुद्वीक्ष्यते ॥ २ ॥

॥ ग्रन्थाग्रम् ८६१ । उभयग्रन्थाग्रम्[4] २५४६ ॥

---

१ °न्धोद्धुरैरुच्चै° खंता० पाता० ॥ २ °तरैरे° खंता० पाता० ॥ ३ यन्मू° वता० ॥
४ °मू २५४७ खंता० ॥

## नवमः सर्गः ।

तपः सम्पल्लतामूलं, दुःखकक्षाऽऽशुशुक्षणिः । इष्टार्थराजीराजीवखण्डमार्तण्डमण्डलम् ॥ १ ॥
परापरमहासिद्धिसौधाग्रोत्सङ्गमिच्छुना । तपःसोपानमास्थेयं, तद्यथा युगबाहुना ॥ २ ॥

### तपोमाहात्म्ये युगबाहुचरितम्

पाटलीपुत्रमित्यस्ति, पुरं सुरपुरोपमम् । रत्नसौधसदालोके, यत्र मित्रत्विषो वृथा ॥ ३ ॥
एतस्मिन् रत्नगर्भाया, रहस्य इव पत्तने । गौणमेवानुमन्यन्ते, धनदं धनिनो जनाः ॥ ४ ॥
तत्र क्षत्रियकोटीरकोटीरश्मिस्मितक्रमः । क्रमनिर्यद्यशःसिन्धुः, सिन्धुगाम्भीर्यधुर्यधीः ॥ ५ ॥
भुवोऽभवद् विभुः कीर्तिविनिर्जितसितद्युतिः । चण्डांशुदुःसहः शत्रुमर्दनः शत्रुमर्दनः ॥ ६ ॥
अभून्मदनरेखेति, कलत्रं तस्य भूभुजः । यदास्यदास्यवानासीदङ्कितस्तुहिनद्युतिः ॥ ७ ॥
धरित्रीशस्य मन्त्रीशस्तस्यासीन्मतिसागरः । राज्ये यद्बुद्धिविध्वस्तशत्रौ शोभैव पत्तयः ॥ ८ ॥
तेनोढप्रौढसौराज्यभरो विश्वम्भराविभुः । वैशारद्यं सुखस्वादेष्वाससाद प्रियान्वितः ॥ ९ ॥
अन्यदाऽन्तःपुरं यातः, प्रातः प्राणप्रियां नृपः । ददर्श दर्शनीयश्रीश्चिन्तयाऽऽचान्तचेतनाम् ॥ १० ॥
जगाद सादरं भूपः, स्वरूपविजितस्मरः । तद्दुःखहेतुजिज्ञासुर्वितर्काकुलमानसः ॥ ११ ॥
सकज्जलेक्षणजलैः, कपोलफलके लिपिः । येयं विलिखिता देवि !, सैव ब्रूते शुचं तव ॥ १२ ॥
निःश्वासधूमवत्त्वेन, हेतुना दुःखकेतुना । कश्चिच्चिन्तानलश्चित्ते, जागरूकोऽनुमीयते ॥ १३ ॥
समादिश शुचां हेतुं, तत् प्रसीद प्रिये ! मम । कः स्वजीवितसावज्ञस्तवाज्ञाखण्डनं व्यधात् ? ॥ १४ ॥
चक्रे केनापराधो वा, यमवेश्म यियासुना ? । मुमूर्षुणाऽथ मूर्खेण, केन तेने पराभवः ? ॥ १५ ॥

कच्चित् किञ्चिन्मयैवाथ, न हितं विहितं तव ? ।
किं वा राज्येऽपि तद् यन्न, त्वदायत्तं मम प्रिये ! ? ॥ १६ ॥

वितर्कशतसम्मूढं, ननु ताम्यति मन्मनः । अधीतपूर्वं यन्नैतन्महत्यप्यरिसङ्कटे ॥ १७ ॥

तत् प्रक्षाल्य जलैर्देवि !, बाष्पाम्भःकलुषं मुखम् ।
शशाङ्कः साङ्कपङ्कोऽयं, चिराद्व्यक्तियतां त्वया ॥ १८ ॥

इतो विलोकय ततो, विशालाक्षि ! प्रसीद मे । भवत्वेष जनस्तूर्णं, नीलोत्पलपराङ्मुखः ॥ १९ ॥
प्रदेशः पेशलालापैर्भूयाद् भूयः प्रिये ! तव । राजहंसाङ्गनावृन्दमञ्जुकूजितपूजित ॥ २० ॥
इत्युक्त्वाऽवस्थिते राज्ञि, मौनमूलीकृतद्विषि । उवाच वाचं दन्तांशुस्फुरणेन शरीरिणीम् ॥ २१ ॥
न भर्तर्वर्तते किञ्चिदन्यद्दुःखस्य कारणम् । लालितायास्त्वया पत्या, विहाय निरपत्यताम् ॥ २२ ॥

---

१ नाम्ना विक्रमबाहुः श्रीसङ्केतैकनिकेतनम् ॥ ६ ॥ युग्मम् ॥ इत्येवंरूपः पाठः नता० ॥
२ °ज्ञि, सा मुखेन्दुसुधोज्ज्वलाम् । उवाच इति खंता० पाठः ॥

तस्याः शस्यामिमां वाचं, समाकर्ण्य नरेश्वरः । आरादाराधयामास, त्रिसन्ध्यं कुलदेवताम् ॥ २३ ॥
तत्प्रसादं समासाद्य, सद्यो विकसिताकृतिः । तस्यामुत्पादयामास, क्षत्रगोत्रस्तुतं सुतम् ॥ २४ ॥
एतस्य स्थापिते नाम्नि, युगबाहुरिति क्रमात् । समं मनोरथैः राज्ञो, वर्धमानो मनोहरैः ॥ २५ ॥
कियत्यपि गते काले, पण्डितेभ्यः पठन्नयम् । प्रज्ञावज्ञातवागीशः, प्रपेदे सकलाः कलाः ॥ २६ ॥ युग्मम् ॥
अथान्यदा समायातस्तदुपाध्यायमन्दिरे । विपश्चित् कश्चिदतिथिः, सोऽभाषिष्ट ससौष्ठवम् ॥ २७ ॥
ब्रूत लोकोत्तरस्फूर्तिः, कथं भूयात् पुमानिति ? । जगदुर्जगतीशेन, गौडेनाभिहिता बुधाः ॥ २८ ॥
शस्त्रे शास्त्रे च जागर्ति, यस्य कीर्तिरनुत्तरा । भाषितः पुरुषः सैष, बुधैर्लोकोत्तरः परम् ॥ २९ ॥
तथा यतेथास्तद् वत्स[3] !, शत्रुमर्दननन्दन ! । यथा शस्त्रे च शास्त्रे च, तवाद्वैतं भवेद् यशः ॥ ३० ॥
उपाध्यायगिरं ध्यायन्निमामेव नृपाङ्गजः । जगाम ग्रामणीः पुंसां, मुनिपार्श्वे बहिर्वने ॥ ३१ ॥
नमस्कृत्य मुनीनाह, साहसोत्साहवानसौ । लोकोत्तरकलावाप्तिः, केनोपायेन जायते ? ॥ ३२ ॥
तेऽप्याहुः शृणु भूपालपुत्र ! सुत्रामविक्रम ! । कर्मानुकूल्येनैवैतत्, सर्वं सम्पद्यते शुभम् ॥ ३३ ॥
पञ्चम्यादितपोयोगैर्देवताराधनेन च । तदभिव्यक्तिमायाति, मायातिगशुभं नृणाम् ॥ ३४ ॥
निर्ममे निर्ममेशस्य, शस्यमस्य निशम्य च । तेन चित्ते वचोऽक्लेशदेशनावेशपेशलम् ॥ ३५ ॥
कलाकामगवी नाम, शारदा तत्र विद्यते । युगबाहुस्तपः कुर्वंस्तत् तदाराधनं व्यधात् ॥ ३६ ॥
आराधनघनो धीमांस्तपस्तपनदुस्सहः । षण्मासान् स समासक्तस्त्रिसन्ध्यं साधितक्रमः ॥ ३७ ॥
अथ पान्थवधूकोपकटाक्षच्छुरितद्युतिः । कालः सविद्युदम्भोदमेदुरः समुपागमत् ॥ ३८ ॥
अम्भोदपटलैर्व्योम्नि, च्छादितः सितदीधितिः । मुखेन्दुः पान्थनारीणां, सकज्जलजलाश्रुभिः ॥ ३९ ॥
अपवारितरङ्गेण, सिन्धुना कार्श्यमाप्यत । अपवारितरङ्गेण, स्थितं भास्करतेजसा ॥ ४० ॥
उल्लासितौ क्षता चैव, बहुकोकनदावलिः । वाहिन्यो भूभृतां भेजुः, सङ्कोचं चोच्छ्रयं च ताः ॥ ४१ ॥
एवंविधेऽथ कालेऽस्मिन्[4], राजानं शत्रुमर्दनम् । कश्चिद् विज्ञपयामास, समासन्नो नियोगवान् ॥ ४२ ॥
तुङ्गरङ्गत्तरङ्गौघपातितासन्नकानना । निर्मर्यादं समायाति, गङ्गा देव ! पुरं प्रति ॥ ४३ ॥
गङ्गाप्रवाहादेतस्मान्नागराः सागरादिव । त्रातरातुरतां भेजुस्तद्[5] यत्नः क्रियतां प्रभो ! ॥ ४४ ॥
समादिश विशामीश !, यत् कर्त्तव्यं विशारद ! । निशम्य सम्यगेतस्मादादिदेश नृपः सुतम् ॥ ४५ ॥
स्वर्णपुत्रकमादाय, गच्छ त्वं वत्स वत्सल ! । पूजानिर्वर्तनेनास्याः, शान्तिं सम्पादय द्रुतम् ॥ ४६ ॥
स तथा प्रतिपद्याथ, गङ्गार्णोऽभ्यर्णमागतः । निर्वर्त्य विविधां पूजां, चिक्षेप स्वर्णपुत्रकम् ॥ ४७ ॥
अथैतस्मिन्नवसरे, तस्मिन् परिसरे कृती । कस्याश्चिच्चारुनेत्रायाः, शुश्राव करुणध्वनिम् ॥ ४८ ॥
दिक्षु चक्षुः क्षिपन्नेष, दिदृक्षुर्विधुरां स्त्रियम् । उपकारमना यावदस्ति क्षितिपनन्दनः ॥ ४९ ॥
तावदाविरभूदम्भोमध्ये काऽपि मृगेक्षणा । कुररीकरुणध्वानैर्द्रावयन्ती जलेचरान् ॥ ५० ॥
साऽऽह साहसिकोत्तंसः, कश्चिदस्ति क्षितौ नरः । गङ्गोपहारभूतायाः, शरण्यः स्यान्ममात्र यः ? ॥ ५१ ॥

रत्नगर्भाऽपि वन्ध्याऽसि, कुतो देवि ! वसुन्धरे ! ।
यन्न जातस्त्वया कोऽपि, मत्प्राणत्राणकारणम् ॥ ५२ ॥

१ ब्रूथ लो° खंता० । कथं लो° पाता० ॥ २ °गदीशे° खंता० ॥ ३ °त्स !, विक्रमक्ष्मापनन्द° खंता० ॥ ४ °ताऽक्ष° पाता० ॥ ५ °स्मिन्नेत्य राजानमाकुलः । कश्चिद् खंता० ॥ ६ भेजे, तद् खंता० ॥

श्रुत्वेति वचनं तस्या, भग्नेऽन्येषां पराक्रमे । स चचाल स्थिरस्थामसिन्धुरः सिन्धुरोधसः ॥ ५३ ॥
तदाऽवगणयन्नेष, परिवारनिवारणम् । धीरोद्धतपदन्यासैः, कम्पयन्निव मेदिनीम् ॥ ५४ ॥
वार्यमाण इवाम्भोभिर्लुलद्भिः सम्मुखागतैः । सेव्यमानो यशोवीजैरिव पाथःकणोत्करैः ॥ ५५ ॥
उद्दिधीर्षुरिमां कन्यां, वाहिनीवाहवाहिताम् । विवेश लसदावेशः, परोपकृतये नदीम् ॥ ५६ ॥
॥ विशेषकम् ॥
वीक्षितः सैनिकैः कन्यामुद्दिधीर्षुर्महीमिव । स्फुरन्नन्तर्जलं सोऽयं, नारायण इवाबभौ ॥ ५७ ॥
प्लवमानो यदैतस्याः, समीपं समुपागतः । कुमारस्तावदेषाऽपि, दूराद् दूरतरं ययौ ॥ ५८ ॥
हर्षोत्कर्षेण सैन्यस्य, तया च मृगचक्षुषा । समकालमदृश्यत्वं, भेजे भूमिभुजाङ्गजः ॥ ५९ ॥
अथ कर्त्तव्यमूढास्ते, सैनिकाः साश्रुचक्षुषः । सन्ति गङ्गातटे यावत्, कुमारादर्शनाकुलाः ॥ ६० ॥
तावत् तन्नाशसाक्षित्वपातकादिव पातुकः । आससाद निधिर्धाम्नामस्तपर्वतमस्तकम् ॥ ६१ ॥
॥ युग्मम् ॥
अस्तोकशोकभृल्लोकचक्रं चक्रन्द चक्रवत् । तत्र मित्रे स्फुरद्भक्त्यावेशे[3] देशान्तरं गते ॥ ६२ ॥
दिदृक्षुरिव तं भानुः, कुमारं मारविग्रहम् । पाथोनाथपथेनाथ, पातालमुपजग्मिवान् ॥ ६३ ॥
अथो पुरान्तरागत्य, सैनिका निशि दुःखिनः । वार्तामार्त्ताशयाः सर्वां, कथयामासुरीशितुः ॥ ६४ ॥
दम्भोलिनेव भूपालस्ताडितो हृदयेऽपतत् । तद्वार्तादुःखसङ्घट्टजन्मना शोकशङ्कुना ॥ ६५ ॥
मुक्त्वा शोकं कुमारस्याधावल्लोको नृपान्तिकम् । चन्दन-व्यजनादीनि, सकलः कलयन् करे ॥ ६६ ॥
तेन शैत्योपचारेण, कृतेन कृतिनां वरः । अथ प्रथितचैतन्यो, जगाद जगतीपतिः ॥ ६७ ॥
क्व सा भक्तिः? क्व सा शक्तिः?, क्व सा क्षान्तिः? क्व सा मतिः? ।
एकैकशोऽपि दृश्यन्ते, हा हन्त! नहि ते गुणाः ॥ ६८ ॥
त्वं तातवत्सलो वत्स!, जन्मतोऽपि प्रभृत्यभूः । मां जराजर्जरं हित्वा, तत् सम्प्रति गतः कुतः? ॥ ६९ ॥
उपेक्ष्य प्रेक्षणीयानां, मूर्धन्य! स्वां कुलश्रियम् ।
कन्याकृते त्यजन् प्राणान्, स्थूललक्ष्योऽसि निश्चितम् ॥ ७० ॥
अमात्योऽपत्यदुःखेन[4], विलपन्तं पतिं भुवः । अभाषिष्ट तदाऽऽचारविचाररुचिरं[5] वचः ॥ ७१ ॥
भवादृशां विशांनाथ!, पाथोनाथगभीरिमन्! । युक्तं भवे भवेदेव, न देव! परिदेवनम् ॥ ७२ ॥
स्वकर्मफलभोगेन, संसाराब्धौ शरीरिणः । बुद्बुदा इव यान्त्येके, समायान्त्यपरे पुनः ॥ ७३ ॥
यदेवेष्टवियोगादि, विरक्तेः कारणं सताम् । मोहान्धानां तदेवाहो!, क्रोध-शोककरं परम् ॥ ७४ ॥
न चक्रिणा न शक्रेण, कृतविक्रमसङ्क्रमम् । विश्वैकवीरमाख्यान्ति, दैवमेवंविधं बुधाः ॥ ७५ ॥
स्वामिन्! सैन्येन दैन्येन, सेवितैः परिदेवितैः । असौ प्रकृतिदुर्दान्तः, कृतान्तः केन गृह्यते? ॥ ७६ ॥
इदं वचः समाकर्ण्य, मतिसागरमन्त्रिणः । कृपाणं पाणिनाऽऽकृष्य, धावितः पृथिवीपतिः ॥ ७७ ॥
कृतं कृतान्त! गर्वेण, व्रज दृष्टिपथं मम । यथा तवैतद्व्यसनं, छिनद्मि च्छद्मसद्मनः ॥ ७८ ॥
अनल्पमिति जल्पन्तमल्पितारिपराक्रमम् । साटोपकोपं भूपालमुवाच सचिवेश्वरः ॥ ७९ ॥

---

१ °रणाम् पाता० ॥ २ °गमत् । कुमा° खंता० ॥ ३ °रद्भूत्यावे° खंता० ॥ ४ °न. प्रलप° खंता० ॥ ५ °दा चारुविचा° खंता० ॥

किं दैवं ? देव ! कश्च त्वं ?, संरम्भः कं प्रति प्रभो ! ? ।
विचारय स्वयं त्यक्त्वा, न शक्यमिदमस्ति यत् ॥ ८० ॥
तदेव दैवं यत् कुर्यात्, कर्म जन्तुः शुभा-ऽशुभम् । शोभैव सृष्टि-संहारकारिकारणवर्णना ॥ ८१ ॥
तत् परित्यज्य संरम्भमुत्तरास्त्वं कुरु क्रियाः । अनित्यं विश्वमालोक्य, स्थैर्योपायपरो भव ॥ ८२ ॥
सुप्रातमङ्गलाचारचारुराविरभूदथ । मांसलो दुन्दुभिध्वानैर्गभीरः शङ्खनिस्वनः ॥ ८३ ॥
अथ सत्वरमागत्य, कश्चिदाश्चर्यतत्परः । उद्यदानन्दसन्दोहमेदुराश्रुरदोऽवदत् ॥ ८४ ॥
आन्ध्यहेतुतमःस्तोमच्छेदभासुरभास्वतः । दिष्ट्या त्वं वर्धसे देव !, युगबाहोरिहागमात् ॥ ८५ ॥
पारितोषिकदानेन, तं सत्कृत्याथ पूरुषम् । नृपतिर्विस्मयस्मेरो, यावदुत्तिष्ठति स्वयम् ॥ ८६ ॥
तावच्चलोककोकानां, शोकमुन्मूलयन्नयम् । स्वच्छेशोचिरलङ्कारभासुराकारविग्रहः ॥ ८७ ॥
स्वयमीक्षणराजीवजीवातुः प्रातरागतः । भास्वानिवोदयकलादुर्निरीक्ष्यो नृपाङ्गजः ॥ ८८ ॥ युग्मम् ॥
नन्दनं चन्दनस्यन्दसुन्दराकारभासुरम् । प्रणमन्तं परिष्वज्य, जगाद जगतीपतिः ॥ ८९ ॥
अदृश्यत्वं स्त्रिया साकं, यावत् त्वमभजस्तया । वृत्तमाख्यायि तत् तावत्, तावकैः सेवकैर्मम ॥ ९० ॥
अतः परं परं धीमन् !, संवृत्तं यद्यदद्भुतम् । वत्स ! तत् सर्वमप्युच्चैर्मदग्रे वक्तुमर्हसि ॥ ९१ ॥
स रूपमन्मथो वाचमथोवाच नृपाङ्गजः । प्रक्षालितामिवात्यन्तविशदैर्दशनांशुभिः ॥ ९२ ॥
मूर्च्छामुषितचैतन्यस्तामेवानुव्रजंस्तदा । कोऽहं ? किमर्थं ? कुत्रास्मीत्येवं न प्रतिपन्नवान् ॥ ९३ ॥
क्षणेनैव ततस्तात !, स्वमपश्यं सचेतनः । मौक्तिकक्षोदमेदस्विसिकते सैकते[3] स्थितम् ॥ ९४ ॥
न तत् पुरं न सा गङ्गा, न सा कन्या न सा रसा । आकस्मिकमिदं जज्ञे, किं विचारपथातिगम् ? ॥ ९५ ॥
किमिन्द्रजालं ? किं स्वप्नः ?, किं वा चैतन्यविप्लवः ? । उत मन्येऽहमन्येह, जातिर्जातिस्मरस्य मे ? ॥ ९६ ॥
विचिन्त्येति क्षणं स्वामिन्नुत्थायाथ परिभ्रमन् । अपश्यमेकं कल्पद्रुकाननं हसिताननः ॥ ९७ ॥
तदन्तःपक्षिभिः पृष्टकुशलोऽहं पुरो व्रजन् । मुमुदे नितरामन्तरारामं तं विलोकयन् ॥ ९८ ॥
अग्रतश्च गतश्चित्रकारणं तापवारणम् । प्रासादमेकमद्राक्षमुच्चैः सप्तक्षणं क्षणात् ॥ ९९ ॥
प्रविश्य तस्मिन्नारूढः, षष्ठीं यावदहं भुवम् । जज्ञे कर्णातिथिस्तावन्मम सङ्गीतनिःस्वनः ॥ १०० ॥
गत्वाऽग्रतस्ततस्तत्र, द्वारदेशे विलम्बितः । कयाचिद् वेत्रधारिण्या, क्षणादागत्य भाषितः ॥ १०१ ॥
अहं श्रीशारदादेव्या, त्वदाकारणहेतवे । शब्दविद्याप्रतीहारी, प्रेषिता तत् पुरो भव ॥ १०२ ॥
तत् तयाऽहं सह प्राप्तः, शारदाचरणान्तिकम् । अपश्यं तुम्बुरुस्फीतगीतप्रीतिस्मितेक्षणाम् ॥ १०३ ॥
चारुचारीप्रचारेण, नृत्तेनाप्सरसां पुरः । प्रेक्षाकौतूहलेनोच्चैः, क्षणमाक्षिप्तचक्षुषम् ॥ १०४ ॥
हंसेन विहितोपास्तिं, सेवितां देव-दानवैः । वादयन्तीं स्वयं वीणां, हिरण्यकमलासनाम् ॥ १०५ ॥
निजकान्तिसुधापूरैर्लिम्पन्तीमिव सेवकान् । बिभ्रतीं पुस्तकं हस्ते, रोहन्मोहमहौषधम् ॥ १०६ ॥
तर्क-साहित्यविद्याभ्यां, वाम-दक्षिणपार्श्वयोः । वालव्यजनपाणिभ्यां, वीज्यमानां मुहुर्मुहुः ॥ १०७ ॥
प्रशान्तपावनीं मूर्तिं, दधानां वचनातिगाम् । शारदां शारदाम्भोदविशदस्वच्छवाससम् ॥ १०८ ॥
॥ षड्भिः कुलकम् ॥

---

१ °भास्वरभास्व° खंता० ॥ २ °च्छरोचि° खंता० पाता० ॥ ३ किञ्चाचार° वता० ॥
४ °दसोदरस्वच्छ° खंता० ॥

अथाहं हर्षसोत्कर्षचेता विकसिताननः । नमोऽकार्षं तदा देवीं, मधुर-स्निग्धमीक्षितः ॥ १०९ ॥
वाग्देव्याऽहं स्वयं पादपीठेऽथ विनिवेशितः । क्षणं जज्ञे किल प्राप्तो, मोक्षादपि परं पदम् ॥ ११० ॥
हारहूरानुहारिण्या, गिरा देव्याऽथ भाषितः । मा वत्स ! विस्मयायत्तं, कार्षीश्चित्तं नृपाङ्गज ! ॥ १११ ॥
इत्थमाराधनाभाजस्तव स्तवन-पूजनैः । गङ्गाकन्यकया चक्रे, मया सत्त्वपरीक्षणम् ॥ ११२ ॥
किञ्च प्रेष्य प्रतीहारीमिहानीतोऽसि सम्प्रति । इदं दर्शयितुं वत्स !, स्वक्रीडाभवनं तव ॥ ११३ ॥
तत् तवाहमनेनोच्चैः, साहसेनास्मि विस्मिता । कुरुषे पुरुषेष्वग्र्य !, कथमाराधनामिमाम् ? ॥ ११४ ॥
किञ्चानाराधिताऽप्युच्चैः, प्राच्यैस्ते पुण्यकर्मभिः । परतन्त्रेव तुष्टाऽस्मि, सकर्णाऽऽकर्णय क्षणम् ॥ ११५ ॥

## युगबाहुकुमारस्य पूर्वभवः

तथाह्यासीत् पुरा पुष्पपुरे जितमरुत्पुरे । निर्धनः कोऽपि दारिद्र्यराजधानीव देहिनी ॥ ११६ ॥
महेऽन्येद्युः स कौमुद्यामुद्याने वीक्ष्य नागरान् । अर्थिसङ्कल्पकल्पद्रूनिव साक्षादचिन्तयत् ॥ ११७ ॥

मन्दभाग्योऽतिनिर्लज्जः, पात्रं निन्दितकर्मणाम् ।
मया समः समस्तेऽपि, नास्त्यन्यः कोऽपि भूतले ॥ ११८ ॥

यदस्मिन्नुत्सवे पौरान्, वीक्ष्य दानाद्यलङ्कृतान् । नैवाद्यापि विमुच्येऽहं, प्राणैः पाषाणनिष्ठुरैः ॥ ११९ ॥
इहान्तरेषां पौराणामहो ! मे सम्पदुत्तमा । निर्वाणाङ्गारकस्येव, शोणमाणिक्यमध्यतः ॥ १२० ॥
समानेऽपि मनुष्यत्वे, विशेषोऽयं यदद्भुतः । तदत्राहमहो ! मन्ये, पुण्या-ऽपुण्ये निबन्धनम् ॥ १२१ ॥
तन्मया यत् क्वचित् किञ्चिन्न कृतं सुकृतं पुरा । दुःखपात्रं तदत्राहमभवं विभवं विना ॥ १२२ ॥
अङ्गत्यागं ततो गत्वा, करिष्ये किल भैरवे । यथा भवाम्यहं दुःखभाजनं न भवान्तरे ॥ १२३ ॥
पर्यालोच्येति तत्रागादुत्सुको भैरवोपरि । अभीष्टदेवतायाश्च, नमस्कारं चकार सः ॥ १२४ ॥
झम्पापातं चिकीर्षुश्च, दिशो व्यालोकयन्नयम् । शमं मूर्त्तमिवाशोकतले मुनिमुदैक्षत ॥ १२५ ॥
दृष्ट्वा च तं नमश्चक्रे, भावपावनमानसः । क्षणं चोपासनाहेतोः, पुरस्तादुपविष्टवान् ॥ १२६ ॥
ध्यानान्तेऽथ मुनीन्द्रोऽपि, ज्ञानत्रयमयः स्वयम् । ज्ञात्वोपकारमूचे तं, सुधामधुकिरा गिरा ॥ १२७ ॥
कुतस्त्वमागतो वत्स !, वनमेतदमानुषम् ? । कथं चेत्यद्भुतानन्दो, वर्तसे प्राप्तरत्नवत् ? ॥ १२८ ॥
उवाच सोऽपि दारिद्र्यसमुद्रस्य महामुने ! । पारं तीर्थमसुं प्राप्य, भैरवं मुदितोऽस्म्यहम् ॥ १२९ ॥
तदत्र कृतकृत्योऽस्मि, युष्मद्दर्शनतोऽधुना । विशुद्धमियता मन्ये, भवान्तरमहं निजम् ॥ १३० ॥
अथोवाच मुनीन्द्रस्तं, वाचा मधु-सुधामुचा । कुतस्त्वमितिमूढोऽसि, वत्साविदिततत्त्ववत् ॥ १३१ ॥
सुलभा जीवलोकेऽस्मिन्, धृति-श्री-सुख-सम्पदः । चिन्तारत्नमिवात्यन्तदुर्लभं जन्म मानुषम् ॥ १३२ ॥

तत् तस्यानुपभुक्तस्य, त्यागः किमिति युज्यते ? ।
यदस्य न पुनः प्राप्तिः, सहस्रेणापि जन्मनाम् ॥ १३३ ॥

कृतेन मृत्युना जन्तोर्देह एव विनश्यति । लाभान्तरायकृत् कर्म, न पुनः पूर्वनिर्मितम् ॥ १३४ ॥
तत्तत्कर्मविनाशाय, प्रायः कायस्तपोऽग्निना । संशोष्य निर्मलः स्वात्मा, बुद्धिमद्भिर्विधीयते ॥ १३५ ॥
तदन्तरायकृत् कर्म, कृतमज्ञानपूर्वकम् । ज्ञानाराधनशुद्धेन, तपसा हि विलीयते ॥ १३६ ॥

१ °हारीं, मयाऽऽनीतो° खंता० ॥ २ °मूचेऽमुं, सुधामधुरया गिरा खंता० ॥ ३ °स्त्वमति° वता० ॥

महात्मन् ! पूर्वदुष्कर्मनिर्मूलनसमीहया । युज्यते तपसाऽऽराद्धुं, ततस्ते ज्ञानपञ्चमी ॥ १३७ ॥
तावज्जाड्यज्वरोद्गारैर्जीयन्ते हन्त ! जन्तवः । यावन्नाविर्भवत्युच्चैस्तपस्तपनवैभवम् ॥ १३८ ॥
येषां तपःकुठारोऽयं, कठोरः स्फुरति स्फुटम् । मूलादुच्छेदमायान्ति, तेषां दुष्कर्मवीरुधः ॥ १३९ ॥
भावेनाराधितो येन, तपोधर्मोऽतिनिर्मलः । एतेनाराधितौ दान-शीलधर्मावपि ध्रुवम् ॥ १४० ॥
सम्पन्नानन्यसामान्यतपःसन्दोहदोहदः । वितनोति फलस्फातिं, मनोरथमहीरुहः ॥ १४१ ॥
तत् ते क्षीणान्तरायस्य, पञ्चमीतपसाऽमुना । मनोरथतरुः सर्वं, वाञ्छितार्थं फलिष्यति ॥ १४२ ॥
इत्युक्तो मुनिना तेन, सैष निष्पुण्यपूरुषः । निवृत्य मृत्योरागत्य, गृहं चक्रे तपोऽद्भुतम् ॥ १४३ ॥
स पूजनं जिनेशस्य, प्रथयन् विभवोचितम् । वरिवस्यन् गुरूंश्चापि, निन्ये जन्म कृतार्थताम् ॥ १४४ ॥
अथायं परिपूर्णायुः, संजज्ञे नृपतेः सुतः । युगबाहुरिति ख्यातः, स त्वं सत्त्वनिकेतनम् ॥ १४५ ॥
तत् त्वया तोषिताऽस्म्युच्चैर्धर्ममाराध्यता पुरा । निःशङ्कितमतो ब्रूहि, वत्स ! वाञ्छितमात्मनः ॥ १४६ ॥
देव्या प्रसादादित्युक्ते, शस्त्रे शास्त्रे च कौशलम् । लोकोत्तरं मयाऽयाचि, प्रतिपन्नं तया च तत् ॥१४७॥
प्रतिपक्षप्रतिक्षेपक्षममेकं परं पुनः । महामन्त्रं ददौ देवी, कलाकौशलदायिनम् ॥ १४८ ॥
यावद् गृहीतमन्त्रोऽहं, नमामि परमेश्वरीम् । अपश्यं तावदात्मानं, नदीपुलिनगामिनम् ॥ १४९ ॥
प्रमोदविस्मयस्मेरवदनस्तदनन्तरम् । उत्सुकोऽहं जवादेव, देवपादान्तमागमम् ॥ १५० ॥
नृपस्तद्वा तदाकर्ण्य, सुतस्य महिमाद्भुतम् । यौवराज्यं ददौ सर्वपुरोत्सवपुरःसरम् ॥ १५१ ॥
कुमारोऽपि श्रियं प्राप्य, सहकार इवाद्भुताम् । गमयामासिवान् काममर्थिसार्थं कृतार्थताम् ॥ १५२ ॥
अर्द्धरात्रेऽन्यदा वासगृहे पर्यङ्कवर्तिनः । युवराजस्य शिश्राय, श्रवणं रुदितध्वनिः ॥ १५३ ॥
जिज्ञासुः प्रभवं तस्य, कुमारः करुणामयः । कृपाणपाणिर्निर्गत्य, गतवानध्वनि ध्वनेः ॥ १५४ ॥
असावन्तर्वणं यातस्तत्र वित्रस्तलोचनाम् । म्लानीभवन्मुखाम्भोजां, सायमम्भोजिनीमिव ॥ १५५ ॥
लावण्यपुण्यतन्वङ्गीं, प्रातःशशिकलामिव । रुदतीं सुदतीमेकामपश्यद् विस्मयाञ्चितः ॥ १५६ ॥ युग्मम् ॥
नरेण दिव्यरूपेण, पुरःप्रोल्लासितासिना । तामभ्यर्थ्यमानामालोक्य, स तस्थौ विटपान्तरे ॥ १५७ ॥
स नरश्चाटुकारोऽपि, रोपिताञ्जमीक्षितः । सुमुखीं विमुखीमेतां, रूक्षाक्षरमदोऽवदत् ॥ १५८ ॥
मयि प्रपन्नदास्येऽपि, दास्यते यदि नोत्तरम् । तदसिर्दंश्यतामेष, स्मर्यतामिष्टदैवतम् ॥ १५९ ॥
ऊचेऽथ कन्या रे मूढ !, स्मरामि कमिवापरम् ? । युगबाहुकुमारोऽस्ति, हृदि मेऽद्वैतदैवतम् ॥ १६० ॥
यद्यत्र मन्दभाग्याया, नैव दैवेन दर्शितः । भवान्तरेऽपि मे भूयात्, प्राणनाथस्तथापि सः ॥ १६१ ॥ युग्मम् ॥
हृष्टः स्वनामश्रवणान्नामसाम्याच्च शङ्कितः । विस्मितो वनितारूपाज्जुगुप्सुः क्रूरकर्मणा ॥ १६२ ॥
कुमारः खड्गमाकृष्य, ततः क्रोधादधावत । स्त्रीघातपातकिन् ! क्रूर !, क्व रे ! यासीति तर्जयन् ॥ १६३ ॥
॥ युग्मम् ॥

अथासौ पुरुषः प्राह, भद्र ! द्रुतमितः सर । रजकस्याऽऽयुषि क्षीणे, खरवन् म्रियसे कथम् ? ॥ १६४ ॥
कुमारोऽप्यब्रवीत् प्राणैरेभिः सत्वरगत्वरैः । यशःपुण्यमयस्वार्थपरं मां धिक्करोषि किम् ? ॥ १६५ ॥
किञ्चातिक्रूरमेतत् ते, निर्मातुं कर्म नोचितम् । लोकद्वयविरुद्धं हि, विदधाति सुधीः कुतः ? ॥ १६६ ॥
नरोऽप्युवाच साचिव्यं, किमहो ! मद्गृहे तव । हितोपदेष्टा येनाभूर्युयुत्सुरपि सम्प्रति ? ॥ १६७ ॥
इत्युक्त्वा धाविते तस्मिन्, नरे रणरसातुरे । खड्गाखड्गि चिरं वृद्धं, युद्धमुद्धतमेतयोः ॥ १६८ ॥

अथार्जय्यं रिपुर्मत्वा, कुमारं मारविक्रमम् । निःशूको दन्दशूकास्त्रं, साक्षेपः क्षिप्रमक्षिपत् ॥ १६९ ॥
ततोऽहिपाशनाशाय, मन्त्रमत्रस्तमानसः । कुमारः शारदादत्तं, वैरिवस्मरमस्मरत् ॥ १७० ॥
तयोरित्यस्त्रमस्त्रेण, विनिवारयतोर्मिथः । शारदामन्त्रमाहात्म्यादङ्गस्तम्भो रिपोरभूत् ॥ १७१ ॥
ततः कुमारमाहात्म्याद्, विस्मितोऽसौ गतस्मयः । मलं ममार्ज दौर्जन्यजनितं वचनामृतैः ॥ १७२ ॥
तदाऽवदानमालोक्य, त्रैलोक्योपरिवर्ति तत् । परोपकारव्यापारसज्जितं च तदूर्जितम् ॥ १७३ ॥
रूपं चानन्यसामान्यं, तच्च सौभाग्यमद्भुतम् । सा कन्या विस्मयोत्तानमानसैवमचिन्तयत् ॥ १७४ ॥
॥ युग्मम् ॥
स एव यदि राजेन्दुनन्दनोऽयमिहागमत् । उपचक्रे ममैतर्हि, तर्हि विद्याधराधमः ॥ १७५ ॥
तदाऽरिवचनैर्यावत्, कुमारस्य प्रसेदुषः । विमुक्तस्तम्भनः शत्रुर्दान्तः पादान्तमागमत् ॥ १७६ ॥
तावदाविर्बभूवाग्रे, कोऽप्युत्तीर्य विमानतः । भास्वरोदारनेपथ्यधरो विद्याधरोत्तमः ॥ १७७ ॥
कुमारस्य पुरः सोऽपि, विस्फुरत्करकोरकः । जगाद युगबाहो ! त्वं, सुस्थितः शृणु मे वचः ॥ १७८ ॥
तथास्थिते कुमारे च, पुरुषे च पुरःसरे । कथां प्रस्तावयामास, विद्याधरधुरन्धरः ॥ १७९ ॥
भरतक्षेत्रसीमन्तवैताढ्योत्तरदिग्गतम् । अस्त्यपास्तामरपुरं, पुरं गगनवल्लभम् ॥ १८० ॥
मणिचूडाभिधस्तत्र, पतिर्विद्याधरेश्वरः । प्रिया च तस्य पूर्णेन्दुवदना मदनावली ॥ १८१ ॥
कुलदेवतया दत्ता, सुताऽनङ्गवती तयोः । जज्ञेऽद्वैतचतुष्षष्टिकलाकौशलशालिनी ॥ १८२ ॥
आरूढयौवना सा च, प्रतिज्ञामिति निर्ममे । यः कोऽपि दास्यति प्रश्नचतुष्केऽपि ममोत्तरम् ॥ १८३ ॥
स एव भावी भर्ता मे, खेचरो भूचरोऽथवा । ततः श्रुत्वा प्रतिज्ञां तां, विद्याधरनराधिपाः ॥ १८४ ॥
गर्वतः सर्वतोऽभ्येत्य, प्रश्नोत्तरबहिर्मुखाः । वृथाऽभवन्नपुण्यानामिव लक्ष्मीमनोरथाः ॥ १८५ ॥
ततश्चार्तेन भूभर्त्रा, पृष्टो नैमित्तिकोत्तमः । युगबाहुं शशंसास्या, भाविनं भूचरं वरम् ॥ १८६ ॥
ततः प्रभृति सा तत्र, लक्ष्मीरिव मुरद्विषि । बद्धभावाऽभवत् कामं, गुणैः श्रुतिपथागतैः ॥ १८७ ॥
पूर्वेद्युः प्रातरेवास्य, सभासीनस्य भूभुजः । आगात् पवनवेगाख्यः, खगः शङ्खपुरेश्वरः ॥ १८८ ॥
पुत्रीमुद्वोढुकामोऽयमकृतप्रश्ननिर्णयः । विलक्षो हृतवानेतां, द्विको मुक्तालतामिव ॥ १८९ ॥
ततोऽनुपदिनस्तस्याः, खेचराः सर्वतो ययुः । अस्यास्तु मातुलः सोऽहमिहायातोऽस्मि दैवतः ॥ १९० ॥
पुरः पवनवेगोऽयं, जामेयी च ममाप्यसौ । प्राणप्रदस्य सर्वेषां, किं ते प्रतिकरोमि तत् ? ॥ १९१ ॥
रत्नचूडाभिधे तस्मिन्नेवं वदति खेचरे । मणिचूडनृपोऽप्यागात्, तत्रैव सपरिच्छदः ॥ १९२ ॥
उवाच च महाबाहो !, सुतेयं मम जीवितम् । सर्वस्वमपि चैतन्मे, तत् त्वयैवाऽऽत्मसात् कृतम् ॥ १९३ ॥
मम नैमित्तिकेनास्याः, कथितस्त्वं पतिः पुरा । साम्प्रतं ज्ञापितश्चासि, मम विद्याधरेश्वरैः ॥ १९४ ॥
तत् त्वां प्रतिप्रदानेऽस्याः, का नाम प्रभुता मम ? ।
किन्तु प्रतिज्ञानिर्वाहोऽप्यस्यास्त्वय्येव तिष्ठति ॥ १९५ ॥
निष्कारणोपकर्तारः, क्व नाम स्युर्भवादृशाः ? । दृष्टः किं विष्टपोज्जीवी, यदि वा न दिवाकरः ? ॥ १९६ ॥
एवं वदति सानन्दं, विद्याधरनरेश्वरे । ज्ञात्वा वृत्तान्तमाजग्मे, तत्र विक्रमबाहुना ॥ १९७ ॥
सङ्गमस्तत्र चान्योन्यमुभयोरपि भूभुजोः । प्रशस्यः समभूद् गङ्गा-कालिन्दीस्रोतसोरिव ॥ १९८ ॥

१ °जर्य्यं रि° खंता० २ °थास्तिगैः ॥ खंता० ॥ ३ °स्यास्तु सोऽवतिष्ठते पाता० ॥

ततः पवनवेगोऽपि, नृपं नत्वेदमब्रवीत् । भृत्योऽस्मि विक्रमक्रीतस्ताताहं युगबाहुना ॥ १९९ ॥
मणिचूडादयस्तत्र, सर्वे विद्याधरेश्वराः । राज्ञा समर्प्य सौधानि, सत्कृता वसना-ऽशनैः ॥ २०० ॥
पुरीपरिसरे रम्ये, तत्र संसूज्य मण्डपम् । सुधर्मायाः सधर्माणं, कार्मणं विश्वचक्षुषाम् ॥ २०१ ॥
परितः कारयामास, मांसलान् भूमिवासवः । मञ्चान् विमानसन्तानमानमुद्रामलिम्लुचान् ॥ २०२ ॥
॥ युग्मम् ॥
सकौतुकप्रपञ्चेषु, मञ्चेष्वथ यथायथम् । भूचराः खेचराः सर्वे, निषेदुर्मेदुरश्रियः ॥ २०३ ॥
ततो विक्रमबाहुश्च, मणिचूडश्च पार्थिवौ । निविष्टौ मण्डपे तत्र, चन्द्रा-ऽर्काविव पर्वणि ॥ २०४ ॥
सप्रागल्भ्येषु सभ्येषु, स्थितेषु स्मेरविस्मयम् । आसीनेषु ससम्मर्दं, कोविदानां गणेषु च ॥ २०५ ॥
स्वदेश-परदेशेभ्योऽभ्यागतेषु सकौतुकम् । अपरेष्वपि लोकेषु, निषण्णेषु यथायथम् ॥ २०६ ॥
एत्य लक्ष्मी-सरस्वत्योरिव जङ्गमसङ्गमः । आसाञ्चक्रे कुमारोऽसौ, पादपद्मान्तिके पितुः ॥ २०७ ॥
॥ विशेषकम् ॥
ततोऽनङ्गवती तत्र, मूर्त्तेवाज्ञा मनोभुवः । क्षीरोदनिर्गतेव श्रीः, कलाकेलिरिवाङ्गिनी ॥ २०८ ॥
याप्ययानात् समुत्तीर्य, प्रतीहारीभिरावृता । सानन्दमिन्दुलेखेव, तारकानिकराञ्चिता ॥ २०९ ॥
प्रणम्य चरणौ पित्रोः, पादाङ्गुष्ठार्पितेक्षणा । निषसादाग्रतो लोकलोचनाञ्चलवीजिता ॥ २१० ॥
॥ विशेषकम् ॥
राजात्मजागुरुः प्राह, कुमार ! क्रियतामयम् । राजपुत्रीकृतप्रश्नचतुष्टयविनिर्णयः ॥ २११ ॥
अभ्यधान्नृपपुत्रोऽथ, पित्रोरानन्दमुद्गिरन् । उच्चैर्वाचंयमीभूय, जनैः साक्षेपमीक्षितः ॥ २१२ ॥
याऽग्रेऽस्ति स्वर्णपाञ्चाली, निर्वाचालीकृतानना । कर्ता मद्वचनादेषा, समस्तप्रश्ननिर्णयम् ॥ २१३ ॥
ततः सा बालिका पाञ्चालिका साऽप्यार्ययैकया । उच्चैरुच्चेरतुः प्रश्नमुत्तरं च क्रमादिदम् ॥ २१४ ॥
तद्यथा—
कः सकलः ? सुकृतरुचिः, कः सद्बुद्धिर्विधेयकरणगणः ।
कः सुभगः ? शुभवादी, को विश्वजयी ? जितक्रोधः ॥ २१५ ॥
ततस्तुष्टेषु सभ्येषु, स्तुवत्सु गुणवत्सु च । कुमारी सचमत्कारं, कुमारमपि च दृशा ॥ २१६ ॥
तं वधू-वरसम्बन्धबन्धं विदधतो विधेः । तदाऽनौचित्यकारित्ववाच्यमुन्मूलितं जनैः ॥ २१७ ॥
विप्राणां मन्त्रनिर्घोषैर्जनानां हर्षनिःस्वनैः । बन्दिकोलाहलैस्तूर्यैः, शब्दाद्वैतं तदाऽभवत् ॥ २१८ ॥
अथ मौहूर्त्तिकादिष्टे, लग्ने सर्वग्रहेक्षिते । क्षितेरधिपती पाणिं, ग्राहयामासतुः सुतौ ॥ २१९ ॥
वधू-वरं च हस्त्यश्व-रथा-ऽलङ्करणांशुकैः । अर्चयामासतुः स्नेह-विभव-प्राभवोचितैः ॥ २२० ॥
पाठसिद्धाश्च साध्याश्च, तत्तत्कर्मसु कर्मठाः । जामात्रे प्रददौ विद्या, विद्याधरनरेश्वरः ॥ २२१ ॥
सप्रपञ्चमहामञ्चमुदारद्वार-तोरणम् । उत्पताकं विशामीशस्ततः प्रावीविशत् पुरम् ॥ २२२ ॥
सम्मान्य मणिचूडादीन्, विद्याधरधराधवान् । राजधानीं निजनिजां, राजा हृष्टो विसृष्टवान् ॥ २२३ ॥
नृपः पवनवेगोऽपि, गोपिताविनयस्ततः । सत्कृत्य कृत्यदक्षेण, प्रैषि विक्रमबाहुना ॥ २२४ ॥
आपृच्छ्य पौरधौरेयानभ्यर्च्य पुरदैवतान् । विमोच्य बन्धनक्षिप्तान्, दीनादीननुकम्प्य च ॥ २२५ ॥

---

१ स्तुतिचत्सु गुणोच्चयम् । कुमा° पाता० ॥

पुण्यपात्राय पुत्राय, दत्त्वा राज्यश्रियं स्वयम् । नृपेणान्यैः सुदुष्प्रापा, संयमश्रीरुपाददे[1] ॥ २२६ ॥
युगबाहुमहीनाथो, विद्यासिद्ध्याऽतिदुर्धरः । नृपांह्रिपान् नतिं निन्ये, हेलयैव महाबलः ॥ २२७ ॥
तथा मनोरथारामसफलीकारकारणम् । धर्ममाराधयामास, मनो-वचन-कर्मभिः ॥ २२८ ॥
मणिचूडनृपेणापि, स्वयं दीक्षां जिघृक्षुणा । युगबाहुनृपश्चक्रे, सर्वविद्याधरेश्वरः ॥ २२९ ॥
इति जन्मान्तरोपात्ततपःसम्भूतवैभवः । आराधयदिदं राज्यद्वयं लोकद्वयं च सः ॥ २३० ॥

इति नृपयुगबाहोः सच्चरित्रं पवित्रं,
तव सचिवशचीश ! स्पष्टमेतत्[2] प्रदिष्टम् ।
सततमपि निषेव्यं सिद्धिकामैः प्रकामं,
निरुपमसुखलक्ष्मीकेलिदीपस्तपस्तत् ॥ २३१ ॥

**॥ इति श्रीविजयसेनसूरिशिष्यश्रीमदुदयप्रभसूरिविरचिते श्रीधर्माभ्युदयनाम्नि श्रीसङ्घपतिचरिते लक्ष्म्यङ्के महाकाव्ये तपःप्रभावोपवर्णनो युगबाहुचरितं[3] नाम नवमः सर्गः ॥**

मुष्णाति प्रसभं वसु द्विजपतेर्गौरी[4]गुरुं लङ्घयन्,
नो धत्ते परलोकतो भयमहो ! हंसापलापे कृती ।
उच्चैरास्तिकचक्रवालमुकुट ! श्रीवस्तुपाल[5] ! स्वयं,
भेजे नास्तिकतामयं तव यशःपूरः कुतस्त्यामिति ? ॥ १ ॥
आयाताः कति नैव यान्ति कति नो यास्यन्ति नो वा कति,
स्थानस्थाननिवासिनो भवपथे पान्थीभवन्तो जनाः ? ।
अस्मिन् विस्मयनीयबुद्धिजलधि[6]र्विध्वस्य[7] दस्यून् करे,
कुर्वन् पुण्यनिधिं[8] धिनोति वसुधां श्रीवस्तुपालः परम् ॥ २ ॥
॥ ग्रन्थाग्रम्[9] २४७ । उभयम् २७९३ ॥

---

१ °मश्रीः समाददे खंता० पाता० ॥ २ °मेवोपदि° खंता० ॥ ३ °रितनामा नव° पाता० ॥ ४ °पतेर्गौरी° खंता० पाता० ॥ ५ °ल ! स्फुटां. भेजे खंता० पाता० ॥ ६ °लधेर्वि° पाता० ॥ ७ °ध्वस्तद° वता० ॥ ८ °निधेर्धिनो° पाता० ॥ ९ सर्गग्रन्था° खंता० ॥

## दशमः सर्गः ।

कार्मणं शर्मलक्ष्मीणां, मूलं धर्ममहीरुहः । आस्पदं सम्पदामेकमिदं दीनानुकम्पनम् ॥ १ ॥
श्रीमन्नेमिजिनेनेव, तदिदं बुद्धिशालिना । पालनीयं प्रयत्नेन, लोकोत्तरफलार्थिना ॥ २ ॥

### दीनानुकम्पायां श्रीनेमिजिनचरितम्

इहैव भरतक्षेत्रे, जम्बूद्वीपविभूषणे । अस्ति स्वर्गोपमं धाम्ना, नाम्नाऽचलपुरं पुरम् ॥ ३ ॥
गृहान् सप्तक्षणान् यत्र, वीक्ष्य सप्ताश्वसप्तयः । क्षणं स्खलन्ति मध्याह्ने, स्फुटं कृतकुटीभ्रमाः ॥ ४ ॥
श्रीविक्रमधनो नाम, तत्रासीदीशिता भुवः । यदसौ यमुनाधाम्नि, मग्ना यान्ति द्विषो दिवि ॥ ५ ॥
रेजे रणाजिरं यस्य, भिन्नेभरद-मौक्तिकैः । छिन्नवैरियशोवृक्षशाखाकुसुमसन्निभैः ॥ ६ ॥
शम्भोरुमेव रम्भोरुरम्भोरुहविलोचना । धारिणीति प्रिया तस्य, बभूव सहचारिणी ॥ ७ ॥
अन्यदाऽसौ निशाशेषे, सुखसुप्ता व्यलोकयत् । स्वप्नान्तर्मञ्जरीमञ्जुसहकारकरं नरम् ॥ ८ ॥
जगाद सोऽप्यसौ देवि !, सहकारमहीरुहः । कल्पपादपकल्पश्रीरारोप्यस्त्वद्गृहाङ्गणे ॥ ९ ॥
ततश्चोद्धारमुद्धारमयमारोपितो मया । आम्रो नवमवेलायां, फलिताऽनवमं फलम् ॥ १० ॥
अत्रान्तरे स्फुरत्तोषैः, पेठे मङ्गलपाठकैः । प्रभाते भाषया पक्वरसालरससारया ॥ ११ ॥
अद्वितीयफलोद्भासिभास्वदुद्गमकारणम् । विभात्यभिनवश्चूतद्रुरिवायं प्रगेक्षणः ॥ १२ ॥
अथोत्थाय महीनाथवल्लभा विकसन्मुखी । राज्ञे विज्ञपयामास, स्वप्नवृत्तान्तमद्भुतम् ॥ १३ ॥
नृपोऽप्यूचे सुतो भावी, भवत्याः कश्चिदुत्तमः । न जानीमस्तु यत्तस्य, वारानारोपणं नव ॥ १४ ॥
अथ गर्भं बभारैषा, निर्भरानन्दशालिनी । शस्यदोहदसन्दोहसूचिताद्भुतलक्षणम् ॥ १५ ॥
वासरेष्वथ पूर्णेषु, पूर्णेन्दुमिव सुन्दरम् । असूतासौ सुतं पूर्णमासीवासीमतेजसम् ॥ १६ ॥
दशाहानन्तरं तस्य, सुतस्य जगतीपतिः । आनन्दवर्द्धितोत्साहो, धन इत्यभिधां व्यधात् ॥ १७ ॥
वर्द्धमानवपुर्लक्ष्मीर्नूतनेन्दुरिव क्रमात् । सकलाः स कलाः प्राप, स्पष्टदृष्टाष्टधीर्गुणः ॥ १८ ॥
असौ भाग्योद्यतश्रीकः, सौभाग्यरुचिरद्युतिः । अद्वितीयकलाशाली, द्वितीयमभजद् वयः ॥ १९ ॥
यौवराज्याभिषेकेऽथ, निर्वृत्ते नृपनन्दनः । नानाविधाभिः क्रीडाभिश्चिक्रीड सुखलालसः ॥ २० ॥
सवयोभिर्महामात्यपुत्रैर्मित्रैः समन्वितम् । धनं वनगतं कश्चिदेवमेत्य व्यजिज्ञपत् ॥ २१ ॥
आज्ञापितोऽस्मि देवेन, यद् दूतं सिंहभूभुजः । मेलयामुं कुमारस्य, मान्यमस्य च वाचिकम् ॥ २२ ॥
उद्यानस्य बहिः सोऽयं, विद्यतेऽद्यापि सुप्रभो ! । समादिश समायातु, यातु वा साम्प्रतं किमु ? ॥ २३ ॥
स राजपुरुषो राजकुमारानुमतादथ । प्रावेशयदमुं दूतमन्तःसभमुरुत्वरः ॥ २४ ॥
विशिष्टे वेत्रिणाऽऽदिष्टे, निविष्टमथ विष्टरे । सविस्मयं वचोऽवादीज्जगतीपतिनन्दनः ॥ २५ ॥

---

१ दिवम् खंता० पाता० ॥ २ °गुणाः खंता० ॥ ३ °मेवं व्य° खंता० ॥

क्षेमोऽस्ति पाटलीपुत्रपतेः सिंहमहीभुजः ? । कार्येण केन प्राप्तोऽसि, झटित्येवं निवेदय ॥ २६ ॥
स वचस्वी ततः प्राह, तस्याक्षेमः कुतो भवेत् ? । श्रीविक्रमधनो यस्य, मित्रमत्रैस्तुमानसः ॥ २७ ॥
परमस्यां तु वेलायां, शीघ्रं यदहमागतः । कारणं शृणु तत्र त्वं, प्रयोजनमिदं तव ॥ २८ ॥
कलत्रे विमलानाम्नि, स्वामिन्! सिंहमहीभुजः । आस्ते धनवती पुत्री, सौन्दर्यस्येव देवता ॥ २९ ॥
तत्र चित्रकरं कञ्चिद्, दिव्यचित्रधरं नरम् । एषा रेखाविशेषज्ञाऽपश्यद् भूपस्य नन्दनी ॥ ३० ॥
व्यलोकयच्च तच्चित्रे, कञ्चिन्नृपतिनन्दनम् । हृदयानन्दनं राज्यलक्षणैः शुभशंसिभिः ॥ ३१ ॥
तमथ प्राह सा चित्रं, यत् त्वयैतद् विनिर्ममे । तत् कलाख्यापनायैव ?, प्रतिच्छन्दोऽथ कस्यचित् ? ॥ ३२ ॥
सोऽप्युवाच कुमारी तच्चित्रं यद् वर्ण्यते मम । विज्ञानाद्भुतमप्येतद्, विगोपककरं परम् ॥ ३३ ॥
प्रतिच्छन्दो हि यस्यायमसौ सोमसमाकृतिः । यदि दृग्गोचरं गच्छेत्, तच्चित्रं स्यान्न चित्रकृत् ॥ ३४ ॥
सतां चित्ते कृतावासः, स यशःकुसुमेषुभिः । वशीकरोति त्रैलोक्यं, द्वितीय इव मन्मथः ॥ ३५ ॥
समाकर्ण्येति तद्वाचं, सा चन्द्रवदनाऽवदत् । स कुत्र ? कस्य वा पुत्रस्तस्य किंनाम नाम वा ? ॥ ३६ ॥

सोऽपि प्राहाऽचलपुरे, श्रीविक्रमधनात्मजः ।
धनोऽस्ति मूर्तिस्तस्यैषा, मयाऽलेखि स्वकौतुकात् ॥ ३७ ॥

श्रुत्वेति तत्प्रभृत्येषा, विशेषात् त्वयि रागिणी । क्रीडां पीडामिव ज्ञात्वा, कन्यान्तःपुरमाययौ ॥ ३८ ॥
त्वदेकतानचित्तेयमपि व्यापारितेन्द्रिया । त्वया व्याप्तं जगद् वेत्ति, योगिनीव परात्मना ॥ ३९ ॥
एकं विहाय त्वां देव!, सा महीपतिनन्दनी । स्त्रीरूपमथवा क्लीबं, मन्यते जगदप्यदः ॥ ४० ॥
देवीमुखादिदं सर्वं, वृत्तान्तं मेदिनीपतिः । विज्ञाय गुणविज्ञाय, भवते मां व्यसर्जयत् ॥ ४१ ॥
मामत्रागामुकं मत्वा, मेदिनीपतिनन्दनी । अमुं लेखप्रतीहारं, हारं दूतमिवाऽऽर्पयत् ॥ ४२ ॥
उक्त्वेति दूतो लेखेन, सहितं चरणान्तिके । कुमारस्यामुचन्मुक्ताहारं तत्प्राभृतीकृतम् ॥ ४३ ॥
छोटयित्वा ततो लेखमेष वेषजितस्मरः । जवादवाचयत् तोषचयपोषचमत्कृतः ॥ ४४ ॥
भवन्मूर्तिनिरस्तेन, कामेन ज्वालितं मम । मानसं त्वत्कृतावासं, सिक्तं नेत्राम्बुबिन्दुभिः ॥ ४५ ॥
न शान्ति याति तन्नाथ!, शान्ति नय दयां कुरु । दृढारम्भपरीरम्भदम्भपीयूषनिर्झरैः ॥ ४६ ॥
परितः परितप्ताङ्गीं, मदनज्वलनार्चिषा । वर्धिष्णुप्रेमकल्लोले, क्षिप मां निजमानसे ॥ ४७ ॥
इति लेखार्थसम्भारं, हारं च हृदये दधौ । स्निग्धोज्ज्वलस्फुरद्वर्णं, कुमारः कारणं मुदाम् ॥ ४८ ॥
विमृश्याथ कुमारोऽपि, प्रतिलेखं लिलेख सः । शृङ्गारेणेव मूर्तेन, मृगनाभिमयाम्भसा ॥ ४९ ॥
रतिरूपसपत्नीं त्वां, दधानस्य ममोरसि । रुषा रतिपतिः शङ्के, किरत्यविरतं शरान् ॥ ५० ॥
गुणैः श्रवणमार्गेण, तवाध्यासितमेव मे । मनो विविशुरक्षाणि, सर्वाण्यपि सुखेप्सया ॥ ५१ ॥
इति लेखेन दानेन, मानेन च कृतार्थितः । कुमारेण चरः प्रैषि, सम्भृतप्राभृतोच्चयः ॥ ५२ ॥
सत्कथाभिरथैतस्य, भूपो भूपसुताऽपि सा । कलयामासतुस्तोषं, कुमारागमकाङ्क्षया ॥ ५३ ॥
विनीतः सोऽपि निर्णीतलग्नस्योपरि भूपभूः । प्रयाणैः कैश्चन प्राप, तत् पुरं सपरिच्छदः ॥ ५४ ॥
सम्मुखाभ्यागतेनाथ, सिंहेन सह भूभुजा । प्रविवेश पुरीं वीरो, नृत्यन्तीमिव केतुभिः ॥ ५५ ॥
पुरे प्रतिगृहं रत्नस्तम्भेषु प्रतिबिम्बितः । श्लिष्यमाणो मृगाक्षीभिः, क्षणं गलितचेतनम् ॥ ५६ ॥

१ °त्रस्तमा° खंता० पाता० ॥ २ °दत्तपी° खंता० ॥

मनस्सु पुरनारीणां, मनोभूनगरेष्विव । एककालं विशन् विर्वो, दर्शयन् बहुरूपिणीम् ॥ ५७ ॥
स रत्नभित्तितेजोभिरस्फुटद्वारभूमिकम् । प्रविवेश नृपावासं, दौवारिकगिरा परम् ॥ ५८ ॥ विशेषकम् ॥
स क्रमेणाथ भूपालसौधमूर्धानमासदत् । पूर्वपर्वतशृङ्गाग्रविभागमिव भानुमान् ॥ ५९ ॥
अथ नारीजने भूरिभूषणद्विगुणद्युतौ । धवलध्वनिपीयूषसञ्जीवितमनोभवे ॥ ६० ॥
वेदोच्चारचमत्कारसम्प्रतापत्रयीतनौ । ब्राह्मणानां गणे स्पर्धनिरुद्धसदनाङ्गणे ॥ ६१ ॥
काहलानलयन्त्रोत्थकिङ्करानमारुतैः । दीपिते जनचित्तेषु, मकरध्वजपावके ॥ ६२ ॥
अद्भुतं वाद्यमानेषु, मृदङ्गेषु मुहुर्मुहुः । अम्भोधरध्वनिभ्रान्त्या, नृत्याकुलकलापिषु ॥ ६३ ॥
कुमारी च कुमारश्च, योजयित्वा कराम्बुजे । ततः पुरोधसा वह्नेः, कारितौ तौ प्रदक्षिणाम् ॥ ६४ ॥

॥ पञ्चभिः कुलकम् ॥

आसीदश्रु न चित्राय, होमधूमे विसर्पति । तदाऽऽसन्ने तयोर्वह्नौ, कम्पो विस्मयभूरभूत् ॥ ६५ ॥
परस्परं तयोः पाणिस्पर्शे पीयूषवर्षिणि । अमुञ्चदङ्कुरान् क्षेत्रे, शृङ्गारः पुलकच्छलात् ॥ ६६ ॥
सर्वाङ्गपूर्णयोः कामरसेन भृशमेतयोः । पाणिपीडनतः स्वेदच्छलात् किञ्चिद् बहिः स्थितम् ॥ ६७ ॥
तदा कुमारवक्त्रेन्दुः, कोऽप्यपूर्वः स्मयं दधौ । कुमारीवदनाम्भोजसमुल्लासनलालसकः ॥ ६८ ॥
नमश्चक्रे क्रमेणाथ, गुरुवर्गं नृपाङ्गजः । तया दयितया सार्कं, वद्धाञ्चलविलग्नया ॥ ६९ ॥
कतिचिद् वासरांस्तत्र, स्थित्वा नृपतिनन्दनः । प्रयातः स्वपुरीं रेमे, समं वनितया तया ॥ ७० ॥
मुनिर्वसुन्धरो नाम, पवित्रितवसुन्धरः । अन्येद्युराजगामात्र, चतुर्ज्ञानधरः पुरे ॥ ७१ ॥
नमस्कर्तुममुं राजा, कुमारेण समं ततः । ययौ पुरवनीखण्डमखण्डगुरुभक्तिकः ॥ ७२ ॥
मुदा वसुन्धराधीशो, वसुन्धरमुनीश्वरम् । प्रणम्य पादपीठाग्रे, क्षितिपीठे निविष्टवान् ॥ ७३ ॥
नवस्थानरसालद्रुन्यासस्वप्नविचारणाम् । अपृच्छत् पृथिवीभर्ता, प्रेयसीप्रेरितस्ततः ॥ ७४ ॥
सर्वज्ञं मनसा पृष्ट्वा, समाचष्ट मुनीश्वरः । कुमारोऽयं जिनो भूत्वा, फलिता नवमे भवे ॥ ७५ ॥
श्रुत्वेति प्रीतिमान् भूपो, मुनिं नत्वा पुरं गतः । वाहव्यूहखुरोद्भूतधूलिधूसरवासरः ॥ ७६ ॥
स कुमारोऽन्यदा केलिशाली गत्वा वनावनौ । चिरं चिक्रीड सखिभिः, कलभैरिव कुञ्जरः ॥ ७७ ॥
अथाऽपश्यदसौ कञ्चिद्, भूमौ निपतितं मुनिम् । निरालम्बवियद्भ्रान्तिखिन्नं रविमिवाचिरात् ॥ ७८ ॥
आश्वास्य चन्दनाम्भोभिरनिलैश्चानुलोमिकैः । चक्रे कुमारः सच्छायं, मुनिं धर्मद्रुमोपमम् ॥ ७९ ॥
उत्तारितः कुमारेण, विपदम्भोनिधेर्मुनिः । तमुत्तारयितुं सोऽपि, तत् प्रारेभे भवान्तरात् ॥ ८० ॥
तत्कालं च समारोप्य, तच्चित्ते वाक्सुधारसैः । सम्यक्त्वपादपस्तेन, शतशाखो व्यतन्यत ॥ ८१ ॥
कुमारस्योपरोधेन, स्थित्वाऽथ स्तोकवासरान् । कृतावद्यपरीहारो, विहारं विदधे मुनिः ॥ ८२ ॥
बन्धुना धनदेवेन, धनदत्तेन चान्वितः । सवधूको धनोऽन्येद्युर्व्रतं प्राप वसुन्धरात् ॥ ८३ ॥
तप्त्वा तपांसि भूयांसि, क्षीणायुःकर्मबन्धनाः । सौधर्मकल्पे सर्वेऽपि, श्रायसीं श्रियमाश्रयन् ॥ ८४ ॥
अत्रैव भरतक्षेत्रे, वैताढ्यगिरिमूर्धनि । उत्तरश्रेणिरोचिष्णुसूरतेजोऽभिधे पुरे ॥ ८५ ॥
अरातिध्वान्तसूरस्य, सूरस्य पृथिवीपतेः । विद्युन्मत्यभिधानाया, देव्याः कुक्षिसरोरुहे ॥ ८६ ॥

---

१ °लालसः खंता० ॥ २ तदा द° खंता० ॥ ३ °रणम् खंता० पाता० ॥ ४ कुमारोऽप्यन्यदा पाता० ॥ ५ °वार्णवात् खंता० पाता० ॥ ६ °लं स समा° पाता० ॥

जीवो धनकुमारस्य, पुण्याविष्टस्त्रिविष्टपात् । जातश्चित्रगतिर्नाम, हंसचित्रगतिः सुतः ॥ ८७ ॥
॥ विशेषकम् ॥

विद्यावैदग्ध्यदुग्धाब्धिकेलिकल्लोलितैरयम् । विद्याधराणामानन्दकन्दं कन्दलितं व्यधात् ॥ ८८ ॥
किञ्चात्रैव गिरौ व्याप्तव्योम्नि वैताढ्यनामनि । दक्षिणश्रेणिकोटीरे, नगरे शिवमन्दिरे ॥ ८९ ॥
अनङ्गसेनसंज्ञस्य, मेदिनीहृदयेशितुः । पत्न्यां शशिप्रभानाम्न्यां, शशिप्रभमुखत्विषि ॥ ९० ॥
च्युत्वा धनवतीजीवः, सोऽपि सौधर्मतस्ततः । धाम्ना रत्नवतीवाभून्नाम्ना रत्नवती सुता ॥ ९१ ॥
॥ विशेषकम् ॥

कलाकलापकुशलां, क्रमादाक्रान्तयौवनाम् । उत्सङ्गसङ्गिनीमेनां, विधाय वसुधाधवः ॥ ९२ ॥
पङ्कजिन्या इवामुष्याः, कः स्यादर्क इव प्रियः ? । दैवज्ञमित्यभाषिष्ट, निविष्टं विष्टरे पुरः ॥ ९३ ॥
॥ युग्मम् ॥

अथागदत सद्यस्कज्ञानामृतभृताऽमुना । अगाधज्योतिषग्रन्थसिन्धुमन्थानभूभृता ॥ ९४ ॥
प्रौढप्रधनपाथोधितरणैकतरण्डकम् । रणे कृपाणमाच्छिद्य, यस्ते हस्ते ग्रहीष्यति ॥ ९५ ॥
श्रीसिद्धायतने यस्य, मूर्धनि स्वर्धुनीनिभा । स्तुतिं प्रस्तुवतो दिव्या, पुष्पवृष्टिर्भविष्यति ॥ ९६ ॥
स एव भवितैतस्याः, श्रीपतिप्रतिमः पतिः । शुद्धपक्षद्वयो हंस्या, राजहंस इवामलः ॥ ९७ ॥
॥ विशेषकम् ॥

इत्याकर्ण्य कृतप्रीतिः, स खेचरशिरोमणिः । प्रैषीज्ज्योतिषिकाग्रण्यं, प्रीणयित्वा विभूतिभिः ॥ ९८ ॥
कदाचिद् भरतक्षेत्रे, व्योम्नि चित्रगतिश्चरन् । आर्त्तं किञ्चित् पुरं वीक्ष्य, मङ्क्षूत्तीर्णो भुवं दिवः ॥९९॥
तत्र भद्राकृतिं कञ्चिदपृच्छत् खेचरो नरम् । केयं पुरी ? नृपः कोऽस्यां ?, दुःखं किमिदमप्यहो ! ?॥१००॥
ज्ञाताशेषकथो वाचमथोवाच स पूरुषः । अलङ्कृतमहीचक्रमिदं चक्रपुरं पुरम् ॥ १०१ ॥
प्रभुरत्रास्ति सुग्रीवः, प्रग्रीवः क्षितिपश्रियः । प्रिये यशोमती-भद्रे, तस्य ख्याते उभे शुभे ॥ १०२ ॥
सुमित्रः सूनुरेकस्या, जगन्मित्रमजायत । द्वितीयस्याः पुनः पद्मश्छद्मनः सद्म जङ्गमम् ॥ १०३ ॥
जीवत्यस्मिन् न मे सूनोर्भावि भूपालवैभवम् । भद्रेति सुचरित्राय, सुमित्राय विषं ददौ ॥ १०४ ॥
विषे ध्वान्त इवोदीर्णे, चरितैः श्यामया तया । सुमित्रो व्यसनं प्रापच्चित्रं पद्मे ननु स्मितम् ॥ १०५ ॥
म्लानिं गते सुमित्रेऽस्मिन्, मित्रवत् तेजसां निधौ । युक्तं चक्रपुरस्यास्य, दुःखं दुःसहतां गतम् ॥१०६॥
इति चित्रगतिः श्रुत्वा, तमुज्जीवयितुं जवात् । परोपकारव्यसनी, विवेश नृपवेश्मनि ॥ १०७ ॥
स मन्त्राम्भः सुमित्राङ्गे, बन्धुदृग्भिः सहाक्षिपत् ।
स्मितं चक्षुः सुमित्रस्य, तद्वान्धवमुखैः समम् ॥ १०८ ॥
पुनरुज्जीविते जाते, सुमित्रे नेत्रपात्रताम् । दुःखबाष्पाम्बु बन्धूनां, प्रमोदाश्रुपदं ययौ ॥ १०९ ॥
अथ सोमे सुमित्रेऽस्मिंस्तापं हरति देहिनाम् । पद्मे सङ्कुचिते भद्रा, भृङ्गीव क्वचिदप्यगात् ॥ ११० ॥
अथ जीवितदातारं, तदा तारं यशोभरैः । तं विद्याधरमानन्दी, ववन्दे नृपनन्दनः ॥ १११ ॥
ततः पितृभ्यां पादान्तप्रणतः स्नपितः सुतः । नेत्रकुम्भमुखोद्गीर्णैरानन्दाश्रुजलप्लवैः ॥ ११२ ॥
विद्याधरकुमारोऽपि, ताभ्यामालिङ्ग्य निर्भरम् । अनिच्छन्नपि सच्चक्रे, वसना-ऽऽभरणादिभिः ॥ ११३ ॥
स्नेहादप्रेषितेनाथ, स चित्रगतिना सह । सुमित्रः कुरुते क्रीडां, विष्णुनेव पुरन्दरः ॥ ११४ ॥

अन्येद्युः सुयशा नाम, केवली प्राप तत् पुरम् । जगाम तं नमस्कर्तुं, सुग्रीवः सह बान्धवैः ॥ ११५ ॥
तं प्रणम्योपविश्याथ, देशनान्ते विशांपतिः । पप्रच्छ क्व नु सा भद्रा, परित्रस्य ययाविति? ॥ ११६ ॥
सा नश्यन्ती हृता चौरैर्विक्रीता वणिजो गृहे । नष्टा ततोऽपि दावाग्निदग्धा दुर्गतिमभ्यगात् ॥ ११७ ॥
अतिशोच्यमनन्तं सा, संसारं विचरिष्यति । इत्थं स कथयामास, केवली नृपतिं प्रति ॥ ११८ ॥
तदाकर्ण्य नृपो दध्यौ, यत्कृते साऽकृतेदृशम् । सोऽस्त्यत्र नरके सा तु, गता वत्सलता हहा ! ॥ ११९ ॥
इत्थं खिन्नः सुमित्राय, दत्त्वा राज्यं भुवो विभुः । कश्चिद् देशं च पद्माय, निर्मायो व्रतमग्रहीत् ॥ १२० ॥
ततः सुमित्रधात्रीशमापृच्छ्य कथमप्यमुम् । गतश्चित्रगतिस्तेन, सत्कृतो नगरं निजम् ॥ १२१ ॥
इतो रत्नवतीभ्राता, कमलोऽनङ्गसेनभूः । सुमित्रभगिनीं कूटात्, कलिङ्गस्याहरत् प्रियाम् ॥१२२॥
स्वमित्रस्य सुमित्रस्य, तामानेतुं सहोदराम् । वेगाच्चित्रगतिः प्राप, नगरं शिवमन्दिरम् ॥ १२३ ॥
तं स्वमित्रस्वसुर्दीनवक्त्रायाश्चाटुकारिणम् । उद्यानेऽत्रासयच्चित्रगतिः कमलमाकुलम् ॥ १२४ ॥
कोपादनङ्गसेनोऽपि, पुत्राभिभवसम्भवात् । योद्धुं चित्रगतिं सैन्यैरदैन्यैर्निरगात् पुरात् ॥ १२५ ॥
उद्यन्महाः सहानेन, चक्रे चित्रगतिर्युधम् । क्रमभ्रष्टाखिलास्त्रेण, वैलक्ष्यमुपगच्छता ॥ १२६ ॥
अनङ्गसेनभूपालः, खड्गरत्नमथास्मरत् । योद्धुमुद्धुरधैर्योऽसौ, समं सूनुविरोधिना ॥ १२७ ॥
अथ चित्रगतिर्मायातमःश्यामलिताम्बरः । राज्ञः कृपाणमाच्छिद्य, गृहीत्वा मित्रसोदराम् ॥ १२८ ॥
गत्वा चक्रपुरे तूर्णं, सुमित्रस्य समर्प्य च । आजगाम स वैताढ्यं, पूर्वाद्रिमिव भानुमान् ॥ १२९ ॥
॥ युग्मम् ॥

प्रौढपुत्रः सुमित्रोऽपि, विरक्तः संसृतौ कृती । व्रतमासाद्य जैनेन्द्रं, विचचार चिरं क्षितौ ॥ १३० ॥
आखेटकगतेनायमथ पद्मेन बन्धुना । पूर्वविद्वेषतः शल्यहतो निपतितः क्षितौ ॥ १३१ ॥
असावनन्तसंसारी, मत्तो भवति बान्धवः । शोचन्नेवं स्वमात्मानं, विपन्नः स महामुनिः ॥ १३२ ॥
बभूव ब्रह्मलोकेऽसौ, शक्रसामानिकः सुरः । अगण्यपुण्यनैपुण्यपण्याद्वैतनिकेतनम् ॥ १३३ ॥
दुष्टाहिदष्टः पद्मोऽपि, सप्तमं नरकं ययौ । मन्येऽसौ चरणे धृत्वा, कृष्टः कालेन कौतुकात् ॥ १३४ ॥
एकदाऽगमदानन्दी, नन्दीश्वरवरं प्रति । विद्याधरगणो बिभ्रदहम्पूर्विकया त्वराम् ॥ १३५ ॥
अथापूज्यन्त निःशेषगीतवाद्यादिकौतुकैः । विद्याधरकदम्बेन, भक्तिविभ्राजिना जिनाः ॥ १३६ ॥
कैः पुण्यैः पदमीदृक्षं, दुःखत्रासदमासदम्? । इदमत्रान्तरे दध्यौ, सुमित्रः स्वर्गितां गतः ॥ १३७ ॥
इति चिन्तयतश्चित्ते, मित्रं चित्रगतिः कृती । अतिप्रेम्णाऽवदातस्य, तदा तस्य स्मृतिं गतः ॥ १३८ ॥
नन्दीश्वरे स तं वीक्ष्य, कुर्वाणं जिनपूजनम् । आगाद् वेगेन तत्रैव, मित्रस्नेहेन मोहितः ॥ १३९ ॥
विद्याधरेषु शृण्वत्सु, स देवः कुर्वतः स्तुतिम् । मूर्ध्नि चित्रगतेर्हृष्टः, पुष्पवृष्टिं विसृष्टवान् ॥ १४० ॥
अथ चित्रगतिं सर्वे, गर्वमुन्मुच्य खेचराः । विस्मिताः पुष्पवर्षेण, नमश्चक्रुर्गुणाधिकम् ॥ १४१ ॥
बुबुधेऽनङ्गसेनोऽपि, स्मृत्वा गणकभाषितम् । पुष्पवृष्ट्याऽसियष्ट्या च, हृतया तं सुतापतिम् ॥ १४२ ॥
रत्नवत्यपि तं प्राप्य, पपावविरतं दृशा । मरुस्थलपथे पान्थाः, पाथःपूरमिवादरात् ॥ १४३ ॥
सोऽपि चित्रगतिर्वीक्ष्य, कैरवाक्षीमिमां तदा । मग्नामुदधरत् कष्टं, तल्लावण्यहृदे दृशम् ॥ १४४ ॥
परस्परमथैताभ्यां, गताभ्यामेकतामिव । स्वं मनः प्रेमसर्वस्वकोशाध्यक्ष इवार्पितम् ॥ १४५ ॥

१ युग्मम् खंता० ॥ २ सुमि° खंता० ॥

अथ स्वस्वपुरं प्रापुः, प्रीताः सर्वेऽपि खेचराः। हर्षमुत्कर्षयन्तोऽन्तः, स्तुत्या चित्रगतेस्तया ॥ १४६ ॥
श्रीसूरा-ऽनङ्गसेनाभ्यामादिष्टो गणकस्ततः। निश्चिकाय विवाहाय, रागिणोर्दिनमेतयोः ॥ १४७ ॥
विवाह्य रत्नवत्याऽथ, सूरश्चित्रगतिं सुतम्। राज्ये न्यस्य समं विद्युन्मत्या व्रतमुपाददे ॥ १४८ ॥
स जीवं धनदेवस्य, बन्धुं नाम्ना मनोगतिम्। धनदत्तस्य चपलगतिं च मुदमानयत् ॥ १४९ ॥
मृतस्य मणिचूडस्य, स्वसामन्तस्य नन्दनौ। विभज्य विभवं राज्ञा, शशि-सूरौ च तोषितौ ॥ १५० ॥
एकद्रव्याभिलाषेण, कदाचिद् युध्यतोस्तयोः। मृतयोर्वार्तया राजा, वैराग्यं हृदि भेजिवान् ॥ १५१ ॥
सार्द्धं स्वकीयबन्धुभ्यां, वध्वा च वसुधाधवः। सूरेर्दमधराद् भेजे, व्रतं खड्गाभतीव्रतम् ॥ १५२ ॥
पुरं पुरन्दरो नाम, पुरन्दरपराक्रमः। अपालयन्नृपालस्य, तस्य सूनुरनूनधीः ॥ १५३ ॥
पादपोपगमं कृत्वा, प्राप चित्रगतिः कृती। माहेन्द्रकल्पे देवत्वमृभुप्रभुनिभप्रभः ॥ १५४ ॥

अस्ति प्रत्यग्विदेहेषु, देशः पद्माख्यया महान्।
यत्र ग्रामाऽन्नराशीनां, शैलानामपि नान्तरम् ॥ १५५ ॥

पुरं सिंहपुरं तत्र, विद्यते विदितं भुवि। सौधाग्रस्त्रीमुखाब्जानां, यत्रेन्दुर्दासवत् पुरः ॥ १५६ ॥
हरिणन्दीति तत्रासीदवनीपालपुङ्गवः। विभाति यत्प्रतापस्य, तप्तांशुः प्रतिहस्तकः ॥ १५७ ॥
स भेजे वल्लभामर्थिप्रियदः प्रियदर्शनाम्। यस्याः शस्यौ रति-प्रीत्योः, केलिशैलरुचौ कुचौ ॥ १५८ ॥
सोऽयं चित्रगतेर्जीवश्च्युत्वा माहेन्द्रकल्पतः। अपराजितनामाऽभूदुग्रधामा तदङ्गजः ॥ १५९ ॥
सखा विमलबोधाख्यस्तस्याभवदमात्यभूः। सहचारी सदा भानोरिव रश्मिसमुच्चयः ॥ १६० ॥
वाहाभ्यां वाहितावेतौ, बाह्यालीक्रमणेऽन्यदा। देशे दवीयसि गतावरण्ये पुण्यविक्रमौ ॥ १६१ ॥
तत्रावतीर्य तौ वीर्यविनिर्जितपुरन्दरौ। निन्यतुस्तोयतीरेषु, तृषार्त्तं तुरगद्वयम् ॥ १६२ ॥
अथ श्लथीकृताबन्धौ, विपन्नौ तौ तुरङ्गमौ। देशान्तरविहारश्रीनेत्रे इव तदा तयोः ॥ १६३ ॥
अथ तत्र स्थितावेतौ, निराशौ गलितश्रियौ। कलुषौ कलिमाहात्म्यान्न्यायधर्माविवाङ्गिनौ ॥ १६४ ॥
अत्रान्तरे नरः कोऽपि, हन्ये हन्ये वदन्निदम्। प्रदत्ताभयदानेन, कुमारेण स्थिरीकृतः ॥ १६५ ॥
स्थितो यावदसौ तत्र, तावदारक्षकाः क्षणात्। हत हतेति जल्पन्तोऽभ्याययुर्येयुवेगतः ॥ १६६ ॥
ततः समं कुमारेण, वधवारणकारिणा। तदाऽऽरक्षकसैन्यं तत्, प्रारेभे युद्धमुद्धतम्[1] ॥ १६७ ॥
करवालः कुमारस्य, ततो दलयतो रणे। बलस्यास्य प्रभावाब्धिमगस्तिरिव पीतवान् ॥ १६८ ॥
अथ ते व्यथितास्तेन, कुमारेणोद्भटा भटाः। आशु विज्ञापयामासुर्वेलित्वा भूभुजं निजम् ॥ १६९ ॥
तदाऽऽरक्षप्रतिक्षेपोद्दीप्रकोपः स भूपतिः। सनाथां दण्डनाथेन, प्राहिणोदसमां चमूम् ॥ १७० ॥
खड्गलेखा कुमारस्यावलेपजलधेस्ततः। इमां पराङ्मुखीचक्रे, वाहिनीमतुलत्वराम् ॥ १७१ ॥
अथ स्वयमयं राजा, समारुह्य मतङ्गजम्। सङ्ग्रामाय समारेभे, संरम्भं क्रोधदुर्धरः ॥ १७२ ॥
मन्त्रिपुत्रं कुमारोऽपि, व्यापार्य नररक्षणे। आरुरोह रणायोग्रमभिमानमतङ्गजम् ॥ १७३ ॥
नृपाङ्गजभुजेनाभादसिलेखा विकम्पिता। शिखेव मुक्ता वातास्ता, विरोधिवधसन्धया ॥ १७४ ॥
तद्भुजस्य यमस्येव, रोमाञ्चैर्मेचकद्युतेः। संहरन्ती रिपून् कृष्टा, जिह्वेवासिलता बभौ ॥ १७५ ॥
मनो मन्त्री भुजे मित्रं, मानो धनमसिर्बलम्। इति वीरो विजग्राह, स युक्तं सह भूभुजा ॥ १७६ ॥

१ °द्धमद्भुतम् खंता० ॥

अग्रे सैन्ये प्रणिधितो, ज्ञात्वा तं नृपनन्दनम् । रणं निर्मुच्य पप्रच्छ, कुशलं कोशलेश्वरः ॥ १७७ ॥
पितृमित्रं कुमारोऽपि, तं मत्वा मन्त्रिणो गिरा । नमश्चकार तत्कालाहङ्कारभ्रंशभासुरः ॥ १७८ ॥
सुता कनकमालाऽस्मै, कुमाराय महीभुजा । दत्ता प्रमथनाथाय, पार्वतीव हिमाद्रिणा ॥ १७९ ॥
अथ देशान्तरालोककौतुकायत्तचेतसौ । निशि निःसृत्य मन्त्रीश-धात्रीशतनुजौ गतौ ॥ १८० ॥
अथ तौ कानने क्वापि, कामिन्याः करुणारवम् । आकर्ण्य कालिकादेव्या, मन्दिरे जग्मतुर्जवात् ॥ १८१ ॥
समीपे वह्निकुण्डस्य, रुदतीं कामपि स्त्रियम् । वीरो व्यलोकयत् तत्र, क्रान्तां केनापि खड्गिना ॥ १८२ ॥
अथ तं प्रथितोत्साहः, कुमारः प्राह खड्गिनम् । न वेत्सि क्रूर ! रे ! भूमिं, मया सस्वामिकामिति ॥ १८३ ॥
विद्यते यदि ते शक्तिर्विधेहि प्रधनं ततः । इत्याकर्ण्य द्रुतं सोऽपि, चलितः कलितः क्रुधा ॥ १८४ ॥
समुल्लासितनिस्त्रिंशौ, रणाय स्फुरितौ ततः । एतावुत्पाटितोद्दण्डशुण्डादण्डाविव द्विपौ ॥ १८५ ॥
खड्गेन धारया धारां, वारयन्तौ मुहुर्मिथः । युयुधातेतरामेतौ, दन्ताभ्यामिव दन्तिनौ ॥ १८६ ॥
तमजेयतमं मत्वा, कुमारमसिना पुरः । क्रीडया पीडयामास, नागपाशप्रबन्धतः ॥ १८७ ॥
वल्लीबन्धानिव गजः, स जगत्कौतुकप्रदः । नृपसूनुर्बलेनैव, नागपाशानतुत्रुटत् ॥ १८८ ॥
लोचने वञ्चयित्वाऽथ, कुमारेण रणाङ्गणे । कालिन्दीस्रोतसेव द्रुररातिः पातितोऽसिना ॥ १८९ ॥
मूर्च्छा निमीलयामास, तस्येन्द्रियगणं ततः । समुल्लसत्तमःस्तोमा, पद्मखण्डमिव क्षपा ॥ १९० ॥
अथ पानीयमानीय, तं निषिच्य नृपाङ्गजः । चलच्चेलाञ्चलोन्मीलन्मारुतैरुदजीवयत् ॥ १९१ ॥
सम्प्रीतः सोऽपि मूर्च्छान्ते, भूपसूनुमभाषत । विघृष्य मूलिकामेतां, लेपं घातेषु देहि मे ॥ १९२ ॥
श्रुत्वेति भूपपुत्रोऽपि, चक्रे तस्य वचः क्षणात् । नीरे रेखेव तत्खड्गक्षतिर्देहे तदाऽमिलत् ॥ १९३ ॥
अथोत्थितः स वीरेण, काऽसौ ? कोऽसीति भाषितः । उद्बुद्धवदनाम्भोजमरन्दमधुरं वचः[3] ॥ १९४ ॥
आस्ते पुरश्रियां सीमा, पुरं श्रीरथनूपुरम् । तस्मिन्नमृतसेनाख्यः, क्षितिपः खेचरेश्वरः ॥ १९५ ॥
अस्ति कीर्तिमती नाम, तस्य कीर्तिमती प्रिया । रत्नमालाऽभिधा बाला, रतिरूपा तयोरियम् ॥ १९६ ॥
हरिणन्दिधराधीशतनुभूरपराजितः । अस्या भविष्यति पतिर्ज्ञानिनेति निवेदितम्[4] ॥ १९७ ॥
श्रीषेणनन्दनः शूरकान्तनामाऽस्मि खेचरः । लावण्यलहरीसिन्धुमेनां याचितवानहम् ॥ १९८ ॥
अपराजित एव स्यात्, प्रियो मे हरिणन्दिभूः । प्रविशाम्यथवा वह्निं, चक्रे निश्चयमित्यसौ ॥ १९९ ॥
अपहृत्य ततः कोपादानीतेयं मया वने । भक्तिभिः शक्तिभिश्चापि, चापलादर्थिता भृशम् ॥ २०० ॥
पूरयिष्यामि ते वह्निप्रवेशनियमं ततः । इत्युक्त्वा कृष्टनिस्त्रिंशे, मयि वीर ! त्वमागतः ॥ २०१ ॥
वितन्वति कथामित्थं, तत्र विद्याधरे तदा । पितरौ रत्नमालायाः, पुत्रीमीक्षितुमागतौ ॥ २०२ ॥
मन्त्रिपुत्रगिरा ताभ्यां, मत्वाऽयमपराजितः । रत्नमालां रतिमिव, प्रद्युम्नः परिणायितः ॥ २०३ ॥
विद्याधरैः कुमाराय, व्रणसंरोहणौषधीम् । चिन्तितार्थकरीं दत्त्वा, गुलिकां च क्वचिद् ययौ ॥ २०४ ॥
अथो यथागतं सर्वे, जग्मुस्तौ तु महाशयौ । चिरकालं वने भ्रान्तौ, दिवीन्दु-तपनाविव ॥ २०५ ॥
कुमारः सहकारस्य, तलेऽथ तृषितः स्थितः । ययौ सचिवसूनुस्तु, वारिग्रहणहेतवे ॥ २०६ ॥
कुतोऽपि तोयमादाय, यावत् सोऽयमुपागतः । तावदाम्रतरोर्मूले, न पश्यति नृपाङ्गजम् ॥ २०७ ॥

१ °तं मित्रनन्द° खंता० ॥ २ °चनं व° खंता० ॥ ३ अवदद् वदना° खंता० ॥
४ निवेदितम् खंता० ॥ ५ °धरकुमारोऽथ, व्रण° खंता० ॥

असावसोढा तन्मित्रविरहं निरहङ्कृतिः । चिरं बभ्राम कान्तारे, यूथभ्रष्ट इव द्विपः ॥ २०८ ॥
अथ भ्रमन् गतो नन्दिपुरोपान्तसुरालये । एत्य खेचरयुग्मेन, स प्रोचे दुःखदुर्मनाः ॥ २०९ ॥
आकारयति मित्रं ते, भूपभूरपराजितः । तदा चापहृतः सोऽयमावाभ्यां विपिनान्तरात् ॥ २१० ॥
प्रभुः कमलभानुर्नौ, हारयामास खेचरः । कुमुदिन्याः कृते पुन्याः, कमलिन्याश्च तं यतः ॥ २११ ॥
अयमेवानयोर्वाल्ये, न्यवेदि ज्ञानिना वरः । प्रभुणा निर्मिते सोऽस्ति, प्रासादे त्वद्विनाऽर्दितः ॥ २१२ ॥
विवाहेऽपि निरुत्साहः, स भवन्तं विनाऽभवत् । तदेहि देहि तस्याद्य, मुदमब्धेरिवोडुपः ॥ २१३ ॥
इत्याकर्ण्य हृदि प्रीतः, स ताभ्यां सह जग्मिवान् । तत्रासिसुदितः कन्ये, वीरः पर्यणयच्च ते ॥ २१४ ॥
अथ श्रीमन्दिरपुरे, तौ गत्वा सत्त्वदुःसहौ । स्थितौ कामलतानाम्न्या, वारनार्या निकेतने ॥ २१५ ॥
पुरेऽस्मिन्नेकदा कश्चिदभूत् कोलाहलो महान् । रथघण्टापथत्यागव्याकुलार्कतुरङ्गमः ॥ २१६ ॥
तत् परम्परया ज्ञात्वा, निहतं घातकैर्नृपम् । वेश्यायै मन्त्रिसूराख्यदथ सञ्जीवनौषधम् ॥ २१७ ॥
तद् भूभृन्मन्त्रिणे तूर्णं, वेश्ययाऽपि निवेदितम् । अयं मद्गृहवास्तव्यः, किञ्चिद् वेत्ति महौषधम् ॥ २१८ ॥
मन्त्रिणा भक्तिसुग्नेन, तत् तदाऽऽकारिताविमौ । औषधेन धराधीशं, क्षणाच्चक्रतुरक्षतम् ॥ २१९ ॥
हरिणन्दितनूजोऽयमिति मत्वाऽथ भूभुजा । रम्भानाम्नः स्वनन्दन्याः, प्रदानेनैव सत्कृतः ॥ २२० ॥
तत्रैव तामपि त्यक्त्वा, पुनः प्रचलिताविमौ । कञ्चित् केवलिनं वीक्ष्य, पुरे कुण्डपुरे स्थितौ ॥ २२१ ॥
नत्वा केवलिनं भक्तिभावितः सुहृदा सह । अपराजितवीरोऽयं, निविष्टः क्षितिविष्टरे ॥ २२२ ॥
पप्रच्छ स्वच्छधीर्भाविशुभा-ऽशुभमथाऽऽत्मनः । मित्रस्य च स्वकीयस्य, मेदिनीनाथनन्दनः ॥ २२३ ॥
द्वाविंशस्तीर्थकृद् भावी, नेमिस्त्वं पञ्चमे भवे । अयं सुहृच्च प्रथमो, गणभृत् ते भविष्यति ॥ २२४ ॥
वाचं सम्यग् निशम्येति, प्रथितां मुनिनाऽमुना । स प्राप प्रमदं भाविसुक्त्यानन्दानुवादिनम् ॥ २२५ ॥
मुनौ कृतविहारेऽथ, केवलज्ञानभास्करे । तौ कुतूहलिनौ देशान्, द्रष्टुमभ्रमतां पुनः ॥ २२६ ॥
इतश्चास्ति जनानन्दे, लङ्काशङ्काकरे पुरे । जितशत्रुर्धरित्रीशो, धारिणी चास्य वल्लभा ॥ २२७ ॥
सोऽपि रत्नवतीजीवश्च्युत्वा माहेन्द्रकल्पतः । देव्याः कुक्षिसरोहंसी, जज्ञे प्रीतिमती सुता ॥ २२८ ॥
अथासौ यौवनं प्राप्ता, प्रतिज्ञामिति निर्ममे । विद्यया मां विजेता यः, स मे भर्ता भविष्यति ॥ २२९ ॥
स्वयंवरार्थमुर्वीशस्ततो निर्माय मण्डपम् । पञ्चेषुरोचिषो भूरीनमीमिलदिलाधिपान् ॥ २३० ॥
संपाञ्चालीप्रपञ्चेषु, ते मञ्चेषु निषादिनः । किरन्ति रागं प्रत्यङ्गं, भूषामणिविभानिभान् ॥ २३१ ॥
अत्रान्तरे नरेशस्य, सचिवस्य च तौ सुतौ । पश्यन्तौ काश्यपीखण्डमखण्डस्मयमीयतुः ॥ २३२ ॥
विधाय गुलिकायोगादन्यं वेषमुभौ ततः । मूले मञ्चस्य कस्यापि, स्थितावुत्तालकौतुकौ ॥ २३३ ॥

कस्याश्चिन्मञ्चपाञ्चाल्या, मूर्ध्नि न्यस्तकराम्बुजः ।
कुमारस्तस्थिवान् पश्यन्, भूभुजस्तृणवत् तदा ॥ २३४ ॥

अथ रङ्गपथक्रोडं, प्राप प्रीतिमती तदा । पुरोवर्तिप्रतिहारीप्रथिताग्रपथान्तरा ॥ २३५ ॥
समालोक्य समायान्तीमथ ते पृथिवीभृतः । चेष्टान्तराणि तत्कालं, चक्रिरे चलचेतसः ॥ २३६ ॥
परिभ्राम्यति लीलाब्जे, चक्षुश्चिक्षेप कश्चन । इह तद्वक्त्रशोभाऽस्ति, न वेतीव विलोकयन् ॥ २३७ ॥

१ °धराधीशो, खंता० ॥

अङ्गुलिभ्यां भ्रमयतः, करात् कस्यापि चम्पकम् । क्षितौ पपात तत्कान्तिविजितं नु ! विलज्जितम् ॥ २३८ ॥
विमलं केतकीपत्रं, नखैः कश्चिददारयत् । तदीयदशनोन्मीलन्मयूखश्रीमलिम्लुचम् ॥ २३९ ॥
तदीयाङ्गपरिष्वङ्गतिरोधानविधायिनम् । कश्चिदभ्रमयत् पाणेराकृष्टुमिव कङ्कणम् ॥ २४० ॥
जगतीपतिषु स्पष्टमिति तेषु विलासिषु । पुरः प्राह प्रतीहारी, मुदा **प्रीतिमतीं** प्रति ॥ २४१ ॥
एते देवि ! मुदे विश्वविजयोज्ज्वलविक्रमाः । आजग्मुस्त्वत्कृते भूपाः, स्मररूपा गुणाब्धयः ॥ २४२ ॥
यः कश्चित् ते मुदं चित्ते, दत्तेऽमीषु विशेषतः । वृणु तं भाग्यसौभाग्यप्रसादसदनं नृपम् ॥ २४३ ॥
असौ मौक्तिकताडङ्कहंसोत्तंसमुखाम्बुजः । राजा **भुवनचन्द्राख्यः**, शौर्य-धैर्य-धियां निधिः ॥ २४४ ॥
अयं हाराङ्कितग्रीवो, राजा **समरकेतनः** । स्मरे हरभयोद्भ्रान्ते, रूपश्रीरमुमाश्रिता ॥ २४५ ॥
भूपः **कुबेरनामाऽयं**, सख्युर्मुखमवेक्षते । उत्तीर्णो भुवि चेतोभूर्दिवः शिवभयादिव ॥ २४६ ॥
अयं **सोमप्रभो** राजा, करोत्क्षिप्तकेलिकन्दुकः । प्रविष्टो हृदि नारीणां, स्यादसावेव मन्मथः ॥ २४७ ॥
भूपः **सूराभिधः** सोऽयं, लीलानीलारविन्दवान् । अमुं भेजे रतिर्नित्यं, प्रियेऽनङ्गे तदाशया ॥ २४८ ॥
**भीमः** श्रीमानसौ राजा, कुण्डले कुरुते करम् । स्मरं रतिरतं मत्वा, यं प्रीतिस्तद्वदाश्रिता ॥ २४९ ॥
क्ष्माधवो **धवलः** सोऽयं, स्मेरनीलाश्मशेखरः । यत्कान्तिकिङ्करः कामो, भुवनेषु विजृम्भते ॥ २५० ॥
इति ज्ञात्वा प्रतीहारीवचनेन नृपानिमान् । क्रमेण प्रष्टुमारेभे, कन्या विद्यासु कौशलम् ॥ २५१ ॥
अथ जित्वा कुमारी,ताननुप्रश्नं निरुत्तरान् । वरं नरेभ्यो नारीति, ज्ञात्वा प्रीतिपराऽभवत् ॥ २५२ ॥
तामथ व्यथमानात्मा, कुमारो जितकाशिनीम् । तयैव मञ्चपाञ्चाल्या, मणिस्पर्शादवीवदत् ॥ २५३ ॥
चमत्कारकरी पुंसां, प्राह पाञ्चालिका ततः । आक्षिप्य क्ष्मापतेः पुत्रीं, मूर्त्तमानभृता गिरा ॥ २५४ ॥
किमु गर्जसि वामाक्षि !, विजित्य नृपशून् नृपान् ? । न किं जानासि मामत्र, पुरः स्फुरितकौतुकाम्[1] ? ॥२५५॥
भवत्या यदि जीयेऽहं, तद् गुरुर्लज्जते मम । मन्मौलौ न्यस्तहस्तोऽयं, **हरिणान्दिनृपात्मजः** ॥ २५६ ॥
चमत्कृतेति पाञ्चालीवाचा सा चारुलोचना । शारदेव स्वयं वादसादरा मुदमुद्दधौ ॥ २५७ ॥
कन्या पप्रच्छ कः शूरो ?, जितात्मेति जगाद सा । को दक्षः ? साऽवदत् प्रोक्तं, तया श्रीभिरवञ्चितः ॥२५८॥
को दुःखीति तया प्रोक्तं, स्पृहा यस्येति साऽब्रवीत् । तयोक्तं को धनी ? यस्य, सुकृतानीत्युवाच सा ॥२५९॥
इति प्रश्नोत्तरगिरा, पाञ्चाल्या विजिता सती । मुदा कण्ठे कुमारस्य, बाला मालामयोजयत् ॥ २६० ॥
अथ पृथ्वीभृतः सर्वे, कुमारं प्रति कोपिनः । सममेव समीकायानीकिनीः[3] समनीनहन् ॥ २६१ ॥
बलानि बलवान् राज्ञां, तानि जित्वा नृपात्मजः । भूपैः प्रत्येकमेकाकी, सार्द्धं युद्धविधिं दधौ ॥ २६२ ॥
हेलयैव महीपालानन्यान् निर्जित्य भूपभूः । केसरीव समारूढः, **सोमप्रभनृपद्विपम्** ॥ २६३ ॥
स्वस्रीयो मातुलेनायं, विस्फुरन्नपराजितः । राज्ञा **सोमप्रभेणाथ**, लक्षणैरुपलक्षितः ॥ २६४ ॥
गलदश्रुजलो वीरमथ **सोमप्रभो** नृपः । भागिनेयं महाहर्षपूरितः परिरब्धवान् ॥ २६५ ॥
**हरिणान्दितनूजं** मे, जामेयमपराजितम् । अमुं जानीथ भूपानामिति **सोमप्रभोऽ**दिशत्[4] ॥ २६६ ॥
जग्मुः स्वाजन्यमुर्वीशाः, सर्वेऽपीति[5] प्रमोदिनः । मध्ये भूत्वा कुमारस्तैः, सोत्साहैश्च विवाहितः ॥ २६७ ॥
अथ सम्मानिता राज्ञा, सर्वेऽपि जितशत्रुणा । ययुर्निजनिजं स्थानं, नृपाः **सोमप्रभादयः** ॥ २६८ ॥

---

१ °तुकम् खंता० ॥ २ °या पृष्टं, स्पृ° खंता० ॥ ३ °किनीं सम° खंता० ॥ ४ °भोऽवदत् खंता० ॥ ५ सर्वे प्रीतिप्रमो° खंता० ॥

ततस्तत्र स्थितं श्रुत्वा, कुमारमपराजितम् । आययौ पैतृको मन्त्री, समाकारयितुं रयात् ॥ २६९ ॥
सर्वेऽपि परिणीतस्त्रीपितरोऽपि तमाययुः । सरिदोघा इवाम्भोधिं, विद्याधरधराधिपाः ॥ २७० ॥
मित्रेण मन्त्रिणा धात्रीश्वरैर्विद्याधरैश्च तैः । ऋक्षैरिव तुषारांशुः, कुमारः परिवारितः ॥ २७१ ॥
कम्पिनीं सैन्यचारेण, स्विन्नां गजमदाम्बुभिः । भेजे निजपुरीमेष, दयितामनुरागिणीम् ॥ २७२ ॥
बभौ पितरमालोक्य, वृक्षोऽम्बुदमिवाथ सः । प्रीतः प्रेक्ष्य च तं राजा, राजानमिव वारिधिः ॥ २७३ ॥
रोमाञ्चमेचकश्रीकः, प्रसरद्भुजपक्षतिः । पितृपादाम्बुजोत्सङ्गे, वीरो भृङ्ग इवापतत् ॥ २७४ ॥
अथो कुमारमुत्थाप्य, बाहुभ्यां प्रीतिविह्वलः । राजा हृदि दधौ मूर्ध्नि, वर्षन् हर्षाश्रुबिन्दुभिः ॥ २७५ ॥
अथोद्दधार नो मौलिं, न्यस्य मातृपदद्वये । नखोष्णीषमणीनां तु, रश्मिभिर्ग्रथितं मिथः ॥ २७६ ॥
मात्रा कथञ्चिदुत्थाप्य, मुदा मूर्धनि चुम्बितः । कुमारः शैशवसुखं, सस्मार सुरदुर्लभम् ॥ २७७ ॥
तौ मनोगति-चपलगतिजीवौ प्रणेमतुः । सोदरौ सूर-सोमाख्यौ, कुमारस्य पदद्वयम् ॥ २७८ ॥
समर्थमथ मत्वा तं, निधाय स्वपदे सुतम् । व्रतं विश्वस्तहरिणं, हरिणन्दी मुदा दधौ ॥ २७९ ॥
तपस्तपनविस्तारध्वस्तकर्मतमस्ततिः । हरिणन्दीमुनिपतिस्तत् प्राप परमं पदम् ॥ २८० ॥
महिषीपदविद्योतमानप्रीतिमतीयुतः । शशास सूर-सोमाभ्यां, सहोर्वीमपराजितः ॥ २८१ ॥
मित्रं विमलबोधोऽपि, तस्य मन्त्रिपदेऽभवत् । दीप्ततेजःप्रदीपैकसदनं सदनन्तधीः ॥ २८२ ॥
कुर्वन्नुर्वीपतिस्तीर्थ-रथयात्रामहोत्सवम् । ददर्शाऽनङ्गदेवाख्यमिभ्यमुद्भिन्नयौवनम् ॥ २८३ ॥
एतस्यैव द्वितीयेऽह्नि, मरणं परिभावयन् । धिक्! संसृतिरसारेयमिति सारां धियं दधौ ॥ २८४ ॥
इहान्तरे पुरोपान्ते, केवलज्ञानवान् मुनिः । आययौ यः कुमारत्वे, दृष्टः कुण्डपुरे पुरा ॥ २८५ ॥
पद्मं प्रीतिमतीपुत्रं, कृत्वा राज्येऽथ पार्थिवः । मुनेस्तस्माद् व्रतं प्राप, सकान्ता-ऽमात्य-बान्धवः ॥ २८६ ॥
स तपो निबिडं तप्त्वा, पूर्णायुः सपरिच्छदः । समभूदारणे कल्पे, शक्रसामानिकः सुरः ॥ २८७ ॥

जम्बूद्वीपाभिधे द्वीपे, क्षेत्रे भरतनामनि । कुरुदेशशिरोमाल्ये, श्रीहास्तिनपुरे पुरे ॥ २८८ ॥
श्रीषेणनृपतेः पत्न्यां, श्रीमत्यां शङ्ख इत्यभूत् । जीवोऽपराजितस्याथ, पूर्णेन्दुस्वप्नतः सुतः ॥ २८९ ॥
॥ युग्मम् ॥
जीवो विमलबोधस्य, मतिप्रभ इति श्रुतः । आसीद् गुणनिधेर्मन्त्रिकिरीटस्याङ्गजो गुणी ॥ २९० ॥
क्रीडां वितनुतो मित्रीभूय तौ पूर्ववत् ततः । यौवनस्य वशं यातौ, वसन्तौ जनचेतसि ॥ २९१ ॥
चौर्यदावाग्निदग्धाङ्गः, सीमादेशजनोऽन्यदा । आगत्य क्षितिनेतारं, विजेतारं व्यजिज्ञपत् ॥ २९२ ॥
विशालशृङ्गः स गिरिः, सा चन्द्रशिशिरा नदी । दुर्गेऽस्मिन् दुर्ग्रहः पल्लीपतिः समरकेतनः ॥ २९३ ॥
हरत्येव सदेशस्थः, स देशस्य श्रियं सदा । दोषा दोषाकरोऽम्भोजवनस्येव समापतन् ॥ २९४ ॥
गिरं जनपदस्येति, दुःखदाहसगद्गदाम् । समाकर्ण्याभवद् भूपः, कोपवह्निसन्तिका ॥ २९५ ॥
कटकाय कटुस्वान्तः, समारम्भं विभावयन् । आदिदेश नृपः पत्ति-द्विप-वाह-रथाधिपान् ॥ २९६ ॥
अथ विज्ञापयामास, कुमारः क्षितिवासवम् । अन्तः स्फुरति कोपेऽपि, निर्विकारमुखाकृतिः ॥ २९७ ॥
स्वर्गेशो नागतः स्वर्गान्न पातालाद् बलिर्बली । कथमित्थं प्रभो! पल्लीपतिमात्रे प्रकुप्यसि? ॥ २९८ ॥
मा कोपीरहमेवामुं, निग्रहीष्यामि हेलया । व्यापारं हि कुठारस्य, नखच्छेद्ये करोति कः? ॥ २९९ ॥

१ °तं मत्वा, खंता० ॥ २ °तिस्तत्र, रथ° खंता० ॥ ३ °निधिर्मं° खंता० ॥

इत्याकर्ण्य नरेन्द्रेण, समादिष्टः प्रमोदिना । कुमारः शत्रुसंहारहेतवे कटकं व्यधात् ॥ ३०० ॥
कृत्वा शून्यमथो दुर्गं, कतिचित्पत्तिपालितम् । तस्थौ दूरेण पल्लीशश्छलाय सह सैनिकः ॥ ३०१ ॥
इति मत्वा कुमारोऽपि, समारोपितसैनिकः । प्रेरितैः पत्तिभिर्दुर्गं, ग्राहयामास कैश्चन ॥ ३०२ ॥
जगामान्तः समं सैन्यैः, शङ्खोऽयमिति शङ्कया । बलैरनर्गलैर्दुर्गं, पल्लीपतिरवेष्टयत् ॥ ३०३ ॥
अथ संरुद्धदुर्गं तं, वल्गन्तं विक्रमोर्जितैः । पल्लीशं वेष्टयामास, कुमारः परितो बलैः ॥ ३०४ ॥
अन्तर्बहिर्बलस्तोमैर्दुर्गान्ते वध्यतां गतम् । मत्वाऽऽत्मानमथो मानममुचत् पक्कणाधिपः ॥ ३०५ ॥
मूर्त्तं मदमषीपिण्डमिवायातं हृदो बहिः । वहन् कण्ठे कुठारं स, कुमारमनुनीतवान् ॥ ३०६ ॥
वलमानः सहानेन, वीरोऽथ कटकान्तिके । अर्धमार्गेऽर्धरात्रे स, शुश्राव रुदितं स्त्रियाः ॥ ३०७ ॥
अथ शब्दानुसारेण, तां जगाम नृपाङ्गजः । एकः खड्गलतोद्रेकभ्राजिष्णुभुजभूरुहः ॥ ३०८ ॥
कुमारस्तामथोवाच, किमिदं भीरु ! रुद्यते ? । इति साऽपि तदाकारविश्वस्ता दुःखिताऽवदत् ॥ ३०९ ॥
अङ्गदेशेषु चम्पायां, जितारिनृपतेः सुता । कीर्तिमत्यामभूद् भूरिपुत्रोपरि यशोमती ॥ ३१० ॥
गुणश्रवणमात्रेण, शङ्खे श्रीषेणनन्दने । अनुरागोऽभवत् तस्याः, सरोजिन्या रवाविव ॥ ३११ ॥
स्वाजन्याय ततो राजा, श्रीषेणनृपतिं प्रति । विशिष्टं प्रेषयामास, वाक्पीयूषपयोनिधिम्[1] ॥ ३१२ ॥
समयेऽस्मिन्निमां बालां, मणिशेखरखेचरः । जह्रे मया सह महस्तिरस्कृतसहस्ररुक् ॥ ३१३ ॥
अटव्यामिह मुक्ताऽहं, निन्ये कन्या तु साऽन्यतः । तस्याः श्रीमन्नहं धात्री, तद्वियोगेन रोदिमि ॥ ३१४ ॥
किंवदन्तीं कुतस्तस्या, लभेयमिति चिन्तयन् । इमामाश्वासयामास, कुमारः काम्यया गिरा ॥ ३१५ ॥
अथ तद्वीक्षणपरे, वीरे शौर्यसखः स्वयम् । पूर्वाशापतिरुष्णांशुं, शैले दीपमिवामुचत् ॥ ३१६ ॥
तदटन्नटवीगर्भे, कन्यावीक्षणसत्वरः । शैले विशालशृङ्गाख्ये, कन्दरामन्दिरोदरे ॥ ३१७ ॥
शङ्ख एव मम स्वामी, वदन्तीमिति बालिकाम् । खेचरं चाटुकारं च, सोऽपश्यन्मणिशेखरम् ॥ ३१८ ॥
॥ युग्मम् ॥
क्रोधादभिमुखं धावन्, पश्यन् कन्यां च सस्पृहम् । कुमारः खेचरेन्द्रेण, तत्प्रियत्वेन निश्चितः ॥ ३१९ ॥
समायातः प्रियोऽयं ते, शङ्खः पश्यैष हन्यते । तां प्रतीति प्रतिज्ञाय, प्रचचाल स खेचरः ॥ ३२० ॥
तन्निष्कृपकृपाणाग्रसङ्ग्रामेण नृपाङ्गजः । खेचरं विगलद्गर्वं, दासं चक्रे विजित्य तम् ॥ ३२१ ॥
स्मित्वा[2] व्यलोकयद् बाला, तं कुमारं जितद्विषम् । प्रभाते परिभूतेन्दुं, पद्मिनीव दिवाकरम् ॥ ३२२ ॥
अथ व्योम्नो मनोवेगा, मणिशेखरपत्तयः । पेतुर्नृपसुतोपान्ते, सरसीव सितच्छदाः ॥ ३२३ ॥
उभौ पुरे च सैन्ये च, प्रैषीद् भूपाङ्गजः खगौ । एकं यशोमतीधात्र्याः, समानयनहेतवे ॥ ३२४ ॥
निकामममुपरोधेन, कुमारः खेचरेशितुः । प्रणमन् सिद्धचैत्यानि, कन्यया साकमेतया ॥ ३२५ ॥
आयातः कनकपुरे, विद्याधरपुरे ततः । भूमिभालभवैताढ्यविशेषककलाभृति ॥ ३२६ ॥ युग्मम् ॥
दिनानि कतिचित् तत्र, तस्थौ भूजानिनन्दनः । खेचरश्रेणिसौजन्यक्षीरनीरेशकेशवः ॥ ३२७ ॥
अथ तस्मै ददौ पुत्रीं, खगेशो मणिशेखरः । ददिरे खेचरैरन्यैरपि विद्या निजा निजाः ॥ ३२८ ॥
अथ विद्याधरैः सर्वैः, परितः परिवारितः । द्विषद्भयादकम्पायां, चम्पायां पुरि यातवान् ॥ ३२९ ॥
यशोमत्यादिकाः कन्याः, स तत्र परिणीतवान् । रोहिणीप्रभृतीः शीतद्युतिर्दाक्षायणीरिव ॥ ३३० ॥

---

१ °निधिः खंता० पाता० ॥ २ स्मिता व्य° खंता० पाता० ॥

विघाटितकपाटोष्ठप्रतोलीमुखनिःसृतैः । सौधांशुभिर्विहसितामिव चम्पां विवेश सः　॥ ३३१ ॥
यशोधरो गुणधरः, कुमारस्य सहोदरौ । सम्मुखौ द्वावपि प्राप्तौ, तौ जीवौ[2] सूर-सोमयोः　॥ ३३२ ॥
बाहुभ्यामिव बन्धुभ्यां, वाम-दक्षिणपक्षयोः । चतुर्बाहुरिवादर्शि, कुमारो नागरैस्तदा　॥ ३३३ ॥
अथासौ पितरौ नत्वा, कृतार्थम्मन्यमानसः । बभूव विपुलप्रीतिवल्लीप्रोल्लासपादपः　॥ ३३४ ॥
वसुन्धराधुराधुर्यं, राज्ये कृत्वाऽथ तं सुतम् । राजा गुणधराचार्यपादान्ते जगृहे व्रतम्　॥ ३३५ ॥
वनीमिवावनीमेनां, सेचं सेचं नयाम्बुभिः । मालाकार इव क्ष्मापः, स यशोभिरपुष्पयत्　॥ ३३६ ॥
अन्यदा केवलज्ञाननिधिर्विबुधसेवितः । श्रीषेणः क्षीणदुष्कर्मा, प्राप्तस्तस्याः पुरः पुरः ॥ ३३७ ॥
परीवारपरीतोऽयमथ शङ्खः क्षमापतिः । मुनीन्द्रं पितरं नत्वा, देशनान्ते व्यजिज्ञपत्　॥ ३३८ ॥
स्वामिन् ! प्रेम्णा यशोमत्यामत्यासक्तिः कुतो मम ? । ऊचे मुनिरथानेकभवसम्बन्धितामिह　॥ ३३९ ॥
आगामिनि भवे भावी, नेमिनामा जिनो भवान् । मन्त्री च बान्धवौ चैतौ, गणेशास्तव भाविनः ॥ ३४० ॥
इयं राजीमती भूत्वा, त्वदेकमयमानसा । अनूढैव व्रतं त्वत्तः, प्राप्य निर्वृतिमाप्स्यति　॥ ३४१ ॥
निशम्येति मुनेर्वाचं, शङ्खः शङ्खोज्ज्वलाननः । कुमारं पुण्डरीकाख्यं, राज्ये व्यधित दुर्धरम् ॥ ३४२ ॥
ततः समं यशोमत्या, बन्धुभ्यां सचिवेन च । अवाप क्ष्मापतिर्दीक्षां, वीक्षां मुक्तिस्त्रिया इव ॥ ३४३ ॥
सोऽर्हद्भक्त्यादिभिः स्थानैस्तीर्थकृत्कर्म निर्ममे । विधायाऽऽराधनां चान्ते, पादपोपगमं व्यधात् ॥ ३४४ ॥
परीषहोपसर्गाद्यैः, स परैरपराजितः । अपराजितसंज्ञेऽभूद्, विमाने भासुरः सुरः　॥ ३४५ ॥

तस्मिन्नखण्डितसुखामृतपानपीनः,
सोऽयं सुरः स्फुरदनुत्तररूपसम्पत् ।
हर्षप्रकर्षमयमद्भुतभूरिभाग्य-
लक्ष्मीमयं च समयं गमयाम्बभूव　॥ ३४६ ॥

**॥ इति श्रीविजयसेनसूरिशिष्यश्रीमदुदयप्रभसूरिविरचिते श्रीधर्माभ्युदयनाम्नि श्रीसङ्घपतिचरिते लक्ष्म्यङ्के महाकाव्ये श्रीनेमिनाथप्राच्य-भववर्णनो नाम दशमः सर्गः ॥**

पीयूषादपि पेशलाः शशधरज्योत्स्नाकलापादपि,
स्वच्छा नूतनचूतमञ्जरिभरादप्युल्लसत्सौरभाः ।
वाग्देवीमुखसामसूक्तविशदोद्गारादपि प्राञ्जलाः,
केषां न प्रथयन्ति चेतसि मुदं श्रीवस्तुपालोक्तयः ?　॥ १ ॥

॥ ग्रन्थाग्रम् ३५२ । उभयम् ३१४५ ॥

---

१ अथ श्वसुरमापृच्छ्य, परिवारैः समं निजैः । पित्रोरुत्कण्ठितः प्राप, कुमारो हस्तिनापुरम् ॥ ३३१ ॥ इतिरूप. श्लोक. खंता० ॥　२ °वौ शशि-सूरयोः वता० ॥　३ °धार्यं पित° पाता० ॥　४ °राधौर्यं पाता० ॥　५ °न्धवावेतौ खंता० ॥

# एकादशः सर्गः ।

इतश्च मथुरापुर्यां, यदुनामा नृपोऽभवत् । बृहद्रथाङ्गजो भूरिभूपान्ते हरिवंशभूः ॥ १ ॥
शूरो जातस्ततः शौरि-सुवीरौ तस्य चाऽऽत्मजौ । शूरः शौरिं नृपं कृत्वा, व्रते प्रववृते कृती ॥ २ ॥
सुवीरं स्वपदे न्यस्य, शौरिः सोदरवत्सलः । स्वयं कुशार्तदेशेषु, चक्रे शौरिपुरं पुरम् ॥ ३ ॥
शौरेरन्धकवृष्ण्याद्या, बभूवुः किल सूनवः । सुवीरस्य महावीरा, भोजवृष्ण्यादयः पुनः ॥ ४ ॥
भूपमन्धकवृष्णिं तत्, कृत्वा शौरिधराधिपः । सुप्रतिष्ठान्मुनेः प्राप्य, व्रतं निर्वृतिमासदत् ॥ ५ ॥
सुवीरस्तनुजं राज्ये, भोजवृष्णिं विधाय च । विदधे सिन्धुषु स्वस्मै, सौवीरं नाम पत्तनम् ॥ ६ ॥
मथुराम्भोजसूर्यस्य, भोजवृष्णेर्महीभुजः । जाग्रदुग्रगुणग्राम, उग्रसेनः सुतोऽभवत् ॥ ७ ॥
आसन्नन्धकवृष्णेस्तु, सुभद्रायां सुता दश । समुद्रविजयो जिष्णुरक्षोभ्यः क्षोभितद्विषन् ॥ ८ ॥
स्तिमितः शमितारातिः, सागरः सागरोपमः । हिमवान् हिमवत्कीर्तिरचलोऽचलनिश्चयः ॥ ९ ॥
धरणो धरणीभूषा, पूरणः शत्रुचूरणः । अभिचन्द्रो वितन्द्रात्मा, वसुदेवश्च विश्वजित् ॥ १० ॥
॥ विशेषकम् ॥
समुद्रविजयं न्यस्य, स्वपदेऽन्धकवृष्णिना । सुप्रतिष्ठान्मुनेरेव, प्रव्रज्य प्रापि निर्वृतिः ॥ ११ ॥
राज्ये न्यस्योग्रसेनं च, भोजवृष्णिर्महाभुजः । सुप्रतिष्ठस्य पादान्ते, दान्तात्मा व्रतमग्रहीत् ॥ १२ ॥
कंसेन तु सुभद्राख्यरसविक्रयिसूनुना । पठतो वसुदेवस्य, मैत्री शौरिपुरेऽभवत् ॥ १३ ॥
ततश्चिक्रीडतुः कंस-वसुदेवौ सदैव तौ । मिथश्चैतन्यवत्कायप्रतिच्छायनिभावुभौ ॥ १४ ॥
समुद्रविजयस्योर्वीभृतोऽन्येद्युः सभाजुषः । अर्द्धचक्रिजरासन्धराजादेशः समाययौ ॥ १५ ॥
अस्मद्वंश्योऽस्ति वैताढ्यतटे सिंहरथो नृपः । एनं बद्ध्वोद्धतक्रोधं, यः कश्चन समानयेत् ॥ १६ ॥
इष्टो दीयेत देशोऽस्मै, तथा जीवयशाः सुता । राजादिष्टं तदित्येतन्मेने मानवपुङ्गवः ॥ १७ ॥
समुद्रविजयाद् राजादेशार्थैकसमर्थधीः । ययाचे स्वयमादेशं, वसुदेवः प्रतिज्ञया ॥ १८ ॥
नरेन्द्रादेशतः कंससारथिः सारसैनिकः । वीरो जगाम वैताढ्यमद्वैताढ्यपराक्रमः ॥ १९ ॥
अथो सिंहरथो युद्धदुःसहः सहसाऽभ्यगात् । वसुदेवं प्रति जवात्, किरिः केसरिणं यथा ॥ २० ॥
अथ युद्धप्रबन्धेन, भग्ने सैन्यसमुच्चये । वसुदेवः समं सिंहरथेन युयुधे स्वयम् ॥ २१ ॥
ततः परिघमुद्यम्य, कंसस्तं सहसा द्विषम् । आहत्य वसुदेवस्य, पुरो बद्धमढोकयत् ॥ २२ ॥
अथैत्य दैत्यविक्रान्तः, क्रान्तसिंहरथो रयात् । समुद्रविजयस्यांह्री, वसुदेवोऽनमन्मुदा ॥ २३ ॥
वसुदेवमथावादीन्नृपस्तुभ्यं प्रदास्यति । राजा तुष्टो जरासन्धस्तां जीवयशसं सुताम् ॥ २४ ॥
पति-तातकुलोच्छित्त्यै, सा तु ज्ञातमिदं मया । क्रोष्टुकिज्ञानिवचसा, तत् तत्त्यागे मतिं कुरु ॥ २५ ॥
ध्यात्वाऽथ वसुदेवोऽपि, जगाद नृपतिं प्रति । युद्धे कंसेन बद्धोऽयं, तद् यशोऽस्यैव दीयताम् ॥ २६ ॥

---

१ सूरो पाता० ॥ २ सूरः पाता० ॥ ३ क्रयसू० खंता० पाता० ॥ ४ शौरि० खंता० पाता० ॥
५ तत्त्यागे तन्मतिं खंता० ॥

तदगद्यत भूपेन, जरासन्धनृपः कथम् । सुतामपि बलिष्ठाय, वणिक्पुत्राय दास्यति ? ॥ २७ ॥
अवादि वसुदेवेन, मन्ये नासौ वणिक्सुतः । जानामि विक्रमेणेति, तत्पिताऽऽकार्य पृच्छ्यते ॥ २८ ॥
अथाऽऽहूय सुभद्रोऽयं, कंसोत्तंसितसन्निधिः । राज्ञा सशपथं पृष्टः, सुतोऽयं ते किमौरसः ? ॥ २९ ॥
इत्युक्ते भूभृताऽवोचत्, सुभद्रोऽपि यथातथम् । गतोऽहमेकदा शौचहेतवे यमुनामनु ॥ ३० ॥
अदर्शि कांस्यमञ्जूषा, तत् तरन्ती रयान्मया । आकृष्योद्घाटिता तस्यां, दृष्टोऽयं महसांनिधिः ॥ ३१ ॥
मुद्रिकायुगभाजोऽस्य, गृहीतस्य शिरस्तले । लब्धेयमिति भूपाङ्घ्रिपुरः पत्री मुमोच सः ॥ ३२ ॥
उग्रसेनसुतेऽमुष्मिन्, धारिण्याः कुक्षिवर्तिनि । पूरितश्छद्मनाऽमात्यैः, पत्यन्त्रस्वाददोहदः ॥ ३३ ॥

पितृवैरीति सञ्चिन्त्य, पुत्रः प्राणप्रियोऽप्यसौ ।
मात्राऽतिनिन्द्यः कालिन्द्याः, प्रवाहेऽस्मिन् प्रवाहितः ॥ ३४ ॥ युग्मम् ॥

पत्रिकां वाचयित्वेति, मुमुदे मेदिनीश्वरः । निजगोत्रावतंसं तं, कंसं विज्ञाय तत्क्षणात् ॥ ३५ ॥
जरासन्धमुपस्थाय, समुद्रविजयस्ततः । कंसस्य शौर्यमाख्याय, तं सिंहरथमार्पयत् ॥ ३६ ॥
दत्त्वा सुतां नृपोऽपृच्छद्, देशमिष्टमनेन तत् । पितृद्विषा ययाचे सा, कंसेन मथुरापुरी ॥ ३७ ॥
तज्जरासन्धदत्तोग्रबलोऽयं मथुरां गतः । उग्रसेननृपं कंसः, काष्ठपञ्जरकेऽक्षिपत् ॥ ३८ ॥
मया त्यक्तोऽसि नो वेत्ति, वार्तामपि पिता तव । एवमुक्तेऽपि धारिण्या, नोग्रसेनं मुमोच सः ॥ ३९ ॥
कंसानुजोऽतिमुक्ताख्यः, पितृदुःखाकुलस्ततः । कृती व्रतं स जग्राह, मुक्तिमार्गैकपल्वलम् ॥ ४० ॥
समुद्रविजयः सोऽपि, स्वामिना सत्कृतस्ततः । ययौ शौरिपुरे शूरसमुच्चयशिरोमणिः ॥ ४१ ॥

## वसुदेवहिण्डिः

वसुदेवाङ्गसौभाग्याकृष्टस्त्रीविप्लवाकुलैः । नृपः कदाऽपि विज्ञप्तो, नागरैर्नयसागरैः ॥ ४२ ॥
समुद्रविजयेनाथ, तादृग्विप्लवभीरुणा । अभाषि वसुदेवोऽयमुत्सङ्गारोपपूर्वकम् ॥ ४३ ॥
अहर्निशं बहिर्भ्रान्त्या, दुर्बलोऽसि ततस्त्वया । स्थेयं सदा मदावासे, कलाभ्यासविनोदिना ॥ ४४ ॥
गुरोर्गिरं शिरस्येष, शेषामिव निधाय ताम् । सौध एव स्थितश्चक्रे, कलाभ्यासमहर्निशम् ॥ ४५ ॥
स कदाऽपि शिवादेव्या, प्रेषितं भूपतिं प्रति । चन्दनोद्वर्तनं चेटीहस्ताज्जग्राह नर्मणा ॥ ४६ ॥
उक्तश्चेटिकया सोऽपि, वसुदेवः सहासया । राज्ञा स्त्रीनर्मदोषेण, त्वमनेनासि यन्त्रितः ॥ ४७ ॥
इत्यसौ परमार्थेन, निजं मत्वा नियन्त्रणम् । देशान्तरविलोकाय, निःससार पुरान्निशि ॥ ४८ ॥
रचयित्वा चितामेष, श्मशानभुवि भूरिधीः । निक्षिप्य मृतकं किञ्चिदन्तरज्वालयन्मुदा ॥ ४९ ॥
स्तम्भं न्यस्य तटे तस्य, पत्रिकायां लिलेख सः । गुरुभिर्दूषितगुणो, वसुदेवोऽनलेऽविशत् ॥ ५० ॥
इति कृत्वा व्रजन् दृष्टः, कयाऽपि पथि कान्तया । आरोपितो रथे खिन्न, इति ब्राह्मणवेषभृत् ॥ ५१ ॥
तद्ग्रामे तद्गृहे स्नात-भुक्तो यक्षालयस्थितः । शुश्रावाग्नौ मृतोऽशोचि, वसुदेवः स्वकैरिति ॥ ५२ ॥
अथाऽऽत्मज्ञाननिर्भीकः, प्रचलन्नग्रतो बली । कयाऽपि किल कामिन्या, रथमारोपितो निजम् ॥ ५३ ॥
पुरे विजयखेटाख्ये, सुग्रीवक्ष्मापतेः सुते । श्यामा-विजयसेनाख्ये पर्यणैषीत् कलाजिते ॥ ५४ ॥
ततो विजयसेनायामुत्पाद्याऽक्रूरमङ्गजम् । अटन्नटव्यां तस्थौ स, जलावर्ताख्यपल्वले ॥ ५५ ॥

१ °पाङ्घ्रेः, पु° पाता० ॥ २ °प्ययम् खंता० पाता० ॥ ३ °नीपतिः खंता० ॥ ४ °मुक्तोऽपि खंता० ॥ ५ °यन्त्रितम् खंता० ॥

द्विपं मत्तमिहायातं, वशीकुर्वन्नसौ वशी । खगाऽर्चिमालि-पवनञ्जयाभ्यां सहसा हृतः ॥ ५६ ॥
उद्याने कुञ्जरावर्ते, नीतस्यास्य मुदा ददौ । खेचरोऽशनिवेगाख्यः, श्यामां नाम निजात्मजाम् ॥ ५७ ॥
अयं तया प्रवीणात्मा, वीणावादेन तोषितः । ददौ वरं तयाऽयाचि, सदाऽप्यविरहस्ततः ॥ ५८ ॥
अवियोगस्त्वयाऽयाचि, कुतः सुतनु ! कथ्यताम् ? । इत्युक्ते वसुदेवेन, सा बभाषे मृगेक्षणा ॥ ५९ ॥
पुरे किन्नरगीताख्ये, वैताढ्यगिरिभूषणे । राजा ज्वलनवेगोऽभूदर्चिमालिनृपात्मजः ॥ ६० ॥
नाम्ना चाऽशनिवेगोऽस्ति, खगस्तदनुजो बली । आस्ते ज्वलनवेगस्य, सूनुरङ्गारकः पुनः ॥ ६१ ॥
एतस्याशनिवेगस्य, सुताऽहमभवं विभो ! । व्रती ज्वलनवेगोऽभूत्, कृत्वा मत्पितरं नृपम् ॥ ६२ ॥
तदङ्गारकवीरेण, विद्या-बलविलोभिना । जित्वा मत्पितरं राज्यमिदमद्भुतमाददे ॥ ६३ ॥
अष्टापदेऽन्यदाऽऽख्यातं, मत्पितुश्चारणर्षिणा । जलावर्ते गजं जेता, राज्यदस्ते भविष्यति ॥ ६४ ॥
तदादि तत्र मुक्ताभ्यां, खगाभ्यां त्वं जितद्विपः । हृतोऽसि राज्यलोभेन, दत्ता तुभ्यमहं पुनः ॥ ६५ ॥
स्त्रीयुतं यः खगं हन्ति, स विद्याभिर्विमुच्यते । इत्याचारः सदैवास्ति, समये व्योमचारिणाम् ॥ ६६ ॥
तत् क्रूरोऽङ्गारकस्तुभ्यं, मा कार्षीत् प्रिय ! विप्रियम् । अवियोगस्तदेतेन, कारणेन मया वृतः ॥ ६७ ॥
प्रतिपद्य गिरं सद्यस्तदीयामिति वृष्णिसूः[1] । तत्रावतस्थे सौस्थ्येन, समं दयितया तया ॥ ६८ ॥
सुप्तः स चान्यदा रात्रौ, वीरो वनितया समम् । अङ्गारकेणापहृतो, वसुदेवः प्रबुद्धवान् ॥ ६९ ॥
को मे हर्तेति विमृशन्, ददर्श निजवल्लभाम् । श्यामामङ्गारकेणैव, खड्गाखड्गि वितन्वतीम् ॥ ७० ॥
अङ्गारकेण सा श्यामा, खड्गेनाऽऽशु द्विखण्डिता ।
द्वे श्यामे युध्यमाने तद्[2], वसुदेवो व्यलोकयत् ॥ ७१ ॥
अथ मायामिमां मत्वा[3], वार्ष्णेयोऽङ्गारकं रुषा । जघान मुष्टिना मूर्ध्नि, केशरीव करीश्वरम् ॥ ७२ ॥
उद्घातपातरुग्णेन, विमुक्तोऽङ्गारकेण सः । च्युतश्चम्पापुरीपार्श्वे, सरोवरपयोऽन्तरा ॥ ७३ ॥
तत् तीर्त्वाऽऽशु सरस्तीरे, वासुपूज्यालयं गतः । जिनं नत्वा सहैकेन, द्विजेन पुरि जग्मिवान् ॥ ७४ ॥
यूनो वीणाजुषः प्रेक्ष्य, हेतुं पप्रच्छ स द्विजात् । अथो कथयितुं तस्मै, प्रारेभे द्विजकुञ्जरः ॥ ७५ ॥
इह गन्धर्वसेनाऽस्ति, चारुदत्तवणिक्सुता । सा प्राह स पतिः स्यान्मे, यो मां जयति वीणया ॥ ७६ ॥
वीणाचार्यौ यशोग्रीव-सुग्रीवाविह तिष्ठतः । वीणाभ्यासं तदभ्यासे, तन्वन्त्येते तदिच्छया ॥ ७७ ॥
मासे मासे परीक्षा स्यात्र कोऽपि[4] च जयत्यमूम् । वसुदेवो निशम्येति, विद्याविकृतरूपकृत् ॥ ७८ ॥
विप्रवेषधरो गत्वा, सुग्रीवं प्रत्यदोऽवदत् । वीणायां तव शिष्योऽस्मि, चारुदत्तसुताकृते ॥ ७९ ॥
सोपहासमुपाध्यायः, स्थापयामास तं ततः । अहासयज्जनान् सोऽपि, मूर्खत्वमिव दर्शयन् ॥ ८० ॥
अथाऽऽजगाम मासान्ते, चारुदत्तस्य नन्दनी । वीणाभ्यासकृतां यूनां, परीक्षां कर्तुमात्मना ॥ ८१ ॥
उपाध्यायेन शिष्यैश्च, चारुचीरधरस्तदा । वसुदेवः प्रहासाय, स्थापितः प्रौढविष्टरे ॥ ८२ ॥
ते युवानोऽथ सर्वेऽपि, वीणया विजितास्तया । वादाय वसुदेवोऽथ, तैरूचे परिहासिभिः ॥ ८३ ॥
अथाऽऽधाय निजं रूपं, चमत्कारकरं नृणाम् । वीणाः प्रदूष्य यूनां च, तस्या वीणां करेऽग्रहीत् ॥ ८४ ॥
गेयो विष्णुकुमारस्य, त्रिविक्रमपराक्रमः । गन्धर्वसेनयेत्युक्ते, स चक्रे सर्वमप्यदः ॥ ८५ ॥

---

१ °वृष्णिभूः खंता० ॥ २ °माने च, वसु° खंता० ॥ ३ °मां ज्ञात्वा खंता० ॥ ४ °पि तु ज° खंता० पाता० ॥

इत्येन चारुदत्तेन, स गृहे जगृहे मुदा । ततो विवाहदीक्षायां, पृष्टे गोत्रादिकेऽहसत् ॥ ८६ ॥
वणिक्पुत्रीयमिति मा, हासीः पृष्टे कुले सति । चरितं अन्यमस्त्यस्यास्तमित्यूचे तदा वणिक् ॥ ८७ ॥
अथ तां परिणीयासौ, श्यामाख्य-विजयाह्वये । पर्यणैषीद् यशोग्रीव-सुग्रीवतनये अपि ॥ ८८ ॥

## चारुदत्त-गन्धर्वसेनयोश्चरितम्

अथ गन्धर्वसेनाया, वृत्तं कथयितुं वणिक् । अपरेद्युः समारेभे, वसुदेवं प्रति स्मितः ॥ ८९ ॥
पुराऽहं जीवतोः पित्रोः, सुभद्रा-भानुसञ्ज्ञयोः । अगां सुहृज्जनैः साकं, हेलया सिन्धुरोधसि ॥ ९० ॥
तत्र स्त्री-पुंसयोः पादप्रतिबिम्बानुसारतः । सञ्चरन्नेहमद्राक्षं, सतल्पं कदलीगृहम् ॥ ९१ ॥
तरुणं तरुणा साकं, कीलितं तत्र दृष्टवान् । ओषधीमूलिकास्तिस्रस्तथा तत्खड्गकोशगाः ॥ ९२ ॥
ताभिरप्युपरिन्यस्तपत्रीज्ञानप्रभावतः । निष्कीलमव्रणं मुक्तमूर्च्छं च तमहं व्यधाम् ॥ ९३ ॥

अथोन्मीलितनेत्राब्जः, प्राप्तसञ्ज्ञोऽवदत् स माम् ।
किं निष्कारणबन्धोस्ते, विदधामि किल प्रियम्? ॥ ९४ ॥

अहं वैताढ्यकोटीरे, नगरे शिवमन्दिरे । महेन्द्रविक्रमक्ष्मापसुतोऽमितगतिः श्रुतः ॥ ९५ ॥
सुतां हिरण्यरोमाख्यमातुलस्य तपस्यतः । यथार्थनामानमहं, व्यवहं सुकुमारिकाम् ॥ ९६ ॥
अभिलाषी मया तस्यां, सखा धूमशिखाभिधः । ज्ञातः स तु न दाक्षिण्यान्मुक्तो मित्रं हि दुस्त्यजम् ॥ ९७ ॥

सहाऽऽयातेन तत् तेन, च्छलाद् विश्वस्तघातिना ।
कीलितोऽस्मि द्रुमेऽमुष्मिन्, हृत्वा च दयितां गतः ॥ ९८ ॥

तत् तवाहं जीवितव्यदातुर्मातुरिवाधुना । अनृणः करुणासार!, भविष्यामि भवे कथम्? ॥ ९९ ॥
अथ त्वद्दर्शनेनैव, कृतकृत्योऽस्मि सर्वथा । इत्युक्ते स मया मैत्र्यं, प्रतिपद्य खमुद्ययौ ॥ १०० ॥
मातुलस्याथ सर्वार्थनाम्नो मित्रवतीं सुताम् । अतुच्छेनोत्सवेनाहं, पितृभ्यां परिणायितः ॥ १०१ ॥
कलासक्तमथो मुक्तभोगं मत्वा पितैव माम् । लीलाललितगोष्ठीषु, प्रमोदनिधिषु न्यधात् ॥ १०२ ॥
अहं कलिङ्गसेनायास्तनयामभजं ततः । वेश्यां वसन्तसेनाख्यां, प्रमोदमधुपद्मिनीम् ॥ १०३ ॥
वर्षैर्द्वादशभिः स्वर्णकोटीः षोडश तद्गृहे । भुक्तवान् निर्धनीभूतस्तत् तयाऽहं बहिष्कृतः ॥ १०४ ॥
गतो गृहं मृतौ मत्वा, पितरौ दुःखितश्चिरम् । तत् कान्ताभूषणान्येव, नीवीं रचितवानहम् ॥ १०५ ॥
मातुलेन सहोशीरवर्तेऽहं नगरे गतः । क्रीतः कर्पासराशिश्च, दग्धः सोऽपि कृशानुना ॥ १०६ ॥
मातुलेनापि निर्भाग्य, इति मुक्तोऽपरां दिशम् । गच्छन् पथि मृते वाहे, पदातिश्चलितोऽस्म्यहम् ॥ १०७ ॥
तत् प्रियङ्गुपुरे कष्टाद्, गतस्तत्र स्थिरीकृतः । नाम्ना सुरेन्द्रदत्तेन, पितृमित्रेण सम्मदात् ॥ १०८ ॥
द्रव्यलक्षं गृहीत्वाऽहं, वणिग्भ्यस्तत् कलान्तरात् । अब्धौ गतागतैरष्ट, स्वर्णकोटीरुपार्जयम् ॥ १०९ ॥
स्वदेशे चलितो भग्ने, पोतेऽथ फलकग्रहात् । उदुम्बरावतीवेलातीरेऽगां सप्तमेऽहनि ॥ ११० ॥
अथ राजपुरोपान्तवने दिनकराभिधम् । त्रिदण्डिनं प्रणम्याहं, पुरः श्रान्तो निविष्टवान् ॥ १११ ॥

---

१ अतुच्छमुत्सवं कृत्वा, पितृ° पाता० ॥ २ °तं गत्वा पुरे ततः । क्रीतः कर्पासभारस्त-दग्धः खंता० ॥

उक्तस्त्रिदण्डिना भद्र !, द्रव्यार्थीव विभाव्यसे । दर्शयिष्यामि तत् तेऽहं, रसकूपं कृपारसात् ॥ ११२ ॥
इत्युक्त्वाऽस्मिन् प्रचलिते, पृष्ठे लग्नोऽहमुन्मुदः । व्यालव्याकुलितोपान्तां, गतस्तत्र गिरेस्तटीम् ॥ ११३ ॥
क्रान्तं बहुशिलायन्त्रैर्द्वारमुद्घाट्य मन्त्रतः । तत्राविशद् बिले सोऽथ, दुर्गपातालनामनि ॥ ११४ ॥
अन्वगामहमप्येनं, लोभपाशैर्नियन्त्रितः । भ्रान्तस्तमसि कष्टेन, रसकूपं व्यलोकयम् ॥ ११५ ॥
तस्मिन्नलाबुहस्तोऽहं, क्षिप्तः कूपे रसेच्छया । योगिना सहसा रज्जुवद्धमञ्चिकया क्रमात् ॥ ११६ ॥
तच्चतुःपुरुषमान्ते, मेखलोपरि सुस्थितः । दृष्ट्वा रसं नमोऽर्हद्भ्य, इति यावदहं ब्रुवे ॥ ११७ ॥
तावत् केनापि तत्राहं, व्यक्तमुक्तो महात्मना । साधर्मिक ! महाभाग !, रसं मास्म स्वयं ग्रहीः ॥ ११८ ॥
रसार्थमहमप्यत्र, वणिक् क्षिप्तस्त्रिदण्डिना । काङ्क्षन् धनमधोनाभं, भक्षितोऽस्मि रसेन च ॥ ११९ ॥
तन्मा विश रसं दास्ये, तुभ्यं मे तुम्बमर्पय । तदर्पितं मया सोऽपि, भृत्वा मम समार्पयत् ॥ १२० ॥
तद्रज्जुचलनात् कृष्टा, त्रिदण्डी मञ्चिकां तदा । तत्तुम्बं याचते द्वारासन्नं मां न तु कर्षति ॥ १२१ ॥

अयं द्रोहीति मत्वा तत्, क्षिप्तः कूपे मया रसः ।
मुक्तस्तेनाप्यहं कोपान्मेखलायां ततोऽपतम् ॥ १२२ ॥

तदुक्तं वणिजा साधु, रसान्तः पतितो न यत् । मा च शोचीर्यदायाति, गोधा रसपिपासया ॥ १२३ ॥
कूपेऽस्मिन् रसमापीय, व्रजन्त्याः पुच्छमादरात् । सर्वथैवावलम्बेथाः, सम्यग् धर्ममिवातुरः ॥ १२४ ॥
॥ युग्मम् ॥
नमस्कारं च मे देहि, परलोकाध्वशम्बलम् । कृते मयाऽथ तत्प्रोक्ते, परलोकं जगाम सः ॥ १२५ ॥
तद्रसग्रसनप्राप्तगोधापुच्छग्रहादहम् । निःसृतो मूर्च्छितः प्राप्तसञ्ज्ञोऽरण्ये ततोऽभ्रमम् ॥ १२६ ॥
अटवीमहिषेणाऽऽसन्नस्तदाऽऽरूढो महाशिलाम् । तत्राजगरसंरुद्धस्ततोऽहं द्रुतमत्रसम् ॥ १२७ ॥
तत् प्रयातोऽटवीप्रान्तग्रामे रोगेण पीडितः । अहं मातुलमित्रेण, रुद्रदत्तेन पालितः ॥ १२८ ॥
गृहीत्वाऽलक्तकं स्वर्णभूमौ तेन सहाऽचलम् । इषुवेगवतीं तीर्त्वा, गिरिकूटं विलङ्घ्य च ॥ १२९ ॥
क्रमाद् वेत्रवनं गत्वा, देशं टङ्कणमागतौ । ततः क्रीतच्छगारूढावुत्तीर्णौ वज्रमेदिनीम् ॥ १३० ॥ युग्मम् ॥
रुद्रदत्तोऽवदत् पन्था, नैवातः पादचारिणाम् । भस्त्रे कुर्वश्छगौ हत्वा, बहिरन्तर्विपर्ययात् ॥ १३१ ॥
तदन्तरस्थितावावां, भारुण्डैरामिषभ्रमात् । उत्पाट्याम्भोनिधौ स्वर्णमहीं नेष्यावहे जवात् ॥ १३२ ॥
श्रुत्वेत्यथावदं दुर्गपथसम्बन्धबान्धवौ । छागाविमौ ततः कार्षीः, पापं मातुल ! माऽतुलम् ॥ १३३ ॥
नैतौ त्वदीयावित्युक्त्वा, स्वं स च्छागं क्रुधाऽवधीत् । मदजो मन्मुखं दीनमुखस्तेन व्यलोकयत् ॥ १३४ ॥
तन्मयोक्तं तव त्राणे, नाहमीशस्तथापि ते । धर्मोऽस्तु मद्गिरा जैनः, परलोकविशुद्धये ॥ १३५ ॥
मया दिष्टं ततो धर्मं, मनसा प्रतिपद्य सः । मत्प्रदत्तं नमस्कारं, मुदा शृण्वन् हतोऽमुना ॥ १३६ ॥
तद्भस्त्रान्तर्गतावावां, भारुण्डाभ्यां छुरीजुषौ । हृतौ ततोऽन्यभारुण्डयुद्धेऽहं सरसि च्युतः ॥ १३७ ॥
शस्त्रीदीर्णाजिनस्तीर्णसरास्तत्राटवीमटन् । आरूढः शैलमनमं, कायोत्सर्गस्थितं मुनिम् ॥ १३८ ॥
धर्मलाभं ततो दत्त्वा, मुनिरेवमुवाच माम् । चारुदत्त ! कथं प्राप्तः, पथि त्वं खेचरोचिते ? ॥ १३९ ॥

महात्मन् ! खेचरः सोऽहं, यः पुरा मोचितस्त्वया ।
त्वामापृच्छ्य गतोऽन्वेष्टुं, तदा दारापहारिणम् ॥ १४० ॥

---

१ °मुत्पाद्य खंता० पाता० ॥

गतश्चाष्टापदे दृष्टोऽपश्यमेकाकिनीं प्रियाम् । ततः श्रुतं मया वैरी, यद् भीतः प्रपलायितः ॥ १४१ ॥
दयितां तामुपादाय, ततो यातः पुरं निजम् । नीतः पित्रा ततो राज्यभारोद्धारे धुरीणताम् ॥ १४२ ॥
विद्याधरश्रमणयोर्हिरण्य-स्वर्णकुम्भयोः । सकाशे स्वयमग्राहि, तातेन व्रतमद्भुतम् ॥ १४३ ॥
जज्ञे मनोरमाकुक्षौ, सुतः सिंहयशा मम । वराहग्रीवनामाऽन्यो, मान्यो दर्पवतामपि ॥ १४४ ॥
सुता गन्धर्वसेनेति, जाता विजयसेनया । सर्वगान्धर्वसर्वस्वसङ्केतैकनिकेतनम् ॥ १४५ ॥

दत्त्वा च सुतयो राज्यं, यौवराज्यं च तन्मया ।
विद्याः सम्पाद्य च प्रापि, पितृगुर्वन्तिके व्रतम् ॥ १४६ ॥

द्वीपोऽयं कुम्भकण्ठाख्यः, क्षारवारिधिमध्यगः । गिरिः कर्कोटकश्चायं, कथमत्राऽऽगतो भवान्? ॥ १४७ ॥
इत्यस्मिन् पृच्छति ख्यातं, सर्वं स्वचरितं मया । अथास्य नन्दनौ प्राप्तौ, खेचरौ तं च नेमतुः ॥ १४८ ॥
नम्यतां चारुदत्तोऽयमित्युक्तौ तेन तौ नतौ । तदैत्य च सुरः कोऽपि, मां नत्वाऽथ मुनिं नतः ॥ १४९ ॥
खेचराभ्यां तदा पृष्टस्तं वन्दनविपर्ययम् । अयं वैमानिकः प्राह, प्रमोदभरपूरितः ॥ १५० ॥
पूर्वजन्मन्यहं छागष्टङ्कणे रुद्रमारितः । एतस्मात् प्राप्तसर्वज्ञधर्मः सौधर्ममासदम् ॥ १५१ ॥
धर्माचार्यस्ततोऽयं मे, तेनाऽऽदौ वन्दितो मया । चारुदत्तः कृपाराशिरिति नोल्लङ्घितः क्रमः ॥ १५२ ॥
तौ खगौ प्रतिबोध्येति, स देवः प्राह मां प्रति । वद प्रत्युपकारं ते, कीदृशं करवाण्यहम्? ॥ १५३ ॥
मयोक्तं समये तूर्णमेतव्यमथ सोऽगमत् । अगृह्ये खेचराभ्यां च, ताभ्यां निजपुरं प्रति ॥ १५४ ॥
तत्रचिरं सत्कृतस्ताभ्यां, तज्जनन्या च तस्थिवान् । स्वसा गन्धर्वसेनेयमन्येद्युर्दर्शिता च मे ॥ १५५ ॥
निवेदितं च यत् तातः, प्रव्रजन्निदमब्रवीत् । चारुदत्तोऽस्ति मे मित्रं, भूचरो जीवितप्रदः ॥ १५६ ॥
उत्कीलितोऽस्मि तेनाहं, यदकारणबन्धुना । तस्य गन्धर्वसेनेयमर्पणीया कथञ्चन ॥ १५७ ॥
परिणेष्यत्यमूं मर्त्यो, वसुदेवः कलाजिताम् । इत्युक्तं ज्ञानिनाऽस्मभ्यं, ततः कार्यं तथैव तत् ॥ १५८ ॥
स्वपुत्रीं तद्गृहाणैतां, श्रुत्वाऽहमपि तद्वचः । एनामादाय सद्योऽपि, गृहायोत्कण्ठितोऽभवम् ॥ १५९ ॥
इहान्तरे समायासीद्, देवोऽसावजजीवजः । तेन ताभ्यां खगाभ्यां च, सह सोऽहमिहाऽऽगमम् ॥ १६० ॥
स देवो भूरि दत्त्वा मे, हेम-रत्नादिकं ततः । जगाम त्रैदिवं धाम, वैताढ्यं खेचरौ च तौ ॥ १६१ ॥
सर्वार्थो मातुलः शीलगृहं मित्रवती च सा । वेश्या वसन्तसेना च, बद्धवेणिर्मयेक्षिता ॥ १६२ ॥
उत्पत्तिरियमेतस्या, नासौ वीर ! वणिक्सुता । श्रुत्वेति वसुदेवस्तामुपयेमे रमासमाम् ॥ १६३ ॥

रक्त्या चाथ विरक्त्या च, च्छलेन च बलेन च ।
कलाजयेन चानेकदेशोद्देशान् परिभ्रमन् ॥ १६४ ॥

भूपानां खेचराणां च, द्विजानां वणिजामपि । कन्याः सौन्दर्य-सौभाग्य-लावण्यादिगुणास्पदम् ॥ १६५ ॥
स कदाप्युपरोधेन, कदापि हठतः पुनः । कदापि कौतुकेनैव, परितः परिणीतवान् ॥ १६६ ॥ विशेषकम् ॥
सुकोशलाभिधां पुत्रीं, कोशलस्य खगेशितुः । कोशलायां पुरि प्राप्तः, स कदाचिदुदूढवान् ॥ १६७ ॥
सुप्तः श्रान्तो रतान्तेऽसौ, केनाप्यङ्गुष्ठचालनात् । उत्थापितो बहिर्गत्वा, कोऽयमेवमचिन्तयत् ॥ १६८ ॥
अथो पतन् पदोपान्ते, कुमारेणोपलक्षितः । खेचरोऽनुचरोऽसौ मे, चन्द्रहास इति स्वयम् ॥ १६९ ॥

---

१ तत° खंता० ॥ २ तदा चैत्य सु° पाता० ॥ ३ °रः कश्चिन्मां खंता० ॥ ४ °द्रतो मृतः । प° पाता० ॥ ५ ताभ्यां गन्ध° खंता० पाता० ॥ ६ °हमिति त° खंता० पाता० ॥ ७ चन्द्रातप इति खंता० ॥

ततः सगौरवं गौरवचसा तमुवाच सः । कुमारः प्रमदामोदसद्योविद्योतिमानसः ॥ १७० ॥
केन प्रयोजनेन त्वं, कुतः स्थानादिहागतः ? । एतावत्यां तमस्विन्यां, तथ्यमित्थं निवेदय ॥ १७१ ॥
अथावददयं विद्याधरः प्रमददुर्धरः । शृणु देव ! कथामेकां, कौतूहलनिकेतनम् ॥ १७२ ॥
पेढालपुरमित्यस्ति, पुरं भूखण्डभूषणम् । स्मरस्य खुरलीवाभूद्, यल्लोलाक्षीकटाक्षितैः ॥ १७३ ॥
हरिश्चन्द्रोऽसुहृद्दन्तिहरिश्चन्द्रोज्ज्वलाशयः । तत्रास्ति भूविभुः कीर्तिकुसुमाराममालिकः ॥ १७४ ॥
लक्ष्मीवतीति तस्यास्ति, रूपलक्ष्मीवती प्रिया । नीरे यद्दास्यदास्याय, तत् तपस्तप्यतेऽम्बुजैः ॥ १७५ ॥
सती सुताम्रसूताऽसौ, सरसीव सरोजिनीम् । जनलोचनलोलालिलिह्यमानमुखाम्बुजाम् ॥ १७६ ॥
तस्या जन्मदिने स्वर्णवर्षमुत्कर्षकृद् बभौ । मेरोरुपागतं सेवाकृते जितमिव त्विषा ॥ १७७ ॥
पितृभ्यां कौतुकप्रीतिपूरिताभ्यां सुनिर्भरम् । सत्यं कनकवत्येषा, नामतोऽपि ततः कृता ॥ १७८ ॥
तत् प्रपेदे क्रमेणासौ, कलाभ्यासमयं वयः । रतिप्राणप्रियोऽप्यासीद्, यस्मिन् वासाय सस्पृहः ॥ १७९ ॥
चन्द्रमूर्तिरिव स्वच्छा, रवेरिव गुरोरियम् । प्राप्य कश्चित् कलोद्देशं, प्रपेदे सकलाः कलाः ॥ १८० ॥
तद्रूपस्तनयारूपानुरूपमनिरूपयन् । प्रवरं स वरं कश्चित्, समारेभे स्वयंवरम् ॥ १८१ ॥
स्वयंवरदिने मासमात्रासन्ने च सा स्वयम् । गवाक्षेऽक्ष्णीव गेहस्य, तस्थौ तारेव कन्यका ॥ १८२ ॥
अत्रान्तरे पुरस्तस्या, गतिशिक्षामतिः किल । हारेण हस्यमानोऽपि, हंसः कोऽपि दिवोऽपतत् ॥ १८३ ॥
कल्याणकिङ्किणीकान्तभूषणानणुझात्कृतिः । स तयाऽऽरोपितः पाणौ, मरालः कमलत्विषि ॥ १८४ ॥
अथासौ शश्वदम्भोजमरन्दस्वादहृद्यया । चमत्कृतिकृता मर्त्यभाषया तामभाषत ॥ १८५ ॥
यदि ते कुतुकं किञ्चिच्चित्ते तन्वि ! तदद्भुता । संवदन्ती सुधास्यन्दैः, किंवदन्ती निशम्यताम् ॥ १८६ ॥
अथावददियं तावत्, त्वं वक्तेत्यद्भुतं महत् । सा कथाऽप्यद्भुता हंस !, भविष्यत्याशु तद् वद ॥ १८७ ॥
हंसोऽप्याह मुदे वार्ता, सुधाकृतसुधारसा । प्रविशन्ती श्रुतौ देवि !, श्रूयतां सावधानया ॥ १८८ ॥
एकदाऽस्मि गतो देवि !, कोशलायां पुरि भ्रमन् । दूराददर्शि तत् तेजो, मया जितरविच्छवि ॥ १८९ ॥
किमेतदिति सम्भ्रान्तो, यावद् द्रष्टुमधोऽपतम् । तावदग्रे नरः कान्तिपूरिताम्बरगह्वरः ॥ १९० ॥
सुता च खेचरस्यैक्षि, कोशलस्य सुकोशला । अतिरूपयुताऽप्येषा, दीनश्रीस्तस्य सन्निधौ ॥ १९१ ॥
॥ युग्मम् ॥

तन्मयाऽचिन्ति सत्यमस्मिन्ननङ्गो न मनोभवः । अतश्च तु रतिर्दृश्या, यदस्य न समीपगा ॥ १९२ ॥
धन्येयं मेदिनी यस्यां, वीरोऽयं मुकुटायते । असावपूर्णपुण्यस्तु, स्त्रीरत्नं यत्र नाहितम् ॥ १९३ ॥
अनुरूपप्रियाहीनमेनमालोकयन् मुहुः । शोचन् निर्माणमेतस्य, गगनाङ्गणमभ्यगाम् ॥ १९४ ॥
ध्यायतस्तदिदानीं मे, हृदि तज्जन्म निष्फलम् । सद्यः सफलतां नीतं, देवि ! त्वद्दर्शनामृतैः ॥ १९५ ॥
जाने यदि समीपेऽस्य, पश्यामि भवतीमहम् । मन्दारपादपस्यान्ते, कल्पवल्लीमिवोद्गताम् ॥ १९६ ॥
इत्याकर्ण्य मरालं सा, जगाद मदनातुरा । दशनद्युतिदुग्धेन, स्नपयन्ती मुहुर्मुहुः ॥ १९७ ॥
असार्गेणैव कर्णेन, मत्तःसद्मनि मेऽविशत् । दृशा घण्टापथेनैव, कदाऽसौ सञ्चरिष्यते ? ॥ १९८ ॥
वार्त्तायामसमाप्तायामित्युड्डीय सितच्छदः । सहसैवोन्मुखस्तस्या, दृशा सह खमुद्ययौ ॥ १९९ ॥

---

१ °त्थं त्वयेदयत् पाता० ॥ २ स्त्रीमुखानां बभौ साङ्कः, शशाङ्को यत्र किङ्करः ॥ इतिरूपः पाठः खंता० पाता० ॥ ३ °पथेनेव पाता० ॥ ४ °यामथोड्डी° खंता० ॥

अदृश्येऽथ मरालेऽस्मिन्, विललाप कुमारिका ।
आस्तां तद्दर्शनं तावत्, तत्कथाकथकोऽप्यगात् ॥ २०० ॥
हा ! भ्रातर्दर्शितोऽसौ मे, कुतः सितविहङ्गमः ? । दर्शितो वा ततोऽकस्मात्, कस्मादपहृतस्त्वया ? ॥ २०१ ॥
विलपन्त्यामिदं तस्यां, चित्रश्छिन्नपटोऽग्रतः । पपात च नभोदेशादुच्चचार च भारती ॥ २०२ ॥
अहं स हंसस्तच्चित्रपटं त्वत्पुरतोऽमुचम् । अस्यानुसारतः सोऽयमुपलक्ष्यः स्वयंवरे ॥ २०३ ॥
अनुरागं तवेवाहं, तस्याप्याधातुमातुरः । यास्यामि न यतः क्वापि, सन्धिः सन्तप्त-शीतयोः ॥ २०४ ॥
इत्युक्त्वा तत्र तूष्णीके, सा ते चित्रगतं वपुः । दध्यौ यत्ननिबद्धस्य, जीवितस्येव यामिकम् ॥ २०५ ॥
तत् त्वया देव ! यातव्यं, तत्र तस्याः स्वयंवरे । विजितानङ्गसङ्गोऽस्तु, भवतोरनुरूपयोः ॥ २०६ ॥
एतच्चेतश्चमत्कारि, निशम्य वचनं तदा । जगाद वसुदेवोऽपि, मित्र ! हंसो भृशं न सः ॥ २०७ ॥
समयुग्माभिषङ्गाय, स्मरस्तं प्राहिणोद् विधुम् । अथवा मम तस्याश्च, मूर्त्तं पुण्यमिव व्यधात् ॥ २०८ ॥
चन्द्रापीड ! त्वया चेयं, ज्ञाता मित्र ! कथं कथा ? । हंसीभूय स्वयं वा त्वं, मत्कृते कृतवानिदम् ? ॥ २०९ ॥
इत्युक्ते स्मयमानोऽयं, कुमारेणोपलक्षितः । आलिङ्गितश्च बाहुभ्यां, तादात्म्यमिव तन्वता ॥ २१० ॥
समं तेनार्थं निश्चित्य, स्वयंवरगतिं कृती । तं च प्रहित्य पल्यङ्के, निविष्टो नीतवान् निशाम् ॥ २११ ॥
सुकोशलामथाऽऽपृच्छ्य, प्रातरुत्कण्ठितो ययौ । पेढालनगरोपान्ते, लक्ष्मीरमणकानने ॥ २१२ ॥
वाक्सुधास्यन्दचन्द्रेण, हरिश्चन्द्रेण सत्कृतः । सैन्यमावासयत् तत्र, वसुदेवो वनावनौ ॥ २१३ ॥
पुरा पुरो नमिविभोर्लक्ष्मी रेमेऽत्र रासकैः । लक्ष्मीरमणमित्येतद्, वनं मत्वेति सोऽधिकम् ॥ २१४ ॥
प्रमोदपेशलस्तत्र, वने नमिजिनालये । पूजयित्वा जिनाधीशान्, ववन्दे पुलकाङ्कितः ॥ २१५ ॥
॥ युग्मम् ॥
अभ्रो जितः पुरस्यास्य, धनाढ्यैरिव सन्धये । अवातरद् विमानेन, धनदोऽस्मिन् वने दिवः ॥ २१६ ॥
पूजयित्वा च नत्वा च, स भक्त्याऽस्मिन् वने जिनान् ।
हस्ताग्रसंज्ञयाऽऽह्वासीद्, विस्मितो वृष्णिनन्दनम् ॥ २१७ ॥
असौ महर्द्धिको देवस्तीर्थकृद्भक्तिभाक् पुनः । माननीय इति ध्यायन्, वसुदेवो मुदा ययौ ॥ २१८ ॥
तमायान्तमथालोक्य, पुरो लावण्यसागरम् । रूपे पुरन्दरस्यापि, धनदो निर्मदोऽभवत् ॥ २१९ ॥
अथादिशेति जल्पन्तं, पुरस्तं धनदोऽभ्यधात् । दूत्यं कनकवत्यां मेऽनन्यकृत्यं कृतिन् ! कुरु ॥ २२० ॥
वरणीयस्त्वया श्रीदोऽवतीर्णस्त्वत्कृते दिवः । स्वयं देहेन गच्छ द्यां, मानुष्येऽपि सुरीभव ॥ २२१ ॥
सा वाच्येति द्रुतं गच्छ, कन्यान्तःपुरमात्मना । यामिकैर्मत्प्रभावेण, त्वमदृश्यो गमिष्यसि ॥ २२२ ॥
शिक्षां धनपतेरित्थं, प्राप्य धीरो विशुद्धधीः । स्पृहणीयां सुरैः कन्यां, धन्यां ध्यायन्मुदाऽचलत् ॥ २२३ ॥
सामान्यजनमानेन, वेषमाकलयन्नयम् । ययौ कन्यागृहोत्सङ्गं, रक्षाकृद्भिरलक्षितः ॥ २२४ ॥
तमकस्मात् पुरो वीक्ष्य, राजपुत्री सविस्मया । अभ्युत्थानं व्यधादन्तर्मुदिता परिकम्पिनी ॥ २२५ ॥
दध्यौ किमु ममानूनैः, पुण्यैरेव विरञ्चिना । चित्रं पटगतं जीवन्यासेनोद्धृतमेव तत् ? ॥ २२६ ॥
अथैनामाह वीरोऽसौ, सुधासोदरया गिरा । अनङ्गमपि कन्दर्पं, कुर्वन् साङ्गमिवाग्रतः ॥ २२७ ॥

---

१ °ध्यमिति व्य° खंता० ॥ २ °न्द्रातप ! त्व° खता० ॥ ३ दौत्यं खंता० ॥
४ °वत्या मे° खंता० पाता० ॥

तन्वि ! मित्रं महेशस्य, महेन्द्रसदृशः श्रिया । त्वत्कृते त्रिदिवादद्य, धनदोऽवनिमागतः ॥ २२८ ॥
दूतोऽहं तस्य वामाक्षि !, त्वयि तेन नियोजितः । त्वया वरयितव्योऽयं, नृवरेषु स्वयंवरे ॥ २२९ ॥
अथो कनकवत्याह, भावेन भिदुरस्वरा । स सुरोऽहं मनुष्या तु, कथमेनं वृणोमि तत् ? ॥ २३० ॥
अपलप्य किमात्मानं, दूतीभूतो वदस्यदः ? । भविता भुवनोत्तंस !, भुवि भर्ता त्वमेव मे ॥ २३१ ॥
मित्रमेष त्रिनेत्रस्य, शक्रतुल्योऽस्तु तेन किम् ? ।
महेशोऽपि महेन्द्रोऽपि, मम देव ! त्वमेव यत् ॥ २३२ ॥
निशम्येदं वचस्तस्याः, स दध्यौ विस्मितो हृदि । मन्ये चित्रपटस्यानुसारेणाहं मतोऽनया ॥ २३३ ॥
अथ तामवदद् वीरः, श्रीददूत्येऽहमागतः । शृण्वन्नपीति वार्ता ते, लिप्ये पापेन यामि तत् ॥ २३४ ॥
अभिधायेदमह्नाय, सोऽयमह्नामिव प्रभुः । अतीतो दृक्पथं साऽभूत्, ततो म्लानमुखाम्बुजा ॥ २३५ ॥
तस्मिन् गते चित्रपटं, सा वीक्ष्य न मुदं दधौ । सहस्रांशेऽपि तद्रूपं, यतस्तत्र न पश्यति ॥ २३६ ॥
सोऽपि गत्वा यथावृत्तं, कथयन् विनयानतः । विज्ञातं सर्वमप्येतदिति श्रीदेन वारितः ॥ २३७ ॥
देवदूष्यांशुकद्वन्द्वमनेन परिधापितः । धनदेन मुदा शौरिः, पारितोषिककर्मणा ॥ २३८ ॥
मुद्रिकामर्जुनस्वर्णमयीं तस्याङ्गुलौ पुनः । चिक्षेप धनदः सोऽपि, तयाऽभूद्धनदोपमः ॥ २३९ ॥
अथो मण्डपमुर्वीशाः, स्वयंवरदिने गताः । तस्थुर्मञ्चेषु शृङ्गारभाजः शृङ्गारयोनिवत् ॥ २४० ॥
तेषु तुल्याकृती श्रीद-वसुदेवौ व्यराजताम् । इन्द्रोपेन्द्राविव तदा, समस्तेषु सुपर्वसु ॥ २४१ ॥
मण्डपेऽस्मिंस्तथाऽविक्षज्जनाकीर्णे नृपाङ्गजा । अम्बरे चन्द्रलेखेव, नक्षत्रावलिमालिते ॥ २४२ ॥
सा दधाना करे मालां, पौष्पीं चापलतामिव । बभावायुधशालेव, जङ्गमाऽनङ्गभूभुजः ॥ २४३ ॥
चक्षुश्चिक्षेप निःशेषानथ पृथ्वीपतीन् प्रति । नालक्षयत् प्रियं श्रीदसदृशं मुद्रया कृतम् ॥ २४४ ॥
अदृष्टवल्लभे तस्मिन्, भूरिभूपेऽपि मण्डपे । अचम्पक इवोद्याने, भृङ्गीवाऽऽप मुदं न सा ॥ २४५ ॥
अथ तस्यां विलक्षायां, नर्म निर्मुच्य गुह्यकः । अर्जुनस्वर्णमुद्रां तां, वसुदेवादयाचत ॥ २४६ ॥
मुक्तायामथ मुद्रायामुन्मुद्रितनिजाकृतिः । मेघमुक्त इव भ्रेजे, भानुरानकदुन्दुभिः ॥ २४७ ॥
तृप्ते कनकवत्यास्तच्चिराय तृषिते दृशौ । तेषु क्षारोदनीरेषु, सुधाकूप इव प्रिये ॥ २४८ ॥
हसन्ती हर्षतो भृङ्गरवपुष्पविभानिभात् । मालाऽक्षिप्यत तत्कण्ठे, धन्यंमन्येव कन्यया ॥ २४९ ॥
अथाऽऽशु धनदादिष्टदुन्दुभिध्वनिभिर्व्यधुः । हरितो हसितं हृष्टाः, सदृग्युग्मसमागमात् ॥ २५० ॥
पर्यणैषीदथ क्ष्मापनन्दनीं यदुनन्दनः । चिरकालार्जितप्रीतिं, शर्वः पर्वतजामिव ॥ २५१ ॥
शौरिः श्रीदमथापृच्छदुदितामन्दसम्मदः । कुतः कनकवत्यां वः, प्रसादविशदं मनः ? ॥ २५२ ॥
श्रीदस्तदवदद् दन्तद्युतिविद्योतिताकृतिम् । गिरं चिरन्तनप्रीतिचमूं यदुसुतं प्रति ॥ २५३ ॥

## कनकवत्याः पूर्वभवः

अस्ति कोशलदेशस्य, किरीटं कोशला पुरी । प्रतोली-तोरणदलभ्रूसम्भ्रान्तद्युपत्तना ॥ २५४ ॥
आरुह्य गृहमालासु, बालाः सुखसमुद्धृतैः । यस्यां गगनगङ्गाब्जैरवतंसं वितन्वते ॥ २५५ ॥

१ °ददौत्ये° खंता० ॥ २ कृतिः । गिं° खंता० ॥

यस्यां तमसि शोणाश्मवेश्मालीरश्मिभस्मिते । जना दिनादिं जानन्ति, वापीपद्मालिनीरवैः ॥ २५६ ॥
यस्यां वसत्सु लोकेषु, रत्नसम्भारहारिषु । रत्नाकरः परीवेषमकार्षीत् परिखामिषात् ॥ २५७ ॥
तत्राभूदरिशौडीर्यनिकषो निषधाभिधः । विभुर्महीमहेलाया, हेलाविजितशात्रवः ॥ २५८ ॥
उच्छलद्भुर्यशःस्तोमधूमध्यामलिताम्बराः । भूरयो भूभृतां वंशा, यत्प्रतापानलेऽज्वलन् ॥ २५९ ॥
उदारदानसौरभ्यमिलन्मार्गणषट्पदः । ऐश्वर्यकुञ्जरो यस्य, भुजस्तम्भे व्यवास्थित ॥ २६० ॥
यत्पदाब्जनखाभीशुभास्वद्भाला बभुर्द्विषः । श्रीप्रदाने स काश्मीरमण्डनाडम्बरा इव ॥ २६१ ॥
तस्य निःसीमसौन्दर्या, सुन्दरेति प्रियाऽभवत् । आस्येनेव जिता यस्याः, पद्मश्रीरपतत् पदोः ॥ २६२ ॥
पायं पायं रसालस्य, रसानपि पिकी ध्रुवम् । यद्गिरं नाप सन्तापः, स तस्याः कार्ष्ण्यकारणम् ॥ २६३ ॥
मन्ये यस्याः सुधासारविजयैकविलासिना । वाग्रसेन सदा सिक्तो, माधुर्यमधरोऽप्यधात् ॥ २६४ ॥
नलनामाऽनलस्पर्द्धिधामा सूनुस्तयोरभूत् । उपादानं यदङ्गस्य, मदनोऽनङ्गतां गतः ॥ २६५ ॥
यः ककुप्कुम्भिनां लीलागतिगौरवमग्रहीत् । तेन ते न चलन्त्येव, दिग्भ्यः क्षितिभृतिमिषात् ॥ २६६ ॥
समग्रायुधयोग्यासु, यं वल्गन्तं विलोकयन् । जातः शङ्के कृताशङ्कः, शङ्करोऽपि सरभ्रमात् ॥ २६७ ॥
स्वविभूतिपराभूतकुबेरः कूबराभिधः । तस्यानुजोऽभवद् युद्धकान्तारक्रोडकेशरी ॥ २६८ ॥
सभायामन्यदा दूतः, कश्चिद् वेत्रिनिवेदितः । आगत्य प्रणिपत्याथ, तं राजानं व्यजिज्ञपत् ॥ २६९ ॥
अस्ति देव! विदर्भेषु, रत्नगर्भाविभूषणम् । पुण्यपीयूषपूरस्य, कुण्डवत् कुण्डिनं पुरम् ॥ २७० ॥
तत्र भीमरथो नाम, सिन्धुसीमरथोद्यमः । अस्ति द्विषन्मुखाम्भोजसुधांशुर्वसुधाधवः ॥ २७१ ॥
प्रियाऽस्य पुष्पदन्तीति, दन्तीन्द्रगतिविभ्रमा । विद्यते द्युतिवैशद्यकिङ्करीकृतकाञ्चना ॥ २७२ ॥
व्यजिज्ञपन्नृपं राज्ञी, तमेकान्ते तदेकदा । आनन्दहृद्यया वक्त्रचन्द्रचन्द्रिकया गिरा ॥ २७३ ॥
अभ्रमूविभुशुभ्राङ्गस्त्वद्वेश्म प्रविशन् मया । दृष्टः कोऽपि द्विपः स्वप्ने, स्वामिन्! भीतो दवादिव ॥ २७४ ॥
सदा तदधरस्वादुरसमाधुर्यधुर्यया । गिरा तदनु सानन्दं, जगाद जगतीश्वरः ॥ २७५ ॥
स्वप्नेनानेन देवि! त्वं, स्त्रीषु धन्याऽसि निश्चितम् । यदुल्लास गर्भस्ते, सगर्भस्तेजसा रवेः ॥ २७६ ॥
किंवदन्तीमिति तयोर्वदतोर्मदतोयधिः । दृष्टः सतुमुलैर्लोकैः, शुभ्रः कुम्भी गृहे विशन् ॥ २७७ ॥
तदाऽऽलोकयितुं लोलौ, करिराजं कुतूहलात् । उदितौ मुदितौ द्वारि, स्वयमेवाथ दम्पती ॥ २७८ ॥
अथ द्वारगतं वीक्ष्य, वलक्षाङ्गं द्विपं नृपः । निजं पुण्यमिवायातं, मेने मूर्तिधरं पुरः ॥ २७९ ॥
तौ तदा दन्तिना तेन, स्वयं स्कन्धेऽधिरोपितौ । जातावाक्रान्तकैलासगौरी-गिरिशसन्निभौ ॥ २८० ॥
सम्भ्रमी बम्भ्रमीति स्म, तदा मदनदीगिरिः । तदाऽऽक्रान्तः पुरस्यान्तर्दुर्धरः सिन्धुरेश्वरः ॥ २८१ ॥
अथावतार्य तौ सौधे, स वारणपतिः स्वयम् । विवेश गजशालायां, शीलितायामिवान्वहम् ॥ २८२ ॥
अथो दिनेषु पूर्णेषु, पुष्पदन्त्याः सुताऽजनि । द्योतयन्ती गृहोत्सङ्गं, भानुमूर्तिरिवाम्बरम् ॥ २८३ ॥
गर्भे दवपरित्रस्तदन्तिस्वप्नावलोकनात् । तन्नाम्ना दवदन्तीति, पितृभ्यां सा प्रतिष्ठिता ॥ २८४ ॥
कलाकलापस्तामापदल्पाभ्यासपरामपि । लुब्धः स्वयमतादृक्षपात्रस्थितिकदर्थितः ॥ २८५ ॥
शाश्वतस्तिलको भालमस्या बाल इवांशुमान् । अलञ्चकार निःशेषध्वान्तसंहारकारकः ॥ २८६ ॥

१ व्यवस्थितः खंता० ॥ २ °न्दरीति पाता० ॥ ३ °तिभिषम् खंता० पाता० ॥ ४ °गदीभ्र° खंता०, पाता० ॥

सतीतेजोमयीमेतां, राहुभीत्या समाश्रिते । सूर्य-सोमश्रियौ मन्ये, मुखाब्जतिलकच्छलात् ॥ २८७ ॥
मन्ये तदीयवक्त्रेन्दोर्लाञ्छनं कबरीच्छलात् । पश्चान्निर्यातमस्तोकलोकदृग्दण्डखण्डितम् ॥ २८८ ॥
सुरस्त्रीरूपनिर्माणैरभ्यस्याभ्यस्य पद्मभूः । स्वप्रत्ययाय निर्माय, रतिमेतां ततो व्यधात् ॥ २८९ ॥
अस्या वदन-दृक्पाणि-क्रमं निर्मातुमब्जवत् । प्रविवेश स्वयं देवः, स्वयम्भूरपि वारिजम् ॥ २९० ॥
तुल्यं तदीयरूपस्य, न पश्यति वरं भुवि । भूपस्तेन समारेभे, स्वयंवरमहोत्सवम् ॥ २९१ ॥
आययुर्भूरयो भूपा, भीमाभ्यर्थनया ततः । स्वामिन् ! समं कुमाराभ्यामभ्येतव्यं त्वयाऽपि तत् ॥ २९२ ॥
तदुक्तं सर्वमुर्वीशस्तथेति प्रतिपद्य सः । सत्कृत्य कृत्यविद् दूतं, प्रचचालाऽचलाधवः ॥ २९३ ॥
अथाऽऽससाद सूनुभ्यां, साकं **कोशलनायकः** । सैन्येभकृतमार्गद्रुखण्डनः **कुण्डिनं पुरम्** ॥ २९४ ॥
**भीमः** सम्मुखमागत्य, सत्कृत्य **निषधाधिपम्** । मुदितः **कुण्डिनो**पान्ततरुखण्डे न्यवासयत् ॥ २९५ ॥
आकारयन्तमत्युच्चध्वजाङ्गुलिदलैश्चलैः । अथाऽऽजग्मुर्महीनाथाः, स्वयंवरणमण्डपम् ॥ २९६ ॥
न्यविशन्नथ मञ्चेषु, पञ्चेषुद्युतिजित्वराः । स्वस्यान्यस्य च पश्यन्तो, रूपं भूपा मुहुर्मुहुः ॥ २९७ ॥

एकस्मिन् **निषधो** मञ्चे, सुताभ्यां सह तस्थिवान् ।
पार्श्वद्वयनिलीनाभ्यां, पक्षाभ्यामिव पक्षिराट् ॥ २९८ ॥

मुखपूर्णेन्दुपीयूषबिन्दुवृन्दानुकारिणा । आनाभि कण्ठमुक्तेन, मुक्ताहारेण हारिणी ॥ २९९ ॥
जिताभ्यां पुष्पदन्ताभ्यामिवाऽऽस्यतिलकश्रिया । माणिक्यताडपत्राभ्यामुपकर्णं निषेविता ॥ ३०० ॥
प्रभिन्नानङ्गमातङ्गमदनिर्झरहृद्यया । प्लावयन्ती सभागर्भमभितः प्रभया दृशोः ॥ ३०१ ॥
हसद्भ्यां नखतेजोभिर्गतिं गज-मरालयोः । चरणाभ्यां चमत्कारिझङ्कारिधृतहंसका ॥ ३०२ ॥
मूर्त्तां कीर्तिं स्मरस्येव, गीयमानां मधुव्रतैः । पश्यन्ती विधृतां सख्या, स्वयंवरणमालिकाम् ॥ ३०३ ॥
मण्डपं प्रविवेशाथ, भूरिभूपतिसम्भृतम् । **दवदन्ती** मरालीव, सरः कमलसङ्कुलम् ॥ ३०४ ॥

॥ षड्भिः कुलकम् ॥

मूर्त्तौ तस्या मणिस्तम्भप्रतिबिम्बेष्वपि क्षणात् । का नाम **दवदन्तीति**, राज्ञा तरलिता दृशः ॥ ३०५ ॥
**दवदन्तीं** प्रति ततो, दर्शयन्ती धराधिपान् । व्याजहार प्रतीहारी, हारीकृतरदद्युतिः ॥ ३०६ ॥
**भानुर्दे**हप्रभापास्तसम्प**च्चम्पा**धिभूरयम् । यदङ्गघटनोच्छिष्टैर्द्रव्यैरघटि मन्मथः ॥ ३०७ ॥

**रोहितकाख्य**देशाब्धिचन्द्रोऽयं **चन्द्रशेखरः** ।
चित्रस्थेऽपि स्मरे दृष्टे, द्विषस्त्रस्यन्ति यद्भ्रमात् ॥ ३०८ ॥

क्ष्मापतिः **शशलक्ष्मा**ऽयं, प्रकाशः **काशिनायकः** ।
उन्मिषन्ति द्विषद्बालैर्यस्य क्रमनखत्विषः ॥ ३०९ ॥

नृदेवो **यज्ञदेवो**ऽयं, चङ्गोऽनङ्गोपमप्रभः । दध्युर्वन्देऽपि साफल्यं, यं विलोक्य रिपुस्त्रियः ॥ ३१० ॥
युद्धवह्निष्णुतृष्णोऽयं **कृष्णो** हूणमहीपतिः । यत्र न्यधाद्धराभारं, श्रीपतिः श्रीसुतभ्रमात् ॥ ३११ ॥
**सुंसमारपुरे**शोऽयं, **दधिपर्णः** कलार्णवः । भाति नित्योदयः किन्तु, पश्य यस्य यशःशशी ॥ ३१२ ॥
**निषधो**ऽयं द्विषच्छेदकुशलः **कोशलेश्वरः** । जिग्ये येनातिकामेन, तेजोभिः शाम्भवः शिखी ॥ ३१३ ॥
**नलो**ऽयं नैषधिर्यस्य, स्फुरन्ति न पुरः स्थिताः । कामन्यक्कारिलावण्यधन्यंमन्याः क्षमाभुजः ॥ ३१४ ॥

१ °श्चेषु च क्ष° खंता० ॥ २ °ष्णोऽसौ, कृ° खंता० पाता० ॥ ३ सुंसुमार° खंता० पाता० ॥

विलङ्घ्य भूभृतो भूरीन्, नले लावण्यवारिधौ । दमयन्त्यास्ततो दृष्टिस्तटिनीव न्यलीयत ॥ ३१५ ॥
अथो विशददृक्पातद्युतिजातविलेपने । मालामयोजयद् बाला, नलस्य गलकन्दले ॥ ३१६ ॥
बद्धक्रुधोऽपि भूपास्ते, तदा न प्राभवन् नले । दवदन्तीसतीत्वेन, स्तम्भिता इव वह्नयः ॥ ३१७ ॥
प्रमोदमेदुरामेनां, मेदिनीनाथनन्दिनीम् । नलस्तदनलः स्वाहामिव व्यवहदुन्महाः ॥ ३१८ ॥
ततश्चकार सत्कारं, जामातुर्भीमभूपतिः । हर्षेण हास्तिका-ऽश्वीय-वसना-ऽऽभरणादिभिः ॥ ३१९ ॥
अन्यानपि धराधीशानशनैर्वसनैरपि । सत्कृत्य कृत्यवित् प्रैषीदसौ निजनिजं पुरम् ॥ ३२० ॥
अथ नक्तं पुरीलोकविलोकनसमुत्सुकः । व्यदधान्निषधक्ष्मापः, प्रयाणं प्रति कोशलाम् ॥ ३२१ ॥
कियन्तमप्यथाध्वानमनुव्रज्य निवर्त्स्यता । जगदे गद्गदं तेन, नन्दनी मेदिनीभुजा ॥ ३२२ ॥
चरित्रेण पवित्राऽसि, पुत्रि! किं तव शिक्षया? । तथापि जनकस्नेहमोहेन मुखरोऽस्म्यहम् ॥ ३२३ ॥
पतिमाराधयेः शुद्धैर्वाङ्मनः-कर्मभिस्त्रिभिः । स एव देवता स्त्रीणां, चित्तं वित्तं गुरुः सुहृत् ॥ ३२४ ॥
किञ्च वैभवमभ्येत्य, सकालुष्यान्तराशया । पातयन्ती जवादेव, स्वयं सविधवर्धितान् ॥ ३२५ ॥
स्वच्छतामुपगच्छन्ती, पुनः प्रक्षीणवैभवा । सत्यतां पुत्रि! मा नैषीः, स्त्रीनदीवदिदं वचः ॥ ३२६ ॥

॥ युग्मम् ॥

पतिमेवानुगच्छेश्च, वत्से! स्वच्छेन चेतसा । क्षिप्ताऽपि दूरतः प्रातश्छायेव निजपादपम् ॥ ३२७ ॥
शिक्षयित्वा सुतामित्थमथ भीमो न्यवर्तत । तद्विश्लेषोत्थसन्तापमश्रुभिः शमयन्निव ॥ ३२८ ॥
बद्धाविव प्रेमगुणैः, शक्तौ विघटितुं न तौ । दवदन्ती-नलावेकरथारूढौ प्रचेलतुः ॥ ३२९ ॥
खपुटाध्वस्खलच्चक्ररथघूर्णिस्तयोर्मुहुः । मिथःसङ्घट्टसङ्कल्पकल्पपादपतां ययौ ॥ ३३० ॥
तदा दीप्तौषधीनुन्नैर्गुहाभ्य इव भूभृताम् । ध्वान्तैः कोकवियोगाग्निधूमैरिव विजृम्भितम् ॥ ३३१ ॥
धाराधरैरिव ध्वान्तैर्निरुद्धे मरुदध्वनि । चुम्बना-ऽऽलिङ्गनैराशु, तयोः प्रेमलताऽफलत् ॥ ३३२ ॥
ध्वान्तैरध्वनि रुद्धेऽपि, नृपे वासमतन्वति । जनो जगाम सैन्येभरत्नादर्शप्रभामनु ॥ ३३३ ॥
तदा च धुर्यमाधुर्यं, मधुव्रतकुलध्वनिम् । निशम्य भीमनन्दन्या, वल्लभः समभाष्यत ॥ ३३४ ॥

न तावद् भाति सौरभ्यसंरम्भः कानने क्वचित् ।
तत् कुतः कुतुकोल्लासकारिणी भृङ्गझात्कृतिः? ॥ ३३५ ॥

प्रिये! किं ज्ञायते ध्वान्ते?, तदा कान्ते वदत्यदः । ममार्ज पाणिपद्मेन, भालं भीमनृपाङ्गजा ॥ ३३६ ॥
दीप्तोऽथ तिलकस्तस्याः, प्रताप इव भास्वतः । अकस्माद् भस्मयामास, तमःसमुदयं वने ॥ ३३७ ॥
वनेभगण्डसङ्क्रान्तमदाविलमथो नलः । कायोत्सर्गजुषं कञ्चिन्मुनिं वीक्ष्य मुदं दधौ ॥ ३३८ ॥

करिघट्टेऽपि नाचालीत्, कर्मभिस्तद्वहिष्कृतैः ।
व्याख्यातोऽयमलिव्याजाद्, गुणा श्लाघ्या रिपोरपि ॥ ३३९ ॥

वदन्निदं नलस्तूर्णमुत्तीर्णः प्रियया सह । नमस्कृत्य च तं साधुं, पुनः स्यन्दनमागमत् ॥ ३४० ॥
काकिणीरत्नविस्पर्द्धिभैमीतिलकतेजसा । ध्वान्ते हतेऽथ तत्सैन्यं, चक्रिसैन्यमिवाचलत् ॥ ३४१ ॥
क्रमादथ पुरं प्राप, निषधः क्ष्मापकुञ्जरः । चलच्चेलाञ्चलोल्लासैः, प्रणर्तितभुजामिव ॥ ३४२ ॥

---

१ °ष्टिर्नलिनीव न्य° खंता० ॥ २ °लान् खंता० ॥ ३ °षधक्ष्मापनन्दनः खंता० ॥

निधायाथ **नलं** राज्ये, यौवराज्ये च **कूबरम्** । आत्मानं शमसाम्राज्ये, न्यधत्त **निषधाधिपः** ॥ ३४३ ॥
पयोधिपरिखामुर्वीमपालयदथो **नलः** । निरन्तरचतुर्वर्णावासकीर्णां पुरीमिव ॥ ३४४ ॥
महीभृद्वंशसन्दोहपरिदाहपटीयसः । तेजसा नान्तरं दावानलस्य च **नलस्य** च ॥ ३४५ ॥
**कूबरस्तं** छलान्वेषी, बन्धुतावत्सलं **नलम्** । दुरोदरविनोदेषु, चिक्षेप क्रूरमानसः ॥ ३४६ ॥
**दवदन्त्या** च मित्रैश्च, द्यूतव्यसनतस्तदा । विरराम निषिद्धोऽपि, **नैषधिर्नैष** धिग् ! विधिम् ॥ ३४७ ॥
**कूबरेण** सह क्रीडन्, मोहध्वान्ताकुलो **नलः** । अहारयत् तदा राज्यं, सान्तःपुर-परिच्छदम् ॥ ३४८ ॥
निकृतः **कूबरेणाथ**, क्ष्मानाथः क्रूरचेतसा । गात्रमात्रपरीवारोऽचलद्देशान्तरं प्रति ॥ ३४९ ॥
**नलानुगामिनीं भैमीं**, **कूबरः** प्राह साहसी । हारिता यन्नलेनासि, न त्वं तद् गन्तुमर्हसि ॥ ३५० ॥
अथेदं स वदन्नुक्तः, पौरैः क्रूर ! करोषि किम् ? । जननीमिव मन्यन्ते, भ्रातृजायां हि साधवः ॥ ३५१ ॥
जननीति न चेन्नीतिस्तवैतां प्रति सम्प्रति । तदस्याः पाप ! शापेन, भृशं भवसि भस्मसात् ॥ ३५२ ॥
इत्ययं भाषितः पौरैः, शिक्षितश्च **नलानुजः** । रथमारोप्य **वैदर्भीं**, न्ययुङ्क्तानु**नलं** तदा ॥ ३५३ ॥
अथ त्यक्तरथः कान्तायुक्तो **निषधनन्दनः** । चचार[1] चरणापातपवित्रितधरातलः ॥ ३५४ ॥
सिक्तो घण्टापथस्तस्य, प्रस्थितस्य वनं प्रति । पौरैर्नेत्राम्बुजोपान्तवान्तैः सलिलबिन्दुभिः ॥ ३५५ ॥
हा ! हा ! हताः स्मो दैवेनेत्यार्तैः प्रतिगृहं स्वनैः । शब्दाद्वैतं तदा जज्ञे, रोदःकन्दरमन्दिरे[2] ॥ ३५६ ॥
पुरीपरिसरोपान्ते, तस्थिवानथ पार्थिवः । अमात्य-पौरप्रभृतीन्, बोधयित्वा न्यवर्तयत् ॥ ३५७ ॥
राज्यत्यागे निषिद्धोऽपि, नैषधिस्तैरनेकशः । सत्यमेव पुरस्कृत्य, प्रतस्थे सुस्थमानसः ॥ ३५८ ॥
प्रपद्य जननीत्वेन, **कूबरेण** निवारिता । **नलेनानुमताऽप्यस्थान्नैवं**[3] सा **भीमनन्दनी** ॥ ३५९ ॥
तद् वनं भवनं वृक्षाः, कल्पवृक्षास्त एव मे । चरणैरार्यपुत्रस्य, पावित्र्यं यत्र सून्यते ॥ ३६० ॥
**दवदन्ती** तदित्युक्त्वा, विसृज्य च परिच्छदम् । चचालोज्ज्वलवक्त्रेन्दुर्नलवर्त्मानुवर्तिनी ॥ ३६१ ॥[4]
असिस्वदत् फलश्रेणीं, पयःपूरमपीप्यत । व्यशिश्रमन्मुहुर्मार्गे, **भैमीं** भूमीशपुङ्गवः ॥ ३६२ ॥
अथ काममरण्यानीं, निरन्तरतरद्रुमाम्[5] । दुर्ग्रहामिव दुर्गोर्वीं, तमसामासदन्नृपः ॥ ३६३ ॥
तत्राऽऽह वल्लभं **भैमी**, लगित्वा पादपद्मयोः । अलङ्कुरु कुलोत्तंस !, पद्भ्यां तातपुरीमिति ॥ ३६४ ॥

यद् वदिष्यसि देवि ! त्वं, तत् कार्यं श्व(श्व)स्तनेऽहनि ।
कृतकृत्येव **भैमीति**, पिप्रिये प्रेयसो गिरा ॥ ३६५ ॥

अथास्तमगमद् भानुर्नलस्येव महोदयः । दुष्कीर्त्या **कूबरस्येव**, व्यानशे तमसा जगत् ॥ ३६६ ॥
उत्तरीयं धराधीशो, नीत्वा पल्यङ्कतां ततः । भुजोपधान एवाऽऽप, स्वापं वल्लभया सह ॥ ३६७ ॥
निशीथे पृथिवीनाथो, निद्रास्पृशि मृगीदृशि । अचिन्तयच्चिरं चित्ते, नियत्या निहतोद्यमः ॥ ३६८ ॥
आकारयिष्यति प्रातः, प्रिया निजपितुर्गृहे[6] । श्रयन्ते श्वशुरं नीचाः, क यामि ? करवाणि किम् ? ॥ ३६९ ॥

श्वः करिष्यामि यद् देवि !, वक्तासीति मयोदितम्[7] ।
तद्दाक्षिण्यमयं वाक्यं, बाढं दुःखाकरोति माम् ॥ ३७० ॥

त्यजामि यद्यमूं सुप्तां, तत् प्रसर्पति दुर्यशः । अन्यथा मासियं प्रातः, प्रापयत्येव **कुण्डिनम्** ॥ ३७१ ॥

---

१ °चाल च° खंता० पाता० ॥ २ °न्दिरम् खंता० ॥ ३ °नैवासौ भी° खंता० ॥ ४ युग्मम् पाता० ॥ ५ °तरु-द्रुमाम् खंता० ॥ ६ °गृहम् खंता० ॥ ७ °ति प्रतिश्रुतम् खंता० ॥

स्वशीलरक्षितात्मानं, वरं मुञ्चामि तामिमाम्[1] । न कुण्डिनगतो दैन्यं, मन्दो मन्दाक्षमुद्वहे ॥ ३७२ ॥
निश्चित्येति नलः कान्ताकपोलतलतो भुजम् । मन्दं चकर्ष निर्यातुमवाञ्छन्तमिव प्रियात् ॥ ३७३ ॥
उत्तरीयस्य पर्यङ्कीकृतस्यार्द्धग्रहेच्छया । आचकर्ष ततः शस्त्रीं, निस्त्रिंशत्वेन सत्रपः ॥ ३७४ ॥
बाष्पोर्मिरुद्धदृग्वर्त्मा, शुचा गलितचेतनः । वसनाय करं व्योम्नि, न्ययुङ्क्त व्याकुलो नलः ॥ ३७५ ॥
तस्य ध्यात्वा क्षणेनाक्ष्णी, परिमृज्यैकपाणिना[2] । चेलं चिकर्तिषोः कम्पान्निपपात क्षुरी करात् ॥ ३७६ ॥
पुनः कृपाणिकां पाणौ, गृहीत्वा दुर्मनायितः । उवाच नैषधो दुःखमग्नमन्दतरस्वरम् ॥ ३७७ ॥
दमयन्त्या वनत्यागे, सपत्न्या मत्करग्रहात् । अपि निस्त्रिंशपुत्रीयं, पपात भुवि धिग् ! नलम् ॥ ३७८ ॥

धाराधिरूढविज्ञाने !, सद्वंशे ! स्निग्धतानिधे ! ।
निष्कृपस्य[3] कुकार्येऽपि, कृपाणि ! कुरु मे कृपाम् ॥ ३७९ ॥

इत्युक्त्वा क्षणमुद्धृत्य, धैर्यं वैक्लव्यतो नलः । चकर्त्त चीवरं प्रेमबन्धनेन समं तदा ॥ ३८० ॥
अथ देव्या मुखाम्भोजमालोकयितुमुन्मनाः । ममार्ज पाणिना भालमुन्मीलत्तिलकप्रभम् ॥ ३८१ ॥
अथाऽध्यायन्नलो मुग्धामुखस्याऽहो ! महो महत् । येन जागर्ति शेते वा, नेति निश्चिनुते मतिः ॥३८२॥

उवाच देवि ! त्वद्वक्त्रालोके भाग्यं न मे दृशोः ।
न च त्वत्परिचर्यायां, योग्यताऽपि हतात्मनः ॥ ३८३ ॥

प्रियाननोपरिन्यस्तदृष्टिरेवं वदन् नलः । दधौ हस्तेन बाष्पाम्भस्तत्प्रबोधभयान्मुहुः ॥ ३८४ ॥
अकृपः सकृपे ! गोत्रकलङ्को गोत्रदीपिके ! । दुराचारः सदाचारे !, कुर्वे नतिमपश्चिमाम् ॥ ३८५ ॥
देवि ! त्वच्चरितेनेन्दुरकलङ्कः किलाभवत् । अन्ववायगुरुः किन्तु, मद्वृत्तेन कलङ्कितः ॥ ३८६ ॥
अहो ! अभीरुर्बलवान्, यद्भीरुमबलां नलः । मुक्त्वा वनान्तरे याति, स्वयं वसति पत्तने ॥ ३८७ ॥
ब्रुवन्निति क्षतस्वाङ्गक्षरत्क्षतजलेखया । अक्षराण्यलिखद् दीनो, देव्याश्चेलाञ्चले नलः ॥ ३८८ ॥
विदर्भेषु वटेनाध्वा, वामे ! वामेन गच्छति । दक्षिणे ! दक्षिणेनैतैः, कोशलायां तु किंशुकैः ॥ ३८९ ॥
यत्र ते प्रतिभात्येव, देवि ! तत्र स्वयं व्रजेः । आत्मानं दर्शयिष्येऽहमुत्तमे ! न तवाधमः ॥ ३९० ॥
लिखित्वेति नलो मन्दपदपातमथाचलत् । पिबन् मुखाम्बुजं देव्या, दृग्भ्यां वलितकन्धरः ॥ ३९१ ॥

रक्षामि शयितां यावद्, यामिनीं स्वामिनीमिति ।
नलः पश्यन् प्रियां वल्लीमण्डलान्तरितः स्थितः ॥ ३९२ ॥

विभातायां विभावर्यां, देव्या जागरणक्षणे । मृदु-द्रुतपदापातमचलन्नलभूपतिः ॥ ३९३ ॥
अथो हृदयसन्तापं, स्फुटीभूतमिवाऽऽत्मनः । नलो व्यलोकयद् दावानलं ज्वलितमग्रतः ॥ ३९४ ॥
रविवंशनरोत्तंस !, निषधक्ष्मापनन्दन ! । महाबल ! नल ! त्राणदक्ष ! संरक्ष मां दवात् ॥ ३९५ ॥
इत्याकर्ण्य गिरं दावानलमध्योत्थितां[4] नलः । अचिन्तयदिदं वेत्ति, कोऽत्र मां निर्जने वने ? ॥ ३९६ ॥
अथोवाच नृपः कस्त्वं, मां परिज्ञाय भाषसे ? । इत्युक्ते पुनरुद्भूता, भारती दावपावकात् ॥ ३९७ ॥
भुजगोऽहमदग्धायां, वल्लौ सङ्कुचितैः स्थितः । निर्गन्तुं भूमितापेन, न शक्नोमि दवानलात् ॥ ३९८ ॥
उपकारं करिष्यामि, महान्तं ते महीपते ! । मूर्तादिव यमक्रोधादग्नेस्तत् कर्ष कर्ष माम् ॥ ३९९ ॥

---

१ °तामेनां, वरं मुञ्चामि भामिनीम् खंता० ॥ २ परिमार्ज्यैक° वता० खंता० ॥
३ निष्कप° खंता० ॥ ४ °त्स्थि° खंता० पाता० ॥

इत्याकर्ण्य विलोक्याथ, पटप्रान्तं नृपोऽक्षिपत् । सर्पे तदग्रमारूढे, क्षणेन पुनराक्षिपत् ॥ ४०० ॥
अथ निःसृत एवास्य, भुजाग्रं भुजगोऽदशत् । तदात्वमेव कुब्जत्वमाससाद ततो नृपः ॥ ४०१ ॥
दृष्ट्वाऽथ भूपः स्वं रूपं, दध्यौ दष्टं मया रयात् । धिग्! देवीत्यागपापद्रुफलोत्पत्तिप्रसूनकम् ॥ ४०२ ॥
अधुना वनमार्यान्त्या, देव्या यादृक् कृतो मया । उपकारोऽमुना तादृग्, दवाक्लिष्टेन मे कृतः ॥ ४०३ ॥
सविलक्षं हसन्नाह, सरीसृपमथो नृपः । उपकारस्त्वयाऽकारि, स्वस्ति ते गम्यतामिति ॥ ४०४ ॥
अथ कोऽप्यग्रतो भूत्वा, प्रीतः प्राह नरो नृपम् । वत्स! जानीहि मां देवीभूतं पितरमात्मनः ॥ ४०५ ॥

भास्वन्तं दुर्दिनेऽपि त्वां, तेजसा मास्म शत्रवः ।
जानन्तु हन्त! तेन त्वं, मया नीतोऽसि कुब्जताम् ॥ ४०६ ॥

समुद्गकं गृहाणेदं, यदा कार्यं भवेत् तव । परिधेयं तदाऽमुष्माद्, देवदूष्यांशुकद्वयम् ॥ ४०७ ॥
इत्थं समर्पयन्नेव, देवः प्राह पुनः सुतम् । क्व भवन्तं विमुञ्चामि?, क्रमचारो हि दुःखदः ॥ ४०८ ॥
**सुंसमारपुरे** मुञ्च, **नलेने**त्थमथोदिते । देवः क्वचिद् ययौ स्वं तु, तत्रापश्यदसौ पुरे ॥ ४०९ ॥

अकस्माद् विस्मयस्मेरस्तत् पश्यन् पुरतः पुरम् ।
यावच्चलति सोऽश्रौषीत्, तावत् कोलाहलं पुरः ॥ ४१० ॥

ततः किमेतदित्यन्तश्चिन्तयत्याकुले **नले** । नश्यतां नश्यतामित्थमूचुरुच्चैस्तुरङ्गिणः ॥ ४११ ॥
स्पर्द्धयेव प्रधावन्तीं, घ्नन्तं छायामपि स्वकाम् । मुहुःकृताकृतस्पर्शं, वायुनाऽपि भयादिव ॥ ४१२ ॥
मधुव्रतैरतितरां, धावद्भिर्मदलिप्सया । अनासादितकर्णान्तमतित्वरितचारतः ॥ ४१३ ॥
उदस्तशुण्डमुड्डीनानपि खण्डयितुं खगान् । क्षयोत्क्षिप्तमहादण्डमिव दण्डधरं क्रुधा ॥ ४१४ ॥
धर्मपुत्रानिवाब्दस्य[2], स्वशब्दस्पर्द्धितध्वनेः । भिन्दन्तं दन्तघातेन, पादपौघान् पदे पदे ॥ ४१५ ॥
मूर्धातिधूननैर्गण्डप्रोड्डीनालिकुलच्छलात् । क्षिपन्तं खण्डशः कृत्वा, व्योमाङ्गणमपि क्षणात् ॥ ४१६ ॥
अस्यन्तं कुम्भसिन्दूररेणूनुद्धतधूननैः[3] । मूर्धाध्वनिःसृतध्मातक्रोधानलकणानिव ॥ ४१७ ॥
कञ्चिदुच्चालितक्षोणिखण्डं चण्डांह्रिपाततः । व्यालं व्यालोकयामास, **नलः** प्रबलविक्रमम् ॥ ४१८ ॥
॥ सप्तभिः कुलकम् ॥

ऊर्द्धीकृत्य भुजामुर्वीभुजा वाहयुजा ततः । व्याहृतं **दधिपर्णेन**, क्षणव्याकुलचेतसा ॥ ४१९ ॥
यः कोऽपि कोपिनममुं, करिणं कुरुते वशे । लक्ष्मीं तनोमि तद्देहोत्सङ्गरङ्गैकनर्तकीम् ॥ ४२० ॥
अथाऽऽकर्ण्येति कुतुकी, सत्वरं प्राचलन्नलः । कालप्रायमपि व्यालं, मन्यमानः शृगालवत् ॥ ४२१ ॥

भो कुब्ज! कुब्ज! कीनाशमुखे मा विश मा विश ।
इत्युक्तोऽपि जनैर्धीरः[4], केसरीव ययौ गजम् ॥ ४२२ ॥

रे रे शुण्डाल! मा बाल-विप्र-धेनु-वधूर्वधीः । एह्येहि मददुर्दान्त!, दान्ततां दर्शयामि ते ॥ ४२३ ॥
वल्गन्तमिति वाचालं, कोपादनुचचाल तम् । करी कराग्रविक्षेपप्राप्ता-ऽप्राप्तशिरोरुहम् ॥ ४२४ ॥
पतन्नुद्यन् मिलन्नस्य, निघ्नन् घातं च वञ्चयन् । अङ्गुष्ठाङ्गुलिसम्मर्दैरर्दयन् पुष्करं छलात् ॥ ४२५ ॥
भ्रान्त्वा दक्षिणपक्षेण, चक्रवद् भ्रमयन् मुहुः । चतुर्णामपि पादानां, प्रविश्याधोऽपि निःसरन् ॥ ४२६ ॥

---

१ °यान्त्यां, देव्यां या° पाता० ॥ २ °स्य, शब्दस्य स्प° खंता० ॥ ३ °रेणुमुद्ध° खंता० ॥ ४ °नैर्वीरः खंता० ॥

निमेषार्द्धात् पुरः पश्चात्, पक्षयोश्च स्फुरन् नलः । खेदयामासिवानेकोऽप्यनेकवदनेकपम् ॥ ४२७ ॥
॥ विशेषकम् ॥

सोऽथ खिन्नमपि क्रोधाद्धावन्तं द्विपमुन्मदम् । वशीकर्तुं पटीं मूर्त्तामिव प्रज्ञां पुरोऽक्षिपत् ॥ ४२८ ॥
रूपबुद्ध्याऽथ तां हन्तुं, विनमन्तं मतङ्गजम् । दन्तन्यस्तपदः शैलं, केशरीवारुरोह सः ॥ ४२९ ॥
कलापकान्तरन्यस्तपदस्तदनु दन्तिनम् । सृणिमादाय रोमाञ्चकवची तमचीचलत् ॥ ४३० ॥[1]
पुरस्य कृपया कोऽपि, किमसावाययौ सुरः ? । स्वयम्भूरथवा पौरपुण्यपूरैस्तथाभवत् ? ॥ ४३१ ॥
अभ्रमूवल्लभस्पर्द्धिवर्द्धितर्द्धिपराक्रमः । ययौ भुवनभीमोऽपि, गजोऽयं यस्य वश्यताम् ॥ ४३२ ॥
इत्थं परस्परं पौरैः, प्रीतिगौरैः पदे पदे । कुब्जोऽपि स्तूयमानश्च, वीक्ष्यमाणश्च रेजिवान् ॥ ४३३ ॥
॥ विशेषकम्[3] ॥

प्रीतात्मा स्वयमारुह्य, गोपुरं पुरनायकः । तस्याधो गच्छतः कण्ठे, दाम रत्नमयं न्यधात् ॥ ४३४ ॥
अथोपनीय शालायां, गजमाकलयन् नलः । लीलाविलोलशुण्डाग्रग्राहिताहारपिण्डकम् ॥ ४३५ ॥
प्रीतः प्रदाय रत्नानि, वसना-ऽऽभरणानि च । अथ मित्त्रैमिवोर्वीशः, पुरः कुब्जं न्यवीविशत् ॥ ४३६ ॥
कुतस्तव कलाभ्यासः ?, कस्त्वं ? वससि कुत्र च ? । राज्ञेति पृष्टो हृष्टेन, नलभूपतिरभ्यधात् ॥ ४३७ ॥
सूपकारो नलस्याहं, प्रियो हुण्डिकसंज्ञकः । नलादात्तकलाभ्यासः, कोशलायां वसामि च ॥ ४३८ ॥
अज्ञासीद् यन्नलः सर्वं, तं कलौघं मयि न्यधात् । अन्यच्चाशिक्षयत् सूर्यपाकां रसवतीमपि ॥ ४३९ ॥
बन्धुना हारितैश्वर्यः, कूबरेणाधमेन सः । नलः स्वामी वने गच्छन्, विपन्नः प्रियया सह ॥ ४४० ॥
ततो राजन् ! परित्यज्य, कूबरं कुलपांसनम् । आश्रितोऽहं कलावन्तं, भवन्तं नलवन्मुदा ॥ ४४१ ॥
इति श्रुत्वा नलक्ष्मापवार्तामार्तारवोऽरुदत् । दधिपर्णोऽशुकच्छन्नवदनः सपरिच्छदः ॥ ४४२ ॥
कृत्वा नलस्य पर्यन्तकृत्यानि कृतिनां वरः । अधारयच्चिरं चित्ते, दधिपर्णनृपः शुचम् ॥ ४४३ ॥
रसवत्या नलः सूर्यपाकया नृपमन्यदा । अप्रीणयद् यथायुक्तरसप्रसरपुष्टया ॥ ४४४ ॥
अथ वासांसि रत्नानि, तस्मै भूरीणि भूपतिः । ग्रामपञ्चशतीं टङ्कलक्षं च प्रीतिमान् ददौ ॥ ४४५ ॥

राज्यं ययौ नलस्यापि, ग्रामैर्नाम करोमि किम् ? ।
तं कुब्जमिति जल्पन्तं, प्रीतः प्राह पुनर्नृपः ॥ ४४६ ॥

प्रीतोऽस्मि तव सत्त्वेन, सत्त्वाधिकशिरोमणे ! । याच्यतां रुचितं किञ्चिदित्युक्तेऽभिदधे नलः ॥ ४४७ ॥
मृगव्य-मदिरा-द्यूतव्यसनानि स्वसीमनि । यावज्जीवं निषेध्यानि, श्रुत्वेदं तद् व्यधान्नृपः ॥ ४४८ ॥
अथ वर्षगणेऽतीते, कश्चिदेत्य द्विजः सभाम् । वेत्रिणाऽऽवेदितः स्वस्तिपूर्वकं नृपमब्रवीत् ॥ ४४९ ॥
श्रीभीमेन समायातदवदन्तीगिरा चिरात् । नलप्रवृत्तिमन्वेष्टुं, प्रेषितोऽहं तवान्तिके ॥ ४५० ॥

भैमीं निशम्य जीवन्तीं, नलोऽपि क्वापि जीवति ।
तद्गिरेति विनिश्चित्य, प्रीतः प्रोवाच पार्थिवः ॥ ४५१ ॥

नलस्य सूपकारोऽयं, कुब्जो राज्येऽस्ति मे गुणी ।
एतद्गिरा मयाऽश्रावि, विपन्नः सप्रियो नलः ॥ ४५२ ॥

---

१ अत्रान्तरे विशेषकम् इति पाता० ॥ २ °रत्नावभूव् ? खंता० पाता० ॥ ३ पाता० नास्ति ॥ ४ °त्रगिरोर्वी° वता० खंता० ॥ ५ °लस्वा° खंता० ॥ ६ °दधौ न° खंता० पाता० ॥

तवैतया पुनर्वार्त्ता, प्रीतोऽस्मि द्विज!, तद्वद । कथं तयोर्वियोगोऽभूद्?, वैदर्भी कथमागता? ॥ ४५३ ॥
अथ द्विजोऽवदद् देव!, प्रविवेश नलो वनम् ।
कान्तामेकाकिनीं सुप्तां, त्यक्त्वाऽन्येद्युर्ययौ क्वचित् ॥ ४५४ ॥
तद् विरामे विभावर्यां, भैमी स्वप्नमलोकयत् । सपुष्प-फलमारूढा, सहकारमहं पुरः ॥ ४५५ ॥
स्वादितान्यस्य पीयूषजित्वराणि फलान्यथ । आम्रो व्यालेन भग्नोऽथ, भ्रष्टाऽहमपि भूतले ॥ ४५६ ॥
स्वप्नान्ते निद्रया मुक्ता, प्रफुल्लनयनाम्बुजा । प्रातः प्रियमपश्यन्ती, व्याकुलैवमचिन्तयत् ॥ ४५७ ॥
जहार वनदेवी वा, खेचरी वा प्रियं मम । स ययौ जलमानेतुं, प्रातःकृत्याय वा स्वयम् ॥ ४५८ ॥
अथवा नर्मणा तस्थौ, वल्लीजालान्तरे क्वचित् । तत् पश्यामि जलस्थान-वल्ली-द्रुमतलान्यहम् ॥ ४५९ ॥
इत्युत्थाय प्रियं द्रष्टुं, यत्र यत्र जगाम सा । तत्र तत्राप्यपश्यन्ती, वैलक्ष्येणातिबाधिता ॥ ४६० ॥
सा चरन्ती लतालीषु, मृगान् वीक्ष्य रवोत्थितान् । मुमुदे च प्रियभ्रान्त्या, मुहुः खिन्ना च निश्चयात् ॥ ४६१ ॥
भ्रामं भ्राममथ श्रान्ता, नलकान्ता समाकुला । पाणिपल्लवमुत्क्षिप्य, पूत्कुर्वन्तीदमभ्यधात् ॥ ४६२ ॥
एह्येहि दर्शनं देहि, परिरम्भं विधेहि मे । नर्मापि शर्मणे नातिक्रियमाणं भवेत् प्रिये ॥ ४६३ ॥
इति प्रतिरवं श्रुत्वा, निजोच्चैरेव हर्षिता । आकारयति मां भर्त्तेत्यागाद् गिरिगुहासु सा ॥ ४६४ ॥
तत्राप्यसावपश्यन्ती, वैदर्भी प्राणवल्लभम् । स्वप्नं सचेतना रात्रिप्रान्तदृष्टं व्यचारयत् ॥ ४६५ ॥
रसालोऽयं नलः पुष्प-फलानि नृपवैभवम् । तत्र देवीपदारूढा, जाताऽहं फलभोगभाग् ॥ ४६६ ॥
द्विपोऽस्य कूबरो भङ्क्ता, भ्रंशो मे विरहस्त्वयम् । स्वप्नार्थेनामुना तन्मे, सुलभो नैव वल्लभः ॥ ४६७ ॥
धिग्! मां दिग्मण्डनयशा, यन्मुमोच नलो नृपः ।
तं मानिनं पितुर्वेश्म, नेतुं धिग्! मे कदाग्रहम् ॥ ४६८ ॥
अवाञ्छन् श्वसुरावासवासं मानधनः सुधीः । ममाऽऽग्रहं च तं वीक्ष्य, साधु तत्याज मामपि ॥ ४६९ ॥
प्राणान् मुञ्चन्ति नो मानं, धीरास्तन्मां मुमोच सः । मानच्छिदाग्रहग्रस्तां, मानी प्राणसमामपि ॥ ४७० ॥
हा कान्त! कुलकोटीर!, हा विवेकनिकेतन! । एकोऽपि नापराधोऽयं, दास्या मे किमसह्यत? ॥ ४७१ ॥
त्वदादेशस्य किं दूरे, कदाचिदभवं विभो!? । यदेवं देव! मुक्ताऽहं, न निषिद्धा कदाग्रहात् ॥ ४७२ ॥
ज्ञातं वा नान्यथा चक्रे, मद्वचोऽपि क्वचिद् भवान् ।
ततस्त्यक्ताऽस्मि नोत्कृष्टा वागमाननमानना[२] ॥ ४७३ ॥
हा दैव! दुर्मतिर्दूरं, निर्ममे किं ममेदृशी? । तदा कदाग्रहेऽमुष्मिन्, नलस्येव दुरोदरे ॥ ४७४ ॥
ध्यायं ध्यायमिदं मन्दभाग्यंमन्या वियोगिनी । प्राणेश! पाहि पाहीति, वदन्ती मूर्च्छिताऽपतत् ॥ ४७५ ॥
अथ क्षणेन मूर्च्छान्ते, बाढं विरहविह्वला । मास्म गा नाथ! नाथेति, तारं दीना रुरोद सा ॥ ४७६ ॥
तदा चक्रन्द सा भर्तृनामग्राहं मुहुस्तथा । हृदयानि विदीर्णानि, शैलानामप्यहो! यथा ॥ ४७७ ॥
अथास्या नलवश्यायाः, कृपयोल्लास्य चीवरम् । अनलस्य वयस्योऽपि, तां वर्णालीमदीदृशत् ॥ ४७८ ॥
स्वपाणिना स्वरक्तेन, प्रियेण लिखितां लिपिम् । दृष्ट्वा नलमिवाऽऽधत्त, हृदयेऽन्तर्बहिश्च सा ॥ ४७९ ॥
अथ प्रमुदिता देवी, व्यचिन्तयदिदं हृदि । अहो! अद्यापि विद्येऽहं, हृदये हृदयेशितुः ॥ ४८० ॥
यदादिदेश मे वर्त्म, स्वरक्तलिखिताक्षरैः । गमिष्यामि पितुर्गेहमेतैरेव सहायकैः ॥ ४८१ ॥

°द्रुयोर्भु° खंता० ॥ २ वता० विनाऽन्यत्र—°नतान° खंता० ॥

निश्चित्येत्यचलद् भीमनन्दनी वटवर्त्मना । स्वपादहृतपत्रालीध्वनितेभ्योऽपि बिभ्यती ॥ ४८२ ॥
वृक्षेषु रत्नगर्भायाः, सपत्न्या अपि सूनुषु । मुहुः स्निग्धेषु विश्रान्ता, साऽचलद् भूपतिप्रिया ॥ ४८३ ॥
तस्यास्तिलकविद्योतपिङ्गदिग्गमनक्षितेः । चलन्त्या दावकीलाया, इव हिंस्रा वनेऽत्रसन् ॥ ४८४ ॥
अथावासितमग्रे सा, सार्थमेकं व्यलोकयत् । व्याप्तं शकटमण्डल्या, सवप्रमिव पत्तनम् ॥ ४८५ ॥
सार्थेन सममेतेन, सुखं गहनलङ्घनम् । चिन्तयन्तीति वैदर्भी, दधौ मुदमुदित्वरीम् ॥ ४८६ ॥
सार्थं यावदलञ्चक्रे, सा मरालीव पल्वलम् । तावत्तं रुरुधुश्चौराः, क्रूराः कृषिमिवेतयः ॥ ४८७ ॥
अत्र सार्थे मया त्राते, रे! मा कुरुत विप्लवम् । सिंहीजुषि वने शाखिभङ्गाय न मतङ्गजाः ॥ ४८८ ॥
भाषमाणामिदं भैमीं, वातूलामिव तस्कराः । अवज्ञाय तदा पेतुः, सार्थे भृङ्गा इवाम्बुजे ॥ ४८९ ॥
पञ्चषानथ हुङ्कारान्, सा चकार पतिव्रता । नेशुश्चौरास्तमःपूरास्तैर्भास्करकैरिव ॥ ४९० ॥
शीलावधिरधिष्ठातृदेवतेव तदैव सा । अर्चिता सार्थवाहेन, जगृहे च गृहे जवात् ॥ ४९१ ॥
मातेति मन्यमानस्य, सार्थवाहस्य पृच्छतः । भिन्दन्ती हृदयं दुःखैस्तद् द्यूतादि जगाद सा ॥ ४९२ ॥
अथासौ सार्थवाहेन, विवेकाद्भुतभक्तिना । अस्थाप्यत गृहे भैमी, नलपत्नीति यत्नतः ॥ ४९३ ॥
घनागमेऽन्यदोद्दामैर्व्यापि व्योम घनाघनैः । तुच्छीभूतार्णवोन्मीलदौर्वधूमभरैरिव ॥ ४९४ ॥
गर्जावाद्यैस्तडिन्नृत्तैर्धाराध्वनितगीतिभिः । मेघो दिनत्रयं यात्रामनुद्घाटेन निर्ममे ॥ ४९५ ॥
तत्र कर्दमसम्मर्दभीममालोक्य भीमजा । अविज्ञाता जनैः शुद्धभूवासाय ततोऽचलत् ॥ ४९६ ॥
तडित्तुल्यमुखज्वालं, घोरनिर्घोषदुर्धरम् । बलाकाकुलसङ्काशकीकसावलिभूषणम् ॥ ४९७ ॥
अतिवृष्ट्या तदा व्योम्नस्त्रुटित्वाऽब्दमिव च्युतम् । पथि सा कौणपं कालं, करालं कञ्चिदैक्षत ॥ ४९८ ॥
॥ युग्मम् ॥
अथैनां राक्षसः प्राह, भोक्ष्यसे त्वं स्थिरीभव । चातकेनेव लब्धाऽसि, मेघधारेव यच्चिरात् ॥ ४९९ ॥
अथावष्टम्भमुद्भाव्य, भैमी भीमं जगाद तम् । कुर्वन्नज्ञ! ममावज्ञां, त्वं भविष्यसि भस्मसात् ॥ ५०० ॥
पश्यन्नित्यभयां भैमीं, मुदितः कौणपोऽवदत् । तुष्टोऽस्मि तव धैर्येण, रुचितं याच्यतामिति ॥ ५०१ ॥
ततोऽवददमुं भैमी, यदि तुष्टोऽसि तद् वद । ज्वलिष्यति कियत्कालं, नलस्य विरहानलः? ॥ ५०२ ॥
आख्यत् तदवधिज्ञानात्, सैष भैमि! भविष्यति । हर्षाय द्वादशे वर्षे, पतिसङ्गः पितुर्गृहे ॥ ५०३ ॥
मुञ्चामि भवतीं तत्र, यदि वैदर्भि! भाषसे । अहं क्षणार्द्धमात्रेण, किमु भ्रमसि दुःखिता? ॥ ५०४ ॥
इत्याकर्ण्य वचः कर्ण्यमस्य हृष्टमनास्ततः । बभाषे भीमभूमीशनन्दनी विशदाशया ॥ ५०५ ॥
पत्युः कथयता सङ्गं, त्वयोपकृतमेव मे । गम्यतां स्वस्ति ते नाहं, यामि साकं परैर्नरैः ॥ ५०६ ॥
सदा भवेद् भवान् धर्मगृह्य इत्युदितस्तया । स्वं रूपं दर्शयन् दिव्यं, कौणपः स तिरोदधे ॥ ५०७ ॥
प्राप्यो द्वादशवर्षान्ते, वर्षान्त इव भास्करः । नलिन्या इव मे भर्ता, मत्वेत्यभ्यग्रहीच्च सा ॥ ५०८ ॥
ताम्बूलमरुणं वासः, कुसुमं विकृतीस्तथा । नादास्ये सत्यमेतानि, प्रियाण्याऽऽप्रियसङ्गमात् ॥ ५०९ ॥
निश्चित्येदं तदा देवी, चलिता मन्थरं पुरः । गिरेर्ददर्श कस्यापि, कन्दरां फलितद्रुमाम् ॥ ५१० ॥
वर्षाकालविरामाय, रामेयं तत्र कन्दरे । एका केसरिकान्तेव, तस्थौ निर्भयमानसा ॥ ५११ ॥
भावितीर्थकृतः शान्तिनाथस्य प्रतिमामिह । निवेश्य मृन्मयीं पुष्पैः, साऽर्चयद् गलितैः स्वयम् ॥ ५१२ ॥

---

१ सर्वे भृ° खंता० ॥ २ °र नृपात्मजा । खता० ॥ ३ °र्षान्ते विशदच्छदः । खंता० ॥
४ प्रियाण्यप्रिय° वता० ॥

चतुरा सा चतुर्थादि, तपःकर्म वितन्वती । चकार पारणं पाकपतितैर्भूरुहां फलैः ॥ ५१३ ॥
अथापश्यन्निमां चक्रश्चक्रबन्धुप्रभामिव । बभ्राम विधुरं सार्थे, सार्थेशस्तामविह्वलः ॥ ५१४ ॥
ततोऽनुपदिकीभूय, सार्थेशस्तां गतो गुहाम् । जिनार्चातत्परामेनामभिवीक्ष्य मुदं दधौ ॥ ५१५ ॥
सार्थनाथः प्रणम्याथ, भैमीमग्रे [1]निविश्य च । पप्रच्छ देवि[2]! देवोऽयं, कस्त्वया परिपूज्यते? ॥ ५१६ ॥
ततः प्रीतिभरस्मेरा, दमयन्ती जगाद तम् ।
पूज्यतेऽसौ महाशान्तिः, शान्तिः षोडशतीर्थकृत् ॥ ५१७ ॥
तथाऽसौ कथयामास, धर्ममार्हतमुज्ज्वलम् । सावधानमनोवृत्तिं, मुदा सार्थपतिं प्रति ॥ ५१८ ॥
निशम्य वचनान्यस्यास्तापसास्तद्वनौकसः । तस्थुः समीपमागत्य, धर्माकर्णनकौतुकात् ॥ ५१९ ॥
मुखेन्दुज्योत्स्नयेवास्या, धर्माख्यानगिरा ततः । बोधितं सार्थवाहस्य, शुद्धं कुमुदवन्मनः ॥ ५२० ॥
दमयन्तीं गुरूकृत्य, कृत्यमेतदिति ब्रुवन् । अङ्गीचकार तीर्थेशधर्मं सार्थेशशेखरः ॥ ५२१ ॥
अत्रान्तरे गिरा तस्या, जितेव गगनापगा । भूमौ पतितुमारेभे, त्रपयाऽब्दजलच्छलात् ॥ ५२२ ॥
अथ दुर्धरधारालधाराधरजलाकुलाः । भ्रेमुस्तपोधना स्तोके, पयसीव तिमिव्रजाः ॥ ५२३ ॥
तानथ स्थापयित्वै[3]कस्थाने पृथ्वीपतिप्रिया । दण्डेन परितो रेखामेतेषामकृत स्वयम् ॥ ५२४ ॥
तत् तापसास्तथा तस्थुस्तदाज्ञाकुट्टिमान्तरे । यथा वर्षति पर्जन्ये, लग्ना वारिच्छटाऽपि न ॥ ५२५ ॥
अथ स्थितेऽम्बुदे प्रौढप्रभावा काऽप्यसाविति । तां गुरूचक्रिरे जैनधर्मकर्मणि तापसाः ॥ ५२६ ॥
तत् तापसपुरं तत्र, चारुश्रीकमचीकरत् । सार्थेशः स्वपुरभ्रान्तिगतिस्खलितखेचरम् ॥ ५२७ ॥
देवानापततो वीक्ष्य, कदाचिदचलोपरि । दमयन्ती समं सर्वैर्ध्यारोहदधित्यकाम् ॥ ५२८ ॥
सिंहकेसरिणं सद्यः, प्रस्फुरत्केवलं मुनिम् । सुरैः कृतार्चनं वीक्ष्य, नत्वा देवी पुरोऽविशत् ॥ ५२९ ॥
ततः प्रदक्षिणीकृत्य, कश्चित् केवलिनं मुनिः । पुरः सपरिवारोऽपि, निविष्टो हृष्टमानसः ॥ ५३० ॥
अथासौ प्रथयामास, धर्मं कर्मद्रुपावकम् । केवली कलितानन्तगुणकेलिनिकेतनम् ॥ ५३१ ॥
देशनाभिः सुधापूरसनाभिभिरथ स्मितः । व्रतं केवलिनस्तस्मादयाचन्मुख्यतापसः ॥ ५३२ ॥
अथ प्रत्याहततमास्तं प्रत्याह स केवली । वाचं दशनविद्योतपूरनासीरभासुराम् ॥ ५३३ ॥
देवरोऽस्याः कुरङ्गाक्ष्याः, कूबरोऽस्ति नलानुजः ।
कोशलाधिपतेस्तस्य, सुतोऽहं सिंहकेसरी ॥ ५३४ ॥
सङ्गापुरीकिरीटस्य, सुतां केसरिणो मया । विवाह्य चलितेनाप्ताः, श्रीयशोभद्रसूरयः ॥ ५३५ ॥
तेषां व्याख्यानमाकर्ण्य, सुधाकृतसुधारसम् । पृष्टा मयाऽतिहृष्टेन, कियदायुर्ममेत्यमी ॥ ५३६ ॥
अथाऽऽचख्युः शुचिज्ञानाः, श्रीयशोभद्रसूरयः । इतो दिनानि पञ्चैव, तवाऽऽयुरवशिष्यते ॥ ५३७ ॥
इत्याकर्ण्य विवर्णास्यः, सोऽहं मोहाम्बुधौ ब्रुडन् । आरोपितस्तपःपोते, श्रीयशोभद्रसूरिभिः ॥ ५३८ ॥
परिपाल्य व्रतं सम्यग्, ज्ञानमुत्पादितं मया । ममैष मोक्षकालस्त्वां, व्रतयिष्यन्ति सूरयः ॥ ५३९ ॥
इत्युक्त्वा क्षीणनिःशेषकर्माऽसौ सिंहकेसरी । निर्वाणं प्राप निर्वाणोत्सवं देवाश्च तेनिरे ॥ ५४० ॥
श्रीयशोभद्रसूरीणां, समीपे सपरिच्छदः । आनन्दरसनिमग्नो, भेजे कुलपतिर्व्रतम् ॥ ५४१ ॥

---

१ निवेश्य खंता० ॥ २ देवदेवो° खंता० ॥ ३ °स्त्वेषा, स्थाने खंता० ॥ ४ °स्थाऽऽरो° खंता० ॥ ५ गङ्गा° पातासं० ॥ ६ व्याख्यां समा° पाता० ॥

अथ प्रभाते सार्थेशपुरस्कृतमहोत्सवा । अवाप तापसपुरं, वैदर्भी सह सूरिभिः ॥ ५४२ ॥
प्रतिष्ठां शान्तिचैत्यस्य, सम्यक्त्वारोपणं तथा । गुरुभ्यः कारयामास, दमयन्ती ससम्मदा ॥ ५४३ ॥
इति तत्रैव वैदर्भ्याः, सप्त वर्षाण्यगुस्ततः । विरञ्चिवर्षदीर्घाणि, प्राणप्रियवियोगतः ॥ ५४४ ॥
अन्यदा कश्चिदागत्य, तां प्रति प्राह पूरुषः । नलः प्रतीक्षमाणोऽस्ति, भवतीं वनवर्त्मनि ॥ ५४५ ॥
अहं यास्यामि सार्थो मे, दवीयान् भवति क्रमात् ।
तमित्युक्त्वा जवाद् यान्तं, भैमी त्वरितमन्वगात् ॥ ५४६ ॥
क्व मे स्फुरति भर्त्तेति, व्याहरन्ती मुहुर्मुहुः । भैमी मार्गादपि भ्रष्टा, प्रयातः सोऽप्यदृश्यताम् ॥ ५४७ ॥
अथ भ्रमन्ती कान्तारे, मृगीव मृगलोचना । अपश्यत् कौणपीं काञ्चिदुच्चलद्रसनाञ्चलाम् ॥ ५४८ ॥
साऽप्याह भैमीमाक्रुद्धा, त्वं मया मायया रयात् । भोक्ष्ये त्वामधुना राहुरसनेन्दुतनूमिव ॥ ५४९ ॥
इति तां विकृतां वीक्ष्य, भैमी स्वं धर्ममस्मरत् । तत्प्रभावादियं त्रस्ता, तमिस्रेव दिवाकरात् ॥ ५५० ॥
अथैषा तृषिता देवी, भ्रमन्ती निर्जले वने । व्याकुलाऽजनि निष्पुष्पे, भ्रमरीव वनस्पतौ ॥ ५५१ ॥
तदाऽऽह मम सान्निध्यं, कुरुध्वं वनदेवताः! । यथा वनमृगीवाऽहं, दाहं नहि सहे तृषः ॥ ५५२ ॥
इन्द्रजालिकमन्त्रोक्तिस्पर्द्धिन्या तद्गिरा ततः । दुकूलं तद्भुवः कूलङ्कषाऽऽविरभवत् पुरः ॥ ५५३ ॥
प्राप्तैरथ जलैर्मङ्क्षु, म्लानाऽप्यौज्ज्वल्यमाययौ । क्षणात् क्षयं व्रजिष्यन्ती, तैलैर्दीपशिखेव सा ॥ ५५४ ॥
कुतोऽपि सार्थतः प्राप्तैरथैषाऽभाषि पूरुषैः ।
काऽसि त्वं ? वनदेवी किं ?, तथ्यमित्याशु कथ्यताम् ॥ ५५५ ॥
साऽपि प्राह वणिक्पुत्री, यान्ती पत्या समं वने ।
सार्थाद् भ्रष्टाऽस्मि यूयं मां, स्थाने वसति मुञ्चत ॥ ५५६ ॥
अथ तैः सा समं नीत्वा, श्रेयःश्रीरिव देहिनी । अर्पिता धनदेवाय, सार्थवाहाय भीमभूः ॥ ५५७ ॥
सार्थवाहोऽपि मन्वानस्तनुजामिव तामथ । आरोप्य वाहने देवीं, नीत्वाऽचलपुरेऽमुचत् ॥ ५५८ ॥
लीलाकोककुलातङ्कहेतुवक्त्रेन्दुदीधितिः । मृगाक्षी तृषिता वापीं, कामपि प्राविशत् ततः ॥ ५५९ ॥
राज्ञ्याश्चन्द्रयशोनाम्न्या, ऋतुपर्णमहीभुजः । पुष्पदन्तीकनिष्ठायाश्चेटीभिरियमैक्ष्यत ॥ ५६० ॥
तच्चन्द्रयशसे ताभिस्तदा रूपवतीति सा । निवेदिता द्रुतं गत्वा, द्वितीयेन्दुतनूरिव ॥ ५६१ ॥
भागिनेयीमजानन्ती, पुष्पदन्तीसुतामिमाम् । आनाय्य निजगादेति, ऋतुपर्णनृपप्रिया ॥ ५६२ ॥
सहोदरेव मत्पुत्र्याश्चन्द्रमत्याः सुलोचने! । वत्से! कृतार्थयेदानीमृतुपर्णनृपश्रियम् ॥ ५६३ ॥
निवेदय पुनः काऽसि, विकासिगुणगौरवा ? । नहि सामान्यवामाक्ष्या, रूपमीदृक्षमीक्ष्यते ॥ ५६४ ॥
तां मातृभगिनीं सुभ्रूरजानानाऽवदत् तदा । यथोक्तं धनदत्तस्य, सार्थवाहस्य पत्त्रिषु (?) ॥ ५६५ ॥
कदाचिद् भोजनाकाङ्क्षाप्राप्तप्रियदिदृक्षया । सा चन्द्रयशसः सत्रागारैश्वर्यमयाचत ॥ ५६६ ॥
ओमित्युक्तेऽथ भूपालप्रिययाऽसौ प्रियंवदा । अर्थिनां कल्पवल्लीव, सत्रागाराधिभूरभूत् ॥ ५६७ ॥
देवि! मां रक्ष रक्षेति, वदन्तं बद्धमन्यदा । रक्षकैर्नीयमानं सा, पुरश्चौरं व्यलोकयत् ॥ ५६८ ॥
आरक्षकानथाऽपृच्छद्, देवी किममुना कृतम् ? । आचख्युस्ते ततश्चन्द्रमतीरत्नकरण्डकम् ॥ ५६९ ॥
देवी ततो दिदेशाऽथ, मुञ्चतैनं तपस्विनम् । तद्गिरा मुमुचुर्नैते, भीता विश्वम्भराभुजः ॥ ५७० ॥

आच्छोटयदमुं देवी, तदम्भश्चुलुकैस्त्रिभिः । बन्धास्तैरत्रुटन् नागपाशास्तार्क्ष्यनखैरिव ॥ ५७१ ॥
अथातिमुमुदे लोकैरालोक्येदं कुतूहलम् । आश्चर्यमृतुपर्णोऽपि, तदाकर्ण्य तदाऽऽययौ ॥ ५७२ ॥
प्रीतोऽपि प्राह भूपस्तां, किं चौरः पुत्रि ! मोच्यते ? ।
व्यवस्था पृथिवीशानां, कथमित्थं विजृम्भते ? ॥ ५७३ ॥
अथाऽऽह नलभूपालवल्लभा भूमिवल्लभम् । आर्हत्या न मया दृष्टश्चौरोऽपि म्रियते पितः ! ॥ ५७४ ॥
अथाऽऽग्रहेण वैदर्भ्याः, सुताया इव भूपतिः । अमूमुचदमुं चौरं, प्रीतिप्रोत्फुल्ललोचनम् ॥ ५७५ ॥
देवीं प्रीतः प्रणम्याथ, स जगाद मलिम्लुचः । देवि ! त्वमद्वितीयाऽपि, द्वितीया जननी मम ॥ ५७६ ॥
अथायमन्वहं देव्याः, कुलदेव्या इव क्रमौ । प्रातः प्रातः समागत्य, प्रणिपत्य प्रमोदते ॥ ५७७ ॥
चौरः पृष्टोऽन्यदा देव्याः, समीचीनं न्यवेदयत् । अस्मि दासो वसन्तस्य, श्रीतापसपुरप्रभोः ॥ ५७८ ॥
पिङ्गलाख्योऽहमेतस्य, हृत्वा रत्नोत्करं प्रभोः । नश्यन् मार्गे धृतश्चौरैर्न क्षेमः स्वामिवञ्चिनाम् ॥ ५७९ ॥
अथास्य नरदेवस्य, सेवकोऽहमिहाऽभवम् । सर्वतोऽप्यतिविश्रम्भादवारितगतागतः ॥ ५८० ॥
तदा तदाऽऽप्य भूपालपुत्रीरत्नकरण्डकम् । अहार्षं त्वत्पदप्राप्तिपुण्यप्रेरितया धिया ॥ ५८१ ॥
निर्गच्छन् यामिकैर्दृष्टा, सलोप्त्रः क्ष्माभुजोऽर्पितः ।
ज्ञात्वाऽहं भूभुजा चौरो, रक्षकेभ्यः समर्पितः ॥ ५८२ ॥
ततो दृष्टिप्रपातेन, त्वदीयेन तदा मम । सर्वाङ्गमत्रुटन् बन्धाश्चौर्याय च मनोरथाः ॥ ५८३ ॥
अपरं च तदा देवि !, निःसृतायां पुरात् त्वयि । वसन्तसार्थवाहोऽयं, भोजनादिकमत्यजत् ॥ ५८४ ॥
सप्तमेऽह्नि सम्बोध्य, श्रीयशोभद्रसूरिभिः । कथञ्चिद् भोजयाञ्चक्रे, देवि ! त्वद्दुःखदुर्मनाः ॥ ५८५ ॥
उपादाय वसन्तोऽयमपरेद्युरुपायनम् । कुशलः कोशलां गत्वा, प्रणनाम नलानुजम् ॥ ५८६ ॥
ददौ पृथ्वीपतिः प्रीतस्तस्य तापसपत्तने । चामरालीमरालीभिः, शोभितां राजहंसताम् ॥ ५८७ ॥
अथ हृष्टः प्रविष्टः स्वां, वसन्तनृपतिः पुरीम् । मौक्तिकस्वस्तिकव्याजराजत्प्रस्वेदबिन्दुकाम् ॥ ५८८ ॥
सोऽपि देवि ! प्रभावस्ते, सोऽभूद् यद् भूपतिर्वणिक् ।
हन्ति गर्भगृहध्वान्तं, दर्पणोऽर्ककरार्पणात् ॥ ५८९ ॥
तद्भूपतिपदप्रीता, तं देवी निजगाद तत् । यदि ते हृदि कोऽप्यस्ति, विवेको मार्गदीपकः ॥ ५९० ॥
उत्सहिष्णुस्तदाऽऽदत्स्व, वत्स ! पापच्छिदे व्रतम् ।
तदादेशाद् व्रतीभूय, सोऽप्यगाद् गुरुभिः सह ॥ ५९१ ॥ युग्मम् ॥
प्राग्दृष्टः कुण्डिनादेत्य, हरिमित्रोऽन्यदा द्विजः ।
वीक्ष्य क्षोणीपतिं क्षिप्रमगाच्चन्द्रयशोऽन्तिकम् ॥ ५९२ ॥
देवी तं वीक्ष्य पप्रच्छ, कुशला-ऽकुशलादिकम् । कथमकथयत् सोऽपि, वैदर्भीत्यागतः पराम् ॥ ५९३ ॥
नलस्य दमयन्त्याश्च, वार्तामार्तान्तराशयः । ज्ञातुं श्रीभीमभूमीशो, भूमीभागे न्ययुङ्क्त माम् ॥ ५९४ ॥
अरण्य-नगर-ग्राम-गिरि-कुञ्जादिकं ततः । समालोकि मया प्रापि, प्रवृत्तिरपि नैतयोः ॥ ५९५ ॥
तद्वार्ता काऽपि युष्माकमाकस्मिकतयाऽप्यभूत् । तदिदं ज्ञातुमत्राहमागतः का गतिः परा ? ॥ ५९६ ॥
इत्याकर्ण्य कथां चन्द्रयशसा सहसा ततः । आक्रन्दि मेदिनीखण्डखण्डिताखिलमण्डनम् ॥ ५९७ ॥

१ °क्येति कु° खंता० पाता० ॥ २ नाहरन्त्या मया पाता० ॥ ३ °लोप्त्रोऽह° वता० ॥ ४ °त्तनम् । चा° खंता० ॥ ५ °पिंडतालिकमण्ड° खंता०सं० ॥

अन्वरोदि तथा भूपप्रियापरिजनैरपि । नददादिवराहस्य, शोभां लेभे यथा नभः ॥ ५९८ ॥
अथेत्थमाकुले राजकुले क्षुत्कुञ्चितोदरः । हरिमित्रस्ततः सत्रागारं प्रति ययौ द्विजः ॥ ५९९ ॥
अकिञ्चन इवालोक्य, भैमीं कल्पलतामिव । अजिह्वावर्णनीयानां, स तदाऽभूत् पदं मुदाम् ॥ ६०० ॥
स प्रीतस्तां प्रणम्याथ, हनूमज्जित्वरत्वरः । सत्रागारेऽस्ति भैमीति, समेत्याऽऽह नृपप्रियाम् ॥ ६०१ ॥
कर्णामृतमिति श्रुत्वा, वाचं प्रीता नृपप्रिया । असिञ्चत् तं ततः स्वर्ण-रत्नाभरणवृष्टिभिः ॥ ६०२ ॥
कुत्र कुत्रेति जल्पन्ती, पद्भ्यां परिजनैः सह । सत्रागारं ययौ चन्द्रयशाश्चन्द्रमुखी मुदा ॥ ६०३ ॥
देवी ततोऽवदत् पुत्रि !, वञ्चिताऽस्मि स्वगोपनात् । यन्मातुरधिका मातृष्वसेति वितथीकृतम् ॥ ६०४ ॥
इत्युपालम्भसंरम्भिबाष्पा भूपालवल्लभा । निकेतनमुपेताऽसौ, पुरस्कृत्य नलप्रियाम् ॥ ६०५ ॥
भूषयित्वा स्वहस्तेन, भैमीं साश्रुविलोचना । अभ्यर्णमृतुपर्णस्य, निनाय विनयानताम् ॥ ६०६ ॥
साऽपि चन्द्रयशोवाचा, सम्मार्ज्य प्रकटं व्यधात् । भास्वन्तमिव भास्वन्तमलिके तिलकाङ्कुरम् ॥ ६०७ ॥
अथ प्रणम्य भूपालं, पितृवद् भीमनन्दनी । उपविष्टा पुरः पृष्टा, स्ववृत्तान्तं न्यवेदयत् ॥ ६०८ ॥
स्ववंश्यनलवृत्तान्ते, कथ्यमानेऽथ तादृशे । लज्जमान इवामज्जन्न्यग्मुखो रविरम्बुधौ ॥ ६०९ ॥
रवावस्ते समस्तेऽपि, क्ष्मापतिः प्राप विस्मयम् । सभान्तर्भान्तमालोकमालोक्य तिमिरापहम् ॥ ६१० ॥
राज्ञी विज्ञपयामास, मनो मत्वा नृपं प्रति । भास्वन्तं शाश्वतं भैमीभाले तिलकमीदृशम् ॥ ६११ ॥
भूपतिस्तत्पितेवास्या, भालं प्यधित पाणिना । तच्छलान्वेषिभिरिव, प्रादुर्भूतं तमोभरैः ॥ ६१२ ॥
करेऽपसारिते राज्ञा, तत् तस्यास्तिलकांशुभिः । किशोरकैरिवाग्रासि, वासरस्रातवत् तमः ॥ ६१३ ॥
क्षणेऽस्मिन् कश्चिदागत्य, भाभासुरनभाः सुरः । नत्वा मध्येसभं भैमीं, प्राह बन्धुरकन्धरः ॥ ६१४ ॥
यस्त्वया तस्करो बद्धगलः पिङ्गलसंज्ञकः । मोचयित्वा तदा देवि !, बोधयित्वा व्रतीकृतः ॥ ६१५ ॥
स तापसपुरं प्राप्तो, विहरन् सह सूरिभिः । स्मशानेऽश्मनरप्रायः, कायोत्सर्गं निशि व्यधात् ॥ ६१६ ॥
चिताभवदवज्वालाजालेन कवलीकृतः । अमुक्तध्यानधैर्योऽयं, सौधर्मत्रिदिवं ययौ ॥ ६१७ ॥
अहं स हंसगमने !, त्वां नमस्कर्तुमागतः । त्वत्प्रसादप्रभावर्द्धिवर्द्धितेदृशवैभवः ॥ ६१८ ॥
इत्युक्त्वा सप्त कल्याणकोटीर्वृष्ट्वा ययौ सुरः । वृत्तेनैतेन राजाऽपि, जिनभक्तोऽभवत् तदा ॥ ६१९ ॥
हरिमित्रोऽन्यदाऽवादीद्, भूपं भूपप्रियामपि । प्रेष्यतां दवदन्तीयं, प्रीणातु पितरौ चिरात् ॥ ६२० ॥
समं चमूसमूहेन, वैदर्भीमथ पार्थिवः । प्रैषीच्चन्द्रयशोदेव्या, कृतानुगमनां स्वयम् ॥ ६२१ ॥
श्रीचन्द्रयशसं देवीं, प्रणम्याथ नलप्रिया । अल्पैः प्रयाणकैरुर्वीमण्डनं प्राप कुण्डिनम् ॥ ६२२ ॥
ईयतुः सम्मुखौ तस्याश्चिराकारणसोत्सुकौ । पितरौ स्मितरोचिर्भिः, खचिताधरविद्रुमौ ॥ ६२३ ॥
पितरं तरसा वीक्ष्य, रसाद् युग्यं विमुच्य सा । अनमत् क्रमराजीवयुग्मविन्यस्तमस्तका ॥ ६२४ ॥
पङ्किलं तं क्षितोद्देशमस्राम्भःसम्भ्रमो व्यधात् । विनम्रेणाम्बुजेनेव, मुखेन तु स भूपितः ॥ ६२५ ॥
अथ राज्ञा सहायातामियं मातरमातुरा । नमश्चकार हर्षाश्रुमुक्तास्तवकितेक्षणाम् ॥ ६२६ ॥
सकलेनापि भूनाथलोकेनाथ नमस्कृता । कुण्डिनं मण्डयामास, सा त्रैलोक्यशिरोमणिः ॥ ६२७ ॥
गुरु-देवार्चनै राजा, पुरे सप्तदिनावधि । महोत्सवमहोरात्रमतिमात्रमकारयत् ॥ ६२८ ॥
साक्षाद् तत्रास्ति धात्रीशनलध्यानधुरन्धरा । कृशा कृशानुकल्पेन, विरहेण विदर्भजा ॥ ६२९ ॥

---

१ °र्योऽसौ, सौधर्मत्रिदिवं गतः खंता० ॥ २ °तरौ तर° खंता० ॥

कथयन्ती कथामित्थं, स्वयं स्वजननीं प्रति । मयाऽश्रूयत वैदर्भी, तुभ्यमावेदितं च तत् ॥ ६३० ॥
इदानीं तु भवद्दूतः कोऽपि भूपालमभ्यधात् । यदस्ति दधिपर्णस्य, पार्श्वे कुब्जः कलानिधिः ॥ ६३१ ॥
नलस्य सूपकारोऽहमिति वक्ति करोति च । अधीतां नलतः सूर्यपाकां रसवतीमसौ ॥ ६३२ ॥
इत्याकर्ण्य समीपस्था, भैमी भूमीशमभ्यधात् । नान्यो रसवतीवेत्ता, कुब्जोऽसून्नल एव सः ॥ ६३३ ॥
द्रष्टुमेनमहं देव !, तद्भीमेन नियोजितः । धिक् कुब्जेऽस्मिन् नलाशङ्का, कृष्णागारे मणिभ्रमः ॥ ६३४ ॥
आकर्ण्य दधिपर्णोऽयमिति विस्तरतः कथाम् । श्रुतां कुब्जेन सास्रेण, यथोक्तरसनाटिना ॥ ६३५ ॥
शरीराभरणस्तोमदानेनाऽऽनन्द्य सम्मदी । प्रैषीत् तं ब्राह्मणं राजा, कुब्जस्तु जगृहे गृहे ॥ ६३६ ॥
॥ युग्मम् ॥
अभोज्यत स कुब्जेन, रसवत्याऽर्कपाकया । स्वर्णादिकं नृपाल्लब्ध्वं, दत्त्वा च प्रीणितस्ततः ॥ ६३७ ॥
अथायं कुब्जमापृच्छ्य, गतः कुण्डिनपत्तनम् । तदीयं दान-भोज्यादि, सर्वमुर्वीभुजेऽभ्यधात् ॥ ६३८ ॥
तं निशम्याऽवदद् भैमी, मुदिता मेदिनीपतिम् । नल एव स कुब्जत्वं, ययौ केनापि हेतुना ॥ ६३९ ॥
तद्दानं सा मतिः सूर्यपाका रसवती च सा । सन्ति नान्यत्र कुत्रापि, युष्मज्जामातरं विना ॥ ६४० ॥
तामालोच्य ततस्तात !, समुन्मेषय शेमुषीम् । नलो यया स्यादेव, प्रकटीभवति स्वयम् ॥ ६४१ ॥
सोत्साहमाह भूपस्तच्चरं सम्प्रेष्य कञ्चन । आकार्यो दधिपर्णोऽयं, त्वत्स्वयंवरणच्छलात् ॥ ६४२ ॥
गत्वा यथार्थवर्णोऽयं, कथयिष्यति तं प्रति । श्वस्तने यद्दिने भावी, दमयन्त्याः स्वयंवरः ॥ ६४३ ॥
तत्पार्श्वे यदि कुब्जोऽयं, नलः स्यादवनीधवः । तदश्वहृदयाभिज्ञस्तमानेष्यत्यसौ द्रुतम् ॥ ६४४ ॥
इति निश्चित्य भीमेन, भूभृता प्रेषितश्चरः । सुंसमारपुरं गत्वा, दधिपर्णमदोऽवदत् ॥ ६४५ ॥

न प्रापि नलवार्ताऽपि, क्वापि तेन करिष्यति ।
भूयः स्वयंवरं भैमी, प्रभुणा प्रेषितोऽस्मि तव ॥ ६४६ ॥

किन्तु मार्गे विलम्बोऽभूद्, देहस्यापाटवान्मम । प्रत्यासन्नतरं जातं, तल्लग्नं श्वस्तने दिने ॥ ६४७ ॥
तूर्णं देव ! तदेतव्यमित्युक्त्वाऽस्मिन् गते चरे । अचिन्तयन्नलश्चित्ते, किमेतदिति विस्मितः ॥ ६४८ ॥
वर्षिष्यति विषैरिन्दुर्वदिष्यत्यनृतं मुनिः । किमन्यमपि भर्तारं, दमयन्ती करिष्यति ? ॥ ६४९ ॥
विवोढुं प्रौढिमा कस्य, मत्पत्नीं मयि जीवति ? । सिंहेऽभ्यर्णगते सिंहीं, मानसेनापि कः स्पृशेत् ? ॥ ६५० ॥
इति ध्यात्वा चिरं चित्ते, दधिपर्णं जगाद सः । आसन्नलग्न-दूरोर्वीगतिचिन्तापरायणम् ॥ ६५१ ॥
समर्पय हयान् जात्यान्, रथं गाढं च कञ्चन । यथाऽहमश्वहृद्वेदी, नये झटिति कुण्डिने ॥ ६५२ ॥
इति प्रीतिमताऽऽकर्ण्य, दधिपर्णेन भूभुजा । उक्तोऽग्रहीच्चतुर्वाहीं, रथं चाहीनपौरुषम् ॥ ६५३ ॥
अथ चामरभृद्युग्म-च्छत्रभृद्भूपभासुरम् । नियुक्तवाजिनं कुब्जो, रथं तूर्णमवाहयत् ॥ ६५४ ॥
नुन्नैरथ रथे वाहैर्जवनैः पवनैरिव । अपतद् भूपतेरंसात्, पटी शैलादिवाऽऽपगा ॥ ६५५ ॥
राजा तदाऽवदत् कुब्ज !, स्थिरीकुरु हयानिमान् । एतदादीयते यावद्, वासो वसुमतीगतम् ॥ ६५६ ॥
जगाद कुब्जको राजन्नपतद् यत्र तेंऽशुकम् । पञ्चविंशतियोजन्या, साऽमुच्यत वसुन्धरा ॥ ६५७ ॥

न राजन् ! वाजिनोऽमी ते, तादृक्षगुणलक्षिताः ।
इयत्या वेलया यान्ति, पञ्चाशद् योजनानि ये ॥ ६५८ ॥

१ सं० विनाऽन्यत्र— °स्वाऽऽशु श्री° वता० । °स्वा तत् श्री° खंता० ॥ २ दवदन्त्याः खंता० ॥
३ नयै झटिति कुण्डिनम् खंता० ॥

अक्षवृक्षमथो वीक्ष्य, फलां दर्शयितुं निजाम् ।
किमन्त्यस्मिन् फलानीति, राजा कुब्जकमब्रवीत् ॥ ६५९ ॥
अजानति ततः कुब्जे, फलसङ्ख्यां धराधवः । आख्यदस्मै परिस्पष्टमष्टादशसहस्रिकाम् ॥ ६६० ॥
मुष्टिघातेन दिग्दन्तिघातघोरेण तन्नलः । अपातयदशेषाणि, फलानि कलिपादपात् ॥ ६६१ ॥
यावद् गणयते तावत्, तावन्त्येवाभवत् पुरः । अश्वहृद्विद्यया सङ्ख्याविद्यां कुब्जस्तदाऽऽददे ॥६६२॥
धावन्नथो रथोऽनायि, स्थैर्यं कुब्जेन सत्वरम् । भीमपुर्या मुखे तारतिलकायितकेतनः ॥ ६६३ ॥
अथ तस्या निशः प्रान्ते, भैमी स्वप्नमलोकयत् । हृष्टा तद्भीमभूपाय, समागत्य न्यवेदयत् ॥ ६६४ ॥
स्वप्नेऽधुना मयाऽदर्शि, तात ! निर्वृतिदेवता । इहाऽऽनीय तया व्योम्नि, दर्शितं कोशलावनम् ॥ ६६५ ॥
सहकारमिहाऽऽरोहं, तद्गिराऽहं फलाकुलम् । समार्प्यत स्मितं पाणौ, तया तामरसं ततः ॥ ६६६ ॥
मंदारोहात् पुरारूढः, पतन् कोऽप्यपतत् तदा । आम्राद् भुवि रविक्रान्तादभ्रात् पूर्ण इवोडुपः ॥ ६६७ ॥
अथ भीमोऽवदत् पुत्रि !, प्रापि स्वप्नोऽयमुत्तमः । निर्वृतिस्तव भाग्यश्रीर्मता तनुमती ननु ॥ ६६८ ॥
कोशलावैभवं भावि, कोशलावनवीक्षणात् । सफलाम्राधिरोहेण, सराज्य-रमणागमः ॥ ६६९ ॥
निपतन् यः पतन् कोऽपि, त्वयाऽदर्शि रसालतः ।
भवत्याऽध्यासिताद् राज्यात्, पतिष्यति स कूबरः ॥ ६७० ॥
अद्य सद्यः स्वचित्तेशसङ्गस्तव भविष्यति । यः प्रातः प्राप्यते स्वप्नः, सद्यः स हि फलेग्रहिः ॥ ६७१ ॥
तदाऽऽयातं पुराऽभ्यर्णे, दधिपर्णधराधवम् । आगत्याचीकथत् कोऽपि, श्रीभीमाय महीभुजे ॥ ६७२ ॥
अथ सम्मुखमागत्य, श्रीमान् भीमरथो नृपः । सम्मानेन पुरोत्सङ्गे, दधिपर्णमवीविशत् ॥ ६७३ ॥
ऊचे मिथः कथागोष्ठ्यां, दधिपर्णं विदर्भराट् । कुब्जाद् रसवतीं सूर्यपाकां कारय मन्मुदे ॥ ६७४ ॥
तदुक्तो दधिपर्णेन, कुब्जो रसवतीं व्यधात् । इन्दुपुष्टिकृदर्कांशुसम्पर्कसुरसीकृताम् ॥ ६७५ ॥
लोकैः साकं रसवती, बुभुजे भूभुजाऽथ सा । विचाराक्षमवैदग्ध्यैर्मिथःपश्यद्भिराननम् ॥ ६७६ ॥
आनायितां परीक्षार्थमथैतां भीमभूपभूः । स्वादयित्वा रसवतीं, कुब्जं निरचिनोन्नलम् ॥ ६७७ ॥
तद् वैदर्भी विदर्भेशं, प्रत्याह प्रीतिपूरिता ।
आस्तां कुब्जोऽपि खञ्जोऽपि, निश्चितः सैष नैषधिः ॥ ६७८ ॥
ज्ञानिना मुनिमुख्येन, कथितं मत्पुरः पुरा । नलो रसवतीमर्कपाकां जानाति नापरः ॥ ६७९ ॥
सा(स्वा)भिज्ञानान्तरं तात !, पुनरेकं समस्ति मे । नलस्पर्शेन विपुलपुलकं यद् भवेद् वपुः ॥ ६८० ॥
तन्मदङ्गमयं कुब्जः, स्तोकं स्पृशतु पाणिना । इत्युक्ते भीमवचसा, तामङ्गुल्या नलोऽस्पृशत् ॥ ६८१ ॥
वपुः सपुलकं तस्यास्तन्नलस्पर्शतः क्षणात् । प्रीतिपूरबहिःक्षिप्तास्तोकशोकमिवाभवत् ॥ ६८२ ॥
अन्तर्भैमी नलं निन्ये, तद् बलादबलाऽप्यसौ । अतूतुषत् तथा चाटुप्रेमामृतकिरा गिरा ॥ ६८३ ॥
दमयन्त्युपरोधेन, नलश्छन्न इवानलः । जज्ञे विल्वकरण्डाभ्यामाविष्कृतनिजाकृतिः ॥ ६८४ ॥
धृतस्वरूपं तद्रूपं, वीक्ष्य कं कं रसं न सा । भेजे भीमसुता धार्ष्ट्य-त्रपासम्पातकातरा ? ॥ ६८५ ॥
तदा भाति स्म वैदर्भी, स्वेदाम्भःकणभासुरा । उपशान्तवियोगाग्निः, स्नाता हर्षाम्भसीव सा ॥ ६८६ ॥
अभितो वीज्यमानाङ्गी, नलनेत्राञ्चलैश्चलैः । सद्यः स्वेदोदकस्नाता, सा चकम्पे चकोरदृक् ॥ ६८७ ॥

---

१ °राधिपम् खंता० ॥ २ °रभीकृ° खंतामं० ॥ ३ तं भूपं, खंता० ॥

साम्बुनेत्राञ्जलिभ्यां सा, तुल्यं दयित-कामयोः । तदान्तःकान्तिदूर्वाभ्यां, व्यधादर्घमनर्घ्ययोः ॥ ६८८ ॥
अदर्शि दर्शनीयश्रीरथाऽऽयातो बहिर्जनैः । नैषधिस्त्यक्तकुब्जत्वो, राहुमुक्त इवांशुमान् ॥ ६८९ ॥
अपराद्धं यदज्ञानान्मया नाथ ! क्षमस्व तत् । दधिपर्णोऽवदन्नेवमपतन्नलपादयोः ॥ ६९० ॥
स्वयं वेत्रीभवन् भीमो, भद्रपीठे निवेश्य तत् । अभ्यषिञ्चन्नलं नाथस्त्वमस्माकमिति ब्रुवन् ॥ ६९१ ॥
ऋतुपर्णः प्रियायुक्तः, सार्थेशोऽपि वसन्तकः । सुख-दुःखांशदायादावाहूतौ नलकान्तया ॥ ६९२ ॥
वसन्त-दधिपर्ण-र्तुपर्ण-भीमैः समं नलः । चिक्रीड लोकपालैः स, चतुर्भिरिव पञ्चमः ॥ ६९३ ॥
धनदेवोऽपि सार्थेशः, कुतोऽपि प्राप कुण्डिनम् । तस्य प्रत्युपकारं सा, कारयामास भूभुजा ॥ ६९४ ॥
कश्चिदेत्य दिवोऽन्येद्युर्देवः पश्यत्सु राजसु । भैमीं नत्वाऽवदद् देवि !, त्वत्प्रसादो मयीदृशः ॥ ६९५ ॥
सम्बोध्य तापसेन्द्रोऽहं, पुरा प्रव्राजितस्त्वया । विमाने केसरेऽभूवं, सौधर्मे केसरः सुरः ॥ ६९६ ॥
इत्युक्त्वा सप्त कल्याणकोटीर्वर्षन् पुरः सुरः । विद्युद्दण्ड इवोद्दण्डः, समुत्पत्य तिरोदधौ[1] ॥ ६९७ ॥
नलादेशेन देशेभ्यः, स्वेभ्यः स्वेभ्यस्ततो नृपाः । ऋतुपर्णादयः स्वं स्वं, सैन्यमानाययन् जवात् ॥ ६९८ ॥
नलस्तदैव दैवज्ञदत्तेऽह्नि प्रति कोशलाम् । प्रयाणं कारयामास, वासवोपमविक्रमः ॥ ६९९ ॥
भूभृतः सैन्यचारेण, स्थावरानपि कम्पयन् । देवभूतमपि क्षोदैः, स्थगयन् सूरमण्डलम् ॥ ७०० ॥
कैश्चित् प्रयाणकैः प्राप, नलः कोशलपत्तनम् । नमयन् पृतनाक्रान्तं, पातालेन्द्रमपि क्षणात् ॥ ७०१ ॥
आकर्ण्य कोशलोद्यानविद्यमानबलं नलम् । अथो यमातिथिमन्यश्चकम्पे कूबरो नृपः ॥ ७०२ ॥
पुनर्लक्ष्मीं पणीकृत्य, द्यूतार्थं दूतभाषया । नलः कूबरमाकार्य, दीव्यन् जित्वाऽग्रहीन्महीम् ॥ ७०३ ॥

अथाऽऽनन्दी नलो मन्दीकृतक्रोधो निजानुजम् ।
अपि क्रूरं व्यधाद् यौवराज्ये प्राज्यमहोत्सवात् ॥ ७०४ ॥

अथ सम्प्रेष्य निःशेषं, राजकं राजकुञ्जरः । कोशलाचैत्यचक्रेषु, चक्रे कान्तान्वितोऽर्चनाम् ॥ ७०५ ॥
बहून्यब्दसहस्राणि, भैम्या सह सहर्षया । त्रिखण्डां खण्डितारातिरपालयदिलां नलः ॥ ७०६ ॥
एत्य देवो दिवोऽन्येद्युर्निषधो न्यगदन्नलम् । फलं गृहाण मानुष्यभूरुहस्य व्रताभिधम् ॥ ७०७ ॥
प्राग् मया प्रतिपन्नं ते, व्रतकालनिदेशनम् । तद् वृथा मा विलम्बिष्ठा, यात्यायुर्जलबिन्दुवत् ॥ ७०८ ॥
इत्युक्त्वाऽस्मिन् गते देवे, नलः कान्तान्वितो ययौ । जिनसेनाभिधं सूरिं, विज्ञातागमनं तदा ॥ ७०९ ॥
प्रणम्य नैषधिः सूरिं, निविष्टः क्षितिविष्टरे । पप्रच्छ स्वस्य देव्याश्च, कारणं सुख-दुःखयोः ॥ ७१० ॥
निर्लूनमन्मथो वाचमथोवाच महामुनिः । प्रदत्तमिश्रशर्माणि, प्राक्कर्माणि शृणु क्षणात् ॥ ७११ ॥
जम्बूद्वीपशिरोरत्नं, भरतक्षेत्रभूषणम् । अष्टापदसमीपेऽस्ति, श्रीसङ्गरपुरं पुरम् ॥ ७१२ ॥

तत्राऽऽसीन्मम्मणो राजा, तस्य वीरमती प्रिया ।
अन्यदाऽऽखेटके गच्छन्, भूपोऽपश्यत् पुरो मुनिम् ॥ ७१३ ॥

मन्वन्नशकुनं सोऽथ, धारयामास तं क्रुधा । तद् द्वादशघटीप्रान्ते, कृपयाऽमूमुचत् पुनः ॥ ७१४ ॥
तदहिंसामयो धर्मः, साधुनाऽस्मै निवेदितः । राज्ञाऽप्यङ्गीकृतो वीरमत्या दयितया समम् ॥ ७१५ ॥
ताभ्यां राजसभावेन, तद् व्रती प्रतिपालितः[3] । अपराधं क्षमस्वेत्थमुक्त्वा मुक्तो जगाम सः ॥ ७१६ ॥
सेवाप्रसादिता वीरमतीं शासनदेवता । धर्मस्थैर्यकृते निन्येऽन्येद्युरष्टापदोपरि ॥ ७१७ ॥

१ 'दोऽयमीद' खंता० ॥ २ 'दधे खंता० ॥ ३ प्रतिलाभितः खंता० ॥

अकृत प्रतितीर्थेशं, विंशतिं विंशतिं ततः । आचाम्लानि चमत्कारिभक्तिचारुः सुलोचना ॥ ७१८ ॥
तथा तिलकमेकैकं, जिनेशानां व्यधापयत् । सौवर्णमर्णःसम्पूर्णमणिसन्दर्भगर्भितम् ॥ ७१९ ॥
तदुद्यापनकं कृत्वा, प्रीता भूकान्तकामिनी । मुनीनानन्द्य दानेन, चारणान् पारणां व्यधात् ॥ ७२० ॥
तत् तीर्थेशपदाम्भोजसेवाहेवाकशालिनी । राजधानीं राजवधूराजगाम प्रमोदिनी ॥ ७२१ ॥
चिराराद्धजिनाधीशधर्मनिर्मलितावथ । व्यपद्येतामुभौ वीरमती-मम्मणभूपती ॥ ७२२ ॥
भूपजीवोऽथ बहलीदेशान्तः पोतने पुरे । आभीरधम्मिलाभस्य, सुतोऽभूद् रेणुकाङ्गभूः ॥ ७२३ ॥
तस्यैव धन्यसञ्ज्ञस्य, धूसरी नाम वल्लभा । आसीद् वीरमतीजीवः, पूर्ववत् प्रेमभाजनम् ॥ ७२४ ॥
वर्षासु महिषीर्धन्यश्चारयन्नन्यदा वने । वर्षत्यम्भोधरेऽपश्यदेकपादस्थितं मुनिम् ॥ ७२५ ॥
न्यधात् तदुपरि च्छत्रं, धन्यो भावनया ततः । अपारवारिभृद्धाराधोरणीवारणक्षमम् ॥ ७२६ ॥

न तिष्ठत्यम्बुदो वर्षन्, साधुः स्थैर्यं न मुञ्चति ।
धन्यस्त्यजति न च्छत्रं, त्रयोऽपि स्पर्द्धिनोऽभवन् ॥ ७२७ ॥

सप्तमेऽह्नि निवृत्तेऽब्दे, कायोत्सर्गमपारयत् । मुनिः पूर्णप्रतिज्ञोऽसौ, ततो धन्येन वन्दितः ॥ ७२८ ॥
स्वस्थवृत्तिरथापृच्छन्मुनीशं धूसरीवरः । भवतां व्रजतां कुत्र, मेघोऽयं विघ्नतां गतः ? ॥ ७२९ ॥
अथावददद: साधुर्लङ्कायां गुरुसन्निधौ । गच्छतो मम मेघेन, प्रारेभे वृष्टिरीदृशी ॥ ७३० ॥
अभिग्रहं गृहीत्वा च, तद्वृष्टिविरमावधिम् । कायोत्सर्गं व्यधां तत्र, त्वया साहायकं कृतम् ॥ ७३१ ॥
ततः सद्मनि धन्येन, सममाकारितो व्रती । निषिध्य महिषारोहं, प्राचालीत् पङ्किले पथि ॥ ७३२ ॥
क्षैरेयीपारणं पुण्यकारणं सप्तमेऽहनि । मुनीशं कारयामास, शुद्धात्मा धूसरीधवः ॥ ७३३ ॥
करुणातरुणीहारो, विहारोद्यमविक्रमी । वर्षात्यये यथाकामं, ग्रामाद् ग्रामं जगाम सः ॥ ७३४ ॥
धन्योऽपि मुनिना दत्तं, श्रावकत्वं प्रियान्वितः । पालयित्वा चिरं हैमवते युगलधर्म्यभूत् ॥ ७३५ ॥
ततोऽपि क्षीरदण्डीराभिधानौ दम्पती दिवि । शोभमानौ प्रभूताभिस्तावभूतां विभूतिभिः ॥ ७३६ ॥
तच्च्युत्वा क्षीरदण्डीरजीवोऽभून्नैषधिर्भवान् । प्रिया ते क्षीरदण्डीरादेवीजीवश्च भीमभूः ॥ ७३७ ॥
यद् द्वादश घटीर्दध्रे, मम्मणेन त्वया मुनिः । तत्प्रियाविरहो राज्यभ्रंशश्च द्वादशाब्दिकः ॥ ७३८ ॥
यच्छत्रधारणं क्षीरपारणं च मुनेः कृतम् । त्वया धन्येन धन्येन, तेनायं विभवस्तव ॥ ७३९ ॥
भैमी त्वद्वल्लभा वीरमतीजन्मनि यन्मुदा । अष्टापदेऽर्हतां रत्नतिलकानि व्यधापयत् ॥ ७४० ॥
करप्रकरविस्तारकिङ्करीकृतभास्करः । तदस्याः शाश्वतो भाले, तिलको भाति भासुरः ॥ ७४१ ॥
॥ युग्मम् ॥

इति प्राग्भवमाकर्ण्य, समं दयितया नलः । पुष्कलाख्ये सुते राज्यं, नियोज्य व्रतमाददे ॥ ७४२ ॥
व्रतेनातीव तीव्रेण, कृतव्रतिचमत्कृती । एतौ यशःसुधापूरैः, शुभ्रयामासतुर्दिशः ॥ ७४३ ॥
नलो विलोक्य वैदर्भीमन्यदा मदनातुरः । गुरुभिर्न्यत्कृतः स्वर्गादित्य पित्रा प्रबोधितः ॥ ७४४ ॥
तन्नलोऽनशनं भेजे, व्रतपालनकातरः । नलानुरागतः साध्वी, प्रपेदे भीमभूरपि ॥ ७४५ ॥

१ विपद्याभवतामेतौ, दम्पती दिवि पूर्ववत् ॥ खंतासं० ॥ २ स्वच्छवृत्तिरथा° पाता० । स्वच्छवृत्तिमथा° खंता० ॥ ३ °रीधवः पाता० ॥ ४ सं० विनाऽन्यत्र—व्यधात् तत्र, वता० तता० ॥ ५-६-७ °रडिण्डी° पाता० ॥ ८ भास्वरः खंता० ॥ ९ नलोऽवलो° खंता० ॥

वसुदेव ! नलः सोऽहं, सञ्जातोऽस्मि धनाधिपः । विपद्य साऽपि वैदर्भी, बभूव मम वल्लभा ॥ ७४६ ॥
अथेयं झटिति च्युत्वा, ततः कनकवत्यभूत् । तेन पूर्वानुरागेण, बद्धः सोऽहमिहाऽऽगमम् ॥ ७४७ ॥
इहैव कर्म निर्मूल्य, सेयं यास्यति निर्वृतिम् । इत्याख्यन्मे विदेहेषु, विमलस्वामितीर्थकृत् ॥ ७४८ ॥
इत्युक्त्वा वसुदेवस्य, पुरः किंपुरुषेश्वरः । शारीरैः पूरयन्नंशुपूरै रोदस्तिरोदधे ॥ ७४९ ॥
वसुदेवोऽन्यदा खेलन्, खेचरीभिः सहान्वहम् । सूर्पकेणैकदा जह्रेऽमोचि गङ्गाजले ततः ॥ ७५० ॥
उत्तीर्य वीर्यवान् गङ्गां, पल्लीं कामपि जग्मिवान् । असौ परिभ्रमन् साकं, पथिकैः पथि कैश्चन ॥ ७५१ ॥
जराभिधां स्मराटोपभल्लीं पल्लीन्दुनन्दनीम् । तत्रोपयेमे रेमे च, चन्द्रिकामिव चन्द्रमाः ॥ ७५२ ॥
तस्यां जराकुमाराख्यं, समुत्पाद्याथ नन्दनम् । विचरन्नन्यतोऽभाषि, साक्षाद् देव्या कयाचन ॥ ७५३ ॥
कन्या रुधिरभूपस्य, दत्ता ते रोहिणी मया । व्रज पाणविकीभूय, तूर्णं तस्याः स्वयंवरे ॥ ७५४ ॥
इत्युक्तः स तया शौरिर्गतोऽरिष्टपुरं प्रति । जरासन्धादिभूपौघस्वयंवरणमण्डपे ॥ ७५५ ॥
रूपेण त्रिजचित्तारोहिणी रोहिणी ततः । स्वयंवरणमाल्येन, राजमानाऽऽजगाम सा ॥ ७५६ ॥

शृङ्गारितेऽप्यरूपेऽस्मिन्, राजकेऽस्याः स्थिता न दृक् ।
वर्ण्यवर्णेऽपि निर्गन्धे, कर्णिकार इवालिनी ॥ ७५७ ॥

शौरिरेषोऽन्यवेषोऽथ, विस्फूर्जंस्तूर्यवादिषु । वादयामास पटहमित्थं पटुभिरक्षरैः ॥ ७५८ ॥

आगच्छाऽऽगच्छ मां तन्वि !, नन्वितः किमु वीक्षसे ? ।
अस्मि त्वदनुरूपोऽहं, कृतोत्कण्ठः सुकण्ठि ! यत् ॥ ७५९ ॥

वादयन्तमिति प्रेक्ष्य, शौरिं शूरनिभप्रभम् । रोहिणी रोहदानन्दाऽनन्दयद् वरमालया ॥ ७६० ॥
अथ पाटहिके तस्मिन्, वृते रुधिरकन्यया । अहसन् सहसा सेर्ष्यं, सर्वेऽप्युर्वीशकुञ्जराः ॥ ७६१ ॥
अहो ! कौलीन्यमेतस्याः, कुलीनमवृणोद् यतः । इति वार्ता मिथश्चक्रुः, पश्यन्तो रुधिरं च ते ॥ ७६२ ॥
अथ तेषु सहासेषु, प्राह पाटहिकः क्रुधा । दोर्दण्डे यस्य कण्डूतिः, कौलीन्यं तस्य दर्श्यते ॥ ७६३ ॥
श्रुत्वा शौरेर्गिरं दावकीलालीलामिमामथ । तद्वधाय जरासन्धः, स्वभूपान् समनीनहत् ॥ ७६४ ॥
सन्नद्धनिजसैन्योऽथ, रुधिरोऽपि धराधिपः । जरासन्धेन युद्धाय, क्रुद्धः शौरेः पुरोऽस्फुरत् ॥ ७६५ ॥
सारथीभूय शोडीरावधिर्दधिमुखाभिधः । खेचरः समरक्रूरं, रथे शौरिमवीविशत् ॥ ७६६ ॥
वेगाद् वेगवतीमात्राऽङ्गारमत्याऽर्पितानि तत् । चण्डः कोदण्ड-तूणानि, जगृहे विग्रहाग्रही ॥ ७६७ ॥
जरासन्धधराधीशौ, रुधिरं युधि रंहसा । भग्नं वीक्ष्य गिरा शौरेः, खेचरो रथमैरयत् ॥ ७६८ ॥
शौरिं स्ववर्ग्यभूमीभृत्कुम्भिकेसरिणं रणे । पश्यन्नूचे जरासन्धः, समुद्रविजयं प्रति ॥ ७६९ ॥
न पाणविकमात्रोऽयं, तदेनं साधय स्वयम् । वनं भञ्जन्निभः केन, रक्ष्यः पञ्चाननं विना ? ॥ ७७० ॥
शूरमेनं निराकृत्य, त्वं भवन् रोहिणीधवः । मद्यशःकुमुदं स्मेरीकुरुष्वानेन मुद्रितम् ॥ ७७१ ॥
वृतान्यनरनिष्ठाया, न धवोऽस्या भवाम्यहम् । जेयोऽसौ तु त्वदादेशादित्युत्तस्थौ समुद्रराट् ॥ ७७२ ॥
ततः समुद्रसुन्मुद्रवेलं खेलन्तमाहवे । अवलोक्य स्म कुर्वन्ति, देवाः कल्पान्तविभ्रमम् ॥ ७७३ ॥
युयुधाते क्रुधा तेजस्तिरस्कृतदिवाकरौ । शौरी दूरीकृतत्रासावथ प्रथम-पश्चिमौ ॥ ७७४ ॥

---

१ °पल्लीशितुः सुताम् । तत्रो° खंता० ॥ २ विहर° खंता० ॥ ३ °पाल्ये, स्व° खंता० ॥ ४ पुरोऽविशत् खंता० ॥

कृतस्य प्रतिकुर्वाणावविशेषतया चिरम् । अयुध्येतामुभौ धीरौ, नृणां कृतचमत्कृती ॥ ७७५ ॥
समुद्रविजयं सम्यगधिगम्य विनीतधीः । चिक्षेप साक्षरं नम्रं, वसुदेवः शरं पुरः ॥ ७७६ ॥
पाणौ बाणमथाऽऽदाय, समुद्रोऽवाचयल्लिपिम् । तदा च्छलेन यातस्त्वां, वसुदेवो नमाम्यहम् ॥ ७७७ ॥
वत्सलो वत्स ! वत्सेति, समुद्रोऽथ वदन्नदः । अभ्यधावद् रथं मुक्त्वा, तं प्रतीन्दुमिवाम्बुधिः ॥ ७७८ ॥
प्रीतिमान् वसुदेवोऽपि, समुत्तीर्य समुत्सुकः । निपतन् पादयोर्दोर्भ्यामुद्धृत्यानेन सस्वजे ॥ ७७९ ॥
क स्थितस्त्वमियत्कालमिति पृष्टोऽग्रजन्मना । समग्रमात्मनो वृत्तं, वसुदेवो न्यवेदयत् ॥ ७८० ॥
वार्ष्णेयो दशमः सोऽयमिति मत्वा पराक्रमात् । दधिरे रुधिरोर्वीश-जरासन्धादयो मुदम् ॥ ७८१ ॥
प्रसङ्गायातनिःशेषभूपालविहितोत्सवम् । पुण्येऽह्नि वसुदेवोऽथ, रोहिणीं परिणीतवान् ॥ ७८२ ॥
जरासन्धादयो जग्मुर्भूभुजो रुधिरार्चिताः । तत्रैव यदवः सर्वे, तस्थुः कंसान्विताः पुनः ॥ ७८३ ॥
अन्येद्युर्जरती काऽपि, श्रीसमुद्रे सभाजुषि । आगत्य गगनोत्सङ्गाद्, वसुदेवमवोचत ॥ ७८४ ॥
मम पुत्र्यौ चिराद् बालचन्द्रा वेगवती तथा । त्वद्वियोगातुरे देव !, सञ्जाते बाढदुर्बले ॥ ७८५ ॥
इति श्रुत्वा मुखं पश्यन्, समुद्रेण स भाषितः । गच्छ वत्स ! चिरं तत्र, मास्म स्थाः पूर्ववत् पुनः ॥ ७८६ ॥
इत्याकर्ण्य तया साकं, वसुदेवो दिवा ययौ । तदागमोत्सुकः प्राप, समुद्रोऽपि स्वपत्तनम् ॥ ७८७ ॥
कन्ये काञ्चनदंष्ट्रस्य, खेचरेन्द्रस्य वृष्णिभूः । उपयेमे प्रसन्नस्ते, पुरे गगनवल्लभे ॥ ७८८ ॥

विवोढा पूर्वोढा निजनिजपुरेभ्यो मृगदृशः,
समादाय भ्राम्यन् दिशि दिशि दशार्होऽथ दशमः ।
समागत्य व्योम्ना स्वपुरमपरैः खेचरचमू-
समूहैर्लक्ष्मीवाननमत समुद्रं स्मितमतिः ॥ ७८९ ॥

**॥ इति श्रीविजयसेनसूरिशिष्यश्रीमदुदयप्रभसूरिविरचिते श्रीधर्माभ्युदयनाम्नि श्रीसङ्घपतिचरिते लक्ष्म्यङ्के महाकाव्ये वसुदेवयात्रावर्णनो नामैकादशः सर्गः ॥**

दृश्यः कस्यापि नायं प्रथयति न परप्रार्थनादैन्यमन्य-
स्तुच्छामिच्छां विधत्ते तनुहृदयतया कोऽपि निष्पुण्यपण्यः ।
इत्थं कल्पद्रुमेऽस्मिन् व्यसनपरवशं लोकमालोक्य सृष्टः,
स्पष्टं श्रीवस्तुपालः कथमपि विधिना नूतनः कल्पवृक्षः ॥ १ ॥
॥ ग्रन्थाग्रम् ७९८ । उभयम् ३९४३ ॥

१ °नचन्द्रस्य, खे° खंता० ॥ २ ग्रन्थाग्रम् ८०४ ॥ उभयम् ४०१९ खंता० ॥

# द्वादशः सर्गः ।

इतश्च कश्चन श्रेष्ठी, जज्ञे श्रीहस्तिनापुरे । ललितस्तत्सुतो मातुः, प्राणेभ्योऽपि प्रियोऽभवत् ॥ १ ॥
अथान्यो गर्भतो दुःखदाता मातुः कृतज्वरः । पातहेतून् वृथाकृत्य, द्वैतीयीकः सुतोऽभवत् ॥ २ ॥
स दास्या त्याजितो मत्वा, पित्रा च्छन्नीकृतः किल । ववृधे गङ्गदत्ताख्यो, लालितो ज्येष्ठबन्धुना ॥ ३ ॥
ललितः श्रेष्ठिनं प्रोचेऽन्येद्युरेष गृहे यदि । भोज्यते गङ्गदत्तस्तत्, सुन्दरं तात ! जायते ॥ ४ ॥
स्वमातुश्छन्नमेवैतत्, कार्यमेवमुवाच सः । ललितोऽथ तमानीय, तल्पस्याधो न्यषादयत् ॥ ५ ॥
ललितक्षिप्तमन्नं च, भुञ्जानं हर्षनिर्भरम् । गङ्गदत्तं कथञ्चित् तं, व्यालोक्य जननी क्रुधा ॥ ६ ॥
दण्डकाष्ठं समुद्यम्य, गृहीत्वा चिहुरव्रजे । क्षणान्निष्कासयामास, कुट्टयन्ती मुहुर्मुहुः ॥ ७ ॥ युग्मम् ॥
तमेवानुगतौ श्रेष्ठि-ललितौ कलितौ शुचा । पुरो वीक्ष्य मुनिं तस्य, मातृवैरमपृच्छताम् ॥ ८ ॥
ऊचे मुनिः क्वचिद् ग्रामे, बन्धू अभवतामुभौ । एकदा शकटं काष्ठैः, पूर्णं ग्रामाय निन्यतुः ॥ ९ ॥
ज्येष्ठः पुरश्चरन् मार्गे, चक्रलण्डां महोरगीम् । वीक्ष्य प्रोचेऽनुजं सूतं, रक्ष्याऽसौ शकटादिति ॥ १० ॥
इति तद्वाक्यविश्वस्ता, सा स्थितैव भुजङ्गमी । सूतेन चूरिता गन्त्र्याऽस्थिभङ्गध्वनिकौतुकात् ॥ ११ ॥
सा ज्येष्ठे दधती प्रीतिमप्रीतिं च कनीयसि । गन्त्रीचक्रेण भग्नाङ्गी, चक्रलण्डा व्यपद्यत ॥ १२ ॥

सा ते जाता प्रिया श्रेष्ठिन् !, ज्येष्ठः स ललितस्त्वसौ ।
गङ्गदत्तः कनिष्ठस्तु, प्राकृतेन प्रिया-ऽप्रियौ ॥ १३ ॥

इत्याकर्ण्य भवोद्विग्नः, श्रेष्ठी सूनुद्वयान्वितः । जैनं प्राप व्रतं पापमतङ्गजमृगाधिपम् ॥ १४ ॥
तौ श्रेष्ठि-ललितावायुः, पूरयित्वा तपोनिधी । देवलोकं महाशुक्रं, जग्मतुस्तिग्मतेजसौ ॥ १५ ॥
जगाम विश्ववाल्लभ्यमिदानीं गङ्गदत्तकः । तपस्तपनपूर्वाद्रिस्तमेव त्रिदशालयम् ॥ १६ ॥
च्युत्वा ललितजीवोऽयं, तन्महाशुक्रकल्पतः । रोहिण्या वसुदेवस्य, प्रेयस्या उदरेऽभवत् ॥ १७ ॥
वदने विशतः स्वप्ने, हलभृज्जन्मसूचकान् । सा मृगाङ्क-मृगेशा-ऽब्धीन्, निशाशेषे व्यलोकयत् ॥ १८ ॥
ततोऽङ्गतेजसा ध्वान्तद्रोहिणं रोहिणी सुतम् । असूत भूतधात्रीर्वे, तर्जितद्युमणिं मणिम् ॥ १९ ॥
रामो नाम्नाऽभिरामत्वात्, पितृभ्यां तत्प्रतिष्ठितः । क्रीडन् भोगीव बालोऽपि, जातः परभयङ्करः ॥ २० ॥
वसुदेवोऽन्यदाऽऽहूतः, कंसेन प्रीतिशालिना । ययौ राजानमापृच्छ्य, मथुरायाममन्थरः ॥ २१ ॥
वसुदेवमथ प्राह, कंसो जीवयशोऽन्वितः । अस्तीन्द्रपुरनिर्यासो, नगरी मृत्तिकावती ॥ २२ ॥
राजा तत्र पितृव्यो मे, देवकः सेवकप्रियः । वर्तते नर्तितश्रीका, सुता तस्यापि देवकी ॥ २३ ॥
सा कान्तिसुमनोवल्ली, त्वं यौवनवनद्रुमः । युवयोस्तद् द्वयोर्लक्ष्मीवेश्मनोरस्तु सङ्गमः ॥ २४ ॥
तस्यां ननु वरो भावी, भवाननुवरस्त्वहम् । तदेहि देवकाद् याच्या, देवकन्येव देवकी ॥ २५ ॥
इदमालोच्य निश्चित्य, शौरिः कंसान्वितो गतः । नगर्यां मृत्तिकावत्यां, राजा सम्मुखमाययौ ॥ २६ ॥

---

१ °जितो ज्ञात्वा, खंता० पाता० ॥ २ °जं-स्वं तं, रक्षासौ खंता० ॥ ३ °हिणी रोहि° खंता० ॥
४ °व, निर्जित° खंता० ॥

बहिर्निवेश्य सैन्यानि, देवकेन पुरस्कृतौ । पुरान्तर्जग्मतुः कंस-शौरी पौरनिरीक्षितौ ॥ २७ ॥
अथोपविविशुर्भूपसदः प्राप्य त्रयोऽपि ते । त्रैलोक्यरक्षासामर्थ्यं, मन्त्रयन्त इवाऽऽत्मसु ॥ २८ ॥
सुहृत्प्रेमोर्मिहंसेन, ततः कंसेन देवकः । याचितः प्रीतिवार्तासु, वसुदेवाय देवकीम् ॥ २९ ॥
स स्वयं प्रार्थनीयेऽर्थे, प्रार्थ्यमानोऽथ देवकः । ऊचे वयं त्वदायत्ता, देवकी देव! कीदृशी? ॥ ३० ॥
पुराऽपि नारदाख्यातगुणोद्यदनुरागयोः । तयोरथ विवाहोऽभूद्, देवकी-वसुदेवयोः ॥ ३१ ॥
देवकोऽथ दशार्हाय, बहुस्वर्णादिकं ददौ । नन्दं गोकोटियुक्तं च, दशगोकुलनायकम् ॥ ३२ ॥
वसुदेवोऽद्भुतानन्दस्ततो नन्दसमन्वितः । मथुरां सह कंसेन, प्रयातो दयितायुतः ॥ ३३ ॥
सुहृत्पाणिग्रहोपज्ञं, कंसश्चक्रे महोत्सवम् । अमानमदिरापानमत्तनृत्यद्वधूजनम् ॥ ३४ ॥
कंसानुजोऽतिमुक्तोऽथ, पूर्वोपात्तव्रतः कृती । अगादोकसि कंसस्य, पारणाय महातपाः ॥ ३५ ॥
वीक्ष्य मत्ता तमायान्तं, प्रीता कंसप्रिया ततः । एहि देवर! नृत्यावो, जल्पन्तीति गलेऽलगत् ॥ ३६ ॥
अथोचे व्यथितः साधुर्यन्निमित्तोऽयमुत्सवः । तस्य सप्तमगर्भेणोच्छेद्यौ त्वत्पितृ-वल्लभौ ॥ ३७ ॥
श्रुत्वेति मुनितो मुक्तमदा जीवयशा जवात् । गत्वा स्फारस्फुरत्खेदं, कंसायेदं न्यवेदयत् ॥ ३८ ॥
याच्यः सौहार्दतः सप्त, गर्भान् शौरिरसौ सुहृत् । निश्चित्येदमगात् कंसो, वसुदेवं प्रियान्वितः ॥ ३९ ॥
प्रारब्धप्रेमवार्तासु, मत्तेनेवामदेन तत् । स मेने देवकीगर्भान्, सप्त कंसेन याचितः ॥ ४० ॥
आकर्ण्य शौरिरन्येद्युरतिमुक्तकथामथ । चिखिदे वञ्चितो गर्भयाच्ञायां सुहृदा च्छलात् ॥ ४१ ॥
इतश्चासीन्नाग इति, श्रीभद्रिलपुरे वणिक् । प्रियाऽभूत् तस्य सुलसा, कुलसागरचन्द्रिका ॥ ४२ ॥
अतिमुक्ताभिधः साधुश्चारणोऽस्याश्च शैशवे । निन्दुरिन्दुमुखी सेयं, भाविनीति न्यवेदयत् ॥ ४३ ॥
परमश्राद्धयाऽऽराधि, सुरः कश्चित् तयाऽप्यथ । तुष्टोऽयाचि सुतानेष, प्राह ज्ञात्वाऽवधेस्ततः ॥ ४४ ॥
हन्तुं शौरिसुतान् प्रीतिकूटात् कंसेन याचितान् । अहं सञ्चारयिष्यामि, निन्दोः सुतपदे तव ॥ ४५ ॥
इति देवः प्रतिज्ञाय, चक्रे शच्या स्वकीयया । देवकी-सुलसापत्यप्रसवे तुल्यकालताम् ॥ ४६ ॥

सुषुवाते समं ते तु, देवक्याः षट् सुतान् क्रमात् ।
सुलसायै ददौ देवो, देवक्यै सौलसान् मृतान् ॥ ४७ ॥

स्फारमास्फालयद् ग्राव्णि, कंसो निन्दुसुतान् स तान् ।
अवर्धन्त च देवक्याः, सूनवः सुलसागृहे ॥ ४८ ॥

नाम्नाऽनीकयशोऽनन्तसेनावजितसैनिकः । निहतारिर्देवयशाः, शत्रुसेनश्च ते श्रुताः ॥ ४९ ॥
निशान्ते प्रैक्षत स्वप्ने, सिंहा-ऽर्का-ऽग्नि-गज-ध्वजान् । विमान-पद्मसरसी, ऋतुस्नाताऽथ देवकी ॥ ५० ॥
तस्याः कुक्षाववातार्षीद्, गङ्गदत्तश्च्युतो दिवः । नभःसिताष्टमीरात्रिमध्येऽथ तमसूत सा ॥ ५१ ॥
सान्निध्यं तेनिरे तस्य, पुण्यपूर्णस्य देवताः । तज्जन्मनि ततः स्वापमापुस्ते कंसयामिकाः ॥ ५२ ॥
तदाऽऽहूय प्रियं प्राह, देवकी रक्ष मे सुतम् । वञ्चयित्वा द्रुतं कंसं, मोच्योऽसौ नन्दगोकुले ॥ ५३ ॥
यशोदा जननीवामुं, सानन्दा नन्दवल्लभा । पालयिष्यति यद् बालमुपचारैर्नवैर्नवैः ॥ ५४ ॥
वसुदेवोऽपि तन्मत्वा, तमादायाङ्गजं व्रजन् । पार्श्वस्थदेवीक्लृप्ताष्टदीप-च्छत्रजुषा पथा ॥ ५५ ॥
अथो धवलरूपेण, शिशुसान्निध्यदेवताः । पुरतो गोपुरद्वारकपाटान्युदघाटयन् ॥ ५६ ॥

---

१ °नोऽपि दे° खंता० ॥ २ °ञ्चिता गर्भ° खंता० ॥ ३ °स्याऽऽशु शै° खंता० ॥

आयातो गोपुरे शौरिरुग्रसेनेन भाषितः । भास्वन्तं दर्शयन् बालं, सानन्दमिदमब्रवीत् ॥ ५७ ॥
पुत्रव्याजेन शत्रुस्ते, कंसोऽनेन हनिष्यते । त्वमुद्धरिष्यसे मैवं, पुनः क्वापि प्रकाशयेः ॥ ५८ ॥
आकर्ण्येत्युग्रसेनेन, हर्षादनुमतस्ततः । जगाम नन्दकान्ताया, यशोदाया निकेतनम् ॥ ५९ ॥
तस्यास्तमात्मजं शौरिः, समर्प्याथ तदात्मजाम् । तनयां समुपादाय, देवक्याः पुरतोऽमुचत् ॥ ६० ॥
इति कृत्वा गते शौरौ, प्रबुद्धाः कंसयामिकाः । कन्यामिमां समादाय, कंसाय द्रागढौकयन् ॥ ६१ ॥
स्त्रीमयं सप्तमं वीक्ष्य, तं गर्भं निर्भयो नृपः । विदधे च्छिन्ननासाग्रां, मानी ज्ञानं हसन् मुनेः ॥ ६२ ॥
अमूमुचदमूं कंसो, देवक्या एव सन्निधौ । पुनर्जातेयमित्यन्तः, प्रमोदं प्राप साऽप्यथ ॥ ६३ ॥
स कृष्ण इति संहूतः, कृष्णाङ्गत्वेन गोमिभिः । वसुदेवकुलोत्तंसो, गोकुलान्तरवर्धत ॥ ६४ ॥
गते मासि सुतं द्रष्टुमुत्सुका देवकी ययौ । सह स्त्रीभिः प्रियं पृष्ट्वा, गोकुले गोऽर्चनच्छलात् ॥ ६५ ॥
मुदं दधौ यशोदाङ्कवर्तिनं निजनन्दनम् । श्रीवत्सलाञ्छितं स्निग्ध-श्याममालोक्य देवकी ॥ ६६ ॥
सदैव देवकी तत्र, गोपूजाव्याजतो ययौ । आविर्बभूव लोकेऽत्र, ततः प्रभृति गोव्रतम् ॥ ६७ ॥
वैरेण वसुदेवस्यान्यदा शकुनि-पूतने । विघया तत्सुतं मत्वा, निहन्तुं कृष्णमागते ॥ ६८ ॥
बभूवैका समारुह्य, शकटं कटुनादिनी । पूतना नूतनक्ष्वेडलिप्तं स्तनमपाययत् ॥ ६९ ॥
सान्निध्यं विदधानाभिर्देवताभिस्तदा मुदा । कृष्णस्य देहमाविश्य, हते तेनैनसैव ते ॥ ७० ॥
एत्य नन्दोऽथ वीक्ष्येदं[२], खेदं मनसि धारयन् । यशोदां प्राह नैकाकी, बालो मोच्यः कदाचन ॥ ७१ ॥
तं पालयति सानन्दा, यशोदाऽथ स्वयं सदा । छलादुच्छृङ्खलो बालः, प्रयातीतस्ततः स तु ॥ ७२ ॥
दाम्नोदूखलबद्धेन, तस्य बद्धाऽन्यदोदरम् । यशोदा तद्गतेर्भीता, गृहेऽगात् प्रतिवेशिनः ॥ ७३ ॥
तदा पितामहद्वेषादेत्य सूर्पकसूः[३] शिशुम् । तं मध्ये पेष्टुमभितो, जगामार्जुनयुग्मताम् ॥ ७४ ॥
अनयोः कृष्णदेव्याऽथ, माथश्चक्रे महीरुहोः । ऊचे गोपैस्ततोऽभञ्जि, कृष्णेनार्जुनयोर्युगम् ॥ ७५ ॥
तदाऽऽकर्ण्येति नन्दश्च, यशोदा च समीयतुः । तौ धूलिधूसरं वीक्ष्य, प्रीतौ बालं चुचुम्बतुः ॥ ७६ ॥
बद्धो यदुदरे दाम्ना, नाम्ना दामोदरस्ततः । ख्यातोऽयं गोकुले बालो, बल्लवीप्रीतिपल्लवी ॥ ७७ ॥
मत्वा शताङ्ग-शकुनि-पूतना-ऽर्जुनसङ्कथाम् । दध्यौ शौरिरमुं कंसो, ज्ञास्यत्येवंविधौजसा ॥ ७८ ॥
माऽपकार्षीत् किमप्यस्य, मत्वाऽपि क्रूरधीरसौ । अहं तदस्य रक्षायै, कञ्चिन्मुञ्चामि नन्दनम् ॥ ७९ ॥
तद् यथातथमाख्याय, राममुद्दामविक्रमम् । सुतत्वेनार्पयामास, यशोदा-नन्दयोर्मुदा ॥ ८० ॥
सहेलं खेलतस्तत्र, राम-दामोदरौ ततः । गोकुले गोमति व्योम्नि, सतारे शशि-सूर्यवत् ॥ ८१ ॥
आयुधेषु समग्रेषु, श्रमं रामेण कारितः । प्रकृत्या विक्रमी कृष्णः, सपक्षाहिरिवाबभौ ॥ ८२ ॥
गोपस्त्रियः प्रियममुं, गूढोन्मुद्रितमन्मथाः । समालिङ्गन्ति चुम्बन्ति, बालव्यवहृतिच्छलात् ॥ ८३ ॥
साकूताभिरनाकूतः, खेल्यते गोपखेलनैः । स गोपीभिः पणीकृत्य, चुम्बना-ऽऽलिङ्गनादिकम् ॥ ८४ ॥
अस्फुटं कृष्ण कृष्णेति, जल्पन्त्यः प्रति तं मुहुः । पतन्ति मदिरोद्भूतमदव्याजेन गोपिकाः ॥ ८५ ॥
तं मध्येकृत्य नृत्यन्ति, गोप्यो मण्डलनर्तनैः । तत्र तालध्वजस्तालवाद्यं वितनुते मुदा ॥ ८६ ॥
एनं केनाप्युपायेन, काऽपि गोपी कदाचन । स्पृशन्ती निर्विकारैव, सेर्ष्यमन्याभिरीक्ष्यते ॥ ८७ ॥

१ °त्सुतं ज्ञात्वा, पाता० ॥ २ °दं, वृत्तं मन° पाता० ॥ ३ °कभूः शि° पाता० ॥
४ °रोद्भूत° खंता० ॥

तं वीक्ष्य विवशा गोप्यो, निमीलितविलोचनाः । पिण्डीकृत्योरसि रसात्, तरसैव न्यपीडयन् ॥ ८८ ॥
कृष्णः सदाऽपि मायूरपिच्छपूरविभूषणः । जगौ गोपालबालाभिः, सह गोपालगूर्जरीम् ॥ ८९ ॥
वंशनादवशैर्नेत्र-गति-कान्तिजितैरिव । सोऽयं कुरङ्ग-मातङ्ग-भुजगैरनुगैर्बभौ ॥ ९० ॥
राम-गोविन्दयोः क्रीडारसनिर्मग्नयोरिति । गोपयोर्जग्मुरेकाह्वदेकादश वत्सराः ॥ ९१ ॥
इतश्च कार्तिके कृष्णद्वादश्यां त्वाष्ट्रगे विधौ । समुद्रविजयाख्यस्य, पत्न्यां शौर्यपुरेशितुः ॥ ९२ ॥
शिवायाः कुक्षिमध्यास्त, शङ्खजीवोऽपराजितात् । सा निशान्ते महास्वप्नांश्चतुर्दश ददर्श च ॥ ९३ ॥

गजोक्ष-सिंह-लक्ष्मी-स्रक्-चन्द्रा-ऽर्क-कलश-ध्वजाः ।
पद्माकर-विमाना-ऽब्धि-रत्नपुञ्जा-ऽग्नयस्तु ते ॥ ९४ ॥

नारकाणामपि स्वर्गजुषामिव तदा सुखम् । क्षणमासीत् प्रकाशश्च, चकास्ति स्म जगत्स्वपि ॥ ९५ ॥

पत्युरत्युत्सुका स्वप्नानाख्यद् देवी प्रबुध्य तान् ।
राज्ञा तदैव दैवज्ञोऽपृच्छ्यत क्रोष्टुकिः स्वयम् ॥ ९६ ॥

स व्याचख्यौ सुतो भावी, जिनो वां त्रिजगत्पतिः । श्रुत्वेति तावपि प्रीतौ, पीयूषस्नपिताविव ॥ ९७ ॥
गर्भस्थितेन तेनाथ, स्वामिना नृपकामिनी । बभौ स्मितमुखाम्भोजा, हंसेनेव सरोजिनी ॥ ९८ ॥
निशीथे सितपञ्चम्यां, श्रावणे त्वाष्ट्रगे विधौ । शङ्खध्वजं शिवाऽसूत, सुतं जीमूतमेचकम् ॥ ९९ ॥
षट्पञ्चाशदथाऽऽगत्य, दिक्कुमार्यो यथाक्रमम् । शिवा-जिनेन्द्रयोश्चक्रुः, सूतिकर्माणि भक्तितः ॥ १०० ॥
पञ्चरूपो हरिः स्वर्गादथाऽऽगत्य यथाविधि । अतिपाण्डुकम्बलायां, शिलायां नीतवान् विभुम् ॥ १०१ ॥

तत्र सिंहासनारूढः, सोऽयं स्वाङ्के जिनं दधौ ।
त्रिषष्ट्या त्वपरैः शक्रैः, स्नात्रं चक्रेऽच्युतादिभिः ॥ १०२ ॥

अङ्के तदीशमीशानो, दधौ सिंहासनासनः । सौधर्मेन्द्रोऽकृत स्नात्रा-ऽऽरात्रिक-स्तवनादिकम् ॥ १०३ ॥
प्रभोरप्सरसः पञ्च, धात्रीराधाय वासवः । कृत्वा नन्दीश्वरे यात्रां, मुदितः स्वपदं ययौ ॥ १०४ ॥
सप्रभावं प्रभावन्तं, राकेन्दुमिव नन्दनम् । तमालोक्य समुद्रोऽभूदुन्मुद्रितमहोदयः ॥ १०५ ॥
दृष्टो रिष्टमणेर्नेमिर्मात्रा स्वप्नेऽत्र गर्भगे । अरिष्टनेमिरित्याख्यां, सूनोस्तद् विदधे पिता ॥ १०६ ॥
मथुरायामथाऽऽतेने, नेमिजन्ममहोत्सवम् । दशार्हो दशमस्तेन, कंसस्तस्याऽऽययौ गृहम् ॥ १०७ ॥

छिन्ननासापुटां वीक्ष्य, खेलन्तीं तत्र तां सुताम् ।
भीतः कंसोऽधिकं सोऽथ, स्मृत्वाऽनुजमुनेर्वचः ॥ १०८ ॥

नैमित्तिकं स कंसस्तदपृच्छत् सदने गतः । स्त्रीगर्भः सप्तमः सोऽयं, मुनिनोक्तो भवेन्न वा? ॥ १०९ ॥
ऊचे नैमित्तिकः साधुगिरो विपरियन्ति न । क्वाप्यस्ति हस्तिमल्लौजाः[२], स गर्भस्ते भयङ्करः ॥ ११० ॥
तमरिष्टाख्यमुक्षाणं[१], हयेशं केशिनं च तम् । खर-मेषौ च तौ मुञ्च, क्रमाद् वृन्दारके वने ॥ १११ ॥
अत्युग्रानपि तान् खेलन्, सहेलं यो हनिष्यति । हन्त! हन्ता स ते सत्यं, निरर्गलभुजार्गलः ॥ ११२ ॥
पूजयेज्जननी यत् ते, शार्ङ्गं धन्व क्रमागतम् । आरोपयिष्यति[३] पयःसितकीर्तिः स एव तत् ॥ ११३ ॥
कालियाहेर्दमयिता, चाणूरस्य विपादकः । हनिष्यति द्विपेन्द्रौ ते, स पद्मोत्तर-चम्पकौ ॥ ११४ ॥
आदिश्याऽथ प्रमायाऽसौ, मल्लौ चाणूर-मौष्टिकौ । अरिष्टादीन् वनेऽमुञ्चदरातिं ज्ञातुमात्मनः ॥ ११५ ॥

---

१ °ष्टाक्षमु° खंता० ॥ २ °बौ ततो मु° पाता० ॥ ३ °ष्यति च यः, सित° पाता० ॥

शरद्घनाघनध्वानो, महोक्षो गाः क्षिपन् मुहुः । भञ्जन् भाण्डभरं तुङ्गशृङ्गो गोपान् लुलोप सः ॥ ११६ ॥

राम ! त्रायस्व गोविन्द !, त्रायस्वेति व्रजे गिरः ।
श्रुत्वैव शौरिजन्मानौ, मानाध्मातावधावताम् ॥ ११७ ॥

अथोक्षाणं क्रुधावन्तं, धावन्तं वीक्ष्य केशवः । करावलितशृङ्गाग्रभग्नग्रीवं जघान तम् ॥ ११८ ॥

तस्मिन् काल इव क्रूरे, नीते कालनिकेतनम् । वल्लवाः पूजयामासुर्जनार्दनभुजौ मुदा ॥ ११९ ॥

प्राप्तः कंसकिशोरोऽथ, केशी क्रीडति केशवे । प्रक्रान्तवल्लवीनाशः, कीनाश इव दुःसहः ॥ १२० ॥

कृष्णेन सोऽपि निर्भिन्दन्, सुरभीः सुरभीषणः । कूर्परार्पणतो वक्त्रं, विदार्यामार्यत द्रुतम् ॥ १२१ ॥

खर-मेषमुरुक्रोधखरमेष ततोऽन्यदा । कृतगोपभयारोपमाजघान जनार्दनः ॥ १२२ ॥

अथायं मथुरानाथस्तन्माथप्रभवद्भयः । द्विपं निश्चेतुमानिन्ये, सदस्यर्चामिषाद्धनुः ॥ १२३ ॥

अत्यद्भुतभुजः शार्ङ्गं, यः कोऽप्यारोपयिष्यति । देयाऽस्मै सत्यभामेयमिति चायमघोषयत् ॥ १२४ ॥

महीभुजो भुजोष्मायमाणाः प्राणाधिकास्ततः । आगताः पर्यभूयन्त, नन्वनेनैव धन्वना ॥ १२५ ॥

सूनुर्मदनवेगाया, वसुदेवात्मजो रथी । चापारोपार्थमुत्कण्ठाकुलो गोकुलमागमत् ॥ १२६ ॥

तत्रोवास निशां राम-केशवस्नेहमोहितः । मार्गे गच्छन्नसौ प्रातः, कृष्णमेकं सहाऽनयत् ॥ १२७ ॥

अथ लग्नं रथं मार्गेऽनाधृष्टौ मोक्षणाक्षमे । हेलया हरिरव्यग्रो, न्यग्रोधमुदमूलयत् ॥ १२८ ॥

इत्थं भुजाबलमालोक्य, तं पदातिं तदाऽन्तिके । हृष्टोऽनाधृष्टिरुत्तीर्य, परिष्वज्य रथेऽनयत् ॥ १२९ ॥

मथुरायामथानेकपृथ्वीनाथकुलाकुलाम् । धीरौ धनुःसभामेतौ, जग्मतुस्तिग्मतेजसौ ॥ १३० ॥

अस्नापयन्नृपस्तोममवीक्षातसमथ क्षणात् । सत्यभामा चिरं चक्षुः, कृष्णलावण्यसागरे ॥ १३१ ॥

ग्रहणादेव चापस्याऽनाधृष्टौ पतिते ततः । भ्रष्टाङ्गभूषणे स्विन्ने, न यावदहसन् जनाः ॥ १३२ ॥

तावन्मृदुलदोर्दण्डचण्डिमानमदीदृशत् । मुदा सदसि गोविन्दस्तन्वन् धन्वाधिरोपणम् ॥ १३३ ॥
॥ युग्मम् ॥

अनाधृष्टिरथागत्य, मुक्त्वा द्वारि रथे हरिम् । गत्वा पितुः सदस्याख्यन्मयाऽऽरोप्यत तद्धनुः ॥ १३४ ॥

उक्तोऽथ वसुदेवेन, नश्य कंसेन हन्यसे । श्रुत्वेति स हरिं मुक्त्वा, व्रजेऽथ स्वपुरेऽव्रजत् ॥ १३५ ॥

चापमारोपयन्नन्दनन्दनः शब्द इत्यभूत् । कंसोऽपि हृदयारोपिशङ्काशङ्कुरजायत ॥ १३६ ॥

आहूय भूयसो भूपान्, मञ्चेषु मथुरापतिः ।
आदिशत् कलये मल्लान्, चापारोपोत्सवच्छलात् ॥ १३७ ॥

रामं जगाद गोविन्दः, श्रुत्वा मल्लरणोत्सवम् ।
द्रष्टुं मल्लभटीमावां, गच्छावः कौतुकं हि मे ॥ १३८ ॥

तं प्रति प्रतिपद्येति, यशोदामवदद् बलः । आवयोर्मङ्क्षु पानीयं, स्नानीयं प्रगुणीकुरु ॥ १३९ ॥

बलस्तदलसां किञ्चित्, तां निरीक्ष्य रुषाऽवदत् । षड्बान्धववधाख्यानं, साक्षात्कर्तुं हरेः पुरः ॥ १४० ॥

आत्मानं मास्म विस्मार्षीर्मदुक्तं न करोषि किम् ? ।
स्वाम्यादेशेऽप्युदासीना, दासी नाम कचिद् भवेत् ? ॥ १४१ ॥

---

१ श्रुत्वेति शौ° खंता० पाता० ॥ २ °षणाः खंता० पाता० ॥ ३ °पर्यसूच्यन्त, पाता० ॥ ४ °नदेवाया, वता० ॥ ५ °मग्रीष्मात° पाता० ॥ ६ द्वारि हरिं रथे । गत्वा खंता० पाता० ॥

वचनेनामुना म्लानमवलोक्य बलो हरिम् । स्नानाय सममादाय, यमुनायास्तटे ययौ ॥ १४२ ॥
रामो हरिमथापृच्छदपच्छायोऽसि वत्स ! किम् । त्वं प्रभातप्रभाराशिव्याश्लिष्ट इव दीपकः ? ॥ १४३ ॥
तदेवं बलदेवं स, निजगाद सगद्गदम् । किङ्करीति किमाक्षिप्ता, भ्रातर्माता मम त्वया ? ॥ १४४ ॥
अथैनं प्रथयन् सामलीलां नीलाम्बरोऽवदत् ।
यशोदा जननी वत्स !, न ते नन्दो न ते पिता ॥ १४५ ॥
देवकी देवकक्ष्मापनन्दनी जननी तव । गोपूजाव्याजतोऽभ्येति, त्वां द्रष्टुं मासि मासि सा ॥ १४६ ॥
वसुदेवश्च देवेन्द्रप्रायरूप-पराक्रमः । पिता स तव तेनात्र, कंसत्रासादमुच्यथाः ॥ १४७ ॥
अहं च रोहिणीसूनुर्वैमात्रेयस्तवाग्रजः । तातेन स्वयमाहूय, त्वद्रक्षायै नियोजितः ॥ १४८ ॥
कंसात् किं भीतिरित्युक्ते, कृष्णेनाख्यत् पुनर्बलः । अतिमुक्तमुनेरुक्तिं, तथा बन्धुवधप्रथाम् ॥ १४९ ॥
कृष्णस्तदा तदाकर्ण्य, क्रोधादनलवज्ज्वलन् । कंसध्वंसं प्रतिज्ञाय, स्नानाय यमुनां ययौ ॥ १५० ॥
दृष्ट्वाऽथ कालियः कृष्णमतिक्रोधादधावत । पश्यन्निवात्मनो मृत्युं, चूडारत्नप्रदीपवान् ॥ १५१ ॥
किमेतदिति सम्भ्रान्ते, रामे वामेन पाणिना । धृत्वाऽसौ हरिणा घ्राणे, पद्मनालेन नस्तितः ॥ १५२ ॥
हरिः शरारुमारुह्य, तं भुजङ्गं महाभुजः । क्रीडन्नुडुपवन्नीरे, सविभ्रममविभ्रमत् ॥ १५३ ॥
मृतकल्पमनल्पौजास्तं मुक्त्वा निर्ययौ हरिः । तदेत्य समदाटोपैर्गोपैस्तौ बान्धवौ वृतौ ॥ १५४ ॥
ततः प्रचलितौ राम-गोविन्दौ मथुरां प्रति । गोपालकैः सहाऽभूतां, पुरगोपुरगोचरौ ॥ १५५ ॥
कंसादिष्टावथ द्विष्टाविभौ यमनिभौ क्रुधा । प्रधावितौ हतौ ताभ्यां, तौ पद्मोत्तर-चम्पकौ ॥ १५६ ॥
अरिष्टादिद्विषौ नन्दनन्दनौ ननु ताविमौ । दर्श्यमानौ मिथो रागसागरैरिति नागरैः ॥ १५७ ॥
गत्वा मल्लभटीभूमिं, सह वल्लभवल्लवैः । निषेदतुः क्वचिन्मञ्चे, तौ समुत्सार्य तज्जनम् ॥ १५८ ॥ युग्मम् ॥
ततश्च वामो रामेण, रौद्रमूर्तिधरः पुरः । सैष मञ्चशिखोत्तंसः, कंसः कृष्णस्य दर्शितः ॥ १५९ ॥
सकौतुकप्रपञ्चेषु, मञ्चेषु विहितासनाः । कंसक्रूराशयज्ञानसावधानीभवद्भटाः ॥ १६० ॥
समुद्रविजयप्रष्ठा, जितज्वलनतेजसः । दशापि च दशार्हास्ते, गोविन्दाय निवेदिताः ॥ १६१ ॥
॥ युग्मम् ॥
विभाविभासुरच्छायौ, सुरप्रायौ नु काविमौ ? । चिन्तयद्भिरिति क्ष्मापैरैक्ष्येतां तौ प्रतिक्षणम् ॥ १६२ ॥
वधे सिन्धुरयोर्लोकैर्ज्ञापिते कुपितस्तदा । सशल्य इव कंसोऽभूद्, घूर्णमानेक्षणः क्षणम् ॥ १६३ ॥
अयुध्यन्ताधिकं मल्लोत्तंसाः कंसाज्ञया ततः । अथोदतिष्ठत क्रूरश्चाणूरः कंससंज्ञया ॥ १६४ ॥
करास्फोटस्फुटाटोपः, स्फूर्जन्नूर्जस्वलं ध्वनन् । ऊर्ध्वीकृतभुजो भूमीभुजोऽधिक्षिप्य सोऽवदत् ॥ १६५ ॥
यः कोऽपि धैर्यधुर्योऽस्ति, पात्रं कोपस्य कोऽपि यः ।
स मे दोर्दण्डकण्डूर्तिं, युधा खण्डयतु क्षणात् ॥ १६६ ॥
असहिष्णुरथो विष्णुश्चाणूरस्येति गर्जितम् । उत्तीर्य मञ्चात् पञ्चास्यध्वनिर्भुजमदिध्वनत् ॥ १६७ ॥
भुजास्फोटध्वनिर्विष्णोर्वर्द्धमानोऽथ दुर्धरः । कीर्तिविस्तृतये व्योमभाण्डे भङ्गमिव व्यधात् ॥ १६८ ॥
तं मत्वाऽथ भुजास्फोटध्वनिनैवात्मघातकम् । एककालयुधे कंसः, प्रेरयामास मौष्टिकम् ॥ १६९ ॥

---

१ °वौ मुदा पाता० ॥ २ °टस्फटा° खंता० पाता० ॥ ३ युद्धा स्व° खंतासं० पाता० ॥
४ °कालं युधि कंसः, पाता० ॥

अथ दृष्ट्वा तमुत्कृष्टमुष्टिकं मौष्टिकं हली । अधावत क्रुधा विष्णुपराभवभिया विभीः ॥ १७० ॥
स्थिराया व्यर्थतां नाम, नयन्तः क्रमसङ्क्रमैः । अथो युयुधिरे विष्णु-चाणूर-बल-मौष्टिकाः ॥ १७१ ॥
कंसे यियासौ कीनाशपुराय प्रहितौ पुरः । तौ मल्लावथ शौरिभ्यां, मार्गालोकपराविव ॥ १७२ ॥
इमौ हत हत क्षिप्रं, सह नन्देन गोमिना । वदन्तमिति भी-कोपद्विगुणस्फुरिताधरम् ॥ १७३ ॥
फालाक्रान्तमहामञ्चः, सञ्चरन् पञ्चवक्त्रवत् । केशेषु केशवः कंसं, कृष्ट्वाऽलूलुठदग्रतः ॥ १७४ ॥
॥ युग्मम् ॥
अथ कृष्णं प्रति क्रुद्धाः, कंसगृह्या महीभुजः । मञ्चस्तम्भायुधेनोच्चैर्बलेन दलिता बलात् ॥ १७५ ॥
कृष्णोऽपि रोपितपदः, शिरस्युरसि च क्षणात् । कंसं क्रोशन्तमत्यन्तमजघातं जघान तम् ॥ १७६ ॥
भयस्पृशाऽधिकं सेना, कंसेनाऽऽनायि या पुरा ।
जरासन्धेरिता साऽपि, योद्धुं क्रोधादधावत ॥ १७७ ॥
तासु सन्नह्यमानासु, वाहिनीष्वर्धचक्रिणः । त्रासं दिदेश सन्नद्धः, समुद्रविजयः स्वयम् ॥ १७८ ॥
यदवोऽथ दवोद[1]ग्रमहसः सहसा ययुः । सदनं वसुदेवस्य, समुद्रविजयादयः ॥ १७९ ॥
चुम्बन्तं लालयन्तं च, राम-दामोदरौ[2] मुदा । किमेतदिति पप्रच्छ, वसुदेवं धराधवः[3] ॥ १८० ॥
देवकीदयितेनाथ, कथितेऽस्मिन् कथानके । स्वाङ्केऽधिरोप्य तौ धीरौ[4], राजा चिरमलालयत् ॥ १८१ ॥
साकं तदुग्रसेनेन, काराकृष्टेन भूभुजा । कंसाय यमुनानद्यां[5], समुद्राद्या जलं ददुः ॥ १८२ ॥
हते कंसाहिते पित्रा, देयं पत्युर्जलं मया । इति जीवयशाः सन्धां, जरासन्धात्मजा व्यधात् ॥ १८३ ॥
मथुरायामथो राम-कृष्णानुज्ञावशंवदः । उग्रसेनं धराधीशं, समुद्रविजयो व्यधात् ॥ १८४ ॥
मुरारिरुग्रसेनेन, दत्तां पर्यणयत् ततः । सत्यभामां प्रभोद्दामां, क्रोष्टुकिप्रथिते दिने ॥ १८५ ॥
ज्ञात्वा तं कंसवृत्तान्तमथ जीवयशोमुखात् । क्रोधबन्धाज्जरासन्धः, सन्धां यदुवधे व्यधात् ॥ १८६ ॥
दूत्येन[6] सोमकक्ष्मापः, समुद्रविजयं प्रति । जरासन्धनिदेशेन, जगाम मथुरापुरीम्[7] ॥ १८७ ॥
यदुराजं सभाभाजं, निजगाद स धीरधीः । कंसद्विषौ स ते स्वामी, याचते राम-केशवौ ॥ १८८ ॥
तौ समर्प्य भवन्तोऽपि, विभवन्तु विभूतिभिः । उच्छित्तिरनयोर्युक्ता, निजप्राभवरोगयोः ॥ १८९ ॥
अथाऽवदत् क्रुधाकम्प्रः, सोमकं प्रति भूपतिः ।
आभ्यां भ्रूणवधात् पापी[8], निन्ये कंसो यमौकसि ॥ १९० ॥
प्राणप्रियाविमौ बालौ, नार्पयिष्यामि सर्वथा । विरोधेऽस्मिन् जरासन्धो, न भव्यं भाणयिष्यति ॥ १९१ ॥
अथाऽऽह सोमकस्तस्मिन्, हते जामातरि प्रिये । त्रिखण्डक्ष्मापतिः क्रुद्धस्तेन युक्तो न विग्रहः ॥ १९२ ॥
एतौ पटीमिव क्षिप्त्वा, यूयं जगति जीवत । क्रोधोद्धुराज्जरासन्धगन्धसिन्धुरतोऽधुना ॥ १९३ ॥
अथावददमुं दीप्तः, कोपनो गोपनायकः । नास्माकं स प्रभुस्तस्य, राज्ञस्तु प्रभवो वयम् ॥ १९४ ॥
प्रियो यद्यस्य कंसोऽभूत्, तदायातु रयादयम् । यथाऽमुं तस्य जामातुर्मेलयामि समुत्सुकम् ॥ १९५ ॥
गच्छ रे ! मत्सरे बाढं, त्वमस्मान् मास्म रोपय । मास्म भूः स्वविभोर्मृत्युपथप्रस्थानडिण्डिमः ॥ १९६ ॥

---

१ °प्रसाहसा सहसा ययुः पाता० ॥ २ °दरौ तदा खंता० ॥ ३ °राधिपः खंता० पाता० ॥ ४ तौ बालौ, रा° खंता० ॥ ५ नद्या, स° खंता० ॥ ६ दौत्ये° खंता० ॥ ७ °थुरां प्रति खंता० । °थुरां पुरीम् पाता० ॥ ८ पापो, निन्ये खंता० । पापान्निन्ये पाता० ॥

इत्युक्तो हरिणा सोमः, समुद्रेणाप्युपेक्षितः । तदाऽऽख्यद् द्विगुणं गत्वा, जरासन्धमहीभुजे ॥ १९७ ॥
अथ क्रुद्धे जरासन्धे, विरोधिवधसन्धया । प्रयाणमकरोत् काल, इव कालकुमारकः ॥ १९८ ॥
इतो योद्धुं समुद्रेण, पृष्टः क्रोष्टुकिरभ्यधात् । प्रतीचीं प्रति पाथोधिकच्छे गच्छत सम्प्रति ॥ १९९ ॥
सत्या सूते सुतौ यत्र, तत्र स्थाने कृते हरिः । जरासन्धवधाद् भावी, भरतार्द्धधराधवः ॥ २०० ॥
सहोग्रसेनभूपेन, श्रुत्वेदं यादवाग्रणीः । मुमोच मथुरामेकादशकोटिकुलान्वितः ॥ २०१ ॥
नीत्वा सूर्यपुरात् सप्त, कुलकोटीरपि[1] द्रुतम् ।
मध्येविन्ध्यं ययौ पृष्ठे, प्राप्तः कालोऽप्यदूरतः ॥ २०२ ॥
कृष्णसान्निध्यदेव्यस्तच्चितां[2] पथि विचक्रिरे । एकामेकाकिनीं पार्श्वे, रुदतीं सुदतीं पुनः ॥ २०३ ॥
किमेतदिति कालेन, पृष्टे सा भीरुरब्रवीत् । एष्यत्कालभयादस्यां, चितायां यदवोऽविशन् ॥ २०४ ॥
मद्भ्राता तैः सहाविक्षदिह वेक्ष्याम्यहं ततः ।
चितां साऽविशदित्युक्त्वा, दध्यौ कालोऽपि कोपनः ॥ २०५ ॥
ज्वलितानलदुर्गेऽस्मिन्, मद्भीता विविशुस्ततः । गत्वा तत्रापि हन्मीति, प्राविशन्मोहितश्चिताम् ॥ २०६ ॥
क्षणेन ज्वलिते कालकुमारे सैनिकैस्ततः । तन्मोहाचरितं सर्वं, गत्वा राज्ञे निवेदितम् ॥ २०७ ॥
यदवः प्रययुः क्वापि, दूरमित्युदिते चरैः । वृद्धालोचेन तन्मेने, देवतामोहितं नृपः ॥ २०८ ॥
यादवानामथ पथि, व्रजतामतिमुक्तकः । चारणर्षिः समुद्रेण, पृष्टो राज्ञैवमब्रवीत् ॥ २०९ ॥
द्वाविंशस्तीर्थकृन्नेमिर्भावी तव तनूद्भवः । राम-कृष्णौ द्विषो[3] जिष्णू, बलविष्णू भविष्यतः ॥ २१० ॥
तन्मा भैषीर्द्विषद्भ्यस्त्वमित्युदीर्य गते मुनौ । सुराष्ट्रामण्डलं प्राप, समुद्रविजयो नृपः ॥ २११ ॥
आवासेषु प्रदत्तेषु, रैवतात् प्रत्यगुत्तरे । सत्याऽसूत सुतौ तत्र, भानु-भामरसंज्ञकौ ॥ २१२ ॥
तत् क्रोष्टुकिगिराऽभ्यर्च्य, हरिर्लहरिमालिनम् । तत्राष्टमं[4] तपस्तेपे, प्रत्यक्षः सुस्थितोऽभवत् ॥ २१३ ॥
पाञ्चजन्य-सुघोषाख्यौ, शङ्खौ सात्वत-कृष्णयोः ।
सुस्थितः प्राभृतीकृत्य, जगाद किमहं स्मृतः ? ॥ २१४ ॥
कृष्णोऽवदत् पुराऽभूद् या, विष्णूनां द्वारका[5] पुरी ।
छादिता सा त्वयाऽम्भोभिस्तां मह्यं प्रकटीकुरु ॥ २१५ ॥
अथेत्याकर्ण्य देवेन, विज्ञप्तस्तेन वासवः । आदिश्य धनदं तत्र, कारयामास तां पुरीम् ॥ २१६ ॥
नवयोजनविस्तारां, दैर्घ्ये द्वादशयोजनीम्[6] । द्वादशा-ऽष्टादशकरपृथुलोत्तुङ्गवप्रिकाम्[7] ॥ २१७ ॥[8]
रत्नोत्करस्फुरत्तेजःपुञ्जपिञ्जरिताम्बराम् । चकार जिनचैत्यानां, श्रेणिं तत्र धनाधिपः ॥ २१८ ॥
प्रासादौ सर्वतोभद्र-पृथिवीजयसंज्ञकौ । पुरान्तर्विदधे श्रीदः, श्रीदामोदर-रामयोः ॥ २१९ ॥
तत्पुरश्च सुधर्मायाः, सधर्माणं सभां व्यधात् । चैत्यं चाष्टोत्तरशतश्रीजैनप्रतिमान्वितम् ॥ २२० ॥
समुद्रविजयादीनां, सर्वेषामपि भूभुजाम् । प्रासादयोस्तयोः पार्श्वे, प्रासादाः कोटिशः कृताः ॥ २२१ ॥

---

१ °रपि प्रभुम् खंता० ॥ २ °देवास्तच्चितां पाता० । °देव्यस्तु, चितां खंता० ॥ ३ द्विषां जि° पाता० ॥ ४ चक्रेऽष्टमं तपस्तेन, प्र° खंता० पाता० ॥ ५ द्वारिका खंता० ॥ ६ °जनाम् खंता० पाता० ॥ ७ °वप्रकाम् पाता० ॥ ८ एतदनन्तरं पाता० युग्मम् इति वर्तते ॥

तत्पीते वाससी मुक्तामालां मुकुट-कौस्तुभौ । गरुडाङ्कं रथं शार्ङ्गं, धन्व कौमोदकीं गदाम् ॥ २२२ ॥
अक्षय्यबाणौ शरधी, नन्दकासिं च विष्णवे । ददौ श्रीदोऽथ रामाय, वनमालां हलं धनुः ॥ २२३ ॥
तालध्वजं रथं तूणौ, मुशलं नीलवाससी । अर्हाणि च दशार्हेभ्यो, रत्नान्याभरणानि च ॥ २२४ ॥
मत्वाऽथ यदवो युद्धे, बलवन्तं बलानुजम् । अपरोदधिपर्यन्तेऽभ्यषिञ्चन् हर्षनिर्भराः ॥ २२५ ॥
रथावारुह्य सिद्धार्थ-दारुकाभिधसारथी । प्रविष्टावुत्सवोद्दामां, राम-दामोदरौ पुरीम् ॥ २२६ ॥

आसेदुः सदनान्यथो निजनिजान्येते जवाद् यादवा,
यक्षाधीश्वरदर्शितानि मणिभिः क्लृप्तानि लक्ष्मीमयैः ।
रत्नस्तम्भतलार्पितप्रतिकृतीन् यत्रावलोक्य प्रभून्,
मुग्धाः प्रणमन्ति जल्पितरवैर्ज्ञात्वा परं सेवकाः ॥ २२७ ॥

**॥ इति श्रीविजयसेनसूरिशिष्यश्रीमदुदयप्रभसूरिविरचिते श्रीधर्माभ्युदयनाम्नि श्रीसङ्घपतिचरिते लक्ष्म्यङ्के महाकाव्ये कृष्णराज्यवर्णनो नाम द्वादशः सर्गः ॥**

**शश्वच्चलाऽपि किल कृष्णमुखं कृपाणे,**
**पाणौ सरोजमुखमिन्दुमुखं मुखे च ।**
**भद्रेभकुम्भसुखमंसयुगे च लब्ध्वा,**
**लक्ष्मीः स्थिराऽजनि चिरादिह वस्तुपाले ॥ १ ॥**

॥ ग्रन्थाग्रम् २३१ । उभयम् ४१७४ ॥

---

१ उभयं ४२४९ पाता० ॥

# त्रयोदशः सर्गः ।

**प्रद्युम्नकुमारचरितम्**

ददन्मुदं दशार्हाणां, तस्यां हलियुतो हरिः । चिरं चिक्रीड सहितो, यादवैर्द्दिङ्लतादवैः ॥ १ ॥
तदन्तर्नेमिनाथोऽपि, बाल्यं साफल्यमानयत् । त्रिज्ञानवानपि क्रीडारसैर्यदुमदप्रदः ॥ २ ॥
आजन्म मन्मथजयी, निर्विकारमनाः क्रमात् । श्रीनेमिर्यौवनं प्राप, दशचापोन्नताकृतिः ॥ ३ ॥
पितृ-भ्रातृ-सुहृद्वर्गैः, प्रार्थ्यमानोऽप्यहर्निशम् । न मेने नेमिनाथस्तु, पाणिग्रहमहोत्सवम् ॥ ४ ॥
अन्येद्युः केलिवल्लीनां, नीरदो नारदो मुनिः । पर्यटन्नेत्य गोविन्दार्चितो भामागृहं ययौ ॥ ५ ॥
तत्रानभ्युत्थितायां तु, दर्पणालोककौतुकात् । क्रुद्धो दध्यौ ददाम्यस्याः, सापत्न्यमिति नारदः ॥ ६ ॥

अथ भीष्मकभूपालसुतायै कुण्डिने पुरे ।
रुक्मिण्यै रुक्मिसोदर्यै, व्याख्यात् कृष्णगुणान् मुनिः ॥ ७ ॥

तस्याः कृष्णानुरक्ताया, रूपं चित्रपटस्थितम् । कृष्णाय दर्शयामास, नेत्रपात्रामृतं मुनिः ॥ ८ ॥
कृष्णस्तदनुरक्तोऽथ, सत्कृत्य मुनिपुङ्गवम् । रुक्मिणे रुक्मिणीयाच्ञा-हेतोर्दूतं नियुक्तवान् ॥ ९ ॥
दूतेन रुक्मिणीं रुक्मी, प्रार्थितोऽभिदधौ हसन् । शिशुपालाय देयाऽसौ, न तु गोकुलरक्षिणे ॥ १० ॥

इत्युक्त्वाऽस्मिन् गते दूते, रुक्मिणी कृष्णरागिणी ।
पितृष्वस्रा सहाऽऽलोच्य, न्ययुङ्क्त हरये चरम् ॥ ११ ॥

माघे मासि सिताष्टम्यां, वने नागार्चनच्छलात् । मामभ्युपेयुषीं हर्तुमागन्तव्यं त्वया रयात् ॥ १२ ॥

वचः श्रुत्वेति रुक्मिण्याः, दूतात् प्रीतो जनार्दनः ।
आहूतः शिशुपालस्तु, रुक्मिणा रुक्मिणीकृते ॥ १३ ॥

रामेण सह सङ्केतदिने गरुडकेतनः । आययौ कुण्डिनोद्याने, तत्राथ रथिना रथी ॥ १४ ॥
इतोऽपि रुक्मिणी नागपूजाव्याजेन निःसृता । पितृष्वस्राऽप्यनुमता, रथं कृष्णस्य शिश्रिये ॥ १५ ॥
अथ स्वदोषमोषाय, सपूत्कारं पितृष्वसा । रुक्मिणेऽकथयज्जह्रे, रुक्मिणी हरिणा हठात् ॥ १६ ॥
पाञ्चजन्य-सुघोषाख्यौ, शङ्खावापूर्य निर्भरम् । हृत्वा च रुक्मिणीं कृष्ण-रामावचलतां ततः ॥ १७ ॥
अपहारं स्वसुः श्रुत्वा, रुक्मी रोषारुणेक्षणः । शिशुपालान्वितोऽचालीत्, कृष्णस्यानुपदं तदा ॥ १८ ॥
तस्थौ रामोऽथ युद्धाय, ययौ तूर्णं तु केशवः । रथेन रुक्मिणीनेत्रस्पर्द्धातरलवाजिना ॥ १९ ॥
रामस्तदनु सङ्ग्रामकुशलो मुशलोद्धतः । ममन्थारिबलं शुण्डाचण्डो ह्रदमिव द्विपः ॥ २० ॥

---

१ °यन् खंता० पाता० ॥ २ °र्हद्दिवम् खंता० पाता० ॥ ३ तस्यां कृष्णानुरक्तायां, रूपं पाता० ॥ ४ °थ, पूजयित्वा तु नारदम् पाता० ॥ ५ माघमासे सिता° खंता० । सिताष्टम्यामहं माघे, मासे नागार्चनच्छलात् । वनमेष्यामि मां हर्त्तुं° पाता० ॥ ६ कृष्णस्य रथमारुहत् पाता० ॥ ७ तां हृत्वा रुक्मि° खंता० पाता० ॥ ८ ततः खंता० ॥ ९ तूर्णं जनार्दनः पाता० ॥

सह सेनासहस्रेण, शिशुपालः पलायत[1] । राममालोक्य रुक्मी तु, युद्धैकश्रद्धया स्थितः ॥ २१ ॥
कृत्वाऽथ विरथं रामो, रुक्मिणं रणमूर्धनि । क्षिप्रं क्षुरप्रनिर्लून-केशं[2] तमिदमभ्यधात् ॥ २२ ॥
त्वं मत्कनिष्ठकान्ताया, रुक्मिण्याः सोदरो यतः ।
जीवन् मुक्तोऽसि तत् केशच्छेदच्छुटितमस्तकः[3] ॥ २३ ॥
रुक्मी कृतशिरस्तुण्डमुण्डनः कुण्डिने पुरे । न जगाम ह्रिया चक्रे, तत्र भोजकटं पुरम् ॥ २४ ॥
इतश्च दर्शयामास, रुक्मिण्यै द्वारकां हरिः । न्यवेदयच्च पूरेषा, कृता श्रीदेन मत्कृते ॥ २५ ॥
सफलीकुरु हेलाभिरिहोपान्तावनीवनीः । लीलाशैल-सरो-वापी-सिन्धुबन्धुरिताः सदा ॥ २६ ॥
अथाऽऽह रुक्मिणी स्वामिन्नहमेकाकिनी हृता । परिवारं ततो देहि, सत्यभामादिवन्मम ॥ २७ ॥
कार्या तदधिकाऽसीति, प्रतिपद्य जनार्दनः । रुक्मिणीममुचद् भामाधामान्तिकनिकेतने ॥ २८ ॥
परिणीयाथ[4] गान्धर्वविवाहेन बलानुजः । क्षणवत् क्षणदां कृत्स्नामिमामरमयन्मुदा ॥ २९ ॥
अतिमुक्तमुनिः प्रापदन्यदा रुक्मिणीगृहम् । तन्मत्वा सत्यभामाऽपि, रभसा समुपागमत् ॥ ३० ॥
भावी मम सुतो नो वा ?, रुक्मिण्येत्युदितो मुनिः ।
जनार्दनसमो भावीत्युक्त्वा तां स ययौ तदा ॥ ३१ ॥
अथाऽऽह रुक्मिणीं भामा, कथितो मे सुतोऽमुना । तेन वादेन ते याते, हरिमन्योन्यकोपने ॥ ३२ ॥
अथ तत्राऽऽगतो धैर्यधुर्यो दुर्योधनो नृपः । भामा तमाह जातो मे, सूनुर्वोढा सुतां तव ॥ ३३ ॥
रुक्मिणीं सत्यभामां च, प्राह दुर्योधनो नृपः । प्राग् भावी तनयो यस्यास्तस्यै देया सुता मया ॥ ३४ ॥
अथाऽऽह भामा प्रथमं, यत्पुत्रः परिणेष्यते ।
तस्यै च्छित्त्वा शिरःकेशान्, द्वितीया स्वान् प्रदास्यति ॥ ३५ ॥
निश्चित्येदं[5] तदा सत्या, रुक्मिणी च सभान्तरे ।
तत् साक्षीचक्रतुः कृष्ण-राम-दुर्योधनादिकान् ॥ ३६ ॥
दृष्टः स्वप्नेऽथ रुक्मिण्या, विशन्नास्ये सितो वृषः ।
तद्विचारं हरिर्व्याख्यद्, यद् भावी तेऽद्भुतः सुतः ॥ ३७ ॥
दासीमुखादिति श्रुत्वा, सत्याऽप्यागत्य कल्पितम् ।
आचख्यौ हरये स्वप्नं, यन्ममाऽऽस्ये गजोऽविशत् ॥ ३८ ॥
तं मत्वाऽपि हरिः स्वप्नं, कल्पितं जल्पितेङ्गितैः । मा भूदस्या विषादस्तद्, व्याख्यद् वरसुतोद्भवम् ॥ ३९ ॥
अथो महर्द्धिकः कोऽपि, महाशुक्राच्च्युतः सुरः । उदरे रुक्मिणीदेव्यास्तेजोरविरवातरत् ॥ ४० ॥
अथ सत्याऽप्यधाद् गर्भमुदरं ववृधे च तत् । यथावस्थोदरैवास्थात्, पुण्यगर्भा तु रुक्मिणी ॥ ४१ ॥
कृष्णमेत्याऽन्यदा सत्या, प्राह सत्या न रुक्मिणी । उदरं मेदुरं नास्याः, पश्य गर्भं पुनर्मम ॥ ४२ ॥
वदन्त्यामिदमेवास्यां, दासी कृष्णमवर्धयत् । पुत्रोऽभूद् देव ! रुक्मिण्या, रुक्मतुल्यतनुद्युतिः ॥ ४३ ॥
वचस्तस्यास्तदाऽऽकर्ण्य, कर्णपीयूषमच्युतः । उत्थाय रुक्मिणीसौधं, प्रति प्रचलितो मुदा ॥ ४४ ॥
गच्छन्ती सदने खिन्ना, तया सत्याऽपि वार्तया । वर्त्मन्येव भयस्यूताऽसूत सा भानुकं सुतम् ॥ ४५ ॥

---

१ °लायितः पाता० ॥ २ क्षुरप्रेण ततो लू° पाता० ॥ ३ °दत्रुटि° पाता० ॥ ४ °आययौ धै° खंता० ॥ ५ °दं गता सत्या, खंता० ॥

इतश्च रुक्मिणीसौधे, हरिः सिंहासने स्थितः । अपश्यत् पुत्रमानाय्य, विभाजितविभाकरम् ॥ ४६ ॥
आनन्दाम्बुधिनिर्मग्नो, निजगाद जनार्दनः । प्रद्युम्न इति तं नाम्ना, धाम्नां सीमा सुतो हि सः ॥ ४७ ॥
ज्योतिष्कः पूर्ववैरेण, धूमकेतुस्तदा सुतम् । तं कृष्णाद् रुक्मिणीवेषो, हृत्वा वैताढ्यमभ्यगात् ॥ ४८ ॥
तं चूतरमणोद्याने, बालं टङ्कशिलोपरि । एष क्षुधातुरत्वेन, म्रियतामित्यमुञ्चत ॥ ४९ ॥
असावनपमृत्युस्तच्चरमाङ्गतया शिशुः । अबाधितोऽपतद् भूरिपर्णाकीर्णमहीतले ॥ ५० ॥
गच्छतः स्वपुरं कालसंवरस्य पुरान्तरात् । विमानमस्खलत् प्रातस्तत्रैव व्योमचारिणः ॥ ५१ ॥
अथाधोदत्तदृष्टिस्तं, दृष्ट्वा बालं रविच्छविम् । पत्न्यै कनकमालायै, पुत्र इत्यार्पयत् खगः ॥ ५२ ॥
अथाऽऽख्यन्मेघकूटाख्ये, खेचरः स्वपुरे गतः । गूढगर्भाऽधुनैवासुं, मत्पत्नी सुषुवे सुतम् ॥ ५३ ॥
पुत्रजन्मोत्सवादूर्द्ध्वं, संवरः सुदिने व्यधात् । तस्य प्रद्युम्न इत्याख्यां, दिक्प्रद्योतनतेजसः ॥ ५४ ॥
अथैत्याप्रच्छि रुक्मिण्या, श्रीगोविन्दः क नन्दनः ? । अधुनैवाग्रहीः पुत्रं, हरिरित्युत्तरं ददौ ॥ ५५ ॥
केनापि च्छलितोऽसीति, भाषमाणाऽथ रुक्मिणी । पपात मूर्छिता भूमौ, लब्धसंज्ञा रुरोद च ॥ ५६ ॥
यदुभिः पद्मवन्म्लानं, भास्वत्यस्मिन् गते सुते । कुमुद्वतीव भामा तु, मुदिता सपरिच्छदा ॥ ५७ ॥
आताय नारदायाथ, किमेतदिति पृच्छते । आख्यत् सर्वं हरिर्दुःखी, शुद्धिं वेत्सीति चावदत् ॥ ५८ ॥

अथाऽऽह नारदो ज्ञानी, पुराऽऽसीदतिमुक्तकः ।
अधुना स गतो मुक्तिं, न ज्ञानं भारतेऽस्ति तत् ॥ ५९ ॥

तदहं प्राग्विदेहेषु, पृष्ट्वा सीमन्धरं जिनम् । कथयिष्यामि ते सर्वमित्युक्त्वा नारदो ययौ ॥ ६० ॥
गत्वाऽथ ज्ञानिनिःसीमं, सीमन्धरजिनेश्वरम् । प्रणम्य नारदोऽपृच्छत्, कृष्णसूनुगतिप्रथाम् ॥ ६१ ॥
अथाऽऽख्यत् तीर्थकृद् धूमकेतोः प्राग्वैरचेष्टितम् । विद्याधरगृहे वर्द्धमानं च हरिनन्दनम् ॥ ६२ ॥
पृच्छते नारदायाथ, तस्य प्राग्वैरकारणम् । स्वामी सीमन्धरस्तत्र, सर्वमित्थमचीकथत् ॥ ६३ ॥

## प्रद्युम्नस्य पूर्वभवचरितम्

अस्ति हस्तिपुरं जम्बूद्वीपे धरणिभूषणम् ।
विष्वक्सेनोऽत्र भूपोऽभूद्, विष्वक्सेनोद्धृताहितः ॥ ६४ ॥

मधु-कैटभनामानौ, तस्याभूतामुभौ सुतौ । भेजे राजा व्रतं राज-युवराजौ विधाय तौ ॥ ६५ ॥
छलात् पल्लीपतिर्भीमस्तयोर्देशमुपाद्रवत् । तं हन्तुमथ भूपालश्चचालाचलविक्रमः ॥ ६६ ॥
मार्गे वटपुरेन्द्रेण, कनकप्रभभूभुजा । मधुर्भोजन-वस्त्रादिदानैः सानन्दमर्चितः ॥ ६७ ॥
तत्रासौ वीक्ष्य चन्द्राभां, कनकप्रभवल्लभाम् । चेतस्तत्रैव मुक्त्वाऽगाद्, भीमं[3] पल्लीपतिं प्रति ॥ ६८ ॥
मधुः पल्लीपतिं हत्वा, कण्ठीरव इव द्विपम् । चलितः पुनरामन्त्रि, कनकप्रभभूभुजा ॥ ६९ ॥
अथाऽयच्छति चन्द्राभां, याच्ञया कनकप्रभे । बलात्कारेण तां निन्ये, मधुर्मधुसखातुरः ॥ ७० ॥
चन्द्राभाविरहाद् भेजे, वैकल्यं कनकप्रभः । मधुस्तु हास्तिनपुरं, प्राप्य रेमे समं तया ॥ ७१ ॥

१ °त्यस्तङ्गते खंता० ॥ २ °त्र, तदा सर्वमची° पाता० । °त्र, °सर्वमेचम° खंता० ॥
३ भीमप° खंता० ॥

उत्सूरागतिमन्येद्युः, पृष्टश्चन्द्राभया मधुः । पारदारिकवादेन, स्थितोऽस्मीदमवोचत ॥ ७२ ॥
चन्द्राभा प्राह को वादो ?, यत् पूज्याः पारदारिकाः ? । श्रुत्वेत्युक्तं नरेन्द्रेण, वध्या मे पारदारिकाः ॥ ७३ ॥
चन्द्राभाऽप्यवदत् पूज्यो, निश्चितं पारदारिकः । अत्रार्थे स्पष्टदृष्टान्तः, क्षोणीनाथस्त्वमेव मे ॥ ७४ ॥
आकर्ण्येति महीपालस्तपालोऽभूदधोमुखः । प्राप्तो राजपथे नृत्यन्नितश्च कनकप्रभः ॥ ७५ ॥
दुःखार्तं वीक्ष्य चन्द्राभा, स्ववियोगविसंस्थुलम् । अदीदृशद् दृशा बाष्परुद्धया मधवे धवम् ॥ ७६ ॥
तां प्रत्यर्प्य विधायाऽथ, मधुर्बन्धुसुतं नृपम् । सकैटभो व्रतं भेजे, मुनेर्विमलवाहनात् ॥ ७७ ॥
तीव्रं तप्त्वा तपः साधुवैयावृत्यकराविमौ । जातावनशनाद् देवौ, महाशुक्रे महर्द्धिकौ ॥ ७८ ॥

ज्योतिष्को धूमकेत्वाख्यो, मृत्वाऽभूत् कनकप्रभः ।
च्युत्वाऽभूत् तापसो मृत्वा, धूमकेतुरभूत् पुनः ॥ ७९ ॥

महाशुक्रान्मधुश्च्युत्वा, रुक्मिण्यां सोऽप्यजायत । प्राग्वैरं स्त्रीकृते धूमकेतु-प्रद्युम्नयोरिदम् ॥ ८० ॥
सूनुः षोडशवर्षान्ते, रुक्मिण्याः स मिलिष्यति । विद्या विद्याधरेन्द्राणां, हृद्या हृदि विनोदयन् ॥ ८१ ॥

किं पुत्रविरहः स्वामिन् !, रुक्मिण्याः षोडशाब्दिकः ? ।
नारदेनेति पृष्टः श्रीजिनेशः पुनरादिशत् ॥ ८२ ॥

## रुक्मिण्याः पुत्रवियोगकारणगर्भं पूर्वभवचरितम्

मण्डले मगधाभिख्ये, जम्बूद्वीपस्य भारते । लक्ष्मीग्रामाभिधे ग्रामे, सोमदेवोऽजनि द्विजः ॥ ८३ ॥
लक्ष्मीवतीति तद्भार्या, कुङ्कुमार्द्रेण पाणिना । कदाऽप्युपवने स्पृष्ट्वा, मयूराण्डमशोणयत् ॥ ८४ ॥
तमौज्झदन्यवन्माता, यावत् षोडश नाडिकाः । मेघवृष्ट्या ततो धौतं, स्वीचकार स्वमण्डकम् ॥ ८५ ॥
भूयो लक्ष्मीवती याता, वने बालं कलापिनम् । तं निनाय गृहे शोकातुरायामपि मातरि ॥ ८६ ॥
धृत्वा षोडश मासान् सा, सकृपा स्वजनोक्तिभिः । नीत्वा तत्र वने मातुरातुरायाः पुरोऽमुचत् ॥ ८७ ॥
ब्राह्मण्या तत्प्रमादेन, बद्धं षोडशवार्षिकम् । कर्मेदं पुत्रविरहव्यथाप्रथितवेदनम् ॥ ८८ ॥
मुनिं समाधिगुप्तं साऽन्यदा भिक्षार्थमागतम् । गृहात् पूत्कृत्य निष्काश्य, कपाटौ पिदधे द्रुतम् ॥ ८९ ॥

ससमेऽह्नि गलत्कुष्ठीभूय व्रतिजुगुप्सया ।
सा विषण्णाऽग्निना मृत्वा, भवान् भूरीन् किलाऽभ्रमत् ॥ ९० ॥

भृगुकच्छतटे रेवातीरेऽभूद्धीवरात्मजा । त्यक्ता पितृभ्यां दौर्गन्ध्यात्, काणाऽसौ दुर्भगाभिधा ॥ ९१ ॥
उद्यौवनाऽन्यदाऽपश्यत्, कायोत्सर्गस्थितं मुनिम् । सेयं समाधिगुप्ताख्यं, शीतार्तौ निर्भरे निशि ॥ ९२ ॥
असौ स्फीतेन शीतेन, निशायां मास्म बाध्यत । इति सार्द्रमनाः साधुं, तृणैः प्रावृणुते स्म तम् ॥ ९३ ॥
ननाम सा मुनिं प्रातर्धर्ममाख्यन्मुनिस्ततः । दृष्टोऽसि क्वचिदित्युक्तः, प्राग्भवानप्यचीकथत् ॥ ९४ ॥

---

१ °खार्त्तां वी° खंता० ॥ २ प्रतिबुद्धो वि° पाता० ॥ ३ श्लोकस्यास्य पूर्वार्धोत्तरार्धयोः खंता० पाता० पुस्तकयोर्विपर्यासो दृश्यते ॥ ४ सोमदेवोऽजनि ग्रामे, लक्ष्मीग्रामाभिधे द्विजः इतिरूपमुत्तरार्धं पाता० ॥ ५ स्वकाण्ड° पाता० ॥ ६ कर्म सत्पुत्रविरहव्यथावेद्यमिदं तदा इतिरूपमुत्तरार्धं पाता० ॥ ७ °न्मुनिः पुनः पाता० ॥

साऽथ दुर्गन्धतां मत्वा, स्वस्मिन् मुनिजुगुप्सया । जातजातिस्मृतिः प्रीता, क्षमयामास तं मुनिम् ॥ ९५ ॥
धर्मश्रीनामिकार्यायाः, श्राविका साऽपि साधुना ।
श्राद्धः साधर्मिकत्वेनान्वग्रहीद् गाङ्गिलोऽथ ताम् ॥ ९६ ॥
एकान्तरोपवासान् सा, द्वादशाब्दीं विधाय तत् । विपद्यानशनादेव, देवाधिपमहिष्यभूत् ॥ ९७ ॥
च्युत्वाऽसौ रुक्मिणी जाता, षोडशाब्दान्यसौ पुनः । मयूरचरितात् पुत्रविरहार्त्ता भविष्यति ॥ ९८ ॥
श्रुत्वेत्युत्पत्य वैताढ्ये, बालं तं वीक्ष्य नारदः । एत्य सर्वं तदावेद्य, रुक्मिणी-कृष्णयोर्ययौ ॥ ९९ ॥
अन्ते षोडशवर्षाणां, सूनुसङ्गमशंसिना । जिनेशवचसा सुस्थावस्थातामथ दम्पती ॥ १०० ॥
समुद्रस्य सभाभाजोऽन्येद्युः कुन्ती सहोदरा । सवधूकैः सुतैः सार्द्धं, पञ्चभिः समुपागता ॥ १०१ ॥
अथार्चित्वा नरेन्द्राय, किमेतदिति पृच्छते । कुन्ती यथातथं प्राह, किमकथ्यं सहोदरे ? ॥ १०२ ॥
राज्यं युधिष्ठिरे न्यस्य, पाण्डुभूपो व्यपद्यत । नकुलं सहदेवं च, मुक्त्वा माद्री तमन्वगात् ॥ १०३ ॥
प्रियौ युधिष्ठिराद् भीमादर्जुनादपि तन्मया । इमौ संवर्द्धितौ माद्रीपुत्राविन्दु-रविच्छवी ॥ १०४ ॥
धार्तराष्ट्रेन दुष्टेन, द्यूते दुर्योधनेन तत् । हारयित्वा वयं राज्यं, वने प्रास्थापयिष्महि ॥ १०५ ॥
अपि द्रुपदपुत्रीयं, जिता द्यूते वधूटिका । दुर्योधनेन मुक्ता द्राक्, भीमभ्रूभङ्गभीरुणा ॥ १०६ ॥
कालं कालमिव क्षिप्त्वा, श्रुत्वा वः किल जीवतः । हृष्टाऽहमागता किञ्च, द्रष्टुं तौ राम-केशवौ ॥ १०७ ॥
इति श्रुत्वा समुद्रोऽपि, सहाऽक्षोभ्यादिसोदरैः । सुतैश्च राम-कृष्णाद्यैस्तां सपुत्रामपूपुजत् ॥ १०८ ॥
ददुर्यदूद्वहाः कुन्तीसुतेभ्यः स्वसुताः क्रमात् । लक्ष्मीवतीं वेगवतीं, सुभद्रां विजयां रतिम् ॥ १०९ ॥
इतः प्रद्युम्नमालोक्य, कलावन्तं सुयौवनम् । ऊचे कनकमाला सा, मदनज्वरजर्जरा ॥ ११० ॥
शंवरेण पथि भ्रष्टः, प्राप्तस्त्वं नासि मे सुतः । तन्मां भज स्मरप्राय !, माऽन्यथा मद्वचः कृथाः ॥ १११ ॥
विद्ये प्रज्ञप्ति-गौर्यौ च, गृहाण मम सन्निधौ । यथा मदीयपुत्रैस्त्वं, जातुचिन्नहि जीयसे ॥ ११२ ॥
श्रुत्वेति सोऽपि नाकृत्यं, करिष्यामीति निश्चयी । मत्वा तद्वाक्यमादाय, विद्ये धीमानसाधयत् ॥ ११३ ॥
माताऽसि पोषणाद् विद्यादानाच्च नियतं मम । इत्थं निषेधयामास, वृषस्यन्तीमिमामसौ ॥ ११४ ॥
ततः प्रद्युम्नः पुरोपान्ते, गतो वापीं कलम्बुकाम् ।
स्वनखैः स्वं विदार्याङ्गं, साऽपि कोलाहलं व्यधात् ॥ ११५ ॥
प्रद्युम्नेन कृतं सर्वमित्याचख्यौ सुतेषु सा । तेऽपि क्रुद्धा गता योद्धुं, प्रद्युम्नेन विनिर्जिताः ॥ ११६ ॥
शंवरस्तत्पीडया जित्वा, शंवरोऽपि नमश्चरः । प्रद्युम्नेन निवेद्याऽथ, तत्कथां परितापितः ॥ ११७ ॥

---

१ °गन्धितां खंता० पाता० ॥ २ तयाऽर्पिता क्वचिद् ग्रामे, गाङ्गिलश्रावकस्य तत् इतिरूपमुत्तरार्धं पाता० ॥ ३ कालात् कालादिव ततः, श्रु° पाता० ॥ ४ किञ्चिद्, द्र° खंता० ॥ ५ °त्वा कुमारोऽपि, सहा° खंता० ॥ ६ संवरेण पथि भ्रष्टः, प्राप्तस्त्वं नासि मे सुतः । विद्ये प्रज्ञप्ति-गौर्याख्ये, गृहाण मम सन्निधौ ॥ १११ ॥ मन्यते मत्सता नाथ !, त्वमजेयबलस्ततः । भजस्व मां स्मरप्राय !, माऽन्यथा मद्वचः कृथाः ॥ ११२ ॥ इतिरूपं श्लोकयुगलं पाता० वर्तते ॥ ७ °ति चिन्तयन् पाता० ॥ ८ °नात् त्वं नि° खंता० ॥ ९ रतं प्रार्थयमानां तां, प्रद्युम्नोऽथ न्यषेधयत् इतिरूपमुत्तरार्धं पाता० ॥ १० °न्ते, वापीं कलम्बुकां गतः पाता० ॥ ११ गतस्तत्पीडया धावन्, शंवरो पाता० ॥

प्राप्तोऽथ **नारद**मुनिः, **प्रद्युम्ना**य न्यवेदयत् ।
आदितः सकलां जन्म-वियोगादिकथाप्रथाम् ॥ ११८ ॥
**सूनुः** सम्प्रति **भामाया, भानुकः** परिणेष्यति । ततस्त्वज्जननीकेशान्, सा सपत्नी ग्रहीष्यति ॥ ११९ ॥
श्रुत्वेति **द्वारिका**मागात्, **कृष्णसूनुः** स**नारदः** । तूर्णं विमान[1]मारुह्य, कूतं प्रज्ञप्तिविद्यया ॥ १२० ॥
विमाने **नारदं** मुक्त्वा, स्वयमुत्तीर्य **कृष्णभूः** । तत्रै[2]व **भानुको**द्वाह्यां, हृत्वा चिक्षेप कन्यकाम् ॥ १२१ ॥
निस्तृणा-ऽम्बुं हयीभूय, मर्कटीभूय निष्फलाम् । स **सत्या**वाटिकां कृत्वा, जातस्तुरगविक्रयी ॥ १२२ ॥
मूल्येनाहं ग्रहीष्यामि, पश्याम्यारुह्य वाजिनम् । जल्पते **भानुका**येति, स तुरङ्गममार्पयत् ॥ १२३ ॥
आरूढोऽथ हयेनायमनायि भुवि **भानुकः** । विपक्वफलवद् वातावधूतद्रुमशाखया ॥ १२४ ॥
स[3] द्विजीभूय **भामायाः**, कुब्जां दासीमृजुं व्यधात् ।
प्रीतयाऽपि तयाऽदर्शि, **भामायै** कपटद्विजः ॥ १२५ ॥
तमाह **भामा** कुरु मां, **रुक्मिणी**तोऽपि रूपिणीम् ।
सोऽप्यूचे मुण्डिता भूत्वा, त्वं मषीमण्डिता भव ॥ १२६ ॥
तत् कृत्वा तद्गिरा **भामा**, रूपाय प्रगुणाऽभवत् । क्षुधितस्य न मे विद्या, स्फुरतीत्याह तु द्विजः ॥ १२७ ॥
भोक्तुं निवेशितः सर्वमन्नमाहृत्य घस्मरः । अतृप्त इव निर्यातः, कुपितः कपटद्विजः ॥ १२८ ॥
तद् बालसाधुवेषेण, **रुक्मिण्याः** सदनं ययौ । **रुक्मिण्यां** पीठहस्तायां, निविष्टः **कृष्ण**विष्टरे ॥ १२९ ॥
एष कोऽपि न सामान्यो, मान्योऽयं दैवतैरपि । यदस्याविनयं सेहे, पीठाधिष्ठातृदेवता ॥ १३० ॥
ध्यात्वेति **रुक्मिणी** प्राह, वात्सल्योत्फुल्लया गिरा । बालर्षे ब्रूहि कार्येण, केनेदानीं त्वमागतः[4] ? ॥ १३१ ॥
मुनिः प्राह क्षुधार्त्तोऽहं, षोडशाब्दान्युपोषितः । पीतं मातुरपि स्तन्यं, न मया जन्मतोऽपि यत् ॥ १३२ ॥
इदानीं त्वामुपायातं, तन्मां कारय पारणम् । अथोचे **रुक्मिणी** हर्ष-विषादाकुलमानसा ॥ १३३ ॥
धन्यं मन्येऽहमात्मानं, मुने ! त्वद्दर्शनाञ्चितम् । धिक्करोमि तु सत्पात्रदानपुण्येन वञ्चितम् ॥ १३४ ॥
ब्रूषे विषण्णा किं नाम, त्वमित्युक्तेऽथ साधुना । **रुक्मिण्युवाच** नोद्वेगादद्य किञ्चिदुपस्कृतम् ॥ १३५ ॥
विषादहेतुमेतेन, पृष्टा प्रोवाच सा पुनः । जातमात्रोऽपि पुत्रो मे, हृतः केनापि पापिना ॥ १३६ ॥
तत्सङ्गमार्थमाराद्धा, सुचिरं कुलदेवता । तथापि व्यर्थयत्नत्वादुपक्रान्तः शिरोबलिः ॥ १३७ ॥
गोत्रदेव्यपि तुष्टाऽथ, सहसादाह सा स्वयम् ।
वत्से ! धत्से मतिं कस्मात्, कर्म निर्मातुमीदृशम् ? ॥ १३८ ॥
अयं ते रुचिराकारः, सहकारः करिष्यति । अकाले दर्शितोद्दामप्रसूनः सूनुसङ्गमम् ॥ १३९ ॥
इत्याशातन्तुसन्तानबन्धसंरुद्धजीविता । षोडशागमयं वत्सवत्सलाऽपि हि वत्सरान् ॥ १४० ॥
तदयं मदयन्नुच्चैः, कोकिलांश्चूतपादपः । पुष्पितो मन्दभाग्याया, न पुनर्मे मनोरथः ॥ १४१ ॥
कुर्वेऽहं सर्वथा तासां, गवामप्यन्वहं स्पृहाम् । धयन्त्यकुण्ठितोत्कण्ठं, यासां स्तन्यं स्तनन्धयाः ॥ १४२ ॥
किं चन्दनेन ? पीयूषबिन्दुना किं ? किमिन्दुना ? । अङ्गजाङ्गपरिष्वङ्गपात्रं गात्रं भवेद् यदि ॥ १४३ ॥
अशनं व्यसनं वेषो, विषमाभरणं रणम् । भवनं च वनं जातं, विना वत्सेन मेऽधुना ॥ १४४ ॥

---

१ °मारूढः, कू° वता० ॥ २ विमाने भा° पाता० ॥ ३ भामादासीं ऋजूचक्रे, द्विजीभूयाऽथ कुब्जिकाम् इतिरूपं पूर्वार्धं पाता० ॥ ४ °गमः खंता० सं० ॥

मुने! प्रसीद तद् ब्रूहि, कदा भावी स वासरः । यत्र पुत्रो ममोत्सङ्गसङ्गमङ्गीकरिष्यति ? ॥ १४५ ॥

मुनिरूचे क्षुधार्तोऽहं, तत् किञ्चिद् देहि भोजनम् ।
कथयामि यथा सुश्रुस्त्वत्पुत्रागमवासरम् ॥ १४६ ॥

अथाऽऽह रुक्मिणी कृष्णमोदकाः सन्ति नापरम् ।
ते तु नान्यस्य जीर्यन्ते, तन्मुने! किं ददामि ते ? ॥ १४७ ॥

किञ्चिन्मे दुर्जरं नेति, जल्पते साधवेऽथ सा । एकैकं मोदकं प्रादादाद कृत्स्नान् क्रमादसौ ॥ १४८ ॥

इतोऽपि सत्यभामानुयुक्ताः पटलिकाभृतः ।
रुक्मिणीमेत्य विजितान्, दास्यः केशान् ययाचिरे ॥ १४९ ॥

भृत्वा पटलिकास्तासामेव केशैः स कृष्णभूः । स्मितस्ताः प्रेषयामास, मुण्डितस्वामिनीसमाः ॥ १५० ॥

ताः प्रेक्ष्य कुपिता सत्या, प्रैषीज्झगिति नापितान् ।
कुट्टितास्ते कुमारेण, रुक्मिणीकुन्तलार्थिनः ॥ १५१ ॥

अथ भामा समामेत्य, कोपना प्राह केशवम् । प्रयच्छ रुक्मिणीकेशान्, यदमूः प्रतिभूरिह ॥ १५२ ॥

रामो दामोदरेणाथ, केशार्थं प्रेषितो ययौ । कृष्णीभूय तदा चास्थात्, कुमारो मातुरन्तिके ॥ १५३ ॥

बलोऽवलोक्य तत् सर्वं, वलितो हृदि लज्जितः । मां प्रेष्य त्वमगास्तत्र, कृष्णमित्याह कोपतः ॥ १५४ ॥

श्रुत्वेति हलिनो वाचं, सत्यभामाऽतिकोपना । सर्वे कपटिनो यूयमित्युक्त्वाऽऽत्मगृहं गता ॥ १५५ ॥

प्रद्युम्नो नारदेनासौ, रुक्मिण्यै कथितस्ततः । तदा स्वं रूपमास्थाय, स्वजनन्यै नमोऽकरोत् ॥ १५६ ॥

स्तनयोरुज्ज्वलं प्रीत्या, साञ्जनं नेत्रयोः पयः । मेने मूर्ध्नि पतद्गङ्गा, यमी स्नानं नमन्नसौ ॥ १५७ ॥

न ज्ञाप्योऽहं पितुर्यावच्चित्रं किञ्चन दर्शये । इत्युक्त्वा मातरं मायी, रथे न्यस्य चचाल सः ॥ १५८ ॥

हरेऽहं जीवतः कान्तां, हरेर्दंष्ट्रां हरेरिव । स इत्याख्यान् जने शङ्खं, दध्मौ दुर्धरविक्रमः ॥ १५९ ॥

मुमूर्षुः कोऽत्र मूर्खोऽयं?, वदन्निति बलान्वितः । कोपी गोपीधवो धन्व, विधुन्वन्नभ्यधावत ॥ १६० ॥

केशवः शैशवे तिष्ठन्, भंक्त्वा कृष्णचमूरमूः । चिरान्निरायुधं चक्रे, वैकुण्ठं कुण्ठितोद्यमम् ॥ १६१ ॥

तदाऽऽगतं हरिं प्रीतिभारदो नारदोऽवदत् । मा विषादीरसौ युद्धं, विधत्ते रुक्मिणीसुतः ॥ १६२ ॥

श्रुत्वेति सप्रमोदस्य, गोविन्दस्य पदाब्जयोः । प्रद्युम्नो न्यपतत् कुर्वन्नश्रुमुक्ताफलार्चनम् ॥ १६३ ॥

प्रविवेश गतावेशः, केशवः सबलः पुरीम् । प्रद्युम्न-रुक्मिणीरोचमानो मानधनाग्रणीः ॥ १६४ ॥

प्रद्युम्नहृतमुक्तां तां, दुर्योधननृपात्मजाम् । पर्यणैषीत् ततः सत्यातनुभूर्भानुकाभिधः ॥ १६५ ॥

रौक्मिणेयविभूत्याऽथ, भामां दुर्मनसं हरिः ।
अपृच्छत् किं विषण्णाऽसि, पूरये किं तवेहितम् ? ॥ १६६ ॥

भामा प्राह मयि प्रीतो, यदि देव! प्रयच्छ तत् । प्रद्युम्नमिव सद्युम्नं, नन्दनं चित्तनन्दनम् ॥ १६७ ॥

प्रत्यक्षीकृत्य तपसा, गीर्वाणं नैगमेषिणम् । हरिर्ययाचे भामायां, प्रद्युम्नप्रतिमं सुतम् ॥ १६८ ॥

---

१ °दादावत् कृ° खंता० ॥ २ कुण्टिता° खंता० ॥ ३ °गत्य हृ° खंता० पाता० ॥ ४ पपात पुरतोऽभीतः, प्रद्युम्नो मन्मथद्युतिः इतिरूपमुत्तरार्धं पाता० ॥ ५ तां, कन्यां पर्यणयत् ततः । दुर्योधनसुतां भामानन्दनो भानुकाभिधः इत्येवंरूपः श्लोकः पाता० ॥

दत्त्वा हारममुं यां त्वं[1], रमयिष्यसि तत्सुतः । अद्भुतो भवितेत्युक्त्वा, दत्त्वा हारं ययौ सुरः ॥ १६९ ॥
प्रज्ञस्या तदथ ज्ञात्वा, प्रद्युम्नः प्राह रुक्मिणीम् ।
आत्मतुल्यं सुतं मातस्तव, यच्छाम्यहं पुनः ॥ १७० ॥
रुक्मिणी प्राह तुष्टाऽस्मि, त्वयैकेन क्षमोऽसि चेत् ।
जाम्बवत्याः सपत्न्या मे, तद् यच्छात्मसमं सुतम् ॥ १७१ ॥
कृतभामाकृतिं जाम्बवतीं तद् रुक्मिणीसुतः । जनार्दनं प्रति प्रैषीद्, भामावासकेवासरे ॥ १७२ ॥
असत्यसत्ययाऽक्रीडद्, दत्त्वा हारं हरिस्तया । महाशु[3]क्राच्च्युतं साऽपि, कैटभं गर्भगं दधौ ॥ १७३ ॥
तस्यामथ प्रयातायां, सत्यभामा समाययौ ।
कयाऽपि च्छलितोऽस्मीति, सहाक्रीडत् तया हरिः ॥ १७४ ॥
किञ्चिद्व्रीतोऽथ तन्मत्वा, विष्णुः प्रद्युम्नचेष्टितम् ।
भीरुरस्याः सुतो भावी, निश्चिकायेति चेतसि ॥ १७५ ॥
अथ पूर्णैर्दिनैर्जाम्बवत्याः साम्बः सुतोऽभवत् । प्रद्युम्नस्य प्रियः पूर्वजन्मतोऽपि हि बान्धवः ॥ १७६ ॥
भामाया भीरुको नाम, सूनुर्जातः सदाभयः । जज्ञिरे[4] हरिपत्नीनामन्यासामपि सूनवः ॥ १७७ ॥
रुक्मिण्या प्रेषितोऽन्येद्युश्चरो भोजकटे पुरे । वैदर्भी रुक्मिणः पुत्रीं, प्रद्युम्नार्थमयाचत ॥ १७८ ॥
रुक्मी वैरं स्मरन् प्राच्यमूचे तं कोपनश्चरम् । वरं म्लेच्छाय यच्छामि, सुतां न तु हरेः कुले ॥ १७९ ॥
अथास्मिन् रुक्मिणीदूते, रुक्मिणेति निराकृते । प्रद्युम्न-साम्बौ चण्डालरूपौ भोजकटं[6] गतौ ॥ १८० ॥
तत्र रुक्मिणमुत्सङ्गे, वैदर्भी दधतं सुताम् । पर्यप्रीणयतामेतौ, मधुरस्वरगीतिभिः ॥ १८१ ॥
तत्र[7] च स्तम्भमुन्मूल्य, कोपात् कोऽपि द्विपो भ्रमन् । बली विलोडयामास, वासवेभनिभः प्रजाः ॥ १८२ ॥
वीक्ष्य द्विपं नृपः प्राह, य एनं कुरुते वशे । मुदे हृदीप्सितं तस्मै, यच्छाम्यहमसंशयम् ॥ १८३ ॥
गीतेन दन्तिनि प्रीते, चण्डालाभ्यां वशीकृते ।
हृष्टस्तदाऽऽह रुक्मी तौ, याच्यतां हृदयेप्सितम् ॥ १८४ ॥
अथान्नसिद्धये भूपात्, वैदर्भी तौ ययाचतुः । तदिमौ रुक्मिणा कोपात्, पुरादपि बहिष्कृतौ ॥ १८५ ॥
प्रद्युम्नोऽथ ययौ व्योम्ना, निशि रुक्मिसुतान्तिके ।
चण्डालादिचरित्रं च, स्वमेतस्यै न्यवेदयत् ॥ १८६ ॥
प्रद्युम्नोऽयमिति ज्ञात्वा, तां हृष्टामनुरागिणीम् । पाणौ[11]जग्राह गान्धर्वविवाहेन हरेः सुतः ॥ १८७ ॥
रमयित्वा[12] निशि स्वैरं, प्रद्युम्नेन्दौ गते सति । प्रातः सा मीलयामास, निद्रया नेत्रकैरवम् ॥ १८८ ॥

---

१ त्वं सम्भोक्ष्यसे हा.......... । ..........हारं मुक्त्वेत्यगात् सुरः ॥ १६९ ॥ इति पाता० ॥ २ °कदायिनम् पाता० ॥ ३ °क्च्युतं पाता० ॥ ४ अन्यास्वपि हरिस्त्रीषु, सुता जाता महाभुजाः इतिरूपमुत्तरार्धं पाता० ॥ ५ °कटे गतः । प्रद्युम्नाय ययाचे स, वैदर्भी रुक्मिणः सुताम् इतिरूपः श्लोक. पाता० ॥ ६ °कटे ग° खंता० ॥ ७ इतश्च स्तम्भमुन्मूल्य, करी कोऽपि स्फुरन् पुरे । इतिरूपं पूर्वार्धं पाता० ॥ ८ अथ गीतिगिरा दन्ती, चण्डालाभ्यां वशीकृतः पाता० ॥ ९ °सुतां प्रति पाता० ॥ १० °तस्या अचीकथत् पाता० ॥ ११ उपयेमे स गान्ध° पाता० सं० ॥ १२ विलस्य तां निशि स्वेच्छं, प्रद्यु° पाता० ॥

विवाहितामिवालोक्य, तामपृच्छत् प्रगे नृपः । न किञ्चिदप्युवाचासौ, रुक्मी प्रकुपितस्ततः ॥ १८९ ॥
तावेवाहूय चण्डालौ, दत्त्वा तामन्वतप्यत । मत्वा प्रद्युम्न-साम्बौ तौ, तदवाप मुदं पुनः ॥ १९० ॥

ऊढवान् सुहिरण्याख्यां, साम्बो हेमाङ्गदात्मजाम् ।
नित्यं हन्ति स्म हेलासु, भामापुत्रं च भीरुकम् ॥ १९१ ॥

अथाऽऽख्यत् केशवो जाम्बवत्यै साम्बकुचेष्टितम् ।
सा प्राह पुत्रः सौम्यो [1]मे, दर्श्यतां कोऽस्य दुर्णयः ? ॥ १९२ ॥

[2]तस्याः प्रत्यायनायाथ, जाम्बवत्या समं हरिः । आभीरीभूय विक्रेतुं, तक्रं द्वारि पुरः स्थितः ॥ १९३ ॥
तक्रविक्रयिणौ साम्बो, नगरद्वारि वीक्ष्य तौ । समाकारयदाभीरीं, तक्रक्रयणकैतवात् ॥ १९४ ॥

सहाऽऽभीरेण साम्बं साऽन्वगाद् देवालयान्तिके ।
अन्तरप्रविशन्तीं तां, साम्बोऽकर्षत् करग्रहात् ॥ १९५ ॥

रे! किमेतदिति क्रुध्यन्नाभीरः साम्बमाक्षिपत् । दृष्ट्वा स माता-पितरौ, तौ साक्षात् तूर्णमत्रसत् ॥ १९६ ॥
दृष्टेयं सोमता सूनोराह जाम्बवतीं हरिः । कीलिकां घटयन् साम्बः, प्रातः प्राप्तः सभान्तरे ॥ १९७ ॥
क्षेप्याऽसौ ह्यस्तनकथाकर्तुरास्ये वदन्निदम् । अन्तः कोपं च हासं च, गोपीभर्तुरवर्धयत् ॥ १९८ ॥

दुर्न्याय इति कृष्णेन, साम्बो निष्कासितः पुरात् ।
तस्मै प्रज्ञप्तिविद्यां तत्, प्रद्युम्नो गच्छते ददौ ॥ १९९ ॥

अन्यदा भानुकं निघ्नन्, प्रद्युम्नोऽभाषि भामया ।
रे वैरिन्! कथमद्यापि, न पुराद् यासि साम्बवत् ? ॥ २०० ॥

गच्छ स्थेयं स्मशानान्तस्तत्वैतव्यं त्वया पुनः । यदा साम्बं करे धृत्वा, पुरान्तः स्वयमानये ॥ २०१ ॥

जगाम भामयेत्युक्तः, स्मशानं रुक्मिणीसुतः ।
मिलितस्तत्र साम्बोऽपि, स्वेच्छाचरणकौतुकी ॥ २०२ ॥

इतश्च रम्यमेकोनं, कन्याशतममेलयत् । भामा भीरुकृते किञ्च, कन्यामेकां स्म काङ्क्षति ॥ २०३ ॥
तन्मत्वा रुक्मिणीसूनुर्विकृत्य पृतनां स्वयम् । जितशत्रुर्नृपो जज्ञे, साम्बस्तस्य तु कन्यका ॥ २०४ ॥
तन्मत्वा भामया प्रैषि, पुरुषो जितशत्रवे । स गत्वा प्रार्थयामास, तां कन्यां भीरुहेतवे ॥ २०५ ॥
जितशत्रुरथ प्राह, तं भामाप्रेषितं नरम् । भामा यदि स्वयं हस्ते, कन्यामादाय गच्छति ॥ २०६ ॥
चेत् कारयति मत्पुत्रीकरं भीरुकरोपरि । पाणिग्रहणवेलायां, तद् ददामि सुतामहम् ॥ २०७ ॥
गत्वा तेन नरेणेति, कथिते सत्यशेषतः । तदूरीकृत्य सत्याऽपि, कन्यार्थं चलिता स्वयम् ॥ २०८ ॥

प्रज्ञप्तिं प्राह साम्बोऽपि, जनोऽसौ साम्बमेव माम् ।
जानातु देवि! भामा तु, कन्यकां सपरिच्छदा ॥ २०९ ॥

अथाऽऽगत्य स्वयं सत्या, कन्यामादाय तां करे । साम्बरूपतया लोकैर्दृश्यमानां गृहेऽनयत् ॥ २१० ॥
भीरोः करोपरि करं, साम्बः कुर्वन्नुदूढवान् । धृत्वैकोनशतस्त्रैणकरान् दक्षिणपाणिना ॥ २११ ॥
अथ ताभिः समं साम्बः, प्रपेदे कौतुकालयम् । भीरुस्तेन भ्रुवाऽऽक्षिप्तः, सर्वं मातुर्न्यवेदयत् ॥ २१२ ॥

---

१ मे, शाठ्यं कचन दर्शय पाता० ॥ २ तच्छाठ्यदर्शनायाथ, विष्णुराभीररूपभाक् । स्वसदृग्रूपया जाम्बवत्या साम्बान्तिके स्थितः ॥ १९३ ॥ इतिरूपः श्लोक. पाता० ॥

कुपिताऽथाऽऽययौ भामा, साम्बः स्मित्वा ननाम ताम् ।
केनाऽऽनीतोऽसि रे धृष्ट !?, साटोपमिति साऽवदत् ॥ २१३ ॥
अहं मातस्त्वयाऽऽनीय, कन्योद्वाहमकारिषि । इति जल्पत्यथो साम्बे, साक्ष्यभूदखिलो जनः ॥ २१४ ॥
त्वया मायागृहेणाहं, कन्याकूटेन वञ्चिता । इत्युक्त्वा सत्यभामाऽपि, यथागतमगात् पुनः ॥ २१५ ॥
अथ ताः कन्यकाः कम्बुपाणिः साम्बाय दत्तवान् ।
ताभिर्जाम्बवतेयोऽभात्, ताराभिरिव चन्द्रमाः ॥ २१६ ॥
इतश्च जवनद्वीपवणिजो द्वारकापुरः । पुरे राजगृहे जग्मुर्विक्रेतुं रत्नकम्बलान् ॥ २१७ ॥
कम्बला जीवयशसा, स्वल्पमूल्येन याचिताः । तदूचुर्वणिजो मूल्यं, द्वारकायामभून्महत् ॥ २१८ ॥
का द्वारकापुरी? तस्यां, कश्चास्ति पृथिवीपतिः? ।
ते जीवयशसेत्युक्ताः, प्रोचुः कम्बलवाणिजाः ॥ २१९ ॥
मध्येपयोधि विदधे, द्वारकाख्या पुरी सुरैः । तत्र धात्रीधवः कृष्णो, देवकी-वसुदेवभूः ॥ २२० ॥
इति जीवयशाः श्रुत्वा, ताडयन्ती करैरुरः । दुःखयन्ती सखीचक्रमिति चक्रन्द मन्दधीः ॥ २२१ ॥
कथं रोदिषि पुत्रीति, जरासन्धाय पृच्छते । साऽऽख्यदद्यापि कंसारिर्जीवत्यवति चावनिम् ॥ २२२ ॥
तदहं मदहुङ्काररहीना दीना करोमि किम्? । ममाद्य शरणं तात!, त्वत्प्रतापसखः शिखी ॥ २२३ ॥
अथेति शिखिनाम्नाऽपि, ज्वलितो निजगाद सः । स्थिरीभव हरेर्नारीः, क्षेपयिष्यामि पावके ॥ २२४ ॥
इत्युदीर्य तदा वीर्यदुःसहः सहसा नृपः । पुरे सूचितदिग्यात्रारम्भां भम्भामवादयत् ॥ २२५ ॥
सहसा सहदेवाद्याः, सह साहसिकैर्भटैः । परिवव्रुर्जरासन्धं, सूनवोऽथ नवोद्यमाः ॥ २२६ ॥
रिपुभूमीभुजां कालः, शिशुपालः करालदृक् । कौरव्योऽरिविधारम्भधुर्यो दुर्योधनः पुनः ॥ २२७ ॥
अन्येऽपि वेपितारातिकोटयः कोटिशो नृपाः । परिवव्रुस्तमागत्य, विन्ध्याद्रिमिव सिन्धुराः ॥ २२८ ॥
॥ युग्मम् ॥
पुरः प्रस्थानवन्मूर्ध्नः, पपात मुकुटं भुवि । हारतस्त्रुटितादायुर्बिन्दुवन्मणयोऽगलन् ॥ २२९ ॥
पुरः श्रुतमभूत् कालजनिताह्वानशब्दवत् । चस्खलेऽङ्घ्रिश्च कीनाशपाशेनेवास्य वाससा ॥ २३० ॥
साक्षादशकुनानीति, नीतिज्ञोऽपि क्रुधाऽन्धलः । प्रयाणे गणनातीतान्यसौ गणयति स्म न ॥ २३१ ॥
प्रतापतापितक्षोणिरथासौ पृथिवीश्वरः । दिवाकर इवास्ताय, प्रतीचीं प्रति चेलिवान् ॥ २३२ ॥
नारदर्षिरथाऽऽचख्यौ, कलिकेलिकुतूहली । द्रुतमेत्य जरासन्धप्रयाणं कम्बुपाणये ॥ २३३ ॥
कृष्णोऽप्यथ द्विषद्दाववारिदो हारिदोर्बलः । अताडयत् प्रयाणाय, पटहं पटुहुङ्कृतिः ॥ २३४ ॥
बलारवकृतासुद्रसमुद्रविजयास्ततः । चेलुर्दशार्हाः सर्वेऽपि, समुद्रविजयादयः ॥ २३५ ॥
पितृष्वस्रेयकाः सर्वे, मातृष्वस्रेयका अपि । यदूनां बहवोऽन्येऽपि, प्रीताः पृथ्वीभुजोऽमिलन् ॥ २३६ ॥
गृहीतरणदीक्षोऽथ, कृतयात्रिकमङ्गलः । विप्रवक्त्राम्बुजोन्मुक्तसूक्तिसंवर्मितोद्यमः ॥ २३७ ॥
बन्दिवृन्दसमुद्गीर्णविक्रमस्फूर्जदूर्जितः । सम्बन्धि-बन्धु-वृद्धाभिराशीर्भिरभिवर्धितः ॥ २३८ ॥
पौरैर्जयजयारावमुखरैरभिनन्दितः । शकुनैरनुकूलैश्च, निश्चितात्मजयोत्सवः ॥ २३९ ॥
अवार्यतूर्यनिर्घोषप्रतिनादितदिङ्मुखः । सानन्दं पौरनारीभिः, साक्षतक्षेपमीक्षितः ॥ २४० ॥

१ °वसुः खंता° ॥

दिने क्रोष्टुकिनाऽऽदिष्टे, रथी दारुकसारथिः । ततः पूर्वोत्तराशायां, विष्णुर्बलवृतोऽचलत् ॥ २४१ ॥
॥ पञ्चभिः कुलकम् ॥

योजनानि पुरात् पञ्चचत्वारिंशतमीयिवान् । ग्रामेऽथ शतपल्याख्ये, स निवासानकारयत् ॥ २४२ ॥
चतुर्भिर्योजनैः कृष्णे, स्थितेऽर्वाग् मगधेशितुः । एत्य विद्याधराः केऽपि, समुद्रनृपमभ्यधुः ॥ २४३ ॥
त्वभ्रातुर्वसुदेवस्य, गुणगृह्या वयं नृप ! । तदागमाम वैताढ्यादाख्यातुं भवतां हितम् ॥ २४४ ॥
अन्येभ्यः किमु साहाय्यं, भवतां भुजशालिनाम् ? । तथापि सुजनस्नेहसम्मोहादिदमुच्यते ॥ २४५ ॥

जरासन्धस्य मित्राणि, वैताढ्ये सन्ति खेचराः ।
असमायान्त एवामी, योग्याः साधयितुं द्विषः ॥ २४६ ॥

प्रद्युम्न-साम्बसहितं, वसुदेवं तदादिश । वयं यथा विगृह्णीमो, रिपुमित्राणि खेचरान् ॥ २४७ ॥
ओमिति क्ष्माभृताऽऽदिष्टे, वसुदेवे चलत्यथ । प्रददौ भगवान्नेमिरौषधीमस्त्रवारणीम् ॥ २४८ ॥
अथाऽऽदिश्य जरासन्धो, हंस-डिम्भकमन्त्रिणौ । अभेद्यं रिपुचक्रेण, चक्रव्यूहमकारयत् ॥ २४९ ॥
चक्रस्यास्य सहस्रारीसहस्रं भूभुजोऽभवन् । भूरिस्यन्दन-हस्त्य-ऽश्व-पदातिपरिवारिताः ॥ २५० ॥
षट्सहस्रमहीपानां, दधिरे प्रविरूपताम् । भूपपञ्चसहस्रीवान्, स्थितोऽन्तर्मगधाधिपः ॥ २५१ ॥
पृष्ठे सैन्धव-गन्धारसेनाऽभून्मगधप्रभोः । धार्तराष्ट्राः शतं युद्धदक्षा दक्षिणतोऽभवन् ॥ २५२ ॥
सन्धौ सन्धौ च पञ्चाशच्छकटव्यूहसङ्कटे । व्यूहेऽस्मिन् दधिरे गुल्मा, भूपानामन्तराऽन्तरा ॥ २५३ ॥
चक्रव्यूहस्य च बहिर्बहुधा व्यूहधारिणः । स्थाने स्थाने नृपास्तस्थुर्महीयांसो महाभुजाः ॥ २५४ ॥
हिरण्यनाभं भूपालं, भूभुजां दण्डनायकम् । कृतं वीक्ष्य भयेनेव, सूरोऽप्यस्तमितस्तदा ॥ २५५ ॥
दोषायामथ दुर्धर्षा, यदवोऽपि दवोर्जिताः । चक्रिरे गरुडव्यूहं, चक्रव्यूहजयेच्छया ॥ २५६ ॥

अर्धकोटिः कुमाराणां, व्यूहस्यास्य मुखे स्थिताः ।
शीरि-शार्ङ्गधरौ युद्धदुर्धरौ मूर्धनि स्थितौ ॥ २५७ ॥

वसुदेवसुतोऽक्रूरमुख्या द्वादश दुर्धराः । रथलक्षयुता विष्णोरभूवन् पृष्ठरक्षकाः ॥ २५८ ॥
पृष्ठे तेषामभूदुग्रसेनः कोटिमितै रथैः । तत्पृष्ठरक्षकास्तस्य, चत्वारः सूनवोऽभवन् ॥ २५९ ॥
व्यूहस्य दक्षिणे पक्षे, समुद्रविजयः स्वयम् । तस्थौ परिवृतो वीरैर्भ्रातृ-भ्रातृव्य-सूनुभिः ॥ २६० ॥
चञ्चन्तः पञ्चविंशत्या, रथलक्षैरथाऽपरे । समुद्रविजयं भूपाः, परिवृत्याऽवतस्थिरे ॥ २६१ ॥
वामपक्षे तथोद्दामधामानो रामनन्दनाः । युधिष्ठिरादयः पाण्डुसूनवश्चावतस्थिरे ॥ २६२ ॥
कृतास्त्रताण्डवास्तस्थुः, पाण्डवानां तु पृष्ठतः । भास्वन्तो भूरयो भूपा, धार्तराष्ट्रवधेच्छया ॥ २६३ ॥
यमदण्डोग्रदोर्दण्डा, अर्ककर्कशतेजसः । अभूवन् भूरयो भूपाः, परितो व्यूहरक्षिणः ॥ २६४ ॥
इत्येष गरुडव्यूहं, विदधे गरुडध्वजः । यं वीक्ष्य विलयं प्राप, दर्पसर्पो विरोधिनाम् ॥ २६५ ॥
अथ प्रेषितमिन्द्रेण, जैत्रशस्त्रचयान्वितम् । युयुत्सुर्नेमिरारूढो, रथं मातलिसारथिम् ॥ २६६ ॥
समुद्रविजयेनाथ, चमूनाथपदे स्वयम् । कृष्णाग्रभूरनाधृष्टिरभिषिक्तो महाभुजः ॥ २६७ ॥
स्कन्धावारे हरेरासीदथो जयजयारवः । विपक्षक्षितिपक्षोभकारी ब्रह्माण्डभाण्डभित् ॥ २६८ ॥

१ °धरः कोऽपि, समुद्रनृपमभ्यधात् खंता० ॥ २ °ह्यादयमुद्यमः ॥ खंता० ॥ ३ °जयादयः । खंता० ॥ ४ °क्ष्य प्रलयं याति, दर्पे° खंता० ॥ ५ °यान्वितम् खंता० ॥ ६ °रथिः खंता० ॥

सैन्यद्वयेऽपि नासीरवीरा युयुधिरे ततः। गर्जन्तोऽस्त्राणि वर्षन्तो, युगान्तघनवद् घनम् ॥ २६९ ॥
गजेन्द्रगर्जिभिस्तूर्यरसितैर्हयहेषितैः। रथघोषैर्भटारावैः, शब्दाद्वैतं जगत्यभूत् ॥ २७० ॥
जरासन्धभटैर्भग्नानिव वीक्ष्य भटानथ। ऊर्ध्वीकृत्य भुजादण्डं, धीरयामास केशवः ॥ २७१ ॥
उत्तस्थिरे महानेमि-पार्था-ऽनाधृष्टयस्त्रयः। तार्क्ष्यपक्षद्वयीचञ्चुरूपा भूपावलीवृताः ॥ २७२ ॥
दध्मुर्निजं निजं शङ्खं, तथामी दुर्धरास्त्रयः। यथा चेतश्चमत्कारं, श्रीनेमेरपि चक्रिरे ॥ २७३ ॥
युद्ध्यमानैः स्फुरन्मानैरथ तै रथिभिस्त्रिभिः। चक्रव्यूहो रयादेव, त्रिषु स्थानेष्वभज्यत ॥ २७४ ॥
इमां वीरत्रयीं व्यूहे, विशन्तीमन्वगुर्नृपाः। दृढीभूताः पटे गाढे, सूचिकामिव तन्तवः ॥ २७५ ॥
एतान् प्रत्युत्थितान् दुर्योधन-रौधिरि-रुक्मिणः। एतैरथ मिथः षड्भिर्द्वन्द्वयुद्धमुरीकृतम् ॥ २७६ ॥
अथ तद्भूत्ववीराणां, कुप्यत्कीनाशतेजसाम्। मिथो विश्वत्रयत्रासचणः प्रववृधे रणः ॥ २७७ ॥

केऽपि भीताः परे क्रुद्धा, न तु कोपोऽप्यजायत।
केषाञ्चित् खेलतां शत्रुशिरोभिः कन्दुकैरिव ॥ २७८ ॥

मौलौ कोऽप्यसिकृत्तेऽपि, दन्तदष्टाधरः क्रुधा। रिपुं जघान हस्तेन, समालम्ब्य गलं बलात् ॥ २७९ ॥
कोऽपि प्रसन्नगम्भीरो, वीरो निर्दारयन्नरीन्। दर्शयामास नेत्रौष्ठ-भ्रूमात्रेऽपि न विक्रियाम् ॥ २८० ॥
शिरो वैरिशिरोत्क्षिप्तं, कस्याप्यालोलवेणिकम्। सखड्गराहुसंभ्रान्त्या, दिवि देवानभापयत् ॥ २८१ ॥
नृत्ते सदृष्टिभ्रूभङ्गं, शत्रौ कृत्तशिरस्यपि। हन्तुर्लोहमयेनापि, शिरः खड्गेन कम्पितम् ॥ २८२ ॥
जिघांसुमिभमायान्तं, गृहीत्वा कोऽपि शुण्डया। भ्रमयन्नम्बरे भ्रष्टशस्त्रो योद्धुमशक्नयत् ॥ २८३ ॥
क्रमव्यापारिताशेषभ्रष्टशस्त्रो रणेऽपरः। नखैर्दन्तैरपि रिपून्, बिभिदे सिंहविक्रमः ॥ २८४ ॥
दृशैव त्रासयन् वीरान्, हुङ्कारेणैव कुञ्जरान्। अभ्युद्यतास्त्र एवान्यः, परसैन्यमलोडयत् ॥ २८५ ॥
ध्वान्ते धूलिकृते खड्गः, कस्यापि दलयन्नरीन्। केयूररत्नबिम्बेन, धृतदीप इवाबभौ ॥ २८६ ॥
हत्वा चपेटयैवान्यः, पविपातसमानया। अलुठदिभान् भूमौ, पर्वतानिव वासवः ॥ २८७ ॥
आस्फाल्यान्योन्यमन्योऽरिशिरांसि करलीलया। नालिकेरीफलानीव, बभञ्ज भुजकौतुकी ॥ २८८ ॥
हक्कापराङ्मुखः पुच्छे, धृतः केनापि कुञ्जरः। प्राणं कुर्वन् गतौ मुक्तो, मुखाग्रेणापतद् भुवि ॥ २८९ ॥

अन्योन्यास्फालनोन्मुक्तस्फुलिङ्गैरसिभिस्तदा।
धूमायितं प्रदीप्तानां, शिखिनामिव दोष्मताम् ॥ २९० ॥

कचग्रहपरः शत्रुहस्तोऽसादसिना क्षतः। कस्याप्यपतितो हस्तिशोभां शुण्डानिभो दधौ ॥ २९१ ॥
उद्यन्महा महानेमिर्विरथं रुक्मिणं व्यधात्। तन्महानेमये शक्तिं, राजा शत्रुन्तपोऽक्षिपत् ॥ २९२ ॥
श्रीनेमिनाथमालोच्य, मातलिर्वज्रसङ्क्रमम्। महानेमिशरे चक्रे, शक्तिस्तेन हताऽपतत् ॥ २९३ ॥
शरैरतत्रसद् दुर्योधनं तत्र धनञ्जयः। बाणवृष्ट्याऽप्यनाधृष्टिर्विधुरं रौधिरं व्यधात् ॥ २९४ ॥
इतोऽपि यदुभिर्वीरैर्वैरिसैन्यं विलोडितम्। जघ्निरे भूरिशो भूपा, द्रुमाद्या मायदुद्यमाः ॥ २९५ ॥
संहताभ्यामितो रामाङ्गजैर्मत्तगजैरिव। भीमा-ऽर्जुनाभ्यां कौरव्याः, शरज्यीचक्रिरे क्रुधा ॥ २९६ ॥

वेगादलक्षसन्धान-मोक्षः पार्थः शरान् किरन्।
श्यामप्रभो बभौ धन्वी, वर्षन् धारा इवाम्बुदः ॥ २९७ ॥

अथाऽवलोक्य संहारमूर्तिमर्जुनमातुरः। संभूय भूरिभूपालैर्गर्जन् दुर्योधनोऽरुधत् ॥ २९८ ॥

मुक्तमार्गणसार्थेन, पार्थेन विरथीकृतः । दुर्योधनः समुत्पत्य, प्रपेदे शकुने रथम् ॥ २९९ ॥

बभञ्ज भूभुजो धीरंमन्यानन्यानपि क्रुधा । पार्थः शरभरैः पद्मान्, धारासारैरिवाम्बुदः ॥ ३०० ॥

शक्त्याऽवधीद् द्विषां शल्यं, शल्यं युधि युधिष्ठिरः ।
अमोघेनाऽऽशु वज्रेण, वज्रपाणिरिवाचलम् ॥ ३०१ ॥

हत्वा दुःशासनस्याऽऽशु, गदयाऽथ व्यदारयत् । उरो दुरोदरच्छद्मजयक्रुद्धो वृकोदरः ॥ ३०२ ॥

सहदेवकरोत्थेन, श्येनेनेव पतत्रिणा । रथादुड्डीयमानेन, चिच्छिदे शकुनेः शिरः ॥ ३०३ ॥

दीप्तं कौरवसेनाया, जीवितव्यमिवेषुभिः । अस्तं निनाय गाण्डीवधन्वा युधि जयद्रथम् ॥ ३०४ ॥

ज्वालजालैरिव व्योम, व्याप्नुवन् विशिखैरथ । निर्दग्धुमर्जुनं दाववर्णः कर्णः समुत्थितः ॥ ३०५ ॥

यशोमुक्ताञ्चितं कर्णताडङ्कमिव जीवितम् । हरन् पार्थोऽकृताश्रीकं, कौरवध्वजिनीमुखम् ॥ ३०६ ॥

मृगेन्द्र इव कर्णेऽस्मिन्, निहतेऽथ मृगा इव । मेनिरे हतमात्मानमहता अपि कौरवाः ॥ ३०७ ॥

हते कर्णेऽर्जुनस्याऽऽसीज्जितमेवेति निश्चयः । भीमश्वासमरुत्तूले, जीवत्यपि सुयोधने ॥ ३०८ ॥

गजेन्द्रसेनासीमन्तो, भीमं तोयधिनिस्वनम् । क्रुद्धो दुर्योधनो राजा, सिंहं मृग इवाक्षिपत् ॥ ३०९ ॥

भीमोऽथ शुण्डया धृत्वा, महेभान् समराद् बहिः ।
दूरं चिक्षेप शैवालजालानीव सरोवरात् ॥ ३१० ॥

कल्लोलानिव कुम्भीन्द्रान्, दोर्भ्यामुभयतः क्षिपन् । तदा तरीतुमारेभे, भीमः सङ्गरसागरम् ॥ ३११ ॥

दायाद एव भीमस्य, युद्धभागेऽप्यढौकत । सज्जीकृतद्विपकुलो, नकुलोऽथ प्रतिद्विषः ॥ ३१२ ॥

ततः पाण्डव-कौरव्यबलयोः प्रबलस्वनाः । अमिलन्नाशु कीनाशकिङ्करा इव कुञ्जराः ॥ ३१३ ॥

कौचिद् द्विपौ दृढाघातभ्रष्टदन्तौ रणे मिथः । अस्पृशयेतां कराग्रेण, मन्दमग्रे द्विपीधिया ॥ ३१४ ॥

कोऽपि प्रतिद्विपं दन्ती, स्वदन्तप्रोतविग्रहम् । ऊर्द्ध्वमुत्पाटयामास, कृतान्तायार्पयन्निव ॥ ३१५ ॥

युद्धेन चलितं योद्धुमक्षमं दन्तमात्मनः । द्विपोऽन्यः शुण्डयोन्मूल्य, तेनाभैत्सीत् प्रतिद्विपम् ॥ ३१६ ॥

पराङ्मुखौ मिथो भङ्गादभूतां सम्मुखौ पुनः ।
स्वेभैः परभ्रमात् कौचित्, ताडितौ चलितौ गजौ ॥ ३१७ ॥

उद्धृत्य शुण्डया कोऽपि, प्रतिदन्तिरदं रणे । रुषाऽक्षिपन्मुखे मूर्त्ता, रिपुकीर्तिमिव द्विपः ॥ ३१८ ॥

उत्क्षिप्तः शुण्डया दूरं, केनापि करिणा करी । ततो भूभङ्गभीत्येव, दन्तदण्डे धृतः पतन् ॥ ३१९ ॥

लज्जयामासतुः स्वं स्वं, योधं कौचन सिन्धुरौ । एकस्त्रस्यन् परः पृष्ठे, व्रजन्नवमताङ्कुशः ॥ ३२० ॥

जानन्निवारिभग्नस्य, हृदयं निजसादिनः । करी प्रतिकरीन्द्रेणोपद्रुतः कोऽपि विद्रुतः ॥ ३२१ ॥

इतो व्यालोलकल्पान्तकालकल्पं सुयोधनः । भीमं द्विषद्वधाविष्टमभ्यधाविष्ट दुष्टधीः ॥ ३२२ ॥

द्यूतच्छलं स्मरन् भीमस्तथा तं गदयाऽपिषत् । यथाऽऽशु पवनेनैव, कीर्णा देहाणवोऽप्ययुः ॥ ३२३ ॥

ततो हिरण्यनाभस्य, शरणं तद्बलं ययौ । परिवव्रुरनाधृष्टिं, तेऽपि यादव-पाण्डवाः ॥ ३२४ ॥

हिरण्यनाभसेनानीः, सेनानीरजनीरविः । करैरिव शरैः शोषं, निन्येऽनाधृष्टिवाहिनीम् ॥ ३२५ ॥

अथाऽऽलोक्य तमायान्तमतुलं मातुलं निजम् ।
जयसेनो जयाकाङ्क्षी, शिवासूनुः समुत्थितः ॥ ३२६ ॥

---

१ °दुत्क्षुय° खंता० ॥ २ °यनिधिस्व° खंता० ॥ ३ समरसा° खंता० सं० ॥ ४ °रणे त° खंता० सं० ॥

हिरण्यनाभोऽप्येतस्य, स्यन्दनध्वजमच्छिदत् ।
जयसेनोऽलुनात् तस्य, ध्वज-वर्म-ऽश्व-सारथीन् ॥ ३२७ ॥
क्रुद्धोऽथ दशभिर्बाणैर्जयसेनं जघान सः । मर्माविद्भिरिभं मत्तं, करजैरिव केसरी ॥ ३२८ ॥
अथ धावन् महीसेनो, जयसेनसहोदरः । खड्ग-वर्मधरो दूरात्, क्षुरप्रेणामुना हतः ॥ ३२९ ॥
अनाधृष्टिरथोत्तस्थे, बन्धुद्वयवधक्रुधा । ऊष्मलो दोष्मतां सीमा, सह भीमा-ऽर्जुनादिभिः ॥ ३३० ॥
हिरण्यनाभं सक्रोधमनाधृष्टिरयोधयत् । परस्परमढौकन्त, परेऽप्यथ महारथाः ॥ ३३१ ॥
आमूलं वैरिनाराचकीलनेन स्थिरीकृते । धनुर्युजि भुजि कोऽपि, ननन्द प्रहरन् रथी ॥ ३३२ ॥
सूते हतेऽपि पादाग्रधृतप्राजनरश्मिकः । हयानवाहयत् कोऽपि, युयुधे च द्विषा रथी ॥ ३३३ ॥
रथिकः कोऽपि बाणेन, पाणौ वामे कृतक्षते । ध्वजदण्डे धनुर्बद्ध्वा, शरान् साक्षेपमक्षिपत् ॥ ३३४ ॥
कस्यापि रथिनो बाणा, मेचं प्राणाधिका ययुः । अन्तःकृत्ता अपि द्वेषविशिखैर्भुजगा इव ॥ ३३५ ॥
हन्तुमुच्छलितश्छिन्नमौलिरर्धपथे रथी । कोऽपि प्रतिरथं गत्वा, रिपोर्मुण्डमखण्डयत् ॥ ३३६ ॥
समरे विरथो व्यस्त्रश्चक्रवर्तीव कोऽप्यभात् । भग्नस्यात्मरथस्यैव, चक्रमादाय शस्त्रयन् ॥ ३३७ ॥
छिन्नेषु कौतुकाद् योक्त्ररश्मिषु द्विषता शरैः । कस्यापि धनुराकृष्टिस्थाम्नाऽभूदुन्मुखो रथः ॥ ३३८ ॥
इतः सात्यकिना कृष्णजयार्णवहिमांशुना । जिग्ये भूरिश्रवा भूपो, योक्त्रबद्धगलग्रहात् ॥ ३३९ ॥
इतो मूर्त्ताविव क्रोधौ, कृतरोधौ परस्परम् । अयुध्येतामनाधृष्टि-हिरण्यपृतनापती ॥ ३४० ॥
अथोद्धृतासि-फलकौ, बलकौतुककारिणौ । उत्सृज्य रथमन्योन्यं, क्रोधाद् वीरावधावताम् ॥ ३४१ ॥
अनाधृष्टिकृपाणेन, सर्पेणेवाथ सर्पता । हिरण्यस्य समं प्राणानिलैः कीर्तिपयः पपे ॥ ३४२ ॥
अत्रान्तरे रणोद्धूतधूलीभिरिव धूसरः । अपराब्धौ गतः स्नातुमह्नामह्नाय नायकः ॥ ३४३ ॥
अथाऽऽत्मस्थानमायातौ, सायं व्यूहावुभावपि । कल्पान्तविरतौ पूर्व-पश्चिमाम्भोनिधी इव ॥ ३४४ ॥
व्यूहयोरनयोर्वीरव्यूहोऽथ रणकौतुकी । चतुर्युगीमिव श्यामाचतुर्यामीममन्यत ॥ ३४५ ॥
अथ तद्युद्धकीलालनदीरक्तादिवाम्बुधेः । उदियाय रविः कुप्यत्कान्ताहक्कोणशोणरुक् ॥ ३४६ ॥
अथो निजं निजं व्यूहं, विरचय्य रणोत्सुकाः । अगर्जिषुर्जरासन्ध-जनार्दनचमूचराः ॥ ३४७ ॥
जरासन्धाभिषिक्तोऽथ, शिशुपालश्चमूपतिः । पुरस्कृत्याश्वसैन्यानि, प्रचचाल प्रति द्विषम् ॥ ३४८ ॥
अनाधृष्टिरथो वाहवाहिनीं स्थिरयन् पुरः । अचस्खलत् खलममुं, सिन्धुपूरमिवाचलः ॥ ३४९ ॥
उत्पाट्योत्पाट्य निस्त्रिंश-गदा-पट्टिश-मुद्गरान् । ततो युयुधिरे धीरास्तुरङ्गाश्च जिहेषिरे ॥ ३५० ॥
व्यालोलत्पादकटकबद्धवप्रग्रहोत्थितम् । अश्वं कोऽपि समित्यश्ववारमारोहयद्भयः ॥ ३५१ ॥
छिन्नाग्रपादतुण्डोऽपि, कोऽप्यश्वः समरान्तरात् ।
क्रामन् पाश्चात्यपादाभ्यामाचकर्ष निषादिनम् ॥ ३५२ ॥
खुराग्रैस्त्रोटयन्नन्त्रावलीं द्विड्घातनिःसृताम् । कोऽप्यश्वः समरेऽधावत्, स्वसादिमनसा समम् ॥ ३५३ ॥
छिन्नमौली द्विषा कौचित्, तुरङ्गम-तुरङ्गिणौ । प्रधावने च घाते च, स्पर्धयेव न निर्वृतौ ॥ ३५४ ॥
अश्वः कोऽप्युरसाऽऽहत्य, साश्ववारान् पुरो हरीन् । धावन्नपातयद् युद्धश्रद्धां च निजसादिनः ॥ ३५५ ॥

---

१ °नोऽच्छिनत् तस्य, खंता° सं° ॥ २ निजनिजव्यू° खंता° ॥ ३ °स्य च सै° सं° ॥
४ °द्विस्ततो वा° सं° ॥ ५ °वीरा° सं° ॥

हयतः पतितौ पादकटकस्खलितक्रमौ । केशाकर्षादयुध्येतां, शस्त्र्या कौचिदधोमुखौ ॥ ३५६ ॥
सारणेन रणे जघ्ने, तदा रामानुजन्मना । जवनाख्यो जरासन्धयुवराजो महाभुजः ॥ ३५७ ॥
ततः सुतवधक्रुद्धो, जरासन्धोऽपि जघ्निवान् । दश रामसुतान् तार्क्ष्यव्यूहाङ्घ्रिनखरानिव ॥ ३५८ ॥
कृष्णोऽपि शिशुपालस्य, मूर्धानमसिनाऽच्छिनत् । चक्राधिरूढकलशं, कुलाल इव तन्तुना ॥ ३५९ ॥
तदाऽष्टाविंशतिस्तत्र, जरासन्धसुता हताः । बलेन मुशलेनाऽऽशु, निजाङ्गजवधक्रुधा ॥ ३६० ॥
जरासन्धेर्न चापत्यपेषरोषान्धचक्षुषा । आहतो गदया रक्तं, वमन् भुवि बलोऽपतत् ॥ ३६१ ॥
तदा बन्धुपराभूतिक्रोधाविर्भूतिदुर्धरः । जरासन्धभुवोऽभैत्सीद्, विष्णुरेकोनसप्ततिम् ॥ ३६२ ॥
तदोद्धुरविरोधेन, क्रोधेन मगधाधिपः । ज्वलंश्चचाल कृष्णाय, शरभायेव केसरी ॥ ३६३ ॥
इहान्तरे जरासन्धशरासारतिरस्कृते । अभवद् यदुसैन्येऽस्मिन्, हतो हरिरिति प्रथा ॥ ३६४ ॥
तदाऽऽकुलं यदुकुलं, श्रीमान् नेमिर्विलोकयन् । रथं मातलिना युद्धे, ससम्भ्रममविभ्रमत् ॥ ३६५ ॥
अथेन्द्रचापनिर्मुक्तैः, शरैः स्वामी रिपुव्रजम् । आच्छादयदुडुस्तोमं, करैरिव दिवाकरः ॥ ३६६ ॥
एक एव तदा स्वामी, विश्वरक्षा-क्षयक्षमः । विपक्षक्ष्माभृतां लक्षं, रुरोधाऽघातकैः शरैः ॥ ३६७ ॥
किरीटेषु ध्वजाग्रेषु, कुन्तप्रान्तेषु सारिषु । फलकेष्वातपत्रेषु, पेतुः प्रभुपतत्रिणः ॥ ३६८ ॥
अथ श्रीनेमिसाहाय्यलब्धोत्साहो यदुव्रजः । परेषुमारुतप्रोत्तोयमो दव इवाज्वलत् ॥ ३६९ ॥
भीमस्तदा रणक्षोणावन्विष्यान्विष्य कौरवान् । करीवोन्मूलयामास, वनान्तः सल्लकीतरून् ॥ ३७० ॥
भास्वानाश्वासनामाप्य, बलोऽपि प्रबलोद्यमः । अरीन् व्यरीरमद् वायुः, कज्जलध्वजवज्जवात् ॥ ३७१ ॥
सद्योऽङ्गजन्मजध्वंसोद्धुद्धकंसवधक्रुधा । जिष्णुं जगाद जाज्वल्यमानधीर्मगधाधिपः ॥ ३७२ ॥
अयुध्यमानो मल्लानां, पश्यन् कौतूहलं छलात् । अरे ! वीरकुलोत्तंसः, कंसः किल हतस्त्वया ॥ ३७३ ॥
तस्मिन् रणाङ्गणोत्ताले, काले दत्तप्रयाणके । पलाय्याऽऽशु प्रविष्टोऽसि, पयोधिपरिखां पुरीम् ॥ ३७४ ॥
तवाद्य केन दैवेन, दत्ता दुर्मद ! दुर्मतिः ? । स तादृशो दृशोर्मार्गे, यदस्माकमढौकथाः ॥ ३७५ ॥
कुक्षौ कस्यां स कंसोऽस्ति ?, वद त्वां हन्मि हेलया । प्रतिज्ञां पूरयाम्यद्य, तां जीवयशसश्चिरात् ॥ ३७६ ॥
ततस्तमाह गोविन्दः, किमालपसि बालिश ! ? । कंसकुञ्जरसिंहस्य, जरद्गव इवासि मे ॥ ३७७ ॥
कंसोऽस्ति वामकुक्षौ मे, कुक्षिः शून्यस्तु दक्षिणः । इहाऽऽविश जवाद् येन, तृप्तः खेलामि भूतले ॥ ३७८ ॥
प्रतिज्ञां पूरय रयात्, तां जीवयशसोऽधुना । त्वत्प्रेयसीनां सार्थेन, यात्वसौ दहनाध्वना ॥ ३७९ ॥
अथ क्रुद्धोऽक्षिपद् बाणान्, मगधश्चिच्छिदुश्च तान् । दिवि कृष्णशरा भानुकरानिव पयोधराः ॥ ३८० ॥
पर्जन्याविव गर्जन्तौ, तर्जयन्तावुभौ मिथः । युयुधाते क्रुधा तेजःपिञ्जरौ कुञ्जराविव ॥ ३८१ ॥
तयोस्तदेषुजातेन, जाते नभसि मण्डपे । नापूरि नाकनारीणां, रणालोकनकौतुकम् ॥ ३८२ ॥
शस्त्रैस्तमपरैः शत्रुमजेयं परिभावयन् । मगधेशोऽस्त्रमाग्नेयं, वाग्नेयं विशिखे न्यधात् ॥ ३८३ ॥
ज्वलनः प्रज्वलन्नुद्यद्धूमलेखाङ्कितस्तदा । शत्रुदाहं प्रतिज्ञातुं, मुक्तचूल इवाभवत् ॥ ३८४ ॥
अथाऽऽलोक्य बलं ज्वालाजिह्वज्वालाकुलाकुलम् । अम्भोदास्त्रं महारम्भो, जम्भारेरनुजोऽमुचत् ॥ ३८५ ॥

१ °न तत्पुत्रपेष° खंता० ॥ २ अच्छा° खंता० ॥ ३ कुम्भप्रा° खंता० ॥ ४ °सोत्साहो दव खंता० सं० ॥ ५ मार्ग° खंता० ॥ ६ °स्तथा खंता० ॥

नैकं केशवसैन्यानि, तापयन्तं हुताशनम् । महोऽपि मगधेशस्य, शान्तिं निन्युस्तदाऽम्बुदाः ॥ ३८६ ॥
धृतेन्द्रचापो निस्तापः, शरासारैस्तदाऽम्बुदः । श्रीनेमिरिव नीलश्रीररिसैन्यानि बद्धवान् ॥ ३८७ ॥
विलोकयन् नृपो मेघधारासाराकुलं बलम् । यशोमालिन्यमुच्छेत्तुं, मुमुचेऽस्त्रं स पावनम् ॥ ३८८ ॥
द्रुतं विदुद्रुवे वातैर्घनडम्बरमम्बरम् । मगधेशप्रतापश्च, भास्वान् दुःसहतामधात् ॥ ३८९ ॥
सङ्कोचं पृतनाङ्गेषु, कुर्वाणं भ्रमिदुर्धरम् । वायुप्रकोपं हन्ति स्म, हरिर्वाताशनौषधैः ॥ ३९० ॥
यशःक्षीरं च वातं च, पीत्वा ते मगधेशितुः । प्रतापदीपं फूत्कारैः, शमयन्ति स्म पन्नगाः ॥ ३९१ ॥
अथो फणिफणाघातकातरां वीक्ष्य वाहिनीम् । मुमोचास्त्रं नृपो धैर्यचारु गारुडमुत्कटम् ॥ ३९२ ॥
ततपक्षास्ततो लक्षसङ्ख्या रुरुधुरुद्धुराः । गरुडा गगनं मेरुकुलोत्पन्ना इवाद्रयः ॥ ३९३ ॥
गरुडैरथ कंसारिर्नागास्त्रे विफलीकृते । भास्वानपि मुमोचास्त्रं, तामसं नाम सङ्गरे ॥ ३९४ ॥
विदधानैस्तदाऽपास्तवार्त्तं मार्तण्डमण्डलम् । अन्धकारैर्जगन्नेत्रबन्दिकारैर्विजृम्भितम् ॥ ३९५ ॥
वलितैः स्खलितैरङ्गैर्निजैरेव परैरिव । अपश्यन्तोऽप्यबध्यन्त, जरासन्धबले भटाः ॥ ३९६ ॥
मुमोचास्त्रमथ प्रौढवैरो वैरोचनं नृपः । प्रतापैरिव तद् भानुभारैराविरभावि खे ॥ ३९७ ॥
मूलेषु जग्मुर्नागानां, तुरङ्गि-रथि-पत्तयः । नारायणबले तापाक्रान्ता यान्तु क्व दन्तिनः ? ॥ ३९८ ॥
आहवे राहवीयास्त्रं, निदधेऽथ यदूद्वहः । चेलुस्ततः करालास्या, राहवो बहवोऽम्बरे ॥ ३९९ ॥
अगिलन्नथ मार्तण्डमण्डलानि सहस्रशः । आकाशद्रुफलानीव, ते पक्षिण इव क्षणात् ॥ ४०० ॥
अतृप्ता इव मार्तण्डमण्डलैर्गिलितैरथ । विधुभ्रान्त्येव तेऽधावन्, परवीराननान्यभि ॥ ४०१ ॥
लीलानिष्फलिताशेषदिव्यास्त्रेषु प्रमाथिषु[1] । राहुष्वथ क्रुधा चक्रं, प्रतिचक्री मुमोच तत् ॥ ४०२ ॥
बहूनामपि राहूणामथाऽऽधाय वधं युधि । हरिं प्रत्यचलच्चक्रं, सहस्रांशुसहस्ररुक् ॥ ४०३ ॥
सम्भूय यदुभिर्मुक्तान्यपि शस्त्राणि भस्मयत् । दावपावकवच्चक्रं, वनमालिनमभ्यगात् ॥ ४०४ ॥
आसन्नेऽपि तदाऽऽयाते, चक्रेऽस्मिन्नर्ककर्कशे । नाऽगाद् गोविन्दवक्त्रेन्दुर्मन्दिमानं मनागपि ॥ ४०५ ॥
तदा यादवसैन्यानामाकुलैस्तुमुलारवैः । परमार्थविदोऽप्यन्तश्चुक्षुभुः कुलदेवताः ॥ ४०६ ॥
क्रुद्धस्त्रीमुक्तताडङ्कताडं कष्टप्रदं तदा । नाभिपिण्डिकया चक्रं, तत् पस्पर्श हरेरुरः ॥ ४०७ ॥
उत्को यावज्जरासन्धः, पश्यत्यरिशिरश्छिदाम् । तावद् विष्णोः करे चक्रं, ददर्श व्योम्नि भानुवत् ॥ ४०८ ॥
अभवद् वासुदेवोऽद्य, नवमोऽयमिति ब्रुवन् । विष्णौ व्यधित गन्धाम्बु-पुष्पवृष्टिं सुरव्रजः ॥ ४०९ ॥
पूर्वाब्धिरिव कल्लोले, रविं चक्रं करे दधत् । अथ कृष्णः कृपाविष्टो, जरासन्धमदोऽवदत् ॥ ४१० ॥
आजीवमङ्घ्रिराजीवभ्रमरीभूय भूयसीम् । भज लक्ष्मीं जरासन्ध !, बन्धो ! सन्धेहि जीवितम् ॥ ४११ ॥
अथाभ्यधाज्जरासन्धो, मुधा गोविन्द ! माद्यसि । मदुच्छिष्टेन लब्धेन, चक्रेण च्छत्रधारवत् ॥ ४१२ ॥
तदुच्चैर्मुञ्च मुञ्चाहो !, चक्रं मां प्रति सम्प्रति । रे रे ! मदीयमेवेदं, प्रभविष्यति नो मयि ॥ ४१३ ॥
ततः कृष्णकरोन्मुक्तं, स्फुलिङ्गैः पिङ्गयद् दिशः । तदायुधं जरासन्धस्कन्धबन्धं द्विधा व्यधात् ॥ ४१४ ॥
चतुर्थं[4] नरकं निन्ये, जरासन्धः स्वकर्मभिः । जयोज्ज्वलस्तु कृष्णोऽस्थाद्, वसुदेवागमोत्सुकः ॥ ४१५ ॥
जरासन्धवधं श्रुत्वा, तद्गृह्यैः खेचरैरितः । विमुच्य रणसंरम्भं, वसुदेवः समाश्रितः ॥ ४१६ ॥
गृहीतोपायनैः साकं, तैर्विद्याधरपुङ्गवैः । प्रद्युम्न-साम्बवान् कृष्णं, वसुदेवः समाययौ ॥ ४१७ ॥

---

१ °म्बरे खंता० ॥ २ °प्ययुध्य° खंता० ॥ ३ प्रधाविषु खंता० ॥ ४ °तुर्थन° खंता० ॥

अथ प्रीतो हरिः सर्वैः, खेचरैर्भूचरैर्वृतः । वसुधां साधयामास, त्रिखण्डां चण्डविक्रमः ॥ ४१८ ॥
भरतार्द्धं विजित्याथ, प्रविष्टो द्वारकापुरीम् । स भेजे सम्भृतं भूपैरभिषेकमहोत्सवम् ॥ ४१९ ॥
सम्बन्धि-बन्धुवर्गेषु, सेवकेषु सुहृत्सु च । यथौचित्यं ददौ राज्यसंविभागं गदाग्रजः ॥ ४२० ॥
इत्थं निर्मथिताशेषोपसर्ग-ग्रह-विग्रहः । गोविन्दो विदधे न्यायधर्मशर्ममयीं महीम् ॥ ४२१ ॥

परिचरति पुरीयं वारिधौ न्यायधर्म-
व्यतिकरमकरन्दस्यारविन्दस्य लक्ष्मीम् ।
जितसितकरमूर्तिस्फूर्तिभिः सच्चरित्रै-
रिह विहरति हंसः कंसविध्वंसनोऽसौ ॥ ४२२ ॥

**॥ इति श्रीविजयसेनसूरिशिष्यश्रीमदुदयप्रभसूरिविरचिते श्रीधर्माभ्युदयनाम्नि श्रीसङ्घपतिचरिते लक्ष्म्यङ्के महाकाव्ये हरिविजयो नाम त्रयोदशः सर्गः ॥**

विश्वस्मिन्नपि वस्तुपाल ! जगति त्वत्कीर्तिविस्फूर्तिभिः,
श्वेतद्वीपति कालिकाकलयति स्वर्मालिकानां मुखम् ।
यत्तैस्तावककीर्तिसौरभमदान्मन्दारमन्दादरे,
वर्गे स्वर्गसदां सदा च्युतनिजव्यापारदुःस्थैः स्थितम् ॥ १ ॥

॥ ग्रन्थाग्रम्[1] ४३० ॥ उभयम् ४६९० ॥

---

१ °म् ४०४ । उभयं ग्रंथ ४५७९ वता० ॥

## चतुर्दशः सर्गः ।

खेलन्नितोऽपि **शैवेयः**, कृष्णायुधगृहं गतः । यामिकेन निषिद्धोऽपि, **पाञ्चजन्यं** करेऽकरोत् ॥ १ ॥
शङ्खमादाय हंसायमानमाननपङ्कजे । **नेमिर्दध्मौ** दृढध्वानबधिरीकृतविष्टपः ॥ २ ॥
चुचुम्ब मस्तुतं शङ्खं, विश्वस्वामीति हर्षतः । वीचीहस्तैर्ननर्ताब्धिस्तेन ध्वानेन विस्तृतैः ॥ ३ ॥
दध्मौ मदधिकप्राणः, कः कम्बुमिति चिन्तयन् । **कृष्णः** शस्त्रगृहारक्षैर्विज्ञप्तो **नेमिविक्रमम्** ॥ ४ ॥
अथाऽऽगतं पुरो **नेमिं**, प्रीतः प्राह **जनार्दनः** । निजं भुजबलं भ्रातर्मम युद्धेन दर्शय ॥ ५ ॥
जगादाथ जगन्नाथो, युक्तो नैव रणोत्सवः । बाहुवल्लिविनामेन, मन्तव्यस्तु बलावधिः ॥ ६ ॥
प्रतिपद्येति **कृष्णेन**, धृतमत्यायतं भुजम् । वज्रार्गलनिभं **नेमिर्मृणालवदनामयत्** ॥ ७ ॥
धृते[2]ऽपि **नेमिना** बाहौ, बाहुयुग्मेन **केशवः** । ललम्बे द्रुमशाखायां, शाखामृग इवोत्प्लुतः ॥ ८ ॥
**नेमे**[3]र्नमयितुं बाहुमशक्तः प्राह **केशवः** । जेतास्मि त्वद्बलेनाहं, साहङ्कारानपि द्विषः ॥ ९ ॥
एवंविधबलोद्दामो**ऽरिष्टनेमिर्ग्र**हीष्यति । मम राज्यमिति ध्यायन्नूचे देवतया **हरिः** ॥ १० ॥
पुरा **नमिजिनेनो**क्तं, भावी **नेमिर्जिनः** स हि । कुमार एव भविता, व्रती तन्मा भयं विधाः ॥ ११ ॥
मत्वेदमथ सम्मानमतिमात्रं जिनेशितुः । चकार **रुक्मिणीकान्तो, रेवतीरमणो**ऽपि च ॥ १२ ॥
अविकारिमनाः स्वामी, यौवनस्थोऽपि बालवत् । अखेलदस्खलन्नन्तःपुरेऽपि **बल-कृष्णयोः** ॥ १३ ॥
अथ **कृष्णो** वसन्तर्तौ, सान्तःपुर-पुरव्रजः । जगाम स्वामिना साकं, **रैवताचलकाननम्** ॥ १४ ॥
तत् **कृष्णेन** समं **नेमिरक्रीडत्** कामिनीजनैः । स्रग्भिः प्रत्युपकुर्वाणोऽप्यविकुर्वाणमानसः ॥ १५ ॥
अहर्दिवमिति क्रीडां, विधाय **गरुडध्वजः** । आजगाम पुनर्द्वारवतीं श्रीनेमिना सह ॥ १६ ॥
ऋतुराजमथो जित्वा, वसन्तं भुवनेऽद्भुतम् । ग्रीष्मर्तुरुदयौ चण्डमार्तण्डेन प्रतापवान् ॥ १७ ॥
श्रीचन्दनरसैर्धौतवसनैरपि देहिनः । मूर्तैर्ग्रीष्मर्तुराजस्य, यशोभिरिव रेजिरे ॥ १८ ॥
हृते[5] नदी-नदादीनां, सर्वस्वे भास्वतः करैः । नदीनदेशः स्मेरोऽभूत्, धिगहो ! जलधीहितम् ॥ १९ ॥
प्रतापं तपनस्योच्चैस्तदा वीक्ष्येव वैरिणः । पेतुर्भीतानि शीतानि, कूपेष्विति हिमं पयः ॥ २० ॥
नभोऽपि प्रसृतं मन्ये, घर्महृत्पवनाशया । तच्चिराल्लङ्घ्यतेऽर्केण, महान्तस्तेन वासराः ॥ २१ ॥
अथ सान्तःपुरो **विष्णुर्नेमिना** सह जग्मिवान् । तदैव **रैवतोद्यान**सरसीं क्रीडितुं रसी ॥ २२ ॥
सरसि स्वच्छनीरेऽस्मिन्, समं स्त्रीभिर्बभौ **हरिः** । व्योम्नीव चन्द्रिकापूर्णे, ताराभिः सह चन्द्रमाः ॥ २३ ॥
गौराङ्गीषु च खेलन्तौ, सहेलं **हरि-नेमिनौ** । चञ्चच्चम्पकमालासु, भ्रेजाते भ्रमराविव ॥ २४ ॥
स्त्रीणां नितम्बसम्बन्धवृद्धाम्बुपिहिताम्बुजे । मुखाँम्बुजेषु भृङ्गाणां, दृशः सरसि बभ्रमुः ॥ २५ ॥
स्वस्तनप्रतिमां वीक्ष्य, धावत्यूर्मौ मृगीदृशः । हरिं भेजुर्भयादम्भःकुम्भिकुम्भस्थलभ्रमात् ॥ २६ ॥

---

१ करे दधौ सं० ॥ २ °ते तु ने° खंता० सं० ॥ ३ °नीम° खंता० ॥ ४ °रप्रजः खंता० ॥
५ °ते तदा नदा° खंता० ॥ ६ °खाम्भोजे° खंता० सं० ॥ ७ °र्जुर्भिया द्वाःस्थकु° सं० ॥

लोलदम्भोरुहकरैं, रसवद्भिस्तरङ्गकैः। निपत्य चपलैः कान्तावक्षोजेषु व्यलीयत ॥ २७ ॥
जलयन्त्रोज्झितं नीरं, मुहुर्मार्जयतः करात्। सङ्क्रान्तमिव रागेण, तदा नेत्रेषु योषिताम् ॥ २८ ॥
स्त्रीणां तदा कराघातैर्जले गर्जति मेघवत्। नृत्ता ग्रीष्ममपि प्रावृट्कालयन्ति स्म केकिनः ॥ २९ ॥
मनोमुदे वरं मुक्त्वा, देवरं प्रति नेमिनम्। तास्ततश्चक्रिरे नीरप्रपञ्चं नर्मकर्मठाः ॥ ३० ॥
करोद्धूतैरपां पूरैरथ तासां निरन्तरैः। तदा न विव्यथे नेमिरब्दमुक्तैरिवाचलः ॥ ३१ ॥
समन्ततः समं ताभिः, कृतप्रतिकृतौ कृती। चिक्रीड नेमिनाथोऽपि, तदा पाथोभिरद्भुतम् ॥ ३२ ॥
इति खेलन्तमालोक्य, तदानीं नेमिनं मुदा। कृतार्थीकृतदृक् तस्थौ, चिरं पयसि केशवः ॥ ३३ ॥
निर्गत्य सरसस्तीरे, तदा तस्थुः ससम्मदाः। अब्देव्य इव देदीप्यमाना माधवयोषितः ॥ ३४ ॥
अथ निःसृत्य दन्तीव, नेमिनाथोऽपि पल्वलात्। लताभिरिव कान्ताभिस्ताभिर्व्याप्ते पदे ययौ ॥ ३५ ॥
प्रहृष्टा रुक्मिणी रुक्मपीठे नेमिं न्यवेशयत्। वाससा दाससामान्यमङ्गे चास्य मृजां व्यधात् ॥ ३६ ॥
अथाऽऽह रुक्मिणी नेमिनाथं मधुरया गिरा। अहं किञ्चन वच्मि त्वां, देवरं देव! रञ्जिता ॥ ३७ ॥
जितं बलेन कान्त्या च, केशवं बान्धवं जय। विधाय बद्धसम्बन्धमवरोधवधूजनम् ॥ ३८ ॥
श्रीनाभेयादयस्तीर्थकराः के न मुमुक्षवः?। परिणीय समुत्पन्नसूनवो दधिरे व्रतम् ॥ ३९ ॥
त्वमप्यतो विवाहेन, पितृ-भ्रातृ-सुहृज्जनम्। आनन्दय दयासार!, दयास्थानमिदं महत् ॥ ४० ॥
इत्युक्त्वा रुक्मिणी सत्यभामाप्रभृतिभिः सह। पपात पादयोर्नेमेः, पाणिग्रहकृताग्रहा[1] ॥ ४१ ॥
ततः सतृष्णः कृष्णोऽपि, पाणिग्रहमहोत्सवे। कुर्वन्नभ्यर्थनां नेमेः, पाणौ दीन इवालगत् ॥ ४२ ॥
अन्येऽपि यदवः सर्वे, विवाहे विहिताग्रहाः। बभूवुर्नेमिनाथस्य, पुरः पटुचटूक्तयः ॥ ४३ ॥
स्त्रिय एता अमी मूढास्तदेषामित्थमाग्रहे। कालनिर्गमनं कर्तुं, युक्तं वचनमाननम् ॥ ४४ ॥
कदाचिदपि लप्स्येऽहमिहार्थे सन्धिदूषणम्। ध्यात्वेदमोमिति प्रोचे, श्रीनेमिस्तानमोदयत् ॥ ४५ ॥
शिवा-समुद्रविजयौ, तत्कथाकथके नरे। दातुं नापश्यतां वस्तु, राज्येऽप्यानन्दमानतः ॥ ४६ ॥
स्वबन्धोरुचितां कन्यामन्विष्यन्नथ केशवः। अभाषि भामयाऽऽस्ते यन्मम राजीमती स्वसा ॥ ४७ ॥
हरिः स्मृत्वाऽथ तां स्मित्वा, ययौ यदु-बलैः समम्। निवासमुग्रसेनस्य, नभोदेशमिवांशुमान् ॥ ४८ ॥
अभ्युत्थायोग्रसेनोऽपि, विष्वक्सेनं ससम्भ्रमः। भद्रपीठे निवेश्याग्रे, तस्थावादेशलालसः ॥ ४९ ॥
याचितो नेमये राजीमतीं कृष्णेन स स्वयम्। तथेति प्रतिपद्याथ, सच्चक्रे चक्रिणं मुदा ॥ ५० ॥
ततः कृष्णेन विज्ञप्तः, समुद्रविजयो नृपः। विवाहलग्नमासन्नं, पृष्टवान् क्रोष्टुकिं तदा ॥ ५१ ॥
दत्तेऽथ श्रावणश्वेतषष्ठ्यां क्रोष्टुकिना दिने। उग्रसेन-समुद्रोर्वीनाथौ तूर्णमसज्जताम् ॥ ५२ ॥
अथ पाणिग्रहासन्नदिने नेमिं यदुस्त्रियः। प्राङ्मुखं स्थापयामासुस्तारप्रारब्धगीतयः ॥ ५३ ॥
तमस्नपयतां प्रीत्या, राम-दामोदरौ स्वयम्। बद्धप्रतिसरं नेमिप्रभुं, नाराचधारिणम् ॥ ५४ ॥
अगादथोग्रसेनस्य, निकेतं तार्क्ष्यकेतनः। स्वयं तद्विधिना राजीमतीमप्यध्यवासयत् ॥ ५५ ॥
अथाऽऽगत्य गृहं विष्णुरिमां निर्वाह्य शर्वरीम्। मुदा संवाहयामास, विवाहाय जगद्गुरुम् ॥ ५६ ॥
अथ श्वेतांशुवल्लोकदृक्कैरवविकासकः। श्रीनेमिः श्वेतशृङ्गारः, श्वेताश्वं रथमास्थितः ॥ ५७ ॥
तूर्यनिर्घोषसंहूतपुरुहूतवधूजनः। बन्दिवृन्दमुखोन्मुक्तैः, सूक्तैर्मुखरिताम्बरः ॥ ५८ ॥

---

१ °तपुरीजनः खंता० सं० ॥

गीयमानगुणग्रामो, हृष्टैर्बन्धुवधूजनैः । कामं जामिसमूहेन, क्रियमाणावतारणः ॥ ५९ ॥
समं समग्रैर्यदुभिर्यदुनारीभिरप्यथ । उग्रसेनगृहासन्नो, जगाम जगदीश्वरः ॥ ६० ॥ कैलापकम् ॥
वयस्याभिरभिप्रायविद्भिः सा प्रेरिता ततः । गवाक्षमाययौ राजीमती नेमिदिदृक्षया ॥ ६१ ॥
आयाति विश्वमालिन्यभिदि नेमौ भयाद् गतम् । पश्चाल्लक्ष्मेव वक्त्रेन्दोर्दधाना कबरीभरम् ॥ ६२ ॥
सीमन्तसीम्नि बिभ्राणा, मुक्तास्तवकमद्भुतम् । लावण्याम्भोधिसम्भूतनवनिर्लाञ्छनेन्दुवत् ॥ ६३ ॥
मदनद्विरदालानमणिस्तम्भानुकारिणा । भालस्थलस्थकाश्मीरतिलकेन विभूषिता ॥ ६४ ॥
समारूढरति-प्रीतिप्रियशैलूषशालिना । भ्रूरज्जुसज्जितेनोच्चैर्नासावंशेन भासुरा ॥ ६५ ॥
दृग्भ्यां योग्याकृते क्षिप्तैः, कर्णकोटरमध्यगैः । विशिखैरिव राजन्ती, कटाक्षैर्द्रुतपातिभिः ॥ ६६ ॥
अन्तर्भित्तिसदृग्नासाविभक्तौ मणिभासुरौ । कपोलौ बिभ्रती कामप्रेयस्योर्वासवेश्मवत् ॥ ६७ ॥
आस्येन्दुना निपीतस्य, शशाङ्कयशसोऽधिकान् । उद्गारानिव तन्वाना, स्मितदन्तद्युतिच्छलात् ॥ ६८ ॥
प्रियानुरागं चित्तान्तरमान्तमिव निर्भरम् । उद्भ्रान्तमधरच्छायाच्छद्मना दधती मुखे ॥ ६९ ॥
कष्टुं नाभीह्रदादीशदग्धं मग्नमिव स्मरम् । दाम्नेवास्येन्दुमुक्तेन, मुक्ताहारेण हारिणी ॥ ७० ॥
दधाना मेखलारत्नं, दीपरूपमिव स्मरम् । उद्यत्कज्जललेखाभरोमराजिविराजितम् ॥ ७१ ॥
पादाभ्यामङ्गुलिश्रेणिशोणितक्षोणिमण्डला । तर्जयन्तीव पद्मानि, मणिनूपुरसिञ्जितैः ॥ ७२ ॥
हर्षपीयूषवर्षेणोद्भिन्नरोमाङ्कुरोत्करा । साऽऽरुरोह वरारोहा, गवाक्षं वीक्षिता जनैः ॥ ७३ ॥
॥ द्वादशभिः कुलकम् ॥

विश्वातिशायिसौभाग्य-भाग्य-लावण्यसम्पदम् । पिबन्ती निर्निमेषाक्षी, सा देवीभूयमन्वभूत् ॥ ७४ ॥
विवोढुमप्युपायान्तं, सा तं वीक्ष्य व्यचिन्तयत् ।
एतत्पाणिग्रहे योग्यं, भाग्यं किं मे भविष्यति ? ॥ ७५ ॥
इतश्चाऽऽकर्णयन् नानाजीवानां करुणं रवम् । जानन्नपि जिनोऽपृच्छत्, किमेतदिति सारथिम् ॥ ७६ ॥
अथ सारथिनाऽभाषि, देवाऽऽतिथ्यकृते तव । उग्रसेनोऽग्रहीजीवान्, जल-स्थल-नभश्चरान् ॥ ७७ ॥
तत् सर्वेऽपि कृपाकान्त !, वाटकान्तः स्थिता अमी । तन्वते तुमुलं प्राणभयं येन महाभयम् ॥ ७८ ॥
तदुवाच यदुस्वामी, यत्रामी सन्ति जन्तवः । स्यन्दनं नय तत्रामुमित्यकार्षीच्च सारथिः ॥ ७९ ॥
अथ व्यलोकि दीनास्यैः, प्राणिभिर्वध्यतां गतैः । स्वोक्त्या रक्षेति जल्पद्भिः, पितेव तनुजैः प्रभुः ॥ ८० ॥
करुणाकरिणीकेलिकाननेनाथ नेमिना । अमी सर्वेऽप्यमोच्यन्त, जवादादिश्य सारथिम् ॥ ८१ ॥
मुक्तेषु तेषु जीवेषु, करुणावीचिवार्धिना । स्यन्दनो जगतां पत्या, प्रत्यावासमचाल्यत ॥ ८२ ॥
शिवा समुद्रविजयः, कृष्ण-रामादयोऽप्यथ । स्वस्वयानं समुत्सृज्य, श्रीमन्नेमिनमभ्यगुः ॥ ८३ ॥
ततो नेमिनमूचाते, पितरौ साश्रुलोचनौ । त्वया जात ! किमारब्धमिदं नः प्रतिलोमिकम् ? ॥ ८४ ॥
प्रभुः प्राह मयाऽऽरब्धमेतद्विश्वानुकूलिकम् । पशुवन्मोचयिष्यामि, यद् युष्मान् स्वं च बन्धनात् ॥ ८५ ॥
तदाकर्ण्याथ मूर्च्छालौ, पितरौ पेततुः क्षितौ । चन्दनादिभिराश्वास्य, कृष्णस्तौ नेमिमभ्यधात् ॥ ८६ ॥
धिक् ! ते विवेकितामेतां, पशूनप्यनुकम्पसे । दोदूयसे पुनर्मातृ-पितृ-बन्धु-सुहृज्जनान् ॥ ८७ ॥

---

१ कुलकम् वता० ॥ २ अयं श्लोकः वता० नास्ति ॥ ३ भवेदिति खंता० सं० ॥
४ °रुणारवम् खंता० सं० ॥ ५ °न्तर्भूता सं० ॥ ६ °भ्ययुः खंता० ॥ ७ °मेतान्, पशू° खंता० ॥

ततोऽभ्यधात् प्रभुः कृष्ण !, नोक्तं युक्तमिदं त्वया । विचारय चिरं बन्धो !, निर्बन्धस्याऽऽयतिं मम ॥८८॥
संसारसुखमापातमधुरं स्यादपथ्यवत् । प्रियङ्करः प्रियेश्चायं, शमस्तु कटुजायुवत् ॥ ८९ ॥
सर्वेषां तत् प्रियाकर्तुं, प्रशमोऽयं श्रितो मया । हितं यत् परिणामे हि, हितं तत् पारमार्थिकम् ॥ ९० ॥
इत्युक्त्वा स्वजनेष्वश्रुगद्गदेषु रुदत्स्वपि । समाजगाम श्रीनेमिर्गृहमुद्वाहनिःस्पृहः ॥ ९१ ॥
तदा च समयं ज्ञात्वा, प्रभुर्लोकान्तिकामरैः । मुदा विज्ञपयाञ्चक्रे, नाथ ! तीर्थं प्रवर्तय ॥ ९२ ॥
अथाऽसौ वार्षिकं दानं, दातुं प्रारब्धवान् प्रभुः । कारुण्यसागरः कृतव्रतग्रहणनिश्चयः ॥ ९३ ॥
अन्यतश्चलिते विश्वस्वामिन्यथ रवाविव । भेजे मूर्च्छामियं राजीमती राजीविनीव सा ॥ ९४ ॥
अमन्दैश्चन्दनस्यन्दैः, कौमुदीकोमलैरथ । अभिषिक्ता वयस्याभिर्बुद्धा कुमुदिनीव सा ॥ ९५ ॥
सकज्जलैरश्रुजलैः, कपोलहुलितैरथ । विललापेयमेणाङ्कविम्बयन्ती मुखाम्बुजम् ॥ ९६ ॥
रे दैव ! यदि भाले मे, न नेमिर्लिखितः पतिः । ततः किमियतीं भूमिं, त्वयाऽहमधिरोपिता ? ॥ ९७ ॥
यदि नेमिर्न मे भावी, भर्ता किं ढौकितस्ततः ? । तन्नाऽलब्धनिधेर्दुःखं, दृष्टनष्टनिधेर्हि यत् ॥ ९८ ॥
काऽहं ? क्व नेमिरित्यासीत्, त्वत्पतित्वे मनोऽपि न । त्वद्गिरैव विवाहार्थे, स्वामिन्नस्मि प्रतारिता ॥ ९९ ॥
त्वयाऽरोपि ममोद्वाहमनोरथतरुः स्वयम् । उन्मूलयंस्त्विमं स्वामिन्नात्मनोऽपि न लज्जसे ? ॥ १०० ॥
क्रन्दन्तीति वयस्याभिर्निषिद्धा कथमप्यसौ । निश्चिकायेति शैवेय, एव देवोऽस्तु मे गतिः ॥ १०१ ॥
ववर्ष वार्षिकं दानमितश्च श्रीशिवासुतः । समुद्रविजयादीनां, जलं च नयनोच्चयः ॥ १०२ ॥
कृतदीक्षाभिषेकोऽयमथाशेषैः सुरेश्वरैः । नाम्नोत्तरकुरुं रत्नशिविकामारुरोह सः ॥ १०३ ॥
सुरा-ऽसुर-नरैर्मातृ-जनक-स्वजनैरपि । स्वामी परिवृतो राजपथेन प्राचलन्मुदा ॥ १०४ ॥
तदाऽऽलोक्य गृहासन्नं, प्रसन्नं नेमिनं जिनम् । अवाप व्याकुला राजीमती मूर्च्छां मुहुर्मुहुः ॥ १०५ ॥
अथाऽऽससाद श्रीनेमिः, सहस्राम्रवणं वनम् । वनान्तलक्ष्मीधम्मिल्लतुल्यरैवतकाचलम् ॥ १०६ ॥
पूर्वाह्णे श्रावणश्वेतषष्ठ्यां षष्ठेन स प्रभुः । पूर्णाब्दत्रिशतीकोऽथ, प्राव्रजत् त्वाष्ट्रगे विधौ ॥ १०७ ॥

प्रतीष्य केशान् देवेशो, दूष्यं स्कन्धे विभोर्न्यधात् ।
तान् परिक्षिप्य दुग्धाब्धौ, तुमुलं च न्यषेधयत् ॥ १०८ ॥

सामायिकमथाऽऽदाय, मनःपर्ययमासदत् । श्रीमान् नेमिश्च सौख्यं च, प्रपेदे नारकैरपि ॥ १०९ ॥
भूभुजः प्राव्रजंस्तत्र, सहस्रं सह नेमिना । स तैः प्रभाद्भुतैर्व्याप्तः, सहस्रांशुरिवाऽऽबभौ ॥ ११० ॥
अथ नत्वा गते लोके, परमान्नेन पारणम् । द्वितीयेऽह्नि विभुश्चक्रे, वरदत्तद्विजौकसि ॥ १११ ॥
अथोत्सवे कृते तत्र, त्रिदशेशैर्यथाविधि । विजहारान्यतः स्वामी, कर्मनिर्मथनोद्यतः ॥ ११२ ॥
रथनेमिरथो नेमेरनुजो मदनातुरः । उपाचरच्चिरं राजीमतीं पाणिग्रहेच्छया ॥ ११३ ॥
हेमपात्रेऽन्यदा पीतं, वान्त्वा दुग्धं प्रयोगतः । पिबेदमिति तं नेमिरथं राजीमती जगौ ॥ ११४ ॥

स तामुवाच श्वानोऽस्मि, किमु वान्तं पिबामि यत् ? ।
साऽप्याह नेमिवान्तां मां, भोक्तुकामोऽसि किं ततः ? ॥ ११५ ॥

आश्विने मासि पूर्वाह्णेऽमावास्यायां कृताष्टमः । वेतसाधः प्रभुः प्राप, केवलं त्वाष्ट्रगे विधौ ॥ ११६ ॥

---

१ °त् पुनः कृ° खंता० ॥ २ °यस्यायं खंता० ॥ ३ °पु वद° खंता० ॥ ४ °न्दचन्द° खंता० सं० ॥ ५ °यत्रमुं स्वा° खंता० ॥ ६ °वात्मजः सं० ॥

देवैः समवसरणे, विहितेऽथ यथाविधि । अलञ्चके विभुः सिंहासनं सिंह इवाचलम् ॥ ११७ ॥
अथाऽऽगतं विभुं मत्वा, हरिः परिजनैः समम् । समागत्य नमस्कृत्य, जिनं हृष्टो निविष्टवान् ॥ ११८ ॥
ततश्च **वरदत्ता**दीनेकादश गणेश्वरान् । विभुः प्रवर्तिनीं चक्रे, राजपुत्रीं च **यक्षिणीम्** ॥ ११९ ॥
**देवक्युदरजैः** षड्भिर्द्वात्रिंशद्वल्लभायुतैः । **नागसद्म**स्थितैर्युक्तेऽगाद् **भद्रिलपुरे** विभुः ॥ १२० ॥
अमी चरमदेहाः षट्, प्राव्रजन् **नेमि**बोधिताः । विजह्रुः स्वामिना साकं, **द्वारकां** च ययौ विभुः ॥ १२१ ॥
**देवकीसूनवः** षट् ते, भूत्वा युगलिनः क्रमात् । **देवक्याः** सदनं जग्मुः, षष्ठान्ते पारणेच्छया ॥ १२२ ॥
मुदिता वीक्ष्य **कृष्णा**भं, पूर्वायातं मुनिद्वयम् । **देवकी** मोदकैः सिंहकेसरैः प्रत्यलाभयत् ॥ १२३ ॥
द्वितीयं युग्ममायातमप्यसौ प्रत्यलाभयत् । युग्मं तृतीयमायातमथाभाषत **देवकी** ॥ १२४ ॥
किं दिग्मोहान्मुहुः प्राप्तौ, युवां ? किं मे मतिभ्रमः ? । किं वा भक्तादिकं नात्र, लभन्ते पुरि साधवः ? ॥ १२५ ॥
तावूचतुः किमाशङ्का ?, यद् वयं षट् सहोदराः । त्रिधा युगलिनो भूत्वा, भृशं त्वद्गृहमागताः ॥ १२६ ॥
तद् दध्यौ **देवकी कृष्ण**तुल्याः किं मे सुता अमी ? ।
उक्ताऽ**तिमुक्तके**नाहं, जीवत्पुत्राष्टकाऽसि यत् ॥ १२७ ॥
इति श्री**नेमि**नं प्रष्टुं, द्वितीयेऽह्नि जगाम सा । ऊचे नाथोऽपि तद्भावं, मत्वा ते षडमी सुताः ॥ १२८ ॥
तेषां जीवितवृत्तान्तमाकर्ण्य च विभोर्मुखात् । सा ववन्दे प्रमोदेन, षडिमान् षडरिच्छिदः ॥ १२९ ॥
ऊचे च मद्भुवां राज्यमुत्कृष्टमथवा व्रतम् । नाङ्के यल्लालितः कोऽपि, सुतस्तदतिबाधते ॥ १३० ॥
प्रभुः प्राह त्वयाऽहारि, सपत्न्या रत्नसप्तकम् । प्राग्भवे यत् त्वया तस्यै, रुदत्यै चैकमर्पितम् ॥ १३१ ॥
तस्मात्कर्मफलेनामी, न त्वया पालिताः सुताः । श्रुत्वेति सा ययौ सौधमष्टमात्मजकाङ्क्षिणी ॥ १३२ ॥
मत्वा मातुरभिप्रायं, **गोविन्दो नैगमेषिणम्** । देवमाराधयामास, तुष्टः सोऽप्येवमब्रवीत् ॥ १३३ ॥
भावी तवानुजः किन्तु, यौवने प्रव्रजिष्यति । तच्च तस्मिन् गते **कृष्णः**, प्रातर्मातुर्न्यवेदयत् ॥ १३४ ॥
तदा च **देवकी**कुक्षौ, देवः कोऽपि दिवश्च्युतः । अवतीर्णः शुभस्वप्नसूचिताद्भुतवैभवः ॥ १३५ ॥
बभूव समये विश्वरूपरूपस्ततः सुतः । नाम्ना **गजसुकुमालो, देवक्या** लालितः स्वयम् ॥ १३६ ॥
उपयेमे क्ष्मापसुतामेष नाम्ना **प्रभावतीम्** । **सोमां** च क्षत्रियाजातां, **सोमशर्म**द्विजाङ्गजाम् ॥ १३७ ॥
उद्यौवनः समं ताभ्यां, श्री**नेमि**व्याख्यया **गजः** । धीमानुत्पन्नवैराग्यः, प्रियाभ्यां प्राव्रजत् समम् ॥ १३८ ॥
पृष्ट्वा प्रभुं स्मशाने च, मतिमान् प्रतिमां व्यधात् । दृष्टः श्वशुरकेणात्र, ब्रह्मणा **सोमशर्मणा** ॥ १३९ ॥
सैष प्रव्रज्य मत्पुत्रीं, व्यडम्बयदिति क्रुधा । चिताङ्गारचितं मूर्ध्नि, घटीकण्ठं न्यधाद् द्विजः ॥ १४० ॥
दग्धकर्मेन्धनोऽङ्गारैस्तैरिवाद्भुतभावनः । **गजः** केवलमासाद्य, प्रपेदे परमं पदम् ॥ १४१ ॥
वीक्षितुं दीक्षितं प्रातः, सोदरं सादरो **हरिः** । वन्दितुं च प्रभोः पादांश्चचाल सपरिच्छदः ॥ १४२ ॥
चैत्यार्थमिष्टकावाही, द्विजो वृद्धः कृपालुना । कृत्वा **कृष्णे**न साहाय्यं, ससैन्येन कृतार्थितः ॥ १४३ ॥
अथ **नेमिं** गतो **विष्णुः**, पप्रच्छ क ययौ **गजः** ? ।
विभुः सिद्धिं मुनेराख्यद्, वृत्तान्तात् **सोमशर्मणः** ॥ १४४ ॥

---

१ °गशर्मस्थि° खंता० ॥ २ °भद्दिल° सं० ॥ ३ साधं, द्वा° सं० ॥ ४ °त्नपञ्चक° सं० ॥ ५ °स, पृष्टः सोऽप्यवदद् रयात् खंता० सं० ॥ ६ °तुं प्रभुपादाब्जं, चचा° खंता० सं० ॥
७ **अथ विष्णुर्गतो नेमिं, पप्र°** सं० ॥

कृष्णोऽपृच्छदथ क्रोधात्, कथं ज्ञेयः स दुर्द्विजः ? ।
प्रभुः प्राह त्वदालोके[1], शिरो यस्य स्फुटिष्यति ॥ १४५ ॥
रुदन् कृष्णोऽथ संस्कार्यं, गजं निजपुरेऽविशत् । सोमं तथामृतं बद्धपादं बहिरचिक्षिपत्[2] ॥ १४६ ॥
यदवो गजदुःखेन, प्राव्रजन् बहवस्ततः । शिवादेवी च दाशार्हा, वसुदेवं विना नव ॥ १४७ ॥
विभोः सहोदराः सप्त, चान्ये हरिकुमारकाः । राजीमती चैकनासा, कन्या चान्या यदुस्त्रियः ॥ १४८ ॥
॥ युग्मम् ॥
प्रत्याख्याच्च हरिः कन्योद्वाहं सोत्साहमानसः । तत्पुत्र्यः प्राव्रजन् सर्वा, वसुदेवस्य चाङ्गनाः ॥ १४९ ॥
देवकी-कनकवती-रोहिणीभिर्विना पुनः । गृहे कनकवत्यास्तु, जातं केवलमुज्ज्वलम् ॥ १५० ॥
तत्रोर्व्यामेत्य गीर्वाणैः, कृप्तोच्चैःकेवलोत्सवा । प्रव्रज्यां स्वयमादाय, नेमिं वीक्ष्य ययौ वने ॥ १५१ ॥
कृत्वाऽऽहारपरीहारं, तत्र त्रिंशदसौ दिनान् । क्षिप्त्वा निःशेषकर्माणि, मोक्षलक्ष्मीमुपाददे ॥ १५२ ॥
शक्रोऽन्यदा सदस्याह, नाऽऽहवं कुरुतेऽधमम् । दोषान् परेषामुत्सृज्य, भाषते च गुणं हरिः ॥ १५३ ॥
तदश्रद्दधता मार्गे, चक्रे देवेन केनचित् । दुर्गन्धः श्वा मृतः श्यामः, स्वैरं विहरतो हरेः ॥ १५४ ॥
गन्धत्रस्तजनं श्वानं, तं प्रेक्ष्य प्राह केशवः । इह श्यामरुचौ[3] दन्ता, भान्ति व्योम्नीव तारकाः ॥ १५५ ॥
हयरत्नं हरन्नक्षहरीभूय पुरःसरः । ऊचे जितान्यसैन्योऽथ, स्वयमभ्येत्य विष्णुना ॥ १५६ ॥
स्थिरीभव क रे[4]! यासि ?, म्रियसे मुञ्च वाजिनम् । इति वासवकल्पं तं, जल्पन्तं त्रिदशोऽवदत् ॥ १५७ ॥
यच्छन्ति वाञ्छितं युद्धं, शुद्धक्षत्रियगोत्रजाः[5] । पुताहवेन मां जित्वा, तद् गृहाण हयं निजम् ॥ १५८ ॥
निषिद्धाधमयुद्धोऽसौ[6], तुष्टादथ हरिः सुरात् । भेरीं भेजे ध्वनिध्वस्तषाण्मासिकमहारुजम् ॥ १५९ ॥
इति प्रीते सुरे तस्मिन्, गते भेरीं हरिः पुरे । अवादयद् यदा लोके, रोगः क्षयमगात् तदा ॥ १६० ॥
अथ लक्षेण लक्षेण, तस्या भेर्याः पलं पलम् । विक्रीतं रक्षकेणैषा, पूर्णा श्रीखण्डखण्डकैः ॥ १६१ ॥
तां निष्प्रभावां तज्ज्ञात्वा, घातयामास रक्षकम् । हरिः सुरात् परां लेभे, भेरीमष्टमभक्ततः ॥ १६२ ॥
तद्भेरीभूरिनादेन, स चक्रे विरुजं पुरम् । पर्जन्यगर्जितेनेव, गतदुःखं महीतलम् ॥ १६३ ॥
अन्येद्युर्द्वारकां प्राप्तो, वर्षासु श्रीशिवासुतः । ततः प्रभुप्रणामाय, निर्मायः केशवो ययौ ॥ १६४ ॥
नत्वा शुश्रूषमाणोऽथ, पप्रच्छ स्वामिनं हरिः । न किं चलन्ति वर्षासु, दत्तहर्षाः सुसाधवः ? ॥ १६५ ॥
विश्वचक्षुरथाऽऽचख्यौ, नेमिर्गम्भीरया गिरा । बहुजीवकुलोत्कर्षा, वर्षा तन्नोचिता गतिः ॥ १६६ ॥
श्रुत्वेति श्रीपतिः श्रीमान्, जग्राह नियमं तदा । वर्षासु निःसरिष्यामि, क्वचिन्नाहं गृहाद् बहिः ॥ १६७ ॥
निश्चित्येति हरिर्नत्वा, नेमिं धाम जगाम सः ।
कोऽपि मोच्योऽन्तरा नेति, द्वारपालं तथाऽऽदिशत् ॥ १६८ ॥
वीराख्यस्तु पुरे तस्मिन्, कुविन्दो भक्तिमान् हरौ ।
अविलोक्य हृषीकेशं, न भुङ्क्ते स्म कदाचन ॥ १६९ ॥
आवासे न प्रवेशं स, लेभे द्वारस्थितस्ततः[7] । सपर्यां विष्णुमुद्दिश्य, चक्रे नित्यमभोजनः ॥ १७० ॥

१ °लोकात्, समन्ताद् यः स्फुटच्छिराः खंता० सं० ॥ २ °मृतं पादचद्धं बहि° खता० ॥ ३ °मद्युतौ द° खंता० सं० ॥ ४ क भो ! या° खंता० ॥ ५ °यवंशजाः सं० ॥ ६ °युद्धोऽथ, तुष्टादेष हरिः खंता० सं० ॥ ७ द्वारि स्थि° खंता० ॥

वर्षान्ते निर्ययौ विष्णुर्गृहाद् भानुरिवाम्बुदात् ।
अपृच्छद् वीरकं धीरः, किं कृशोऽसीति नीतिमान् ॥ १७१ ॥
तद्वचे कथिते द्वास्थैर्गृहे सोऽस्खलितः कृतः । वीरकेण समं जग्मे, हरिणा नेमिसन्निधौ ॥ १७२ ॥[1]
साधुधर्मं जिनाधीशात्, कर्ण्यमाकर्ण्य सोऽवदत् । नास्मि श्रामण्ययोग्योऽहमस्तु मे नियमस्तु तत् ॥१७३॥
न निषेध्यो व्रतात् कश्चित्, कार्यः किन्तु व्रतोत्सवः ।
सर्वस्यापि मया विष्णुरभिगृह्येत्यगाद् गृहम् ॥ १७४ ॥ युग्मम् ॥
विवाह्याः स्वसुताः प्राह, कृष्णस्तन्नन्तुमागताः ।
स्वामित्वमथ दास्यत्वं, भवतीभ्यो ददामि किम् ? ॥ १७५ ॥
स्वामित्वं देहि नस्तात !, ताभिरित्युदितो हरिः । ग्राहयामास ताः सर्वाः, प्रव्रज्यां नेमिसन्निधौ ॥ १७६ ॥
जननीशिक्षिताऽवोचत्, कन्यका केतुमञ्जरी । भविष्यामि भुजिष्याऽहं, तात ! न स्वामिनी पुनः ॥१७७॥
अन्याः कन्या ममेदृक्षं, मा वदन्निति विष्णुना । तद्विवाहधिया पृष्टो, विक्रमं वीरकः स्वयम् ॥ १७८ ॥
वीरम्मन्यस्ततो वीरः, कुविन्दोऽवोचदच्युतम् । बदरीस्थो मया ग्राव्णा, कृकलासो हतो मृतः ॥ १७९ ॥
चक्रमार्गे मया वारि, वहद्वामाङ्घ्रिणा धृतम् । मक्षिकाः पानकुम्भान्तर्धृता द्वारस्थपाणिना ॥ १८० ॥
समासीनो द्वितीयेऽह्नि, विष्णुर्भूमीभुजोऽवदत् । वीरकस्यास्य वीरत्वं, कुलातीतं किमप्यहो ! ॥ १८१ ॥
येन रक्तस्फटो नागो, निवसन् बदरीवने । निजघ्ने भूमिशस्त्रेण, वेमतिः क्षत्रियो ह्ययम् ॥ १८२ ॥
येन चक्रकृता गङ्गा, वहन्ती कलुषोदकम् । धारिता वामपादेन, वेमतिः क्षत्रियो ह्ययम् ॥ १८३ ॥
येन घोषवती सेना, वसन्ती कलशीपुरे । निरुद्धा वामहस्तेन, वेमतिः क्षत्रियो ह्ययम् ॥ १८४ ॥
इत्युक्त्वा पौरुषं स्पष्टं, क्षत्रियेषु जनार्दनः । वीरेणोद्वाहयामास, स्वकन्यां केतुमञ्जरीम् ॥ १८५ ॥
वीरकस्तां गृहे नीत्वा, तस्या दास इवाभवत् । आज्ञया केशवस्याथ, तां दासीमिव चक्रिवान् ॥ १८६ ॥
पराभूता तु सा विष्णुं, रुदतीदं न्यवेदयत् ।
कृष्णोऽवोचत् त्वयाऽयाचि, दास्यं स्वाम्यममोचि तत् ॥ १८७ ॥
साऽवोचदधुनाऽपि त्वं, पितः ! स्वाम्यं प्रयच्छ मे । इति प्राव्राजयत् पुत्रीं, कृष्णोऽनुज्ञाप्य वीरकम् ॥१८८॥[2]
एकदा प्रददौ विष्णुर्द्वादशावर्तवन्दनम् । विश्वेषामपि साधूनां, मुदा तदनु वीरकः ॥ १८९ ॥
ऊचे हरिर्विभुं षष्ठ्याऽधिकैर्युद्धशतैस्त्रिभिः । न श्रान्तोऽहं तथा नाथ !, यथा वन्दनयाऽनया ॥ १९० ॥[3]
अभ्यधत्त ततः स्वामी, श्रीमन्नद्य त्वयाऽर्जिते । साक्षात् क्षायिकसम्यक्त्व-तीर्थकृन्नामकर्मणी ॥ १९१ ॥[4]
सप्तम्या दुर्गतेरायुरुद्धृत्याद्य त्वया हरे ! । साधुवन्दनया बद्धं, तृतीयंनिरयावनौ ॥ १९२ ॥[5]
कृष्णोऽवदत् पुनर्देयं, वन्दनं दमिनां मया । नरकायुर्यथा शेषमपि निःशेषतां भजेत् ॥ १९३ ॥[6]
द्रव्यवन्दनमित्थं ते, न भवेद् दुर्गतिच्छिदे । इत्युक्तः स्वामिनाऽपृच्छद्, वीरकस्य फलं हरिः ॥ १९४ ॥
अथाभ्यधत्त तीर्थेशः, क्लेश एवास्य तत्फलम् । वन्दिताः साधवोऽनेन, यतस्त्वदनुवर्तनात् ॥ १९५ ॥
नत्वाऽथ नाथमावासे, ययौ द्वारवतीपतिः । ढण्ढणाख्यो हरेः सूनुः, प्राव्रजन्नेमिसन्निधौ ॥ १९६ ॥

---

१ °गमे, नन्तुं च हरिणा प्रभुम् ॥ खंता० सं० ॥ २ त्वं, स्वाम्यं तात ! प्रय° खंता० सं० ॥ ३ ऊचे विष्णुर्वि° सं० ॥ ४ °यनरकोच्चितम् ॥ खंता० सं० ॥ ५ °नं शर्मि° खंता० सं० ॥ ६ शेषं, मम मूलादपि त्रुटेत् खंता० सं० ॥

अन्यदा कर्म तस्योच्चैरुदगादान्तरायिकम्। स्वयं न लभते सोऽयं, हन्ति लाभं परस्य च ॥१९७॥
साधवोऽथ जगन्नाथमपृच्छन् किं न ढण्ढणः। कुत्रापि लभते किञ्चिन्नगरे ऋद्धिमत्यपि? ॥ १९८ ॥
अथावदद् विभुर्ग्रामे, धान्यपूराभिधे पुरा। विप्रो मगधदेशेऽभूदयं नाम्ना परासरः ॥ १९९ ॥
ग्रामे राजनियुक्तोऽसौ, ग्राम्यैः क्षेत्राणि वापयन्। सीतामकर्षयद् भक्तेऽभ्युपेतेऽपि पृथक् पृथक् ॥ २०० ॥
बुभुक्षितानपि श्रान्तानपि तृष्णातुरानपि। वृषान् दासांश्च स क्रूरो, मुमोच न कथञ्चन ॥ २०१ ॥
इत्यन्तरायमर्जित्वा, कर्म भ्रान्त्वा भृशं भवे। ढण्ढणोऽभूत् सुतो विष्णोः, पूर्वकर्मोदितं च तत् ॥ २०२ ॥
समाकर्ण्येति संविग्नः, कृष्णसूनुः पुरः प्रभोः। अभ्यग्रहीदिदं यन्न, भोक्ष्येऽहं परलब्धिभिः ॥ २०३ ॥
परलब्धं न तद् भुङ्क्ते, लभते न स्वयं क्वचित्। कालक्षेपमसावित्थं, चक्रे दुष्करकारकः ॥ २०४ ॥
कोऽतिदुष्करकारीति, प्रभुः पृष्टोऽथ विष्णुना। व्याचख्यौ ढण्ढणं साधुं, सोढाऽलाभपरीषहम् ॥ २०५ ॥
नत्वाऽथ स्वामिनं विष्णुः, पुरं द्वारवतीं व्रजन्। मुनिं ढण्ढणमालोक्य, ननामोत्तीर्य कुञ्जरात् ॥ २०६ ॥
ववन्दे विष्णुनाऽप्येष, धन्यः कोऽपि मुनीश्वरः। कोऽपि श्रेष्ठीति तं साधुं, मोदकैः प्रत्यलाभयत् ॥ २०७ ॥
दर्शयन् मोदकान् सोऽपि, मुनिः प्रभुमभाषत। मम कर्माद्य किं क्षीणं, लब्धा यन्मोदका अमी? ॥ २०८ ॥
जिनो जगाद नो कर्म, क्षीणं लब्धिश्च नैव ते। वन्दमानं हरिं दृष्ट्वा, यत् त्वां स प्रत्यलाभयत् ॥ २०९ ॥
परलब्धिमभुञ्जानः, स्थण्डिले मोदकान् मुनिः। द्राक् परिष्ठापयन् लेभे, केवलं भूरिभावनः ॥ २१० ॥
प्रभुं प्रदक्षिणीकृत्य, स केवलिसभां गतः। विहृत्याथ भुवि स्वामी, द्वारकां पुनरागमत् ॥ २११ ॥
रथनेमिरथान्येद्युर्भिक्षां भ्रान्त्वा पुरान्तरे। वलमानो गुहां काञ्चित्, प्रविष्टो वृष्टिपीडितः ॥ २१२ ॥
नेमिं नत्वा तथा राजीमती यान्ती पुरं प्रति। वृष्टिदूना तमोगुप्तां, रथनेमिगुहामगात् ॥ २१३ ॥
रथनेमिमजानन्ती, तमःस्तोमतिरोहितम्। उद्वापयितुमत्रासौ, वस्त्राण्यूर्द्धाण्यमुञ्चत ॥ २१४ ॥
तां तथा वीक्ष्य कामार्तो, रथनेमिरथाऽवदत्। पुराऽपि प्रार्थिताऽसि त्वमद्य मे कुरु वाञ्छितम् ॥ २१५ ॥
रथनेमिमथो मत्वा, ध्वनिना भोजनन्दनी। संवृताङ्गी जवादेव, व्रीडाभारादुपाविशत् ॥ २१६ ॥
राजीमत्याऽथ जल्पन्त्या, चिरं साधूचितं वचः। प्रत्यबोधि तदा प्रीतो, रथनेमिमहामुनिः ॥ २१७ ॥
तदालोच्य प्रभोरग्रे, तपस्तीव्रतरं चरन्। स्वच्छात्मा वत्सरेणासौ, कलयामास केवलम् ॥ २१८ ॥
विहृत्य पुनरन्येद्युः, स्वामी रैवतपर्वते। सेवितो देवतावृन्दैः, शमवान् समवासरत् ॥ २१९ ॥
हरिराह सुतान् प्रातर्यः प्राग् नंस्यति नेमिनम्। यच्छामि वाञ्छितं तस्मै, वाजिनं रयराजिनम् ॥ २२० ॥
श्रुत्वेति प्रथमं प्रातर्बालकः पालको मुदा। तुरङ्गस्यैव लोभेन, नेमिनाथं ननाम सः ॥ २२१ ॥
शाम्बस्तु प्रस्तुतध्याननिधानीभूतमानसः। स्थानस्थ एव तीर्थेशं, प्रणनाम निशात्यये ॥ २२२ ॥
ययाचे पालकः प्रातर्हयं हरिरथाब्रवीत्। प्रभुः प्राग् वन्दितो येन, दास्ये तस्यैव वाजिनम् ॥ २२३ ॥
गत्वाऽथ विष्णुना पृष्टः, स्वामी सम्यगभाषत।
द्रव्यतः पालकः शाम्बो, भावतः प्राग् ननाम माम् ॥ २२४ ॥
अभव्योऽयमिति क्रुद्धो, निचक्रे पालकं हरिः। शाम्बाय मण्डलेशत्वमिष्टं च तुरगं ददौ ॥ २२५ ॥
देशनान्तेऽन्यदा नेमिं, नमस्कृत्य जनार्दनः। पप्रच्छ द्वारकाऽप्येषा, कदाचिद् यास्यति क्षयम्? ॥ २२६ ॥

---

१ °न्त्वा चिरं भवे। खंता० सं० ॥ २ °तकाचले खंता० ॥ ३ नत्वा° सं० ॥ ४ °ति श्रुत्वा, निच° खंता० ॥

अथावदद् विभुः शौर्यपुरसीम्नि परासरः । सिषेवे तापसः कश्चित्, कन्यां नीचकुलां पुरा ॥ २२७ ॥
तज्जो द्वैपायनो नाम, ब्रह्मचारी दमी शमी । वसन् वनेऽत्र मद्यान्धैः, शाम्बाद्यैः स हनिष्यते ॥ २२८ ॥
स पुरीं धक्ष्यति क्रुद्धो, यादवैः सह तापसः । भ्रातुर्जराकुमारात् ते, मृत्युर्भावी जरासुतात् ॥ २२९ ॥
श्रुत्वा जराकुमारस्तत्, खिन्नचेताः प्रभोर्वचः । ययौ वनं जिनं नत्वा, तूण-कोदण्डदण्डभृत् ॥ २३० ॥
श्रुत्वा द्वैपायनोऽपीदं, नृपरम्परया वचः । सर्वक्षयाय मा भूवमित्यभूद् वनमन्दिरः ॥ २३१ ॥
नेमिं प्रणम्य कृष्णोऽपि, प्रति द्वारवतीं गतः । भावी मद्यादनर्थोऽयमिति मद्यं न्यवारयत् ॥ २३२ ॥
अथ कादम्बरीं कादम्बरीसंज्ञगुहान्तरे । शिलाकुण्डे समीपाद्रेः, पौराः कृष्णाज्ञयाऽत्यजन् ॥ २३३ ॥
एवं क्षयभियाऽऽपृच्छ्य, सिद्धार्थः सोदरो बलम् । देवीभूयोपकर्तास्मि, गदित्वेत्यग्रहीद् व्रतम् ॥ २३४ ॥
स षण्मासीं तपस्तप्त्वा, मुनीन्द्रस्त्रिदिवं ययौ । इतश्च कश्चित् कुण्डस्थां, सुरां शाम्बानुगः पपौ ॥ २३५ ॥
शाम्बायाथ सुरापूर्णां, चक्रे दृतिमुपायनम् । आख्यत् पृष्टः स शाम्बेन, शिलाकुण्डे स्थितां सुराम् ॥ २३६ ॥
द्वितीयेऽह्नि ययौ शाम्बः, कुमारैः सह दुर्धरैः । अतृप्तश्च पपौ स्वादुरसां स्वादुरसां चिरात् ॥ २३७ ॥
द्वैपायनस्तदा ध्यानस्थितः शैलाश्रितः शमी । पूर्दाहहेतुरित्येष, रुषा शाम्बेन कुट्टितः ॥ २३८ ॥
कृत्वाऽथ तं मृतप्रायं, ययुः सर्वेऽपि वेश्मसु । क्रुद्धस्यास्य पुरीदाहे, प्रतिज्ञां श्रुतवान् हरिः ॥ २३९ ॥
पटुभिश्चटुभिः शास्त्रवचोभिर्भक्तिभिस्तथा । कृष्णस्तं सान्त्वयामास, न पुनः शान्तवानसौ ॥ २४० ॥
कोपक्रूरारुणाक्षोऽपि, मुनीशः कृष्णमब्रवीत् । सह रामेण मुक्तोऽसि, पुरीदाहेऽतिभक्तिभाक् ॥ २४१ ॥
हन्यमानेन दुर्दान्तैर्मया तव कुमारकैः । बद्धं निदानमद्येति, पूर्दाहोऽस्तु तपःफलम् ॥ २४२ ॥
कृष्णस्तपस्विनेत्युक्तः, सरामः प्रययौ पुरीम् । द्वैपायननिदानं च, तदभूत् प्रकटं पुरे ॥ २४३ ॥
अथ कृष्णाज्ञयाऽभूवन्, धर्मनिष्ठाः पुरीजनाः । तदा रैवतकाद्रौ च, श्रीनेमिः समवासरत् ॥ २४४ ॥
तत्र गत्वा प्रभुं नत्वा, चाश्रौषीद् देशनां हरिः । प्रद्युम्न-शाम्बौ निषध, उल्मुकः सारणादयः ॥ २४५ ॥
कुमारा रुक्मिणी चात्र, सत्याद्याश्च यदुस्त्रियः । बह्व्यः संसारनिर्विण्णा, देशनान्ते प्रवव्रजुः ॥ २४६ ॥
॥ युग्मम् ॥

समुद्रविजयादीन् स, स्तुवन् प्रव्रजितान् पुरा । निनिन्द स्वयमात्मानं, हरिर्मुहुरदीक्षितम् ॥ २४७ ॥
ज्ञातचेताः प्रभुः प्राह, जातुचिन्नैव शार्ङ्गिणः । भजन्ते संयमं बद्धा, यन्निदानेन केशव ! ॥ २४८ ॥
किञ्चाधोगामिनः सर्वे, स्वभावेन भवन्त्यमी । श्रुत्वेति विधुरं बाढं, तं स्वामी पुनरभ्यधात् ॥ २४९ ॥
मा विषीद हरे ! भावी, त्वमर्हन्नत्र भारते । ब्रह्मलोकं बलो गत्वा, च्युत्वा मर्त्यो भविष्यति ॥ २५० ॥
देवीभूतस्ततश्च्युत्वा, पुनरत्रैव भारते । भूत्वा ते तीर्थनाथस्य, शासने मोक्षमाप्स्यति ॥ २५१ ॥
श्रुत्वेति नत्वा तीर्थेशं, कृष्णोऽगान्नगरीं निजाम् । भगवान् नेमिनाथोऽपि, विजहारान्यतस्ततः ॥ २५२ ॥
पुनः कृष्णाज्ञया पौरा, बाढं धर्मपराः स्थिताः । द्वैपायनोऽपि मृत्वाऽभूदथ वह्निकुमारकः ॥ २५३ ॥
पूर्ववैरस्मृतेरेत्य, द्वारकां दग्धुमुद्धुरः । नालम्भूष्णुरसौ पौरतपःप्रतिहतः परम् ॥ २५४ ॥
वर्षाण्येकादशालब्धच्छिद्रोऽस्थादेष रोषणः । द्वादशेऽब्दे प्रवृत्ते च, लोकश्चित्तमिति व्यधात् ॥ २५५ ॥
भ्रष्टस्तपोभिरस्माकं, सोऽपि द्वैपायनो ध्रुवम् । रमामहे ततः स्वैरं, प्रवर्तितमहोत्सवाः ॥ २५६ ॥

---

१ °दुर्मदैः खंता० । दुर्दमैः सं० ॥ २ °न्न पिष्टिं खंता० सं० ॥ ३ °क्षोऽथ, मु° खंता० सं० ॥
४ °त्मानमेकं मुहु° खंता० ॥ ५ तदधो° सं० ॥ ६ °स्मृतेः प्राप्तो, द्वार° खंता० सं० ॥

इति मांसादनं मद्यपानं च यदवो व्यधुः। छिद्रान्वेषी स च च्छिद्रं, लेभे द्वैपायनासुरः ॥ २५७ ॥
उल्का-निर्घात-भूकम्पा-ऽऽलेख्य-प्रहसितादयः। उत्पाता विविधाः प्रादुरासंस्तस्यां ततः पुरि ॥ २५८ ॥
पिशाच-शाकिनी-भूत-वेतालादिपरिच्छदः। द्वैपायनासुरः सोऽपि, बभ्राम द्वारिकान्तरे ॥ २५९ ॥
उष्ट्रारूढं दक्षिणस्यां, यान्तं रक्तांशुकावृतम्। महिषारूढमात्मानं, स्वप्नेऽपश्यन् पुरीजनाः ॥ २६० ॥
सीरादि सीरिणो नष्टं, रत्नं चक्रादि शार्ङ्गिणः। तत्र संवर्तकं वातं, विचकारासुरस्ततः ॥ २६१ ॥
काननानि समग्राणि, दिग्भ्योऽष्टाभ्योऽपि वायुना। उन्मूल्य स पुरीं काष्ठ-तृणादिभिरपूरयत् ॥ २६२ ॥

भीत्या प्रणश्यतो लोकान्, दिग्भ्योऽप्यानीय दुष्टधीः।
द्वारकान्तर्निचिक्षेप, क्षणाद् द्वैपायनासुरः ॥ २६३ ॥

अथ क्षयानलप्राये, ज्वलने ज्वालिते द्विषा। तत्र बालैश्च वृद्धैश्च, कण्ठलग्नैर्मिथः स्थितम् ॥ २६४ ॥
देवकी-रोहिणीयुक्तं, वसुदेवमथो रथे। क्रष्टुं प्रज्वलनाद् रामयुक्तः कृष्णो न्यवेशयत् ॥ २६५ ॥
न हया न वृषा नेभास्तं क्रष्टुं रथमीशते। स्तम्भितास्तेन दैत्येन, स्थिता लेप्यमया इव ॥ २६६ ॥
कृष्ण-रामौ स्वसामर्थ्यात्, तं रथं द्वारि निन्यतुः। पूःप्रतोलीकपाटे ते, पिदधावसुरः क्रुधा ॥ २६७ ॥
अपाटयत् कपाटौ तौ, रामः पादप्रहारतः। रथस्तु नाचलत् कृष्यमाणोऽपि गिरिशृङ्गवत् ॥ २६८ ॥
अथ तौ पितरः प्राहुर्वत्सौ! द्राग् गच्छतं युवाम्। निदानं स मुनिः कुर्वन्, युवामेव मुमोच यत् ॥ २६९ ॥
शरणं नः पुनर्नेमिरधुनाऽप्यस्तु दुर्धियाम्। कस्यापि न वयं कोऽपि, नास्माकमिति निश्चयः ॥ २७० ॥
इति ध्यानवतां मूर्ध्नि, तेषामग्निं ववर्ष सः। मृत्वाऽथ दिवि जग्मुस्ते, राम-कृष्णौ निरीयतुः ॥ २७१ ॥
दह्यमानां पुरीं पश्यन्तौ, द्रष्टुमप्यक्षमौ शुचा। आलोच्याऽऽलोच्य तौ पाण्डुपत्तनं प्रति चेलतुः ॥ २७२ ॥
पुरेऽथ प्रज्वलत्यस्मिन्, रामसूः कुब्जवारकः। शिष्योऽस्मि नेमिनाथस्य, भावतोऽहं धृतव्रतः ॥ २७३ ॥
ब्रुवन्निति समुत्पाट्य, नीतोऽसौ जृम्भकामरैः। प्राव्राजीत् पल्हवे देशे, श्रीमन्नेमिपदान्तिके ॥ २७४ ॥
॥ युग्मम् ॥

इतोऽपि क्षुधितं कृष्णं, मुक्त्वा हस्तिपुराद् बहिः। गत्वा बलो गृहीत्वा च, शम्बलं वलितः स्वयम् ॥ २७५ ॥
तन्नृपेणाऽच्छदन्तेन, धार्तराष्ट्रेण सीरभृत्। पिधाय नगरद्वारं, चौरोऽयमिति रोधितः ॥ २७६ ॥
क्ष्वेडाहूतेन कृष्णेन, बलादर्गलबाहुना। हेलाहतकपाटेन, युक्तः सीरी द्विषोऽजयत् ॥ २७७ ॥
अथ भुक्त्वा तदुद्याने, तौ कौशाम्बवनं गतौ। तत्रार्तस्तृष्णया कृष्णस्तस्थौ रामोऽम्भसे गतः ॥ २७८ ॥
अथ पीताम्बरच्छन्नतनोः सुप्तस्य कानने। लग्नो जानूपरिन्यस्ते, कृष्णस्याङ्घ्रितले शरः ॥ २७९ ॥
तदुत्थाय हरिः कोऽयमित्यवादीदमर्षणः। उपलक्ष्य गिराऽऽगत्य, जरापुत्रो मुमूर्च्छ च ॥ २८० ॥
लब्धसंज्ञो रुदन्नाह, धिग् मे जन्मेदमीदृशम्। धिग् मां यन्न तदा दीर्णः, श्रुत्वा तत् तीर्थकृद्वचः ॥ २८१ ॥
ममारण्यगतस्यापि, यद्भूः शरगोचरः। तन्मन्ये कृष्ण! पूर्दग्धा, न स्यादर्हद्वचोऽन्यथा ॥ २८२ ॥
अथ तं हरिरित्याह, विषादेन कृतं कृतिन्!। त्वं जीव यादवेष्वेको, व्रज वेगेन पाण्डवान् ॥ २८३ ॥
भाविनस्ते सहायास्ते, चिरं क्षाम्याश्च मद्गिरा। गच्छ यावद् बलो नैति, त्वां हनिष्यति स क्रुधा ॥ २८४ ॥
इत्युक्त्वा प्रेषितः सैष, गोविन्देन जरासुतः। उन्मूल्यास्मै ददौ चायमभिज्ञानाय कौस्तुभम् ॥ २८५ ॥

---

१ °परिग्रहः खंता० ॥ २ °पाक्रान्तमात्मा° खंता० सं० ॥ ३ °स्तं रथं क्रष्टुमी° खंता० ॥
४ °ण्डुमथुरां प्रति खंता० सं० ॥ ५ °त्वाऽथ, श° खंता० । °त्वाऽध्वश° सं० ॥

कृष्णाङ्गेर्बाणमुद्धृत्य, प्रयातोऽथ जरासुतः। रामान्वेषभयात् किञ्चिद्, विपरीतैः पदैश्चलन् ॥ २८६ ॥
उत्तराभिमुखीभूय, कृष्णोऽपि प्राञ्जलिस्तदा। पञ्चभ्यः परमेष्ठिभ्यो, नमश्चक्रे यथाविधि ॥ २८७ ॥
प्रशशंस कुटुम्बं स्वं, पुरा प्रव्रजितं तदा। हृदा निनिन्द चात्मानमीदृशव्यसनातुरम् ॥ २८८ ॥
प्रहारपीडयाऽथाऽयं, निर्विवेकीभवन्मनाः। ध्यातद्वैपायनद्वेषस्तृतीयां पृथिवीं ययौ ॥ २८९ ॥
कृत्वाऽम्भः पद्मपत्रेऽथ, बलः कृष्णाग्रमागतः। असौ सुखेन विश्रान्तः, सुप्तोऽस्तीति क्षणं स्थितः ॥२९०॥
वीक्ष्य रक्तं चिराचीरं, मृतं मत्वाऽथ बान्धवम्। सोऽपतन्मूर्च्छितो लब्धसञ्ज्ञः सद्यो रुरोद च ॥ २९१ ॥
विष्णोर्मुखाग्रमागत्य, जगाद च शुचाऽर्दितः। भ्रातर्न किं वदस्यद्य?, कोऽपराधः कृतो मया? ॥२९२॥
लग्नः कालो ममाद्येति, क्रुद्धश्चेत् तत् त्यज क्रुधम्। पयोमध्याङ्गुलीरेखोपमः[1] कोपो महात्मनाम् ॥२९३॥
रामस्तमित्यजल्पन्तं, बन्धुं[3] वात्सल्यमोहितः। स्कन्धेऽधिरोप्य बभ्राम, पूजयामास चान्वहम् ॥ २९४ ॥
षण्मासान्ते कदाऽप्येष, कञ्चित् पप्रच्छ पूरुषम्। मेलयन्तं रथं शैलोत्तीर्णं भग्नं पुनः समे ॥ २९५ ॥
उत्तीर्य विषमाद् भग्नः, समे योऽयं रथः पथि। कथं सहस्रखण्डोऽयं, मूढ! मेलकमेष्यति? ॥ २९६ ॥

सोऽप्याह जित्वा युद्धानि, सुखसुप्तोऽप्ययं मृतः।
चेत् ते जीविष्यति भ्राता, मिलिष्यति रथोऽपि तत् ॥ २९७ ॥

रामोऽन्यतः कमप्याह, वपन्तं प्राश्णि पद्मिनीः। लगिष्यन्ति महामूढ!, कथमत्राप्यमूरिति ॥२९८॥
सोऽप्युवाच यदि भ्राता, जीविष्यति मृतस्तव। तदेताः कमलिन्योऽपि, गमिष्यन्त्यत्र वैभवम् ॥२९९॥
अन्यतोऽपि हली प्राह, नरं प्लुष्टद्रुसेचिनम्। रोक्ष्यत्येष कथं नाम, दग्धकीलोपमो द्रुमः? ॥ ३०० ॥
सहासमाह सोऽप्येनमहो! महदिहाद्भुतम्। शवं स्कन्धे वहन् प्लुष्टद्रुसेके यद्वदस्यदः ॥ ३०१ ॥
गोशबास्ये तृणं कश्चित्, क्षिपन् रामेण[2] भाषितः। रचयन्ति मृताः क्वापि, गावः कवलनक्रियाम्? ॥३०२॥
स जगाद यदा स्कन्धे, जीविष्यति शबस्तव। करिष्यति तदा सद्यो, गौरियं कवलग्रहम् ॥ ३०३ ॥
किं मृतो मेऽनुजः सीरी?, ध्यायन्निति तदुक्तिभिः। दिव्यरूपं पुरोऽपश्यत्, तं सिद्धार्थं स्वबान्धवम् ॥३०४॥
स जगाद व्रताकाङ्क्षी, त्वयाऽहं प्रार्थितोऽभवम्। तेनाऽऽयातोऽस्मि मूढं त्वामद्य बोधयितुं बलात् ॥३०५॥
रथादि मत्कृतं सर्वं, मोहं मुञ्च मृतो हरिः। इदं वदन् जरासूनुकथामपि जगाद सः ॥ ३०६ ॥
अथाऽऽह सीरभृद् बन्धो!, साधु साध्वस्मि बोधितः। किं करोम्यधुनाऽहं तु, स्वबान्धववियोजितः? ॥३०७॥
अथाभाषिष्ट सिद्धार्थो, जिनदीक्षां विनाऽधुना। बन्धो! न युज्यते किञ्चित्, तव कर्तुं विवेकिनः ॥३०८॥
मत्वेति तद्वचस्तेन, देवेन सह सीरभृत्। चकार हरिसंस्कारं, सिन्धुसम्भेदसीमनि ॥ ३०९ ॥
चारणर्षेरथो नेमिनियुक्ताद् प्राव्रजद् बलः। तुङ्गिकाशिखरस्थायी, सिद्धार्थोऽभूच्च रक्षकः ॥ ३१० ॥
अन्यदा तं पुरे क्वापि, पश्यन्ती काऽपि कूपगा। कुम्भस्थाने स्वपुत्रस्य, ग्रीवायां रज्जुमक्षिपत् ॥३११॥
आलोक्येदं बलो निन्दन्, निजरूपातिशायिताम्। तदादि नगर-ग्रामगत्यभिग्रहमग्रहीत् ॥ ३१२ ॥
सदा मासोपवासी स, वन एव स्थितः कृती। तृण-काष्ठादिहारिभ्यो, भिक्षया पारणं व्यधात् ॥ ३१३ ॥
अस्मद्राज्येच्छया धीरः, कोऽप्ययं तप्यते तपः। ध्यात्वेति भूरयो भूपास्तं हन्तुं तद् वनं ययुः ॥ ३१४ ॥
सिद्धार्थः सन्निधानेऽथ, तस्य सिंहान् विचक्रिवान्। भीतास्ततो बलं नत्वा, ययुर्निजपुरं नृपाः ॥ ३१५ ॥

---

१ °लीलेखो° खंता० सं० ॥ २ ततस्त° खंता० ॥ ३ बन्धुवा° खंता० ॥ ४ °मस्मिन्नमू° खंता० सं० ॥
५ °ण वारितः। खंता० ॥ ६ मुग्धं त्वा° सं० ॥ ७ °सङ्गमसीम° खंता० सं० ॥

अथ सिंहादयोऽप्यस्मिन्, बलदेशनया वने । निवृत्तपिशिताहाराः, श्रावकत्वं प्रपेदिरे ॥ ३१६ ॥
प्राक्सम्बन्धी मुनेरस्य, कोऽपि जातिस्मरो मृगः । वनेऽशंसज्जनं सान्नमागतं मौलिसंज्ञया ॥ ३१७ ॥
रथकारोऽन्यदा कोऽपि, दारुभ्यस्तद् वनं गतः । तत्रानयन्मृगो रामं, भिक्षाहेतोः पुरःसरः ॥ ३१८ ॥
तदा भोक्तुं निविष्टोऽसौ, रथकृद् वीक्ष्य सीरिणम् । धन्योऽहं यदिहायातः, साधुरित्युत्थितो मुदा ॥३१९॥
सर्वाङ्गस्पृष्टभूर्नत्वा, स मुनिं प्रत्यलाभयत् । भाग्यभागी भवत्वेष, भिक्षामित्यग्रहीन्मुनिः ॥ ३२० ॥
स मृगोऽपि तदाऽध्यायद्, धिग् मे तिर्यक्त्वमागतम् । न शक्तोऽस्मि तपः कर्तुं, दानं दातुं च न क्षमः ॥३२१॥
इति त्रयोऽपि सद्ध्याना, रथकारेण-सीरिणः । वातेरितद्रुघातेन, ब्रह्मलोके ययुः समम् ॥ ३२२ ॥
इतश्च पाण्डवा मत्वा, जरापुत्रात् कथामिमाम् । आक्रन्दमुखराश्चक्रुः, मुरारेरौर्ध्वदेहिकम् ॥३२३॥
जरासूनुमथ न्यस्य, राज्ये मार्तण्डतेजसम् । ते नेमिप्रेषिताद्धर्मघोषाचार्याद् व्रतं दधुः ॥ ३२४ ॥
आर्या-ऽनार्येषु देशेषु, लोकं नेमिरबोधयत् । निर्वाणसमये चायं, ययौ रैवतकाचलम् ॥ ३२५ ॥
कृते समवसरणे, देवैः कृत्वाऽन्तदेशनाम् । तत्र प्राबोधयन्नेमिस्वामी लोकाननेकशः ॥ ३२६ ॥
सहितः पञ्चभिः साधुशतैः षट्त्रिंशताऽधिकैः । मासिकानशनी स्वामी, पादपोपगमं व्यधात् ॥ ३२७ ॥
अथ त्वाष्ट्रे शुचिश्वेताष्टम्यां सद्ध्यानमाश्रितः । सार्द्धं तैः साधुभिः सायं, विभुर्निर्वाणमासदत् ॥ ३२८ ॥
कौमारे त्रिशती जज्ञे, छद्म-केवलयोः पुनः । शतानि सप्त वर्षाणां, सहस्रायुरिति प्रभुः ॥ ३२९ ॥

निर्वाणपर्वणि सुपर्वपतिर्विधाय, कृत्यानि तत्र सफलीकृतनाकिलक्ष्मीः ।
नन्दीश्वरे प्रशमिताखिललोककष्टमष्टाह्निकोत्सवमतुच्छमतिस्ततान ॥ ३३० ॥

तस्यां निर्वाणभूमौ मणिमयमतुलं मन्दिरं नेमिभर्तु-
श्चक्रे शक्रेण शृङ्गप्रकरकवलितव्योमदेशावकाशम् ।
तत् पूर्वं रैवताद्रिः प्रथितमिह महातीर्थमेतत् पृथिव्यां,
देवी यत्राऽम्बिकाऽसौ किशलयति सतां सन्ततं क्षेममलक्ष्मीम् ॥ ३३१ ॥

**॥ इत्याचार्यश्रीविजयसेनसूरिशिष्यश्रीमदुदयप्रभसूरिविरचिते श्रीधर्माभ्युदय-नाम्नि श्रीसङ्घपतिचरिते लक्ष्म्यङ्के महाकाव्ये श्रीनेमिनिर्वाणवर्णनो[1] नाम चतुर्दशः सर्गः ॥**

यात्रायां चन्द्रसान्द्रं लसदहितयशः कोटिशः कुट्टयित्वा,
क्षिप्तं सङ्घप्रतापानलमहसि मुदा यत् त्वया लीलयैव ।
अद्याप्युद्दामपूरप्रसरसुरभिताशेषदिक्चक्रवाल-
स्तेन श्रीवस्तुपाल! स्फुरति परिमलः कोऽपि सौभाग्यभूमिः ॥ १ ॥

[3] कुतस्त्वं ननु दीनमण्डलपतिर्दारिद्र्य! तत् किं पुनः,
खिन्नः साम्प्रतमीक्ष्यसे गतमहा भ्रातः! समाकर्ण्यताम् ।
त्वद्दत्तामपि पत्तलां मम हठाद् दुःस्थालिभालाक्षर-
श्रेणिं सम्प्रति लुम्पति प्रतिमुहुः श्रीवस्तुपालः क्षितौ ॥ २ ॥

॥ ग्रन्थाग्रम् ३४० । उभयम् ४९१९ ॥[4]

---

१ इति श्रीवि° खंता० ॥ २ °मिस्वामिनिर्वा° खंता० ॥ ३ अयं श्लोक वता० प्रतौ नास्ति ॥
४ ग्रन्थाग्रम्-३४५ । उभयम्-४९२४ । वता० ॥

## पञ्चदशः सर्गः ।

अयं क्षुब्धक्षीरार्णवनवसुधासन्निभविभा-
तुभाकर्ण्याकर्ण्यानुपदमुपदेशानिति गुरोः ।
समस्तं ध्वस्तैना जनितजिनयात्रापरिकरो-
ऽकरोत् सुस्थं प्रास्थानिकविधिमधीशो मतिमताम् ॥ १ ॥

श्लाघ्येऽह्नि सङ्घसहितः स हितः प्रजानां, श्रीमानथ प्रथमतीर्थकृदेकचित्तः ।
सम्भाषणाद्भुतसुधाभवचाश्चचाल, वाचालवारिदपथो रथचक्रनादैः ॥ २ ॥

सान्द्रैरुपर्युपरिवाहपदाग्रजाग्रद्धूलीपटैर्झटिति कुट्टिमतामटद्भिः ।
मार्गे निरुद्धखरदीधितिधामसङ्गे, सङ्घस्तदा भवनगर्भ इवावभासे ॥ ३ ॥

नाभेयप्रभुभक्तिभासुरमनाः कीर्तिप्रभाशुभ्रिता-
काशः काशहृदाभिधेऽथ विदधे तीर्थे निवासानसौ ।
चक्रे चारुमना जिनार्चनविधिं तद् ब्रह्मचर्यव्रता-
रम्भस्तम्भितविष्टपत्रयजयश्रीधामकामस्मयः ॥ ४ ॥

पुष्टभक्तिभरतुष्टया रयादम्बया हततमःकदम्बया ।
पत्य दृक्पथमथ प्रतिश्रुतं, सन्निधिं समधिगम्य सोऽचलत् ॥ ५ ॥

ग्रामे ग्रामे पुरि पुरि पुरोवर्तिभिर्मर्त्यमुख्यैः,
कृप्तप्रावेशिकविधिततां व्योम्नि पश्यन् पताकाः ।
मूर्ताः कीर्तीरयममनुत प्रौढनृत्तप्रपञ्च-
भ्राम्यल्लीलाद्भुतभुजलतावर्णनीयाः स्वकीयाः ॥ ६ ॥

अध्यावास्य नमस्यकीर्तिविभवः श्रीसङ्घमंहस्तमः-
स्तोमादित्यमुपत्यकापरिसरे श्रीमल्लदेवानुजः ।
श्रीनाभेयजिनेशदर्शनसमुत्कण्ठोल्लसन्मानस-
स्त्रस्यन्मोहमथारुरोह विमलक्षोणीधरं धीरधीः ॥ ७ ॥

तत्र स्नात्रमहोत्सवव्यसनिनं मार्तण्डचण्डद्युति-
क्रान्तं सङ्घजनं निरीक्ष्य निखिलं सार्द्रीभवन्मानसः ।
सद्यो माद्यदमन्दमेदुरतरश्रद्धानिधिः शुद्धधी-
र्मन्त्रीन्द्रः स्वयमिन्द्रमण्डपमयं प्रारम्भयामासिवान् ॥ ८ ॥

मन्त्री मौलौ किल जिनपतेश्चित्रचारित्रपात्रं,
स्नात्रं कृत्वा कलशलुलितैः स्मेरकाश्मीरनीरैः ।
चक्रे चञ्चन्मृगमदमयालेपन-स्वर्णभूषा,
वर्ण्यैः पूजाकुसुम-वसनैस्तं स कल्पद्रुकल्पम् ॥ ९ ॥
मन्त्रीशेन जिनेश्वरस्य पुरतः कर्पूरपूरा-ऽगुरु-
प्लोषत्प्रेङ्खितधूपधूमपटली सा काऽपि तेने मुदा ।
या तद्बद्धमहाध्वजप्रणयिनी स्वर्लोककल्लोलिनी-
मिश्रेयं रविकन्यकेति वियति प्रत्यक्षमुत्प्रेक्ष्यते ॥ १० ॥
इत्थं तत्र विधाय निर्मलमनाः सम्मान-दानक्रिया-
सानन्दप्रमदाकुलां कुलनभोमाणिक्यमष्टाहिकाम् ।
विघ्नोन्मर्दिकपर्दियक्षविहितप्रत्यक्षसान्निध्यतः,
श्रद्धावर्धितसम्मदादुदतरन्मन्त्रीश्वरो भूधरात् ॥ ११ ॥
अजाहराख्ये नगरे च पार्श्वपादानजापालनृपालपूज्यान् ।
अभ्यर्चयन्नेष पुरे च कोडीनारे स्फुरत्कीर्तिकदम्बमम्बाम् ॥ १२ ॥
देवपत्तनपुरे पुरन्दरस्तूयमानममृतांशुलाञ्छनम् ।
अर्चयन्नुचितचातुरीचितः, कामनिर्मथननिर्मलद्युतिम् ॥ १३ ॥
पीतस्फीतरुचिश्चिराय नयनैर्वामभ्रुवां वामन-
स्थल्यामेष मनोविनोदजननं कृत्वा प्रवेशं पुरि ।
धीमान् निर्मलधर्मनिर्मितिसमुल्लासेन विस्मापयन्,
दैवं रैवतकाधिरोहमकरोत् सङ्घेन सङ्घेश्वरः ॥ १४ ॥ विशेषकम् ॥
गजेन्द्रपदकुण्डस्य, तत्र पीयूषहारिभिः ।
चकार मज्जनं मन्त्री, वारिभिः पापवारिभिः ॥ १५ ॥
जिनमज्जनसज्जसज्जनं, कलशान्यस्ततदम्बुकुङ्कुमम् ।
अथ सङ्घमवेक्ष्य सङ्कटे, विदधे वासवमण्डपोद्यमम् ॥ १६ ॥
संरम्भसङ्घटितसङ्घजनौघहृद्यामष्टाहिकामयमिहापि कृती वितेने ।
सद्भूतभावभरभासुरचित्तवृत्तिरुद्वृत्तकीर्तिचयचुम्बितदिक्कदम्बः ॥ १७ ॥
लुम्पन् रजो विजयसेनमुनीशपाणिवासप्रवासितकुवासनभासमानः ।
सम्यक्त्वरोपणकृते विततान नन्दिमानन्दमेदुरमयं रमयन् मनांसि ॥ १८ ॥
दानैरानन्द्य वन्दिव्रजमसृजदनिर्वारमाहारदानं,
मानी सम्मान्य साधूनपुषदपि मुखोद्घाटकर्मादिकानि ।
मन्त्री सत्कृत्य देवार्चनरचनपरानर्चयित्वाऽयमुच्चै-
रम्बा-प्रद्युम्न-साम्बानिति कृतसुकृतः पर्वतादुत्ततार ॥ १९ ॥

---

१ °लुठितैः खंता० ॥

असाधि साधर्मिकमानदानैरनेन नानाविधधर्मकर्म ।
अबाधि सा धिक्करणेन माया, निर्माय निर्मायमनःसु पूजाम् ॥ २० ॥
पुरः पुरः पूरयता पयांसि, घनेन सान्निध्यकृता कृतीन्दुः ।
स्वकीर्तिवन्नव्यनदीर्ददर्शे, ग्रीष्मेऽतिभीष्मेऽपि पदे पदेऽसौ ॥ २१ ॥
इति प्रतिज्ञामिव नव्यकीर्तिप्रियः प्रयाणैरतिवाह्य वीथीम् ।
आनन्दनिःस्यन्दविधिर्विधिज्ञः, पुरं प्रपेदे धवलक्कर्क सः ॥ २२ ॥
समं तेजःपालान्वितपुरजनैर्वीरधवल-
प्रभुः प्रत्युद्यातस्तदनु सदनं प्राप्य सुकृती ।
युतः सङ्घेनासौ जिनपतिमथोत्तार्य रथत-
स्ततः सङ्घस्यार्चामशन-वसनाद्यैर्व्यरचयत् ॥ २३ ॥
अथ प्रसादाद् भूभर्तुः, प्राप्य वैभवमद्भुतम् ।
मन्त्रीशः सफलीचक्रे, स्वमनोरथपादपम् ॥ २४ ॥
भक्त्याऽऽखण्डलमण्डपं नवनवश्रीकेलिपर्यङ्किका-
वर्यं कारयति स्म विस्मयमयं मन्त्री स शत्रुञ्जये ।
यत्र स्तम्भन-रैवतप्रभुजिनौ शाम्बाऽम्बिकालोकन-
प्रद्युम्नप्रभृतीनि किञ्च शिखराण्यारोपयामासिवान् ॥ २५ ॥
गुरु-पूर्वज-सम्बन्धि-मित्रमूर्तिकदम्बकम् ।
तुरङ्गसङ्गतं मूर्तिद्वयं स्वस्यानुजस्य च ॥ २६ ॥
शातकुम्भमयान् कुम्भान्, पञ्च तत्र न्यवेशयत् ।
पञ्चधाभोगसौख्यश्रीनिधानकलशानिव ॥ २७ ॥
सौवर्णदण्डयुग्मं च, प्रासादद्वितये न्यधात् ।
श्रीकीर्तिकन्दयोरुद्यन्नूतनाङ्कुरसोदरम् ॥ २८ ॥
कुन्देन्दुसुन्दरग्रावपावनं तोरणद्वयम् ।
इहैव श्री-सरस्वत्योः, प्रवेशायेव निर्ममे ॥ २९ ॥
अर्कपालितकं ग्राममिह पूजाकृते कृती ।
श्रीवीरधवलक्ष्मापाद्, दापयामास शासने ॥ ३० ॥
[ [१]**श्रीपालिताख्ये नगरे गरीयस्तरङ्गलीलादलिता(तो)ऽप्रतापम् ।
तडागमागःक्षयहेतुरेतच्चकार मन्त्री ललिताभिधानम् ॥ ३१ ॥
हर्षोत्कर्षं न केषां मधुरयति सुधासाधुमाधुर्यगर्जे-
त्तोयः सोऽयं तडागः पथि मथितमिलत्पान्थसन्तापपापः ? ।
साक्षादम्भोजदम्भोदितमुदितसुखैर्लोलरोलम्बशब्दै-
रब्देव्यो दुग्धमुग्धां त्रिजगति जगदुर्यत्र मन्त्रीशकीर्तिम् ॥३२॥ **]

---

१ [ ** ** ] एतच्चिह्नान्तर्गतौ ३१–३२ श्लोकौ वता० पुस्तके न स्तः । एवमग्रेऽपि एतादृक्चिह्नान्तर्वर्तीनि पद्यानि वता० पुस्तकादर्शे न विद्यन्ते इति ज्ञेयम् ॥

पृष्ठपट्टं च सौवर्णं, श्रीयुगादिजिनेशितुः ।
स्वकीयतेजःसर्वस्वकोशन्यासमिवाऽऽर्पयत् ॥ ३३ ॥
प्रासादे निदधे चास्य, काञ्चनं कलशत्रयम् ।
ज्ञान-दर्शन-चारित्रमहारत्ननिधानवत् ॥ ३४ ॥
किञ्चैतन्मन्दिरद्वारि[1], तोरणं नेत्रपारणम् ।
शिलाभिर्विदधे ज्योत्स्नागर्वसर्वस्वदस्युभिः ॥ ३५ ॥
लोकैः पाञ्चालिकानृत्तसंरम्भस्तम्भितेक्षणैः ।
इहाभिनीयते दिव्यनाट्यप्रेक्षाक्षणः क्षणम् ॥ ३६ ॥
[ **प्रासादः स्फुटमच्युतैकमहिमा श्रीनाभिसूनुप्रभो-
स्तस्याग्रे स्थितिरेककुण्डलतुलां धत्तेतरां तोरणम् ।
श्रीमन्त्रीश्वर ! वस्तुपाल ! कलयन्नीलाम्बरालम्बिता-
मप्युच्चैर्जगतोऽपि कौतुकमसौ नन्दी तथा(वा)ऽस्तु श्रिये ॥३७॥**]
अत्र यात्रिकलोकानां[2], विशतां व्रजतामपि ।
सर्वथा सम्मुखैवास्ति, लक्ष्मीरुपरिवर्तिनी ॥ ३८ ॥
[ **यत् पूर्वैर्न निराकृतं सुकृतिभिः साम्मुख्य-वैमुख्ययो-
र्द्वैतं तन्मम वस्तुपालसचिवेनोन्मूलितं दुर्यशः ।
आशास्तेऽद्भुततोरणोभयमुखी लक्ष्मीस्तदस्मै मुदा,
श्रीनाभेयविभुप्रसादवशतः साम्मुख्यमेवाधुना ॥ ३९ ॥
तस्यानुजश्च जगति प्रथितः पृथिव्यामव्याजपौरुषगुणप्रगुणीकृतश्रीः ।
श्रीतेजपाल इति पालयति क्षितीन्द्रमुद्रां समुद्ररसनावधिगीतकीर्तिः ॥ ४० ॥
समुद्रत्वं श्लाघे महिमहिमधाम्नोऽस्य बहुधा,
यतो भीष्मग्रीष्मोपमविषमकालेऽप्यजनि यः ।
क्षणेन क्षीणायामितरजनदानोदकततौ,
दयावेला हेलाद्विगुणितगुणत्यागलहरी ॥ ४१ ॥
वल्रापथस्य पन्थास्तपस्विनां ग्रामशासनोद्धारात् ।
येनापनीय नवकरमनवकरः कारयाञ्चक्रे ॥ ४२ ॥
पुण्योल्लासविलासलालसधिया येनात्र शत्रुञ्जये,
श्रीनन्दीश्वरतीर्थमर्पितजगत्पावित्र्यमासूत्रितम् ।
एतच्चानुपमासरःपरिसरोद्देशे शिलासञ्चये,
व्यानद्धोद्धतबन्धमुद्धुरपयःकल्लोलमुक्तक्रमम् ॥ ४३ ॥
स्फुटस्फटिकदर्पणप्रतिमतामिदं गाहते,
सुधाकृतसुधाकरच्छविपवित्रनीरं सरः ।

---

१ °द्वारतो° खंता० ॥ २ °नां, व्रजतां विशतामपि खंता० ॥

विकस्वरसरोरुहप्रकरलक्षलोलक्षते,
यदत्र हरिदङ्गनावदनविम्बनाडम्बरः ॥ ४४ ॥
शत्रुञ्जये यः सरसी निवेश्य, श्रीरैवताद्रौ च जटाधराणाम् ।
ग्रामस्य दानेन करं निवार्य, सङ्घस्य सन्तापमपाचकार ॥ ४५ ॥
क्षोणीपीठमियद्रजःकणमियत्पानीयबिन्दुः पतिः,
सिन्धूनामियदङ्गुलं वियदियत्ताला च कालस्थितिः ।
इत्थं तथ्यमवैति यस्त्रिभुवने श्रीवस्तुपालस्य तां,
धर्मस्थानपरम्परां गणयितुं शङ्के न सोऽपि क्षमः ॥ ४६ ॥**]
एतत् सुवर्णरचितं, विश्वालङ्करणमनणुगुणरत्नम् ।
सङ्घाधीश्वरचरितं, हतदुरितं कुरुत हृदि सन्तः ! ॥ ४७ ॥

## [ अथ प्रशस्तिः ]

॥ स्वस्ति ॥

श्रीनागेन्द्रमुनीन्द्रगच्छतरणिः श्रीमान् महेन्द्रः प्रभु-
र्जज्ञे क्षान्तिसुधानिधानकलशः सौख्याप्तिचन्द्रोदयः[1] ।
सम्मोहोपनिपातकातरतरे विश्वेऽत्र तीर्थेशितुः,
सिद्धान्तोऽप्यविभेद्यतर्कविषमं यं दुर्गमाशिश्रिये[2] ॥ १ ॥
तत्सिंहासनपूर्वपर्वतशिरःप्राप्तोदयः कोऽप्यभूद्,
भास्वानस्तसमस्तदुस्तमतमाः श्रीशान्तिसूरिः प्रभुः ।
प्रत्युज्जीवितदर्शनप्रविकसद्भव्यौघपद्माकरं,[3]
तेजश्छन्नदिगम्बरं विजयते तद् यस्य लोकोत्तरम् ॥ २ ॥
आनन्दसूरिरिति तस्य बभूव शिष्यः, पूर्वोऽपरः शमधरोऽमरचन्द्रसूरिः[4] ।
धर्मद्विपस्य दशनाविव पापवृक्षक्षोदक्षमौ जगति यौ विशदौ विभातः ॥ ३ ॥
अस्ताघवाङ्मयपयोनिधिमन्दराद्रिमुद्राजुषोः किमनयोः स्तुमहे महिम्नः ? ।
बाल्येऽपि निर्दलितवादिगजौ जगाद, यौ व्याघ्र-सिंहशिशुकाविति सिद्धराजः ॥ ४ ॥
सिद्धान्तोपनिषन्निषण्णहृदयो धीजन्मभूमिस्तयोः,
पट्टे श्रीहरिभद्रसूरिरभवच्चारित्रिणामग्रणीः[5] ।
भ्रान्त्वा शून्यमनाश्रयैरतिचिरात्[6] यस्मिन्नवस्थानतः,
सन्तुष्टैः कलिकालगौतम इति ख्यातिर्वितेने गुणैः ॥ ५ ॥
श्रीविजयसेनसूरिस्तत्पट्टे जयति जलधरध्वानः ।
यस्य गिरो धारा इव, भवदवभवदवथुविभवभिदः ॥ ६ ॥

---

१ °शः पुण्याब्धिचन्द्रो° खंता० सं० ॥ २ °श्रियत् खंता० ॥ ३ °नद्युतिलसद्भव्यौ° खंता० सं० ॥ ४ °धनोऽम° खंता० सं० ॥ ५ °भूस्तत्पदे, पूज्यश्रीहरि° खंता० सं० ॥ ६ °यैरिव चि° सं० ॥

[ **पश्चासराह्वनराजविहारतीर्थे,
प्रालेयभूमिधरभूतिधुरन्धरेऽस्मिन् ।
साक्षादधःकृतभवा तटिनीव यस्य,
व्याख्येयमच्युतगुरुक्रमजा विभाति ॥ ७ ॥
भवोद्भटवनावनीविकटकर्मवंशावलि-
च्छिदोच्छलितमौक्तिकप्रतिमकीर्तिकीर्णाम्बरम् ।
असिश्रियमशिश्रियद् विततीव्रतं यद्व्रतं,
क्षितौ विजयतामयं **विजयसेनसूरिर्गुरुः** ॥ ८ ॥** ]
शिष्यं तस्य प्रशस्यप्रशमगुणनिधेरन्यदाऽरण्यदाव-
ज्वालाजिह्वालदीप्तिर्भविकजनविपद्वह्निवार्दः **कपर्दी** ।
देवी **चाम्बा** निशीथे समसमयमुपागत्य हर्षाश्रुवर्षा-
मेयश्रेयःसुभिक्षाविति निजगदतुर्गद्गदोद्दामनादम् ॥ ९ ॥
नाभूवन् कति नाम? सन्ति कति नो? नो वा भविष्यन्ति के?,
किन्तु क्वापि न कोऽपि सङ्घपुरुषः श्री**वस्तुपालो**पमः ।
पश्येत्थं[1] प्रहरन्नहर्निशमहो! सर्वाभिसारोद्धरो,
येनायं विजितः कलिः कलयता[2] तीर्थेशयात्रोत्सवम् ॥ १० ॥
तस्मादस्य यशस्विनः सुचरितं श्री**वस्तुपाल**स्य तद्[3],
वाचाऽस्माकममोघया किल यथाऽध्यक्षीकृतं सर्वथा ।
त्वं श्री**मन्नुदयप्रभ**! प्रथय तत् पीयूषसर्वङ्कषैः,
श्लोकैर्यत्तव **भारती** समभवत् साक्षादिति श्रूयते ॥ ११ ॥
इत्युक्त्वा गतयोस्तयोरथ पथो दृष्टेः प्रभातक्षणे,
विज्ञप्य स्वगुरोः पुरः सविनयं नम्रीभवन्मौलिना ।
प्राप्याऽऽदेशममुं प्रभोर्विरचयामासे समासेदुषा,
प्रागल्भी**मुदयप्रभे**ण चरितं निस्यन्दरूपं गिराम् ॥ १२ ॥
किञ्च श्री**मलधारि**गच्छजलधिप्रोल्लासशीतद्युते-
स्तस्य श्री**नरचन्द्रसूरि**सुगुरोर्माहात्म्यमाशास्महे ।
यत्पाणिस्मितपद्मवासविकसत्किञ्जल्कसंवासिताः,
सन्तः सन्ततमाश्रिताः कमलया भृङ्ग्येव भान्ति क्षितौ ॥ १३ ॥
श्री**धर्माभ्युदयाह्वये**ऽत्र चरिते श्रीसङ्घभर्तुर्मया,
दध्रे काव्यदलानि सङ्घटयितुं कर्मान्तिकत्वं परम् ।

---

१ यत्रेत्थं सं० ॥ २ कलिर्विदधता ती° खंता० सं० ॥ ३ यद् सं० ॥

किन्तु श्रीनरचन्द्रसूरिभिरिदं संशोध्य चक्रे जग-
त्पावित्र्यक्षमपादपङ्कजरजःपुञ्जैः प्रतिष्ठास्पदम् ॥ १४ ॥
नित्यं व्योमनि नीलनीरजरुचौ यावत् त्विषामीश्वरो,
दिक्पत्रावलिबन्धुरे कुवलये यावच्च हेमाचलः ।
हृत्पद्मे विदुषामिदं सुचरितं तावन्नवाविर्भव-
त्सौरभ्यप्रसरं चिरं कलयतात् किञ्जल्कलक्ष्मीपदम् ॥ १५ ॥

**॥ इति श्रीविजयसेनसूरिशिष्यश्रीमदुदयप्रभसूरिविरचिते श्रीधर्माभ्युदयनाम्नि श्रीसङ्घपतिचरिते लक्ष्म्यङ्के महाकाव्ये श्रीवस्तुपालसङ्घयात्रावर्णनो नाम पञ्चदशः सर्गः ॥ छ ॥ १५ ॥**

मुक्तेर्मार्गे यदेतद् विरचितमुचितं सङ्घभर्तुश्चरित्रं,
सत्रं पावित्र्यपात्रं पथिकजनमनःखेदविच्छेदहेतुः ।
अस्मिन् सौरभ्यगर्भामसमरसवतीं सत्कथां पान्थसार्थाः,
प्राप्य श्रीवस्तुपालप्रवरनवरसास्वादमासादयन्ति[2] ॥ १ ॥
श्रीशारदैकसदनं हृदयालवः के,
नो सन्ति हन्त ! सकलासु कलासु निष्ठाः ? ।
तादृक् परस्य ददृशे सुकवित्वतत्त्व-
बोधाय बुद्धिविभवस्तु न वस्तुपालात् ॥ २ ॥
नैव व्यापारिणः के विदधति करणग्राममात्मैकवश्यं ?,
लेभे सद्योगसिद्धेः फलममलमलं केवलं वस्तुपालः ।
आकल्पस्थायि धर्माभ्युदयनवमहाकाव्यनाम्ना यदीयं,
